Digitized by Arya Samaj Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri
130223

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

LIBRARY
Gurukul Kangri Vishwavidyalaya
HARDWAR
051403
(24)
C

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
श्रुतम् मे गोपाय

130223

Vol. 54
1999-2000

५४ वर्षे
१-२ अङ्कौ

ज्येष्ठ-भाद्रपदपूर्णिमे
जून - सितम्बर, १९९९ ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पादकौ

डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य

130223

५४ वर्षे
१-२ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि
जून - सितम्बर, १९९९ ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. राममूर्तिशर्मा, कुलपतिः, अध्यक्षः

१. **डॉ. उमाशङ्करशुक्लः**,
वेदवेदाङ्गसङ्कायाध्यक्षः

२. **डॉ. रामकिशोरत्रिपाठी**,
दर्शनसङ्कायाध्यक्षः

३. **डॉ. गङ्गाधरपण्डा**,
साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **डॉ. ब्रह्मदेवनारायणशर्मा**,
श्रमणविद्या-सङ्कायाध्यक्षः

५. **डॉ. सत्यव्रतशर्मा**,
आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. राजारामशुक्लः**,
संयोजकः

प्रकाशकः —

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

मुद्रकः —

श्रीजी-कम्प्यूटर प्रिण्टर्स
नाटी इमली
वाराणसी - २२१००१

प्राप्तिस्थानम्—

विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **प्रतिबिम्बवादः**
प्रो. रामकिशोरत्रिपाठी १-१४

२. **अमूर्त्तदेवतातत्त्वविमर्शः**
डॉ. बनारसीत्रिपाठी १५-२८

३. **दर्शनानामास्तिकनास्तिकत्वविमर्शः**
डॉ. हरिप्रसाद-अधिकारी २९-४०

४. **कार्यकारणभावमीमांसा**
डॉ. वृजकिशोरत्रिपाठी ४१-५८

५. **विधवोद्वाहमीमांसा**
डॉ. कमलाकान्तत्रिपाठी ५९-७२

६. **कालविवेचनम्**
डॉ. देवीप्रसादत्रिपाठी ७३-१०८

७. **बौद्धनये प्रमाणविमर्शः**
डॉ. देवीप्रसादद्विवेदी १०९-११६

८. **श्रीनीलकण्ठदीक्षितस्य शिवलीलार्णवः**
डॉ. ददन-उपाध्यायः ११७-१२८

लघु-ग्रन्थमाला

१. **पराम्बास्तुतिशतकम्**
श्रीविद्याधरदत्तपाण्डेयः १-४०

२. **आकाङ्क्षावादः**
डॉ. हरेरामत्रिपाठी १-२७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पादकौ

डॉ. राजारामशुक्लः
निदेशकः, अनुसन्धानसंस्थानस्य

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य

५४ वर्षे
३-४ अङ्कौ

वार्षिकं मूल्यम् - १०० रूप्यकाणि
दिसम्बर - मार्च, १९९९-२००० ई.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परामर्शदातृसम्पादकमण्डलम्

प्रो. राममूर्तिशर्मा, कुलपतिः, अध्यक्षः

१. **डॉ. उमाशङ्करशुक्लः**,
वेदवेदाङ्गसङ्कायाध्यक्षः

२. **डॉ. रामकिशोरत्रिपाठी**,
दर्शनसङ्कायाध्यक्षः

३. **डॉ. गङ्गाधरपण्डा**,
साहित्य-संस्कृति-सङ्कायाध्यक्षः

४. **डॉ. ब्रह्मदेवनारायणशर्मा**,
श्रमणविद्या-सङ्कायाध्यक्षः

५. **डॉ. सत्यव्रतशर्मा**,
आधुनिक-ज्ञान-विज्ञान-सङ्कायाध्यक्षः

६. **डॉ. राजारामशुक्लः**,
संयोजकः

❖ ❖ ❖

प्रकाशकः —

डॉ. हरिश्चन्द्रमणित्रिपाठी
निदेशकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी - २२१००२

मुद्रकः —

श्रीजी-कम्प्यूटर प्रिण्टर्स
नाटी इमली
वाराणसी - २२१००१

प्राप्तिस्थानम्—

विक्रय-विभागः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

१. **'र' प्रत्याहारः**
प्रो. आद्याप्रसादमिश्रः १२९-१३४

२. **शब्दशास्त्रीयकतिपयसिद्धान्तविमर्शः**
डॉ. रमाकान्तपाण्डेयः १३५-१४६

३. **वेदाङ्गेषु निरुक्ताङ्गवैशिष्ट्यम्**
डॉ. देवेन्द्रनाथत्रिपाठी १४७-१५२

४. **तत्त्वमसिमहावाक्यस्याखण्डार्थत्वविचारः**
प्रो. रामकिशोरत्रिपाठी १५३-१६८

५. **शेषत्वलक्षणविचारः**
डॉ. कमलाकान्तत्रिपाठी १६९-१८०

६. **प्राच्यभारतीयान्वेषणकथासन्देशः - ३**
डॉ. जानकीप्रसादद्विवेदी १८१-२०४

७. **ज्ञानश्रीमित्रस्य कतिपयनिबन्धसमीक्षा**
डॉ. वृजकिशोरत्रिपाठी २०५-२१२

८. **सामाजिकन्यायव्यवस्थानुशीलनम्**
डॉ. गिरीशदत्तपाण्डेयः २१३-२२०

९. **बौद्धनये निर्वाणस्वरूपविमर्शः**
डॉ. देवीप्रसादद्विवेदी २२१-२२८

१०. **कालिदासस्य सन्देशः**
प्रो. शिवजी-उपाध्यायः २२९-२३२

११. **प्रबन्धकाव्यरचनापरम्परायां मुक्तककाव्यावदानविमर्शः**
डॉ. बालकृष्णशर्मा २३३-२४०

१२. **पर्यावरणसंरक्षणार्थं सन्देशः**
डॉ. रामप्रतापतिवारी २४१-२४६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३. **विश्वनाथः शब्दकाव्यतावादी वा**
श्रीश्यामानन्दमिश्रः २४७-२५०

१४. **महाकविकालिदासस्य विमानविज्ञानम्**
डॉ. रामाशीषपाण्डेयः २५१-२५८

१५. **काव्यस्य भूमिः**
डॉ. ददन-उपाध्यायः २५९-२७०

१६. **भट्टिस्तस्य काव्यत्वञ्च**
श्रीरंजनकुमारपाण्डेयः २७१-२७६

लघु-ग्रन्थमाला

१. **पार्वतीमङ्गलम्**
प्रो. पारसनाथद्विवेदी १-६०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५४ वर्षे	ज्येष्ठ-भाद्रपदपूर्णिमे, वि.सं. २०५६	१-२ अङ्कौ

प्रतिबिम्बवादः

प्रो. रामकिशोरत्रिपाठी

दर्शनसङ्कायाध्यक्षः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

वाराणसी

❀ ❀ ❀

स्वच्छे निर्मलदर्पणे भ्रमवशाद्बिम्बच्छटाऽध्यस्यते
चैतन्ये प्रतिबिम्बरूपमखिलं मिथ्यैव सम्भासते ।
तेनाध्यस्तमिदं प्रपञ्चसहितं लोकप्रवृत्त्याशयं
ब्रह्मज्ञाननिवर्तितो हि सकलोऽध्यासप्रशस्तिः कुतः।।

नित्यानित्यविभागशून्यविमतं सद्वस्तुवद् भासते
नीरूपप्रतिरूपमेव सकलं व्यासक्तिजन्यं सदा ।
अज्ञानप्रतिबिम्बभूतमखिलं ब्रह्मप्रभाबाधितं
सज्ज्ञानेन निवर्त्यते जगदिदं भ्रान्त्या समुत्साहितम् ।।

यद्वा ब्रह्मसमस्तलोकरचनाशक्त्या च बिम्बाश्रितं
नित्यं सत्प्रतिबिम्बितेन जगतोऽभिन्नं प्रपञ्चास्पदम्।
नीरूपं प्रतिरूपतां गतमहो व्योम्नोऽपि सद्रूपता
भिन्नाभिन्नमिदं विभाति विधिवशाद् बिम्बावसक्तं जगत् ।।

अज्ञानेनावृतज्ञानशक्तितया नित्यानित्यवस्तुभेदशून्यमिदं जगत् सद्वस्तुस्वरूपाद् भिन्नमप्यभिन्नतयाऽवभासते। तत्रावस्तुतया रूपहीनं रज्जौ प्रतिभासमानसर्पवद्वस्तुनो ब्रह्मणो रूपरूषितं सद्वस्तुवत् प्रतीयते। ननु नीरूपस्य ब्रह्मणः कथं प्रतिबिम्बत्वमत्रोच्यते नभोवत्। नीरूपस्याकाशस्यालोकाभावेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपवत्त्वम्। तेनाज्ञानस्य व्यष्टितयाऽभास्वरशुक्लरूपमपि जलं तमोरूपोपाधिना श्यामतामापद्यते। अज्ञानस्य समष्टितया च तदेव जलाशयत्वेन महाकाशरूपरूषितं भासते। "न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैकः"[१]।। "दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः"[२]। "वह्नेर्यथा योनिगतस्य भूतिर्न दृश्यते नैव च लिङ्गनाशः"[३] इति श्रुतिभिररूपत्वेनावबोधितमपि चैतन्यमज्ञानोपाधिनोपहितत्वेन रूपवदवभासते।

यथैक एव चन्द्रः स्वबिम्बासक्तजलादिभेदेन भिन्नः, तद्गतक्रियाशीलतया चञ्चलश्च भवति, तथैव "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इति श्रुत्या नीरूपं क्रियाहीनमपि ब्रह्माज्ञानोपाधिनोपहितं सत् सक्रियं रूपवच्च भवति[४]। तत्र प्रतिशरीरं भासमानत्वेन च भिन्नमपि। तथा चोक्तम्—

"एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्"[५]।।

ननु निरवयवस्य परमात्मनो बिम्बत्वाभावात् कथं तस्य प्रतिबिम्बितमत्रोच्यते निरवयवस्याप्याकाशस्यालोकाभावसमवहितेन प्रतिबिम्बदर्शनात्। यथा नीरूपस्य निर्मलस्याकाशस्य यच्छ्यामरूपत्वं तदवलोकयितृनेत्रसामर्थ्यभावोत्पन्नतिमिरत्वादिना, न तु तत्र वास्तविकं श्यामरूपमस्ति, तथैवात्रापि प्रमातुरज्ञानोपाधिनोपहितत्वेन तथ्यातथ्यविवेचकत्वाभावे स्वाज्ञानस्य परमात्मन्यारोपात् परमात्मनः प्रतिबिम्बत्वेनात्मानं जानाति। "न बिम्बकृतं तत्त्वज्ञानाश्रयत्वम्; किन्तु भ्रान्तत्वकृतम्, तदप्यज्ञत्वकृतम्, तदपि जीवत्वनिमित्तम्"[६]।

वस्तुतो नीरूपमप्याकाशं जपाकुसुमगतलोहितत्वादिरागवशाद् रक्तो लोहितः स्फटिक इव पृथिवीसमवहितेन तद्गतरूपरूषितमिव भवति। एवं परमात्मापि नानाऽज्ञानोपाध्युपहितजीवात्मरूपाध्यासेन तद्रूपरूषित इव भाति। तथा चोक्तं भाष्यकारेण "परमार्थतोऽविकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यन्तर्भावाद् भजत इवोपाधिधर्मान्"[७]।

अयं प्रतिबिम्बः छायामात्रमन्यः कश्चिद्वा वस्तुविशेषः? नाद्यः, छाया हि प्रकाशातिरेकेण बिम्बमनुसरन्ती शरीरक्रियादिकमधिश्रित्य क्रियावतीव तमोरूपा

---

१. कठो. २।२।९; २. मुण्ड. २।१।२।
३. श्वेता. १।१३; ४. तत्रैव-६।९।
५. पञ्चदशी-ब्रह्मानन्दे ९; ६. पञ्चपादिकाविवरणे।
७. शा. भा., ब्र. सू. ३।२।२०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्याकृतिमात्रम्। प्रतिबिम्बस्तु स्वाश्रयजलाशयगतक्रियामपेक्षते। अधिष्ठानानेकत्वेनानेकरूपश्च भवति।

प्रतिबिम्बं यथाऽन्यत्र स्थितं तोयक्रियावशात्।
तत्प्रवृत्तिमिवान्वेति स धर्मः स्फोटनादयोः[१]।।

नापि द्वितीयः, प्रतिबिम्बो यदि वस्तुविशेषः स्यात्तदा बिम्बसमवधानाभावेऽपि उपलभ्येत। अतो विलक्षणोऽयं शुक्तिरूप्यवत् कश्चिदनिर्वचनीयपदार्थः प्रतिबिम्बः। "न छाया नापि वस्त्वन्यत् प्रतिबिम्बमसम्भवात्[२]"। अयमेव प्रतिबिम्बः सकलप्रपञ्चाध्यासे निमित्तम्।

अज्ञानस्यैव महिम्ना जीवेशविभागः, तथा हि सत्त्वशुद्ध्यविशुद्धिभ्यामज्ञानं मायाऽविद्यारूपतामापद्यते। तत्र मायायां प्रतिबिम्बितं चैतन्यमीश्वरः। अविद्यायां प्रतिबिम्बितं च जीव इत्युच्यते। तत्रैकजीववादेऽविद्याप्रतिबिम्बो जीवः, अविद्याया एकत्वेन तत्प्रतिबिम्बस्य जीवस्याप्येकत्वौचित्यात् "तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्"[३]। "यथाग्नेः क्षुद्राविस्फुलिङ्गा व्युच्चरन्ति, एवमेवैतस्मादात्मनः सर्व एत आत्मानः"[४] इत्यादिश्रुतेः, "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते"[५] इत्यादिस्मृतेः, "भागेन त्वितरे क्षपयित्वा सम्पद्यन्ते"[६] इत्यादिसूत्राच्च।

अनेकजीववादेऽन्तःकरणप्रतिबिम्बो जीवः। अविद्या हि जीवात्मनः स्थूलसूक्ष्मशरीरादिकारणम्। तस्यास्तमःप्रधानभूताया वियदादयः पञ्चभूतान्युत्पद्यन्ते। तेषां वियदादीनां पञ्चभिः सत्त्वांशैः सत्त्वगुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यज्ञानेन्द्रियाणि पञ्च। तैः सत्त्वांशैः सह सम्भूय मनोबुद्ध्युपादानभूतमन्तःकरणरूपं द्रव्यमुपजायते। तस्यानेकत्वात्तत्प्रतिबिम्बितचैतन्यरूपस्य जीवस्याप्यनेकत्वं सिद्ध्यति।

ननु प्रतिबिम्बस्तैजसपदार्थ एव सम्भवति, न हि पृथिव्यादिमालिन्यप्रधाने द्रव्ये कदापि सूर्यः प्रतिबिम्बते, तत्र प्रतिबिम्बसामर्थ्यस्य तैजसपदार्थस्याभावात्। अविद्यायामपि तैजसत्वाभावात्प्रतिबिम्बासम्भव इति चेत्, न, तत्रोद्भूतसत्त्वांशतया तैजसांशस्योद्भूतत्वात्। मायाऽविद्ययो; सत्त्वांशस्य शुद्धाविशुद्धभावेन विद्यमानत्वात्।

"सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते।
मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः"[७]।।

---

१. वाक्यपदीये-१।४९; २. सिद्धान्तलेशसङ्ग्रहः; ३. बृ. उप. १।४।१०।
४. बृ. उप. २।१।२०; ५. भग. गीता-७।१४; ६. ब्र सू. ४।१।१९।
७. पञ्चदशी-१।१६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्त्वांशस्य शुद्ध्यविशुद्धिभेदेनाज्ञाने मायाऽविद्यारूपविभागः। तत्र सत्त्वांशस्य शुद्धितयाऽतिप्रकाशक्षमत्वात्तदंशभूतमज्ञानं मायेति व्यपदिश्यते। तत्र प्रतिबिम्बितं चैतन्यमीश्वर इति कथ्यते। अत एवेश्वरस्य सर्वज्ञत्वं सर्वशक्तिमत्त्वं सर्वनियन्तृत्वञ्च प्रतिपद्यन्ते। सत्त्वांशस्याविशुद्धित्वेन तदज्ञानमयविद्येति व्यपदिश्यते, तत्र प्रतिबिम्बितं चैतन्यं जीव इति कथ्यते।

प्रपञ्चस्याविद्याजन्यतया चैतन्येऽध्यस्तत्वेनावभासः। नानाऽज्ञानजन्यानेकवासनावासितचित्तवृत्तितयाऽनेकेषणाकल्पितवस्तुस्वरूपं परमात्मनि भासते। तत्र प्रतिभासमानवस्तुस्वरूपेषु ममेदम् अस्याहमिति मोहजनिकाऽविद्यैव कारणम्। तत्राज्ञानं प्रथमं मोहमुत्पादयति, उत्पन्नो मोहश्चेषणां प्रकटयति, मोहोत्पन्नेषणा हि वस्तुस्वरूपं कल्पयति, कल्पितवस्तुस्वरूपं प्रतिबिम्बत्वेन परमात्मनि तादात्म्येनाध्यस्यते। "अज्ञानकल्पितमनिर्वचनीयमस्मिन्नाबालवृद्धमविवादपदं प्रसिद्धम्[१]"।

पूर्वमविद्या चिदात्मन्यध्यस्यते, तत्राध्यस्ता सा चैतन्यांशरूपमावरणशक्त्याऽऽवृत्त्य विक्षेपशक्त्या प्रपञ्चमुद्भावयति। उद्भूतश्चायं प्रपञ्चश्चैतन्यमधिशेते। मालिन्यप्राधान्येन कलुषीभूतान्तःकरणवृत्तिरीप्सितकामनासञ्चितविषयत्वेन प्रपञ्चं सङ्गृह्णाति। अतो वियदादिसकलप्रपञ्चोऽन्तःकरणवृत्तावववभासते। बाह्यघटादिविषयाश्चैतन्यप्रतिबिम्बा अन्तःकरणस्य वा। नाद्यः, अमूर्तचैतन्यस्य प्रतिबिम्बासम्भवात्, लोके हि मूर्तमन्मुखादेरेव प्रतिबिम्बदर्शनात्। नापि द्वितीयः, जडभूतस्याप्यन्तःकरणस्यामूर्तत्वात्। अत्रोच्यते बुद्धिस्थविषया एव वासनामयत्वेन बाह्यघटादिरूपेण प्रतिबिम्बन्ते, ते च चित्तपरिणामजायमानाः, न तु वास्तविकाः सन्ति। यदि बाह्यविषयसापेक्षप्रतिबिम्बस्थितिः स्यात्, तदा शुक्तिरजतादिप्रतीतिकरभ्रमस्थले स्वप्ने च विषयावभासो न स्यात्, तत्र विषयाणां व्यावहारिकसत्ताभावात्। तथा चोक्तम्—

"बहिर्न किञ्चिदप्यस्ति खाद्यब्ध्युर्वीदिगादिकम् ।
एतत्स्वचित्त एवास्ति पत्रपुञ्जमिवाङ्कुरे ।।
फलादिस्फारतामेति यथैव बहिरङ्कुरात् ।
बहिः प्रकटतां याति तथा पृथ्व्यादिचेतसः ।।
सत्यं पृथ्व्यादि चित्तस्थं न बहिष्ठं कदाचन ।
आबालमेतत्पुरुषैः सर्वैरेवानुभूयते ।
स्वप्नभ्रममदावेगरागरोगादिदृष्टिषु"[२] ।।

---

१. संक्षेपशारीरके-१।३३६; २. योगवा. ५।४८,४९,५३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्पणस्थे मुखप्रतिबिम्बे मुखादिबुद्धिवदन्तःकरणस्य स्वच्छतया तत्र घटादिविषयाणां प्रतिबिम्बिते घटादिविषया बुद्धिर्भवति। जडेष्वन्तःकरणवृत्तिरूपेषु चैतन्यमपि सङ्क्रान्तमिव दृश्यते। तत्सङ्क्रमविशिष्टान्तःकरणवृत्तावपि घटादिविषयाणां न बाह्यविषयत्वेन प्रतिबिम्बप्रत्ययः। अत एवाह—"चित्तस्य द्रव्यरूपो वृत्त्याख्यः परिणाम इन्द्रियप्रणाल्या निर्गत्य विषयेण संयुज्य सूक्ष्मावस्थारूपविषयवासनावशात् तत्तद्विषयाकारेण परिणमते, न तु तस्यां संयुक्तबाह्यविषयप्रतिबिम्बः स्वप्नादौ बाह्यविषयासंयोगेन तत्प्रतिबिम्बासम्भवात्"[१]।

अन्तःकरणचैतन्यस्यैवानाद्यविद्यावशात् स्वरूपतिरोधाने बाह्यरूपेण मानम्। तद्यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथान्तःकरणमपि चक्षुरादिद्वारा घटादिदेशं गत्वा घटाद्याकारेण परिणमति। स एव परिणामो वृत्तिरित्युच्यते। यत्र च वृत्त्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोरैक्यं तत्र विषयस्य प्रत्यक्षत्वम्। नन्वन्तःकरणस्य निरवयवतया कथं परिणामरूपा वृत्तिरिति चेत्, न, अन्तःकरणस्य द्रव्यत्वेन सावयवत्वात्। एवं शुक्तिरजतादिस्थलेऽविद्यैव रजताकारेण परिणमति। रजतरूपेणाविद्यायाः परिणामे वेदान्तनये 'नेदं रजतम्' इत्यनेन लौकिकपरमार्थरजतं कथं निषिध्यत इति चेत्, अत्रोच्यते—पुरोवर्तिनि रजतार्थिनः प्रवृत्ति-दर्शनाल्लौकिकपरमार्थरजतत्वेनापरोक्षतया निषिध्यत इति तदाशयात्।

तदुक्तम्—'न हि तत्र रजतत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिताको व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभ्युपगमात्"[२], "अनिश्चिता यथा रज्जुरन्धकारे विकल्पिता। सर्पधारादिभिर्भावैस्तद्वदात्मा विकल्पितः"[३]।

चैतन्ये प्रतिबिम्बाभासकत्वविचारः

अथेदं विचार्यते यदयं प्रतिबिम्बः कुत्रावभासते, वृत्तौ शुद्धचैतन्ये वा? नाद्यः, वृत्तेरन्तःकरणस्य धर्मविशेषादविद्योपाधिनोपहितत्वाच्च। न हि पङ्कमृद-वालिप्तदर्पणादिषु कदाचित् प्रतिबिम्बः सम्भवति। शुद्धचैतन्य इति चेत्, न, तस्यावस्तुरूपत्वान्निरवयवद्रव्यत्वाच्चास्फटिकादिसावयवद्रव्यसन्निहित एव जपाकुसुमरागादिप्रत्ययः। अत्रोच्यते—उभयतादात्म्येनोभयत्रापि प्रतिबिम्बावभासः। तथा हि वृत्तिर्नाम चित्तस्य विषयाकारपरिणामविशेषः। सा च विषयाकारा सती विषयगतमज्ञानरूपमावरणमपाकरोति। अनावृत्तविषयाणां प्रकाशस्तु वृत्त्यवच्छिन्न-चैतन्येन क्रियते।

---

१. वैया. सि. लघुमञ्जूषा।

२. वेदान्तपरिभाषा-प्रत्यक्षखण्डे; ३. मा. का. २।१७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्तेर्जडरूपत्वेनाप्रकाशकत्वेऽपि विषयावरणभङ्गसमवहितकालमेव दग्धे काष्ठे निवृत्ताग्निरिव वृत्तेरविद्या निवर्त्यते। निवृत्ताज्ञानात्मिकायां स्वच्छदर्पण-वदवभासमानायां वृत्तौ बाह्यविषयाणां प्रतिबिम्बावभासः। वृत्तेश्चैतन्यतादात्म्येन विषयप्रकाशकत्वाद् वृत्तितादात्म्यमापन्नं चैतन्यमपि वृत्तिनिष्ठविषयप्रतिबिम्ब-वदवभासते। "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"[१], "सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च"[२]।

इन्द्रियविशिष्टमेवान्तःकरणं विषयाकारेण परिणमति। अत एव रसनेन्द्रियगतपित्तान्वयेन गुडे कटुत्वप्रत्ययः, चक्षुरिन्द्रियगतचित्तान्वयेन च शङ्खे पीतत्वानुभवश्च भवतः। सा च भ्रमप्रमोभयरूपा वृत्तिश्चैतन्यतादात्म्यापन्ना पुरुषे प्रतिबिम्बते। ननु दोषविशेषाजन्यज्ञानं प्रत्येव बाधज्ञानस्य प्रतिबन्धकमिति तद्विशिष्टान्तःकरणपरिणामाभावेऽपि तादृशप्रतीतौ प्रतिबन्धकाभाव इति चेत्, न, इन्द्रियगतपित्तरूपदोषतारतम्येन विषयगतपीतत्वतारतम्यस्यानुभवसिद्धतया तत्र विषयविधया पित्तस्यैव हेतुत्वावश्यकत्वात्। पीतत्वविशिष्टशङ्खविषयाभावेन पीतः शङ्ख इति चित्तवृत्तिः कथम्? अत एवोक्तम्—"वृत्तिश्चेन्द्रियेण सहैव"[३]।

अयं भावः—क्षारपदार्थसंयोगेन यथा वस्तुमालिन्यमपसार्यते, तथेन्द्रिय-सन्निकर्षेण बौद्धं तमोऽपहन्यते। तथा च निर्मले वस्त्रे कुसुम्भयोगस्तद्वर्णतेव स्वच्छे बुद्धिसत्त्वे विषयाकारता सम्पद्यते। सैव बुद्ध्यवस्था वृत्तिरित्युच्यते।

यथा इदमाकारवृत्ते रजताकारवृत्तेश्च प्रत्येकमेकैकविषयत्व एव तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपकत्वाभावेन शुक्तौ रजतज्ञानस्य भ्रमः, तथैवेहापि शङ्खावच्छेदेन प्रमात्वस्य पीतत्वावच्छेदेन भ्रमत्व-स्यैकस्मिन् वृत्तिप्रतिबिम्बितचैतन्ये सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेनैव भ्रमोत्पत्तिः। अयःपिण्डस्य दग्धत्वाभावेऽविदग्धत्वाशयवह्नितादात्म्याध्यासाद् अयो दहतीतिवद् विषयाकारपरिणाम्यन्तःकरणैक्याध्यासादात्मनोऽपि सविषयत्वमिति विवेकः।

असौ वृत्त्यवच्छिन्नचैतन्यप्रतिबिम्बो ब्रह्मसाक्षात्कारं यावदवभासते, तावत् कालपर्यन्तं वृत्तेरवस्थितेः। ब्रह्मसाक्षात्कारे हि वृत्तिलयात्तत्र प्रतिभासमान-प्रतिबिम्बस्यापि लय उच्यते। ननु नित्यशुद्धबुद्धमुक्तस्वभावस्यात्मनः स्वतः प्रकाशशीलत्वात्तत्र वृत्तेः किं प्रयोजनम्? ब्रह्मणो हि आवरणहीनत्वात् स्वयं-प्रकाशत्वाच्च। तथा च श्रुतिः—"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"। अत्रोच्यते—सा च चित्तवृत्तिर्न शुद्धब्रह्मविषयिणी किन्त्वज्ञानविशिष्टप्रत्यगभिन्नपर-ब्रह्मविषयिणी। सा च चैतन्यप्रतिबिम्बसंवलिता सती चैतन्यगतमज्ञानं निवर्तयति।

---

१. कठो. २।२।१५; २. गीता-१५।१५; ३. तै. उप. २।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्याश्चैतन्यावरणकाज्ञाननिष्पत्तिरेव प्रयोजनम्। तत्त्वमस्यादिवाक्यश्रवणोत्पन्नाखण्डचैतन्यवृत्त्या सकलाविद्यानिवृत्तौ तत्कार्यस्य सकलप्रपञ्चस्य क्षयादद्वैतप्रत्ययः। तथा चोक्तम्—"पटकारणतन्तुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदन्तर्भूताखण्डाकाराकारिता चित्तवृत्तिरपि बाधिता भवति[1]। वृत्तिनिवृत्तौ तत्प्रतिबिम्बितचैतन्यस्य बिम्बावभासनासमर्थत्वाद् वृत्त्युपाधिबाधितेन तत्प्रतिबिम्बितचैतन्यमपि चैतन्यमात्रतयाऽवशिष्यते। दर्पणोपाधिविगमे तत्प्रतिबिम्बितमुखावभासस्य बिम्बभूतमुखमात्रतयावशेषवत्।

सङ्क्षेपशारीरककारस्तु अज्ञानप्रतिबिम्बितं चैतन्यमीश्वरः, बुद्धिप्रतिबिम्बितचैतन्यं जीव इति मन्यते। अज्ञानोपहितं बिम्बचैतन्यं शुद्धमिति। शुद्धं हि जीवेशयोरनुस्यूतसाक्षिरूपम्। अत एवोपहितशब्देन निर्देशः। भास्यभासकभावरूपस्याज्ञानकृतसम्बन्धस्य च व्यवहारकाले सत्वात्। अनयोर्बिम्बप्रतिबिम्बावीशजीवौ, कार्यकारणौपाधिकौ च जीवेशौ। प्रतिबिम्बत्वविशिष्टरूपेण कल्पितत्वेऽपि प्रतिबिम्बस्य स्वरूपचैतन्यमकल्पितमिति भावः। तथा च श्रुतिः—"रूपं रूपं प्रतिरूपो बभूव"[2]। तत्तदज्ञानोपाधिविशिष्टजीवेशाद्यधिकरणेषु भासमानः प्रतिबिम्बश्चैतन्यतादात्म्येन ब्रह्मण्यध्यस्यते।

नानाज्ञानोपरागाद् विविधगुणरतो बिम्बरूपानुशक्तः
जीवेशादिप्रमोषात्तदनुगतकलो वस्तुभासावभासी।
लोके सर्वावभासो यदधिगतधिया बिम्बतेऽसौ प्रपञ्चः
चैतन्येऽध्यासहेतुर्भवति धृतिवशान्मायया प्रातिबिम्बः।।

नानाऽज्ञानजन्यप्रपञ्चाध्यासेन चैतन्यमपि प्रतिबिम्बते चेत्कोऽन्यश्चैतन्याद्यस्यायं प्रतिबिम्बः। विषया इति चेत्, न, तेषां चैतन्यमात्रावभासमानत्वेन प्रतिबिम्बासम्भवात्। चैतन्यमेव प्रतिबिम्बहेतुरिति चेत्, न, कार्यकारणयोरेकाधिकरण्येन स्वज्ञप्त्यधीनज्ञप्तिकत्वरूपान्योन्याश्रयप्रसङ्गात्।

अत्रोच्यते—विषया एव प्रतिबिम्बनिमित्तानि। यदुक्तं चैतन्यमात्रावभासकत्वं तदेव प्रतिबिम्बाध्यासे निमित्तम्। अज्ञानावृतं चैतन्यमेव विषयः। तत्राविद्याऽध्यस्तमालिन्याद् बिम्बत्वं चैतन्यांशप्रकाशेन बिम्बग्रहक्षयत्वेन च प्रतिबिम्बत्वमिति। ग्रीवास्थं मुखं बिम्बग्रहक्षयदर्पणादिसान्निध्यात् प्रतिबिम्बत्वेन भासमानं मुखगततैजसेन्द्रियेण गृह्यते। तथा चोक्तं सिद्धान्तलेशसङ्ग्रहे—

---

१. वेदान्तसारे २८ पृष्ठे; २. कठो. २।५।९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"दर्पणादिपरावृत्तैर्निजैर्नयनरश्मिभिः।
सन्निकृष्टं मुखं तत्रोपाध्यन्तः स्थितिविभ्रमः"[१]।।

ग्रीवास्थ एव मुखे दर्पणोपाधिसन्निधानदोषाद् दर्पणस्थत्वप्रत्यङ्मुखत्व-बिम्बभेदानामध्याससम्भवेन न दर्पणमुखस्याध्यासः कल्पनीयो गौरवात्।

अथवाऽस्तु चैतन्यमेव प्रतिबिम्बनिमित्तम्। तत्र कार्यकारणयोरेकाधिकरण्येऽपि अविद्ययाऽध्यस्तविषयाशक्तत्वेन बिम्बत्वम्, बिम्बग्रहक्षयतैजसांशेन प्रतिबिम्बत्वम्। यथा दर्पणादीनां मुखबिम्बाध्यासेन बिम्बत्वं तद्रूपरूषिततया च भासमानत्वेन प्रतिबिम्बत्वम्। तथा च पञ्चपादिकायाम्—'तदहङ्कर्तुरनिदमंशो बिम्बादिना प्रतिबिम्बं न ब्रह्मणो वस्त्वन्तरम्; किन्तु तदेव तत् पृथगवभासविपर्ययस्वरूपतामात्रं मिथ्येति दर्शयितुम्"[२]। तथा च श्रुतिः—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"[३]।

तत्तदधिष्ठानभेदेन भिन्नमपि प्रतिबिम्बितचैतन्यमेकमेव। तथा चैकमेवाज्ञानं सत्त्वादिगुणोपाधिना स्वगतक्रियोपाधिना च भिन्नं विविधप्रपञ्चोत्पत्तिनिमित्तम्। नाना-जलाशयगतसूर्यप्रतिबिम्ब इवाज्ञानभेदेन भिन्नेष्वपि प्रपञ्चेषु चित्प्रतिबिम्ब एक एव। सर्वत्र प्रतिभासमानचैतन्यस्यैकत्वात्तत्र प्रतिबिम्बस्यैकत्वमव्याहतम्। अथ च ब्रह्मण एव सर्वप्रपञ्चस्याधिष्ठानतया, बिम्बप्रतिबिम्बावपि ब्रह्मनिष्ठावेव। अत्र पक्षे श्रुतिरपि मानम्—"एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति"[४], "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्[५]"। नास्त्यन्यत् किञ्चिद् यस्य बिम्बः प्रतिबिम्बो वा शक्यौ वर्णयितुम्। बिम्बात्मनः प्रतिबिम्बात्मनो वा सर्वत्र भासमानं ब्रह्मैव।

प्रतिबिम्बस्य सत्यासत्यत्वविचारः

चैतन्यसंश्लेषमवाप्य सत्यो वस्तुस्वरूपाभिरतोऽप्यसत्यः।
ब्रह्माश्रयेण प्रतिबिम्बतेऽसौ यद् दर्पणे तन्मुखमेव नान्यत्।।
चैतन्याध्यस्तमेकं विषयपरिवृतं वस्तुरूपानुरक्तं
बिम्बासक्तञ्च लोके भ्रमजनकमिदं प्रातिबिम्बस्वरूपम्।
सत्यं तच्चास्ति कश्चिद् विषयपरिमृषाद् वक्त्यसत्यं तदन्य
इत्थं व्याख्यातृवादैर्विविधमतमिदं भ्रान्तिमावर्तकं तत्।।

---

१. सिद्धान्तलेशसङ्ग्रहे प्रतिबिम्बवादे;
२. पञ्चपादिकायां प्रतिबिम्बवादे।
३. मुण्ड. उप. २।२।१०;
४. कठो. २।२।१२।
५. छा. उप. ६।२।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्पणादिषु प्रतिभासमानमुखप्रतिबिम्बो ग्रीवास्थमुखमेवास्ति, न प्रतिबिम्बस्य पृथक् स्थितिरिति केचित्। तदन्ये असिमण्यादिस्थप्रतिबिम्बस्य बिम्बविपरीत-स्थितिदर्शनात्तस्य पृथक् स्थितिरिति मन्यन्ते। तथा हि एकमेव ग्रीवास्थमुख-मसिसन्निहिते तद्धाराधारितास्यताकारत्वेन प्रतिबिम्बते। तदेव च वर्तुलाकारमणि-दर्पणादिषु वर्तुलाकारतामधिगच्छति। अथ च जलाशयतीरद्रुमाणां प्रतिबिम्बा जलाशयेऽधोमुखा इवावभासन्ते। अतो बिम्बात् पृथक् सत्ता प्रतिबिम्बस्येति विवरणकाराः। ग्रीवास्थमुखमेवाधिष्ठानोपाधिनोपहितं भिन्नमेवावभासते, न बिम्बातिरिक्तः कश्चित् प्रतिबिम्बः। बिम्बावभासमात्रं स इति सर्वज्ञमुनिः।

तत्र पृथक् सत्तापक्ष इदं विचार्यते यदियं सत्ता प्रातिभासिकी व्यावहारिकी पारमार्थिकी वा। नाद्या, मुखादिसमवहितेऽधिष्ठाने नायं प्रतिबिम्ब इति बाधा-सम्भवात्। न द्वितीया, ग्रीवास्थमुखचेष्टया चेष्टितदर्पणस्थप्रतिबिम्बस्य चेष्टाश्रयत्व-मवलोक्य ग्रीवास्थमुखमेव दर्पणे नान्यदिति ब्रह्मप्रमातिरिक्तप्रमाबाधितत्वात्। पारमार्थिकी इति चेत्, न, ब्रह्मातिरिक्तस्य त्रिकालाबाधासहत्वात्। "अव्यक्तस्तु परः पुरुषो व्यापकोऽलिङ्ग एव च"[1], "क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोऽपि दृष्टः"[2], "स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म"[3], "एकस्तथा सर्वभूतान्तरात्मा"[4] इत्यादिश्रुतिभिर्ब्रह्मातिरिक्तस्य सर्वस्यापि पारमार्थिकत्वनिषेधात्।

अस्तु तावत् प्रातिभासिकं सत् प्रतिबिम्बस्वरूपम्। भ्रमवशात् प्रतिभासमानं शुक्तौ रजतप्रतिबिम्बवत् प्रतिभासमानं जपाकुसुमादिलौहित्यादिकं प्रातिभासिकं जपाकुसुमाद्यपनयने रागहीनाधिष्ठानज्ञानेन तस्य बाधात्। एवं चैतन्ये प्रतिभासमानं प्रपञ्चप्रतिबिम्बरूपमपि सर्वविकल्पातीतचैतन्यज्ञानेन बाध्यते। विषयप्रतिबिम्बाश्चै-तन्याधिष्ठाने प्रतिभासमाना अपि चैतन्यस्वरूपं न दूषयन्ति। तथा च श्रुतिः—

"सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः"[5]।

भ्रमाद्धि सृष्टिः सचराचरस्य तदेव लोकस्य विधानमूलम्।
बिम्बानुसक्तं प्रतिबिम्बरूपं प्रबिम्बते वासनयाऽवलिप्तम्।।

अतः प्रातिभासिकमेव प्रतिबिम्बस्वरूपम्।

अथवाऽस्तु व्यावहारिकं प्रतिबिम्बस्वरूपम्। जपाकुसुमादिसंसर्गाल्लौहितोऽयं रक्तोऽयं स्फटिक इत्यत्र जपाकुसुमादिरागरञ्जितस्फटिकप्रतिबिम्बस्य सर्वव्यवहार-

१. कठो. २।३।८; २. श्वेता. उप. ५।१२।
३. बृ. उप. ४।४।२५; ४. कठो. २।५।१०; ५. तत्रैव-२।५।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योग्यत्वात्। अथ च दूरदर्शनयन्त्रं कम्प्यूटरयन्त्रञ्च प्रतिबिम्बमहिम्नैव लोकव्यवहार-साधकम्। ननु व्यावहारिकसत्ताकस्य पारमार्थिकसत्ताकज्ञानेन बाधः। प्रतिबिम्बस्तु शुक्त्यधिष्ठानज्ञानेन नेदं रजतं मिथ्यैव रजतभ्रमादितिवद् दर्पणे मुखं नास्ति मिथ्यैवात्र दर्पणे मुखभ्रमाद् इत्यादिसर्वसिद्धबाधात् प्रतिबिम्बं न व्यावहारिकमिति चेत्, न, बिम्बसन्निधानापसारणेनाधिष्ठानस्वरूपावगतौ नात्यन्तिकविक्षेपांशस्य बाधः। पुनर्बिम्बसन्निहितेनोत्पत्तियोग्यत्वात्। तत्र यत्किञ्चिदंशस्यैव बाधो न सर्वांशरूपेण। ब्रह्मज्ञानेनैव सर्वांशरूपेण विक्षेपस्य बाधात्। तथा चोक्तम्—

बिम्बापसरणाध्यक्षाद्विक्षेपांशस्य बाधनम्।
विरोधादथवा ब्रह्मज्ञानेनैवास्य बाधनम्[१]।।

ननु यत्प्रतिबिम्बं पुरस्तात्प्रातिभासिकमुक्तं तदेवेदानीं कथं व्यावहारिक-मुच्यते। तन्निराकुर्वन्नाह, उभयतो हि प्रतिबिम्बस्वरूपनिर्णयः। तूलाविद्यायाः कार्यमिति पक्षे शुक्तिरजतादिवत् प्रातिभासिकम्। मूलाविद्यायाः कार्यमिति पक्षे ब्रह्मप्रमां यावज्जायमानतया व्यावहारिकम्। तथा हि शुक्तिरजतसम्बन्धिमिथ्यात्वं यद्यपि इदमर्थतादात्म्यापन्नमेव रजतं विषयीकरोति, तथापि तत्र तादात्म्यमात्रं न कल्पते; अपि चानिर्वचनीयरजतमपि, कल्पितरजतस्यैव तत्र प्रतीतेः।

तत्र कल्पितानिर्वचनीयरजतप्रतीतौ शुक्त्यधिष्ठानविषयकमज्ञानं कारणम्। अधिष्ठानविषयकाज्ञाने सति रजतप्रत्ययः, अज्ञानाभावे प्रतीत्यभाव इत्यन्वयव्यतिरेकभावेन रजतोद्भवः। शुक्तिरूपाधिष्ठानज्ञानेन नेदं रजतमिति ज्ञानमुदेति। तेन यदेतावन्तं कालं रजतं प्रतिपन्नं तन्नेति रजतस्वरूपमेव न बाध्यते, अपि च रजतमिथ्यात्वेन शुक्तिरजतसंसर्गोऽपि बाध्यते। अतो देशान्तरस्थहाटकीयरजतस्य तत्रासम्भवात्, तेन सह प्रत्यभिज्ञानासम्भवात् तद्रजतमिति प्रत्यभिज्ञाऽपि न भवति। तथा चोक्तम्—"तत्र नेदं रजतमिति रजतस्वरूपमेव बाध्यते, नात्र रजतं किन्तु तदिदं रजतमिति देशमात्रबाधया सत्यरजतेनैकतया न प्रत्यभिज्ञायते[२]"।

प्रतिबिम्बाध्यासविषये न तथा, प्रतिबिम्बाधिष्ठानज्ञानेऽपि प्रतिबिम्बप्रत्ययात्। रजताध्यासो ह्यधिष्ठानज्ञानेन निवर्तते। प्रतिबिम्बाध्यासस्त्वधिष्ठानसमकालमेव प्रवर्तते। अधिष्ठानावगमे प्रतिबिम्बावगतिः, अधिष्ठानाभावे प्रतिबिम्बाभाव इति शुक्तिरजतावगतेर्विपरीतान्वयव्यतिरेकभावेन प्रतिबिम्बाध्यासस्य सम्भवात्। प्रतिबिम्बस्थले दर्पणादौ न किमप्यनिर्वचनीयं मुखं कल्प्यते। अपि च ग्रीवास्थ एव

१. सिद्धान्तलेशसङ्ग्रहे; २. पञ्चपादिकाविवरणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखे दर्पणोपाधिसन्निधानदोषाद् दर्पणस्थत्वप्रत्यङ्मुखत्वबिम्बभेदानामध्याससम्भवेन दर्पणे मुखं नास्तीत्यादिना दर्पणसंसर्गमात्रस्य बाधः। "तत्र हि बाधदर्शनाद् मिथ्याभावः, नेह स बाधो दृश्यते। यत्पुनर्दर्पणापगमे तदपगमः, न स बाधः, दर्पणेऽपि तत्प्रसङ्गात्"[१]।

शुक्तिरजतस्थले शुक्तिरजतसंसर्गोऽप्यनिर्वचनीयस्तत्र रजतमप्यनिर्वचनीयं तद्द्वयमपि बाध्येते। प्रतिबिम्बस्थले हि बिम्बाधिष्ठानसंसर्गमात्रं बाध्यते। अतो न प्रतिबिम्बस्य वास्तविकं प्रातिभासिकत्वम्। अत्र मूलाविद्याया आवरणांशस्यैव नाशः, विक्षेपांशस्तु वर्तत एव। अतः पुनर्दर्पणसन्निधाने प्रतिबिम्बस्य प्रत्ययस्तु भवत्येव। तत्र मिथ्यात्वं केन रूपेण? तत्रोच्यते—बिम्बादिदोषजन्यत्वेन दर्पणे मम मुखं भातीति संसर्गाध्यासेन जायमानग्रीवास्थदर्पणस्थमुखयोरभेदप्रत्ययस्य बाधः। तथा चाह—

"मूलाविद्याऽथवा हेतुर्विक्षेपांशेन संस्थिता।
बिम्बादिदोषजन्यत्वान्मिथ्येत्यन्ये प्रचक्षते[२]" ।।

प्रतिबिम्बविषयकव्यवहारोऽपि घटपटादिविषयकव्यवहाराद्विलक्षणः। घटपटादिविषयाणां ब्रह्मप्रमातिरिक्तप्रमाबाधायोग्यत्वेन व्यवहारयोग्यता। प्रतिबिम्बन्तु दर्पणादौ मुखसंसर्गाभावेन प्रतीत्ययोग्यत्वेऽपि व्यवहारयोग्यतां भजते। अथ च शुक्तिरजतादिकं तदुपमं चैतज्जगत् अविद्याजन्यम्। प्रतिबिम्बप्रत्ययस्तु नाविद्याजन्यः, ज्ञातमेव दर्पणादिकं प्रतिबिम्बप्रबोधनिमित्तम्।

मायामात्रविजृम्भितं जगदिदं शुक्तिस्थरूप्योपमं
कृत्स्नं व्याप्य तनोति विश्वमखिलं रज्जौ यथाहेर्भ्रमः।
बिम्बो हि प्रतिबिम्बरूपमसकृद् मोहात्प्रपञ्चाश्रयं
नाविद्या न च कार्यमेव तदिह ज्ञानाश्रितं बिम्बनम्।।

प्रतिबिम्बस्य पारमार्थिकत्वविचारः

बिम्बात्मनस्तत्पदवाच्यमेतच्चैतन्यमेकं विषयावसक्तम्।
जीवात्मनस्त्वंपदबोध्यतां गतं तत्त्वन्त्वभिन्नं परमार्थरूपम्।।
तद् ब्रह्मबिम्बः प्रतिबिम्बजीवो द्वावेव तत्त्वंपदवाच्यताश्रयौ।
औपाधिकं भेदमुपेत्य सर्गस्तत्त्वन्त्वभेदेन चिदेव शिष्टम्।।

---

१. पञ्चपादिकाप्रतिबिम्बवादे; २. सिद्धान्तलेशसङ्ग्रहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बिम्बप्रतिबिम्बयोर्न प्रातिभासिकं रूपं दर्पणाद्यधिष्ठानज्ञानेनापि तत्प्रत्ययात्। नापि व्यावहारिकं ब्रह्मप्रमातिरिक्तदर्पणाद्यपसारणेन तत्प्रत्ययाभावात्। खपुष्पवदलीकमिति चेत्, न, लौकिकप्रतीत्याश्रयात्। अत आह पारमार्थिकत्वं तयोः। चैतन्यमेव बिम्बप्रतिबिम्बभावेन भिन्नं जगद्रूपम्। तत्त्वमस्यादिमहावाक्यस्याखण्डार्थबोधाद् भेदक्षये चैतन्यमात्रावशेषान्मोक्षः। तथा च श्रुतिः—"अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते"[१]। यथैको विवश्वान् नानाजलान्तर्गतप्रतिबिम्बात्मनो विभज्यत इव। तथैकश्चिदात्मा नानाजीवोपाधिना प्रतिबिम्बितो भिन्न इवास्ते। स च प्रतिबिम्बो जीवान्तर्गतः सन्नात्मन्यध्यस्ततयाऽवभासते। यथा सूर्यबिम्ब एव जलान्तर्गतो जलाशयप्रतिबिम्बात्मनाऽवभासते। तथैव चैतन्यमेव बिम्बप्रतिबिम्बोपाधिनोपहितं सकलप्रपञ्चाश्रयतामाकलयति। बिम्बप्रतिबिम्बोपाधिभिश्चैतन्यं नैव विभज्यते। विधेयानान्वितस्यैवोपाधेर्व्यावर्तकत्वात्। उक्तञ्च भाष्ये—

यथा ह्ययं ज्योतिरात्मा विवश्वानपो भिन्ना बहुधैकोऽनुगच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षत्रेष्वेवमजोऽयमात्मा[२]।।

प्रथममविद्यावृते मनस्येव प्रतिबिम्बरूपावगतिस्तदनन्तरं सर्वत्र दृश्येऽवभासते। तच्च प्रतिबिम्बं परमात्मरूपत्वेन ब्रह्मादिस्तम्बपर्यन्तेषु देहेषु प्रविष्टः प्रतिबिम्बते। "स एष इह प्रविष्ट आनखाग्रेभ्यः"[३], एवमतीन्द्रियार्थेष्वपीश्वरीयमायावृत्तिविशिष्टरूपेषु प्रतिबिम्बत्वरूपप्रवेशः। ननु बिम्बरूपचैतन्यस्य कथं प्रतिबिम्बात्मनः प्रवेशः? बिम्बप्रतिबिम्बोपाधिना प्रवेश्यत्वसम्भवात्। "तत्सृष्ट्वा तदेवानुप्राविशत्"[४]।

निरवयवस्य परमात्मनः प्रवेशासम्भवात् प्रतिबिम्बरूपत्वमवगम्यते। यथा स्वसजातीयविजातीयस्वगतभेदशून्यतया त्रिकालाबाधसत्ताकत्वेन ब्रह्मणः पारमार्थिकत्वम्, तथैव तद्रूपत्वेन भासमानस्य प्रतिबिम्बस्यापि। परमात्मनः पारमार्थिकत्वसाधकानि नैकानि श्रुतिवाक्यानि। यथा—"सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[५], "एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि"[६]।

बिम्बात् प्रतिबिम्बं भिन्नमभिन्नं वा? नाद्यः, बिम्बसमवहितेनैव प्रतिबिम्बप्रत्ययात्। प्रतिबिम्बो यदि बिम्बातिरिक्तं किमपि वस्तु स्यात्तदा बिम्बसमवधानाभावेऽपि प्रतीयेत। नापि द्वितीयः, विविधाधिष्ठानाधिष्ठितमहिम्नाऽऽश्रयगतधर्मा-

१. माण्डूक्यो. ६।७; २. शा.भा., ब्र.सू. ३।२।१८।
३. बृ.उप. १।४।७; ४. तै.उप. २।६।
५. छान्दो. ६।१।४; ६. तत्रैव-६।८।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यासेन प्रतिनियतरूपस्यापि दीर्घत्ववर्तुलत्वादिना प्रतीतेः। अथवाऽस्तु भिन्नं पूर्वाभिमुखबिम्बसमवधाने प्रतिबिम्बस्य पश्चिमाभिमुखत्वेन प्रतीतेः। तथा च कृपाणमण्याद्यधिष्ठानेषु बिम्बभिन्नमेव आयतवर्तुलत्वादिना बिम्बावभासात्। अस्तु चाभिन्नमपि, यदुक्तमाश्रयगतधर्माध्यासेन भिन्नमिति तन्न, धर्माध्यासस्याज्ञानजन्यत्वात्। अतो बिम्बप्रतिबिम्बयोराध्यासिको भेदः। परमार्थतस्त्वभिन्नावेवोभौ। आध्यासिकभेदस्य हि परमार्थतोऽभिन्नवस्तुभेदेऽप्रयोजकत्वात्।

यत्तु जलाशयादिषु भयप्रदप्रतिबिम्बावलोकेन बालानां भीतिः। शान्तं सुन्दरं प्रतिबिम्बं दृष्ट्वा प्रीतिं चावगत्य बिम्बात् प्रतिबिम्बं भिन्नमभिमन्यन्ते तन्न, यदि प्रतिबिम्बं बिम्बाद्भिन्नं स्यात्तदा मुखबिम्बवैशिष्ट्यावलोकनाय दर्पणस्थे प्रतिबिम्बे प्रवृत्तिर्न स्यात्। भवति च प्रवृत्तिः, अतो बिम्बाभिन्नं प्रतिबिम्बमिति। यथैक एव चन्द्रबिम्बो जलमालिन्यादिदूषितः क्वचिदस्पष्टः, स एव निर्मले जले स्पष्टः प्रतिभाति। एवमेकं ब्रह्मतत्त्वमज्ञानोपाधिना जीवेशादिपदव्यवहारयोग्यं सद्भिन्नं बिम्बप्रतिबिम्बाभेदेनाभिन्नमिव भाति। तथा चोक्तम्—

"जले प्रविष्टश्चन्द्रोऽयमस्पष्टः कलुषे जले।
विस्पष्टो निर्मले तद्वद् द्वेधा ब्रह्मापि वृत्तिषु"[१]।।

निष्कलनीरूपस्फाटिकादेर्जपाकुसुमादिरागसन्निधाने प्रतीतिवन्निर्गुणनिर्विकारनीरूपस्य ब्रह्मणोऽविद्यावच्छिन्नजीवेशादिबिम्बाध्यासेन प्रतिबिम्बात्मरूपेण प्रत्ययः। शब्दशास्त्रे स्फोटात्मकशब्दस्य ब्रह्मरूपत्वं स्वीकुर्वद्भिर्वैयाकरणैर्ज्ञानस्वरूपस्यापि स्फोटस्य कत्वगत्वादिवर्णधर्मरूषितेन राम इत्यादिपदरूषितेन 'रामो ग्रामं गच्छति' इत्यादिवाक्यरूषितेन वा प्रत्ययोऽभिमतः। एवमात्मनोऽपि व्यञ्जकबिम्बसमवहितप्रतिबिम्बरूपेण प्रत्ययः।

शान्तविद्यात्मकं योंऽशस्तदु हैतदविद्या।
तया ग्रस्तमिवाजस्रं या निर्वक्तुं न शक्यते[२]।।

एकमेव ब्रह्मज्ञानोपाधिनोपहितबिम्बात्मना व्यञ्जकं तदेवाधिष्ठानरूपेण व्यङ्ग्यप्रतिबिम्बमित्यौपाधिकभेदेऽपि चित्स्वरूपमभिन्नमेव। चित्स्वरूपस्य पारमार्थिकत्वात् प्रतिबिम्बस्यापि पारमार्थिकत्वं सिद्ध्यति।

अयं भावः—सकलप्रपञ्चस्य ब्रह्मण्यध्यस्ततया चिदचिद्विशिष्टेन प्रत्ययः। तत्राचिदंशो बिम्बात्मना शरणम्, चिदंशस्तु बिम्बसङ्घातावधानेन प्रतिबिम्बरूपत्वमाधत्ते। प्रतिबिम्बस्य पारमार्थिकत्वं स्मृतिकारैरप्यभिमतम्। यथा—

---

१. पञ्चदशी-३।८; २. वाक्यपदीये हरिवृषभवृत्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"नेक्षतोद्यन्तमादित्यं नास्तं यत्तं कदाचन ।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्"[१] ।।

ननु सकलप्रपञ्चस्य बिम्बरूपेण चेतनस्य च प्रतिबिम्बरूपेण सर्वैः प्रत्ययोऽभिमतः, तत्कथं भवद्भिश्चिदंशस्य बिम्बत्वं चिदंशस्य च प्रतिबिम्बत्वमुक्तम्, तत्रोच्यतेऽचेतनप्रयुक्तावगतेरदर्शनात्। यथाऽवदातस्यापि प्रतिबिम्बस्योपाधिदोषादन्यथात्वम्। एवं चेतनत्वेऽपि प्रतिबिम्बस्योपाधिजाड्याज्जडत्वमिति। वस्तुतस्तु प्रपञ्चप्रतिबिम्बनं चेतनांशसहितमेव भवति। तत्र प्रतिबिम्बनिमित्तं श्यामत्वादिः। अधिष्ठानं चेतनमेव। अविद्यावच्छेदेन सकलप्रपञ्चस्य प्रत्ययाच्छ्यामत्वं निमित्तमुक्तम्। "स चेतनांशस्यैव वा प्रतिबिम्बत्वे प्रतिबिम्बहेतोः श्यामादिधर्मेणैव जाड्येनाप्यास्कन्दितत्वात्"।

अपरिच्छिन्नस्वरूपस्य व्यापकस्वभावस्यैव ब्रह्मणः पारमर्थिकत्वमुक्तम्। बिम्बप्रतिबिम्बयोः परिच्छिन्नदेशतयाऽव्यापकस्वभावात् तत्कथं पारमार्थिकत्वमत आह—भेदोऽध्यासिकोऽभेद एव वास्तविकः। तथा चोक्तम्—"न वयं विच्छेदावभासं पारमार्थिकं ब्रूमः, किन्त्वेकत्वम्? विच्छेदस्तु मायाविजृम्भितः"[३]। एकदेशस्थमेव मुखं सम्भ्रमाद्भिन्नं भिन्नदेशस्थमिवावभासते।

यद्यपि जीवब्रह्मणोर्बिम्बप्रतिबिम्बभावेन भिन्नत्वम्, तथापि 'सोऽयं देवदत्तः' इत्यत्र भिन्नप्रवृत्तिनिमित्तयोः सोऽयंपदयोरेकस्मिन् देवदत्तपिण्डे तात्पर्यसम्बन्धवत् तत्त्वमसीति महावाक्ये बिम्बप्रतिबिम्बभावेन भिन्नप्रवृत्तिनिमित्तयोस्तत्त्वंपदयोरेकस्मिंश्चैतन्ये तात्पर्यात्सामानाधिकरण्यम्।

अज्ञानसन्ध्येश्वरजीवभेदः स एव बिम्बप्रतिबिम्बहेतुः ।
तत्त्वंपदेऽखण्डधिया प्रबोधादुपाधिहीनो विभुरेव शिष्टः ।।
बिम्बाद्भिन्नमिदं विभाति सततं यावद्धि मायावृतं
तन्नाशात् प्रतिबिम्बबिम्बरहितं चैतन्यमेकञ्च तत्।
भेदोपाधितमोनिरावृतमिदं नित्यन्नु केचिद् बुधाः
ब्रह्मैवैकमशेषकारणमिदं तच्चास्ति सत्यं परे।।इति।

---

१. मनुस्मृतिः-४।३७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अमूर्त्तदेवतातत्त्वविमर्शः

डॉ. बनारसीत्रिपाठी
उपाचार्यः, संस्कृतविभागस्य
दीनदयाल-उपाध्यायगोरखपुरविश्वविद्यालये

❀ ❀ ❀

वैदिकदेवशास्त्रवित्सु कैश्चिदिदं स्वीक्रियते यत्पुराकाले नैसर्गिक्यो घटना एव विग्रहवत्यो भूत्वा देवरूपेण विकसिताः सञ्जाताः। तदानीन्तने समये नैसर्गिकीभिर्घटनाभिः परिचयमात्रमेव लक्ष्यं नासीत्। आसीत्तासां सम्बन्धो मानवानां व्यष्टिजीवनेन सामूहिकजीवनेनापि। नासन् सकला घटनाः समानरूपिण्यः। काश्चन भीतिजनका आसन्, काश्चन च प्रसादजनकाः। स्वाभाविकरूपेण मनुष्यो हितावहाभिर्घटनाभिरेव स्वसम्बन्धं स्थापयितुं प्रयत्नमकरोत्। एतदर्थमुपासनाः स्तुतयो वा केवलं साहाय्यमासीत्। परिणामतः कासाञ्चिद् घटनानां प्रशंसा कासाञ्चिच्च दूरेऽवस्थातुं प्रार्थना च सम्पद्यमानाभूत्। तानि सर्वाणि वस्तूनि, सर्वाश्च घटना या अस्मदर्थं भयोत्पादकानि सुखोत्पादकानि वाऽऽसन्, अथवा प्रियप्रभावमप्रियप्रभावं वोत्पादयितुं समर्थानि आसन्, तानि सर्वाण्यपि पूजार्हाणि अभूवन्। आकाश-पृथिव्यादयो ये भौतिकपदार्थास्सन्ति, तेषां दिव्यशक्तिरूपेण स्तुतयो विहिता विद्यन्ते। निश्चयेनात्रेदं प्रति दृढो विश्वास एवासीद् यन्मानवान् परित उत्पद्यमानाः सर्वा अपि घटनाश्चेतनवत्यो दिव्याश्च सन्ति। मानवनिर्मितानि वस्तूनि सहायोपकरणान्यपि च आराधनविषया अभूवन्। परं त्वत्रावश्यमवधेयमस्ति यदिमानि नेह वास्तविका देवाः; परन्त्विमानि परिव्याप्य एष्वेवावस्थिता वर्तन्ते।

अग्न्यादयो भौतिकपदार्था नैव स्तुतिविषयाः। तत्रास्ति काचिददृश्या शक्तिः, या एभिः स्थूलवस्त्वादिभिः कर्म करोति। आदौ तु प्राकृतिकतत्त्वान्येव पूजार्हाणि आसन्, परन्तु पश्चात्ताः सूक्ष्मशक्तय एव देवरूपेण मन्यमाना विलोक्यन्ते, याश्चैतेषु व्यक्तीभवन्ति। अस्यानुभूतिः सहजमेव सम्पद्यमानाऽभवद् यदेतादृशान्यपि अदृश्यतत्त्वानि सन्ति, येषां शक्तीनामभिव्यक्तिः प्रकृतौ जायते। इमाः शक्तय एव देवास्सन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मैक्डोनेलमहोदयस्य मतमस्ति यद् वेदेषु वर्णिता देवास्तु विशिष्टीकृताः मानवा एव सन्ति, ये तत्सदृशीभिराकाङ्क्षाभिः प्रेरणाभिश्च परिपूरितानां मानवानामिव अजनयन्, किन्तु ते सन्त्यमराः। सर्वेऽप्यमी गोचरीकृतघटनानां तत्त्वानां वा दिव्याः प्रतिनिधयस्सन्ति[१]।

देवो देवता च—

देवशब्दस्य पुँल्लिङ्गे देवताशब्दस्य च स्त्रीलिङ्गे प्रयोगः समुपलभ्यते। दिव्धातोर्देवशब्दस्य व्युत्पत्तिः। धातोरस्य क्रीडाविजिगीषाव्यवहारद्युतिस्तुति-मोदमदस्वप्नकान्तिगतिषु व्यवहारो दृश्यते। यास्काचार्यस्तु देवो दानाद् दीपनाद् द्योतनाद् द्युस्थानीयो भवतीति निर्वक्ति[२]। अवेस्ताभाषायामस्य सजातीयः शब्दः 'देउस्' इत्युपलभ्यते। देवताशब्दं शक्तेः पर्यायं मत्वा स्त्रीत्वस्य व्याख्यानं विदधाति। तन्मतानुसारं विशिष्टवैदिकपरम्परावशात् स्त्रीवाचकेन देवताशब्देन सह इन्द्रादीनां संसर्गो विहितः, यथा—'इन्द्रो देवता' इत्यादिरूपेण। मन्त्रैः सह यत्रैषामुल्लेखो विधीयते तत्र तस्यार्थस्तु तत्तच्छक्तय एवेति। अत एव मन्त्रविशेष-पाठेन देवताविशेषस्य किं वा शक्तिविशेषस्यावबोधो जायते। इदं चात्र कथयितुं शक्यते यदग्निवाय्वादित्यादयो न केवलां व्यक्तिं संज्ञां वा, अपि तु शक्तीरपि बोधयन्ति[३]। यास्कः पाणिनिश्चोभावपि देव एव देवता इति मन्वाते[४]।

शौनकमते तु मन्त्रार्थज्ञानायेदमावश्यकं यद् पूर्वमिदमवगन्तव्यं यन्मन्त्रस्य का देवता[५]? कस्मिंश्चिद्देवताविषये अयमिमं दातुं समर्थ इति जानन् स्तोता येन मन्त्रेण तं स्तौति, प्राधान्येन स्तुतो देव एव तस्य मन्त्रस्य देवता भवति[६]। यास्कदिशा तु "यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति"[७]। कात्यायनस्त्वेह प्रतिपादयति यदृषिवर्णितो विषय एव तन्मन्त्रस्य देवता भवति[८]।

---

१. वैदिक माइथॉलोजी, अनु. रामकुमाररायः, पृष्ठम्-३।

२. निरुक्तम्-७/१५।

३. हिन्दू देव परिवार का विकास, पृ. ६१-८३।

४. निरुक्तम्-७/१५—'यो देवः सा देवता', पा.सू. ५/४/२७-देवात्तल्।

५. बृहद्देवता-१/२-३; ६. तदेव-१/६।

७. निरुक्तम्-७/१।

८. सर्वानुक्रमणी २/४-५ 'यस्य वाक्यं स ऋषिः। या तेनोच्यते सा देवता'। द्रष्टव्यात्रैव षड्गुरुशिष्यस्य वेदार्थदीपिका—'तेन वाक्येन यत्प्रतिपाद्यं वस्तु सा देवता'।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवसंख्या—

ऋग्वेदे (३।६।९) अथर्ववेदे चोभयत्रापि देवानां संख्या त्रयस्त्रिंशन्निर्दिष्टा। अनेकत्र संख्येयमेकादशेन वारत्रयं प्रगुणीकृत्य व्यक्तीकृता दृश्यते[१]। अन्यत्र (ऋग्वेदे-१।१३९।११) स्वर्गे एकादशानां, पृथिव्यामेकादशानां जलेऽप्येकादशानां निवसतां स्तुतयः कृता विलोक्यन्ते। अथर्ववेदेऽपि (१०।९।१२) किञ्चिदेतादृशमेव वर्गीकरणं कृतं विद्यते। अत्रेदं बोध्यं यद्देवानां त्रयस्त्रिंशत्परिमिता संख्या सदैव नोपलभ्यते[२]। वाजसनेयिसंहितायां देवानां संख्या ३३३९ विद्यते। ब्राह्मणेष्वपि देवानां संख्या ३३ प्रतिपादिता। अर्वाचीनसाहित्ये तु संख्येयं कोटिमधिगता।

देवानां वर्गीकरणम्—

अध्ययनसौविध्याय कतिपयान् हेतूनाधृत्य वैदिकानां देवानां वर्गीकरणं कर्त्तुं शक्यते। ऋषिः परुच्छेपः स्तौति यद् द्युस्थानीयाः, पृथिवीस्थानीयाः, जलस्थानीया विश्वेदेवाः (११+११+११+=३३) सर्वेऽप्यत्र यज्ञे समुपस्थिताः स्युः[३]। एतदनुसृत्य यास्कोऽपि विभिन्नान् देवान् अथवैकस्य देवस्य विभिन्नरूपाणि त्रिष्वेव लोकेषु निदधाति—

(१) पृथिवीस्थानीया अथवा पार्थिवाः (निरुक्तम्-७।५)

(२) अन्तरिक्षस्थानीया अथवा माध्यमिकाः (निरुक्तम्-१०।१।११,५०)

(३) द्युस्थानीया अथवा दिव्याः (निरुक्तम्-१२।१-४६)

शौनकोऽप्येवमेव वर्णयति[४]। पूर्वेषां नैरुक्तानां मते तिस्र एव देवताः— पृथिव्यामग्निः, अन्तरिक्षे वायुरिन्द्रो वा, स्वर्गे सूर्य इति निरुक्तकृद् वर्णयति[५]। तन्मते एक एव पुरुषो होता, अध्वर्युः, ब्रह्मा, उद्गाता चेति रूपेण भिन्नं कर्म करोति, तथैव एषु त्रिषु प्रत्येकं देवतायातत्कर्मानुसारं विभिन्नान्यभिधानानि

१. ऋग्वेदः, ८/३५/३।

२. द्र. ऋग्वेदः, १/३४/११. १/४५/२, ८/३५/३, ३९/९।

३. ऋग्वेदः १/३९/११, द्रष्टव्यम्-७/३५/११, १०/४९/२, १०/६५/९;, अथर्ववेदः, १०/९/१२।

४. बृहद्देवता-१/६९-७३।

५. निरुक्तम् ७/५—'तिस्र एव देवता इति नैरुक्ताः—अग्निः पृथ्वीस्थानो वायुर्वेन्द्रो वाऽन्तरिक्षस्थानः सूर्यो द्युस्थानः। द्र. ऋग्वेदः १/१३९/११, १०/१५८/१, तैत्तिरीयसंहिता ६/६/८/३. अथर्ववेदः १०/९/१२, कात्यायनसर्वानुक्रमणीप्रस्तावना २/८—तिस्र एव देवताः क्षित्यन्तरिक्षद्युस्थाना अग्निर्वायुः सूर्य इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकल्पितानि सन्ति; परन्त्वत्र यास्को नास्ति पक्षपाती यत्सर्वेऽपि देवाः त्रयाणामेषामेव देवानां स्वरूपभूताः। अन्यत्र देवगणनाप्रसङ्गेऽल्पैश्वर्यान् देवान् तथा च दैवीकृतान् पदार्थानपि देवताकोटौ परिगणयति[१]।

कात्यायनस्तु एकामेव देवतां सर्वेषां मूले मनुते। कर्मपार्थक्येनैषां कृते पृथक् पृथग् नाम्नां स्तुतीनाञ्च विधानं विद्यते[२]।

शुनःशेपर्षिः सापेक्षिकं माहात्म्यमवलम्ब्य वृद्ध-युवरूपेण च विभज्य देवानर्चयति[३]; परन्त्वन्यत्र वैवस्वतो मनुर्विश्वेषां देवानां स्तुतौ विभेदमेवं नैव स्वीकरोति—

न हि वो अस्त्यर्भको देवासो न कुमारकः।
विश्वे सतो महान्त इत्। (ऋग्वेदः-८।३०।१)

(हे देवाः! युष्माकं मध्ये शिशुर्नास्ति, कुमारोऽपि नास्ति। यूयं सर्वे सतो महान्त इत्युच्यन्ते)।

अत्रेदमपि पश्यामो यत् तुल्यशक्तिसमन्वितानामपि देवतानां तासां विशिष्ट-गुणैः पृथक् पृथग् वर्णनं कृतमुपलभ्यते, यथा योद्धृरूपेणेन्द्रस्य, सत्यपालकत्वेन वरुणस्य, अतः परमग्निः सोमश्चायाति। प्रत्येकं देवाय समर्पितानां सूक्तानां संख्यादृष्ट्या ऋग्वेदे तन्नामावृत्त्या च देवानां पञ्च वर्गान् विधातुं शक्यते—

१. इन्द्रः, अग्निः, सोमश्च,
२. अश्विनौ, मरुतः, वरुणश्च,
३. उषा सविता बृहस्पतिः सूर्यः पूषा च,
४. वायुः द्यावापृथिवी विष्णुः रुद्रश्च,
५. यमः पर्जन्यश्च।

मैक्डोनेलमहोदयो मनुते यद्देवानामीदृशं सापेक्षिकं महत्त्वख्यापनं सर्वथा निर्दुष्टं सन्देहरहितञ्च भवितुन्नार्हति। पुराकथाशास्त्रीयाणां प्रत्ययानां सापेक्षिकत्व-मनुसृत्य तत्र सर्वथा भारतीयेरानीं भारोपीयं वा मत्वा कालक्रमेण पूर्वयुगीनं पूर्वावस्थं वा वक्तुं शक्यते; परन्तु तन्मते वर्गीकरणमीदृशमपि संशीतिगर्ते पतिष्यति[४]।

---

१. निघण्टुः, ५/२-३।
२. सर्वानुक्रमणी-प्रस्तावना—२-११,१२,१३,१४।
३. ऋग्वेदः-१/२७/१३।
४. वैदिक माइथॉलोजी, अनु. रामकुमारायः, पृ. ३६-३७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रख्यातो वैदिको भाष्यकारो महीधरः कर्मदेवाजानदेवाविति द्विधा देवान् विभजति—"द्विविधा देवाः कर्मदेवा आजानदेवाश्च। कर्मणोत्कृष्टेन देवत्वं प्राप्ताः कर्मदेवाः। सृष्ट्यादावुत्पन्ना आजानदेवाः। ते कर्मदेवेभ्यः श्रेष्ठाः। ये शतं कर्मदेवानामानन्दाः, स एक आजानदेवानामानन्दाः (बृहदारण्यकोपनिषद्-४।१।३५) इति श्रुतेः सूर्यादय आजानदेवाः"[१]। आजानदेवा एव साध्यदेवा अप्यभिधीयन्ते। इमे नाके (स्वर्गे) निवसन्ति। तपस्विनो मनुष्या देवत्वमवाप्यात्र महतीरनुभूतीः प्राप्नुवन्ति[२]। यत्र पूर्वे साध्याः सन्ति देवा इत्यत्र 'पूर्वे' इत्यनेन कालानुगतविभाजनस्यापि सङ्केतस्समुपलभ्यते। निरुक्ते (१२।४१) यास्केन वर्णितं यन्नैरुक्तानां मते साध्या द्युस्थानीया देवता इति।

सायणाचार्यः ऋग्वेदस्य १।१६४।५० मन्त्रव्याख्यानावसरे प्रतिपादयति—यज्ञादिसाधनवन्तः कर्मदेवाः, अथ च छन्दसामधिष्ठातारो देवा इति। विल्सनमहोदयस्तु 'धार्मिककृत्यानामधिष्ठातारः अथवेमे सम्पादका देवा इति रूपेण स्वीकरोति।

देवतानां वर्गनिर्धारणे यद्यप्यन्यान्यपि कारणतत्त्वानि सन्ति; परन्तु न तान्यधिकं महत्त्वमावहन्ति—

१. युग्मा अयुग्माश्च,
२. पुंल्लिङ्गाख्याः स्त्रीलिङ्गाख्याश्च,
३. विश्वरूपाः स्वरूपाश्च,
४. सर्वशक्तिमत्यः (यथादितिः) तदितरा वा,
५. निरुक्ता अनिरुक्ताश्च (अनिरुक्तः प्रजापतिः),
६. अमृतो मृतश्च (मृताः पितरः),
७. उपकारका अपकारकाश्च,
८. पुरुषविधा अपुरुषविधाश्च,
९. देवोऽसुरश्च (असुरवर्गे—रक्षांसि, राक्षसाः, असुराः, विनायकाः)
   (क) अभीष्टोऽनभीष्टश्च
   (ख) मृदुस्वभावो भयङ्करः
   (ग) देव उग्रदेवश्च।

---

१. वाजसनेयिसंहिता-३१/७, द्रष्टव्यं तदुपरि महीधरभाष्यम्।
२. द्रष्टव्यम्, ऋग्वेदः-१/१६४/५०, १०/९०/१६—'ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः'।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणेषु देवा असुराश्चान्योन्यस्य प्रतिस्पर्धिरूपेणोपवर्णितौ दृश्येते, द्वावपि मूले समानावास्ताम्। तैत्तिरीयसंहितायाः—'ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामध्यासते। अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम् (३।५।४।१)'' तथा अथर्ववेदस्य—'तन्मे भूयो भवतु मा कनीयोऽग्ने सातघ्नो देवान् हविषा निषेध-३।१५।५'' इति कथनेन च सिध्यति यद् दुरात्मानोऽपि देवता भवितुमर्हन्ति।

पाश्चात्त्यविद्वत्सु ब्लूमफील्डमहोदयो देवान् पञ्चधा विभजति[१]—

१. प्रागैतिह्यकालस्य देवताः—यासामुल्लेखो दृश्यतेऽन्येष्वार्यमण्डलेषु तथा चावेस्तायाम्, यथा—द्यौः, वरुणः, मित्रः, अर्यमा।

२. स्वरूपे पारदर्शिन्यो विस्पष्टा देवता वा—यासां देवतानां मानवीकरणमपूर्णं विद्यते याश्च देवतातिरिक्तं प्रकृतेः किमपि विशिष्टं तत्त्वं प्रकटयन्ति, यथा—अग्निः, उषा, वायुः, सूर्यः।

३. अल्पपारदर्शिन्यः, अर्धस्पष्टस्वरूपवत्यो देवताः—यासां व्यक्तित्वं स्वकारण-भूतविशिष्टप्रकृतितत्त्वात् पृथग्भूय विकसितं परन्तु नैवादृश्यं जातम्, केनचिदन्वेषणेनैव ज्ञातुं शक्यते, यथा—विष्णुः।

४. अपारदर्शिन्यः स्वरूपप्रकाशनेऽविस्पष्टा वा देवताः—या अनेकैरुपाख्यानैः संयुज्य स्वमूलरूपाद् बहुदूरमपगताः, यासां प्रभवमधिगन्तुं नास्त्यस्माकं पार्श्वे कोऽप्युपायः, यथा—इन्द्रः, वरुणः, अश्विनौ च।

५. अमूर्त्ताः, भावात्मकाः प्रतीकात्मकाश्च देवताः—या देवताः, कमपि क्रियाविशेषं भावं वा सूचयन्ति, देवतारूपेण राक्षसरूपेण वा कामपि कामनां भावं वा कमपि अभिव्यञ्जयन्ति, यथा—प्रजापतिः, विश्वकर्मा, बृहस्पतिः, पुरुषः, कालः, श्रद्धा, कामः, निर्वृतिर्मन्युर्वा।

इह तु चरमवर्गीयाणां देवानां प्रामाणिकं विवरणं दातुं प्रयासो विधास्यते। ऋग्वेदे केषाञ्चिद्देवानां प्रकृतिरमूर्त्तधारणास्वाधृतास्ति। वर्गद्वये तन्निधाय विचारयितुं शक्यते—

१. देवानाममूर्तीकरणम्,

२. अमूर्त्तसंज्ञानाञ्च दैवीकरणम्।

---

१. वैदिक देवता : उद्भव और विकास, गयाचरण त्रिपाठी, पृ. १९६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवानाममूर्त्तीकरणम्—

ऋग्वेदस्य अधिकभागेषु अग्नीन्द्रसूर्यादयो देवताः परस्परं पृथक् पृथग् रूपेण स्तुतास्सन्ति। कुत्रचिद् भिन्नं वैशिष्ट्यमावहन्तोऽपि पर्जन्य-विष्णु-सवितृ-पूषादयो देवा एभिः सह प्रशंसिता विलोक्यन्ते। एकस्याः सर्वव्यापिन्या दिव्यशक्तेः प्रकल्पनवशादग्निर्विष्णुना, वरुणेन मित्रादिभिश्च सह तथेन्द्रो वरुणेन सह समीकृतो दृश्यते—'अहमिन्द्रो वरुणः'[1]। प्रवृत्त्यानया शनैः शनैरुपाधयोऽपि सरलीकृताः, तथा किञ्चिदंशेषु परस्परमन्योन्यकृते व्यवहृता अभूवन्। एषु दिव्यशक्तिसम्पन्नायाः सर्वव्यापिदेवताया लक्षणान्यपि प्रतीतिमवाप्नुवन्। जे० मूइर-महोदयमतमस्ति यद्यदैकवारं कस्या अपि देवताया धारणा समीकृतरूपेण विस्तृता भूत्वा तस्यामेव देवतायां समस्तानपि दिव्यगुणानारोपयति, तदूर्ध्वं सोपानं प्रजापतिविश्वकर्मादिनूतनाभिधानैर्देवताया अभिव्यक्तीकरणं भविष्यति, यतो हि इमान्यभिधानानि प्रकृतेः केनाप्येकेन क्षेत्रेण सह समाश्रितं कार्यं यावत् परिमितानि नैव तिष्ठन्ति; अपि तु अपेक्षयाधिकं सामान्यममूर्त्तञ्च प्रत्ययमभिव्यञ्जयन्त ईदृशीं दिव्यशक्तिमभिकल्पयन्ति या विश्वसृष्टौ शासने च सक्रियं भवितुं शक्नोति। प्रजापतिर्विश्वकर्मा चोभे ऋग्वेदे (४।५३।२,८।९८।२) सवितुरिन्द्रस्य विशेषणे स्तः, देवते अभूताम्[2]।

मैक्डोनेलमहोदयेन येषां देवानां प्रकृतिरमूर्त्तधारणासु समाश्रिता विद्यते, तेषां वर्गद्वयं विनिर्मितम्। एकस्मिन् वर्गेऽमूर्त्तधारणानां भावानां वा यथा कामादीनां प्रत्यक्षं मूर्त्तीकरणमायाति। एतदुत्तरवर्तिषु मण्डलेषु द्रष्टुं शक्यते। द्वितीयो वर्गस्त्वतिविस्तृतः। अस्मिन् 'तृ'प्रत्ययान्तैर्धातुभिर्व्युत्पन्ना धातृकर्त्रादिरूपाः संज्ञाः सन्त्यथवा कस्यापि गुणविशेषस्य प्रजापत्यादिरूपस्य द्योतकाः सन्ति। वर्गस्यास्य देवता आदावेकस्मै अधिकेभ्यो वा देवेभ्य उपाधिरूपेण व्यवहृता आसन्, येनोपाधिना कस्यचिद् व्यवहारस्य चरित्रस्य वा अभिव्यक्तिर्जायते स्म।

ईदृशाश्चोपाधयः क्रमेण विशेष्यं विहाय पृथग्भूय चान्ततो गत्वा स्वतन्त्रं स्थानं गृहीतवन्तः। यथा रोहितः (स्त्रीलिङ्गे रोहिणी), योऽस्ति सूर्यस्योपाधिरेकः सृष्टिकर्तृरूपेणाथर्ववेदे एकः स्वतन्त्रो देवता अभूत्[3]।

इह तावत् 'तृ'प्रत्ययान्तानां देवानां विवेचनं विधीयते—

---

१. ऋग्वेदः-४/४२/३।

२. मूल संस्कृत-उद्धरण, अनु. रामकुमाररायः, पञ्चमो भागः, पृ. ३४८।

३. अथर्ववेदः, १३/१/६, २/३९, ३/२३, द्र. वैदिक माइथॉलोजी, अनु. रामकुमाररायः पृ. २१८-२१९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धाता—

(धा+तृ) धातुर्देवतात्वेन स्वतन्त्रोल्लेखो दशमे मण्डलेऽवाप्यते[१]। ऋग्वेदे विभिन्नानां देवानामुपरि लोकानां धारणात्मिकाया घटनाया आरोपः कृतो विद्यते। आरोपस्येदृशी धारणैव क्रमेणैकस्यैवम्भूतस्य देवस्य धारणां समुदपादयत्, यो देवः स्वयमपीदं विशिष्टं कार्यं कर्तुं प्रभवति।

ऋग्वेदस्य १०।१९० सूक्तेऽयं सूर्यस्य, चन्द्रमसः, आकाशस्य, पृथिव्याः, वायोश्च जनिकर्त्ता निगदितः। अन्यत्रास्योल्लेखो दृष्टिप्रदातृत्वेन (ऋग्वेदः-१०।१५८) तथा च सन्तानप्रदातृत्वेन (ऋग्वेदः-१०।१८४) कृतो विद्यते। निघण्टौ (५।५) माध्यमिकदेवेषु धातुगणनोपलभ्यते। अनन्तरञ्च प्रजापतेर्ब्रह्मणः समकक्षमेव धाता अपि विश्वस्रष्टा विश्वपालकश्चाभूत्।

त्राता—

(त्रा+तृ) अस्यार्थोऽस्ति रक्षकः। प्रायशोऽयमग्नेरिन्द्रस्यादित्यानां वोपाधिरूपेण व्यवहृतो जातः। ऋग्वेदस्य पञ्चसु स्थलेषु रक्षकदेवस्यार्थेऽयं स्वतन्त्ररूपेण प्रयुक्तो विद्यते[२]।

देवनेता—

(< देव+नेतृ < √नी+तृ) अयमस्ति नायको देवता। ऋग्वेदस्य ५।५० सूक्ते देवनेतुरावाहनं जीवने समृद्ध्यर्थं पथप्रदर्शकत्वेन कृतं विद्यते।

त्वष्टा—

(< त्वष्टृ < √तक्ष्+तृ) 'तृ'प्रत्ययान्तर्गतेष्वमूर्त्तदेवेषु सवित्रपेक्षया त्वष्टुरल्पोल्लेखः प्राप्यते। प्रायशो बाहुल्येन अस्योल्लेखः प्रथमे सप्तमे च मण्डले जातः। अयञ्च पञ्चषष्टिवारं प्रयुक्तोऽस्ति; परन्त्वस्य कस्याप्यङ्गस्योल्लेखो नास्ति। देवोऽयं सुगभस्तिः सुपाणिश्चास्ति। अयं शिल्पीति वर्णितः। सर्वरूपो विश्वरूपश्चायम्। त्वष्टा सोमस्याभिभावकोऽस्ति। मैक्डोनेलमहोदयस्तु त्वक्ष्-धातोर्व्युत्पन्नं मत्वा अस्यार्थो निर्माणकर्त्तेति शिल्पी वेति मनुते[३]। वैदिकदेवेष्वस्त्ययमत्यन्तमविस्पष्टो देवः। ओल्डेनबर्गमहोदयस्य विश्वासोऽस्ति यदयं कस्याश्चिद् विशिष्टक्रियाया अभिव्यञ्जकोऽमूर्त्तः शब्दः[४]।

---

१. ऋग्वेदः-१०/८२, १२८, १६७, १९०।

२. तदेव-१/१०६/७, ४।५५/५,७, ८/१८/२०, १०/१२८/७।

३. वैदिक माइथॉलोजी, अनु. रामकुमारराय:, पृ. २२३।

४. तदेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सविता—

(सवितृ < √सु+तृ) ऋग्वेदस्य महत्त्वपूर्णेषु देवेषु अद्वितीयोऽस्ति देवः सविता। सु < सू-धातोर्वायं व्याख्यातः। प्रसवितृ-प्रसवादिशब्दानां प्रयोगः सवित्रा सहोपलभ्यते। धातावस्मिन् प्रेरणादानस्योद्दीप्तकरणस्य जागृतिकरणस्यैश्वर्य-प्रदानस्योत्पत्तिकरणस्य रससवनादिकस्याशया निहितास्सन्ति। मैक्डोनेलमहोदयस्य मतं यत्—मूलतो भारत एव व्युत्पन्न उपाधिरेकोऽस्ति सविता, यश्च विश्वस्यान्यासु सर्वासु गतिषु प्रधानानां महत्त्वपूर्णानां गतीनां प्रतिनिधित्वेन जीवनस्य गतीनां च महत्प्रेरकत्वेन सूर्याय प्रयुक्तो विद्यते। ऋग्वेदे यजुर्वेदेऽथर्ववेदे ब्राह्मणेषु च सवितुर्वर्णनं प्राचुर्य्येणोपलभ्यते। नास्त्यत्र सवितुर्मूर्त्तरूपस्य वर्णनमुद्देश्यमपि तु लक्ष्यमस्ति यत् 'तृ'प्रत्ययान्तोऽयं सविता देवः परिस्थितिविशेषेषु कथममूर्त्तो जात इति।

अयमस्ति प्रेरकत्वेन सूर्यस्यैवोपाधिरिति पूर्वं वर्णितम्; परन्तु सूर्यात् पृथक्त्वे सति अपेक्षाकृतमाधिक्येनामूर्त्तो देवः। ओल्डेनबर्गमहाशयो भणति—'वास्तविकरूपेण प्रेरणाया एव एकस्या धारणायाः प्रतिनिधित्वं भजते। एतच्चरित्रे सूर्योऽथवा कस्यामपि दशायां सूर्यसम्बन्धिनी धारणा प्रायशो गौणरूपेणैव संयुक्ता विद्यते[1]। ऋग्वेदे सन्त्यनेके सन्दर्भा ईदृशा ये सूर्यात् सवितारं विस्पष्टरूपेण पृथक् कुर्वन्ति (१।३५।९, १२३।३, ५।८१।४)।

सायणमते तूदयात्पूर्वभावी सविता, उदयास्तमयवर्ती सूर्य इति[2]। यास्कमते तु स एवास्ति समयः सवितुर्प्राकट्यस्य यदान्धकारोऽपसृतो भवति प्रकाशरश्मयश्चाकाशे विकीर्णा भवन्ति[3]; परन्तु ऋग्वेदस्यान्येष्वनेकेषु सन्दर्भेषु (यथा—७।३५।८,१०, ६६।४, १०।१३९।१,१८१।३) सूर्योदयात् प्राक् स्तोतॄनभिप्रेरयितुं मित्रेणार्यम्णा भगेन च सहास्यार्चनमवाप्यते (७।६६।४-'यदद्य सूर उदितेऽनागा मित्रो अर्यमा। सुवाति सविता भगः')। ऋग्वेदस्य १०।१८१।३ मन्त्रे सूर्यसवित्रोः पार्थक्यमेवाभिमतम् (द्र. १।१५७।१), तथाप्यन्यस्थलेषु उभयोरप्येकदेवतात्वेन प्रयोगो जातः[4]।

---

१. वैदिक माइथॉलोजी, अनु. रामकुमाररायः, पृ. ६३-६४।

२. ऋग्वेदभाष्यम्-५/८१/४।

३. निरुक्तम्-१२/१२—'तस्य कालो यदा द्यौरपहततमस्काकीर्णरश्मिर्भवति'।

४. द्र. ऋग्वेदः, ४/१३/२, १०/१५८/१ तथा च १/३५/७, १२४/१, ७/६३/१-४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सवितुः समीकरणं मित्रेण पूष्णा सहापि दृश्यते; परन्तु ऋग्वेदस्य ३।५४।११-१२,६।४९।१४,५०।१,१३, ८।१८।३,९।१।६, १०।१३९।१ ईदृशेषु स्थलेषु एभ्यस्तथा चान्येभ्योऽपि देवेभ्यः सवितुर्व्यक्तो भेदः परिलक्ष्यते। इदमत्रावधेयं यत् सवितुः प्रयोगो व्यक्तिवाचकनाम्ना सहैवोपाधावपि कृतो दृश्यते (ऋग्वेदः-२।३०।१,३।५५।१९, १०।१०।५)।

अदितिः—

उपाधिरूपेऽदितिरेकामूर्त्ता धारणास्ति। ऋग्वेदस्य १।११३।१९ मन्त्रेऽदित्या सहोषसः समीकरणं कृतं विद्यते। निरुक्ते (४।२२) देवमातारूपेणेयं प्रख्यापिता—'अदीना देवमाता'। जे० मूइरमहाशयानां मते तु अदितिर्नित्यत्वे नित्ये वा रूपे एवंभूतं तत्त्वमस्ति यदादित्यं धारयति यच्चादित्या धारयन्ति। स्वप्रकृतिवशाद् वेदेष्वियं धारणा निश्चयेन मूर्त्तीकरणपर्यन्तं नैव नीता दृश्यते। यद्यप्येतद्विषयकप्रयासानामभावो नैवास्ति[1]।

ऋग्वेदे (१।२४।१) अदितेरमूर्त्तीकृतोऽर्थः स्वतन्त्रतेति प्रतिभाति; परन्त्वनन्तरमस्य मूर्त्तीकरणमनुष्ठितम्।

डॉ. गयाचरणत्रिपाठिमते 'अदितिस्वरूपस्य मूलाधारविषये निश्चयेन किमपि वक्तुमतीव कठिनमस्ति। प्रायः सर्वेऽपि विद्वांसोऽनेन सह सम्मतिं प्रदर्शयन्ति यद् अदितिरस्ति मूलत एकाऽमूर्त्तस्वरूपा भावात्मिका देवी' तथा प्रकृतेः केनचित्तत्त्वेन नास्ति तस्याः सम्बन्धो विशेषः[2]।

विश्वकर्मा प्रजापतिर्वा—

ऋग्वेदस्य दशमे मण्डले विश्वकर्मणो देवतात्वेनोल्लेखः प्राप्यते। आदाविन्द्रस्योपाधिरेक आसीद् विश्वकर्मा। ऋग्वेदे (१०।१७०।४) प्रयुक्तोऽयं दृश्यते सूर्योपाधिरूपे। अयमस्ति परमा संदृक्, धाता, विधाता चापि। स्वीयविशेषगुणनिर्मित्या 'अयमस्ति विश्वकर्मा', यश्च ब्राह्मणेषु प्रजापतिर्निगदितः। ऋग्वेदस्य ४।५३।२ मन्त्रे प्रजापतिः सवितुरुपाधिरूपेण व्यवहृतः। देवतासु सर्वोत्कृष्टत्वेन प्रजापतिः स्तुतः। अयमन्वर्थेऽस्ति प्रजापतिः प्रजानां पालकत्वात्। वस्तुतो ब्राह्मणेष्वेव देवतारूपेणायं प्रथमं प्रकल्पितः।

---

१. मूल संस्कृत उद्धरण, पञ्चमो भागः, पृ. ४१।

२. वैदिक देवता : उद्भव और विकास, पृ. ७०३, विस्तरेण द्रष्टव्यम् Aditi and other Dities in the Veda—M.P. Pandit

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संहिताब्राह्मणयोरनेकेष्वाख्यानेष्वस्योल्लेखो विद्यते। प्रजापतेरुपाधिरूपे 'कस्मै' इत्यस्य प्रयोगो बहुधोपलभ्यते। ऋग्वेदस्य १०।१२१ सूक्ते स्तुतो हिरण्यगर्भो देवः तैत्तिरीयसंहितायां (५।५।१) प्रजापतिना साकं समीकृतो दृश्यते। पश्चात्त्वस्य ब्रह्मणैव सह सम्बन्धो जातः[१]।

ब्रह्मणस्पतिः—

ऋग्वेदस्य १०।७२ सूक्तानुसारं देवसृष्टिर्ब्रह्मणस्पतिदेवानुग्रहेणैव जाता, तथापीतरान् सन्दर्भानधिकृत्य वयं जानीमहे यद् वस्तुतोऽदितिदेवताया अनन्तरमेव सत्तायां देवगणो दृश्यते। दक्षोऽदितिश्च मिथः प्रजनेन समुत्पन्नौ स्तः।

वास्तोष्पतिः—

इदञ्च नाम ऋग्वेदे सप्तवारं प्रयुक्तं विद्यते। ऋग्वेदस्य ७।५४ सूक्तेऽस्य प्रशस्तिर्वर्तते। तस्यैव ७।५५।१ मन्त्रेऽयं व्याधीनां हर्त्ता कामरूपा व्यक्तिश्चेति रूपेण वर्णितः।

सोमेन त्वष्ट्रा च सह समीकृतोऽयम्। ऋग्वेदस्य ८।१७।४४ मन्त्रेऽस्य समीकरणमिन्द्रेण सहोपलभ्यते। ऋग्वेदे (१०।६१।७) देवनिर्मितविधानानां परिपालकत्वेनायं वर्णितः। गेल्डनरमहोदयमते तैत्तिरीयसंहितायां (३।४।१०।३) अयमस्ति रुद्रस्योपाधिः। अन्वर्थेऽयमस्ति निवासानां रक्षक इति मन्यते।

स्कम्भः—

अथर्ववेदेऽस्य स्तुतिः सर्वदेवरूपेणोपलभ्यते[२]। अयं पुरुषेण ब्रह्मणा च सह समीकृतः प्रतिभाति। अस्याङ्गेषु मूर्तिमतो जगतो विभिन्नांशैः समं तपः श्रद्धा सत्यं कालः' इत्यादिरूपा अमूर्तधारणा अपि निहिता विद्यन्ते।

गोल्डस्टुकरमते तु एकस्यैव धातोर्विभिन्नरूपे स्तः स्कम्भधातुः स्तम्भधातुश्च। स्कम्भः स्तम्भ एवास्ति। अयमस्ति सम्पूर्णस्य विश्वस्यालम्बः।

रोहितः—

अयमस्त्यग्नेः सूर्यस्य वैकं रूपम्। अथर्ववेदे (१३।१, १३।२।३९) आकाशस्य पृथिव्याश्च प्रकटयितृरूपेण रोहितो वर्णितः। स तु यज्ञस्य प्रकाशको

---

१. वैदिक माइथॉलोजी, अनु. रामकुमाररायः, पृ. २२४-२२६ तथा जे.मूइर-मूल संस्कृत उद्धरण, पृ. ३५०-३५१।

२. अथर्ववेदः, १०/७/२,८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुखञ्चास्ति। अयं सर्वत्र विचरणशीलः सर्वेषां रक्षकः। एकत्र रोहितस्य सम्भवो देवेभ्य एव वर्णितः (अथर्ववेदः-१३।२।२३)।

मन्युः—

मन्युर्क्रोधो वैका भावात्मिका अमूर्त्तसंज्ञा। ऋग्वेदस्य सूक्तद्वयेऽस्यावाहनं कृतं विद्यते। अयमस्ति वृत्रघ्नः, दुर्जेयः प्रकाशमानो बलस्य देवता। अयं तपसा सह मिलित्वा स्वीयान् स्तोतॄन् रक्षति।

उच्छिष्टः—

(बलम्) अथर्ववेदे (११।७) उच्छिष्टस्य स्तुतिर्विहिता विद्यते। अस्मादेव सर्वेऽपि प्राणिनो देवता ऋचः पितरो मात्रादयश्च प्रजायन्त इति वर्णितम्।

प्राणः—

प्राणस्यापि दैवीकरणं कृतम्। अयं प्रजापतिना तथा केषुचिन्मन्त्रेषु पर्जन्येन सहापि समीकृतो विद्यते। (द्र. अथर्ववेदः, ११।४)

मनः—

ऋग्वेदस्य १०।५८ सूक्ते मनसो महिमा वर्णितः। यथोक्तसूक्तस्य समेष्वपि द्वादशमन्त्रेषु 'मनो जगाम दूरकम्' इत्यस्य पौनःपुन्येनावृत्तिरुपलभ्यते। याज्ञवल्क्येनर्षिणाऽपि (वाजसनेयिसंहिता ३४ अध्यायः) मनसस्स्तुतिः कृता।

कामः—

ऋग्वेदस्य १०।१२९।४ सूक्ते कामो मनसः प्रथमं बीजमुपवर्णितः। अथर्ववेदे (९।२, १९।५२) अस्य मूर्तीकरणमपि दृश्यते। अयमस्तीच्छायाः पूरयिता देवः। अथर्ववेदे (३।२५।१) अस्य बाणानामप्युल्लेखो विद्यते।

कालः—

अथर्ववेदे (१९।५३,५४।७) कालस्य मूर्तीकरणं विश्वस्य निर्माता काल एवेत्येवंरूपेण विहितं विद्यते।

मृत्युः—

ऋग्वेदस्य १०।१८।१-४ मन्त्रेषु देवतारूपेणास्य स्तुतिः कृतोपलभ्यते।

ज्ञानम्—

ऋग्वेदस्य १०।७१ सम्पूर्णं सूक्तं ज्ञानदेवतायै समर्पितम्। ऋत्विक्कर्मणां विभागवर्णनपरो मन्त्रः 'ऋचां त्वं पोषमास्ते' सूक्तस्यास्य चरमो मन्त्रः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दानम्—

ऋग्वेदस्य सूक्तद्वये (१।१२५,१०।११७) दानक्रियाया दैवीकरणं कृतं विद्यते।

श्रद्धा

श्रद्धायाः प्रशस्तिः ऋग्वेदस्य १०।१५१ सूक्ते विहिता वर्तते। अस्यावाहनं प्रातः, मध्याह्ने सायं रात्रौ च क्रियते। अग्नेर्प्रज्वालनं घृतार्पणञ्च अनयैवानुष्ठीयते। इयं च सम्पत्तिदात्री।

अनुमतिः—

अग्नेः स्तवनमनुग्रहाय, येन स्तोतारो बहुकालपर्यन्तं सूर्यावलोकने समर्थाः स्युः, सम्पाद्यते। (द्र. ऋग्वेदः, १०।५९।६,१०।१६७।३)। अथर्ववेदे (७।२०) प्रेम्णः प्रजननस्य वाजसनेयिसंहितायां (३४।८,९) सुख-शान्ति-समृद्धीनामधिष्ठात्री देवी भूत्वा परिदृश्यमाना लक्ष्यते।

अरमतिः (भक्तिः)—

इयमपि देवतात्वेन वर्ण्यमाना दृश्यते[1]। एवं प्रतिभाति यदवेस्तायाः 'आर्मैति' अस्या एव प्रतिच्छाया।

सुनृता (उदारता)—

अस्योपाधेरपि देवतारूपेण मूर्तीकरणं कृतं विद्यते।

असुनीतिः—

ऋग्वेदे (१०।५९।५-६) अस्या देवतात्वेन वर्णनमुपलभ्यते। दीर्घजीवनाय, शक्त्यर्थं परिपोषणाय चास्याः स्तुतिः सम्पद्यमाना वर्तते।

निर्ऋतिः (रोगः, दुर्भाग्यम्)—

ऋग्वेदस्य १०।५९ सूक्तेऽस्या मूर्तीकरणं मृत्योरधिष्ठातृत्वेन क्रियमाणं विद्यते। अस्यामपगतायां सत्यां यजमानः परमायुषा यौवनेन च युक्तो भूत्वाभिवर्धते।

रतिः—

ऋग्वेदस्य १।१७९ सूक्ते अस्या देवतात्वेन स्तुतिरुपलभ्यते।

---

१. ऋग्वेदः २/३४/८, ५/४३/३, ५४/६, ७/१/६, ३४/२१, ३६/८, ४२/३, ८/३१/१२, १०/६४/१५, १२/४/५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः—

वाजसनेयिसंहितायां (३१।२२) श्रीर्लक्ष्मीश्चादित्यस्य पत्न्याविति वर्णितम्। शतपथब्राह्मणे चेयं सौभाग्यस्य सौन्दर्यस्य च मूर्तीकृतं रूपमस्ति।[१]

संक्षेपेणात्र वैदिकदेवेष्वमूर्त्तदेवतानां वैशिष्ट्यमधिकृत्य पर्यालोचनं प्रवर्तितम्। उपर्युक्तदेवताभ्यो भिन्ना इतरा वा देवता विद्यन्ते, यासां चारित्रिकं वैशिष्ट्यं स्वरूपं वा नैव व्यक्ततरं प्रतीयते; परन्तु विहितस्तुतिकर्मणा एतासु देवत्वाधानं कर्त्तुं शक्यते। बृहस्पतिः सुखमायुरित्यादयो देवता अस्यामेव कोटावायान्ति, यासां देवतात्वमथर्ववेदे स्वीकृतमिति।

●

१. शतपथब्राह्मणे (११/४/३/१-४)—प्रजापतिर्वै प्रजाः सृजमानोऽतप्यत। तस्माच्छ्रान्तात्ते पानाच्छ्रीरुदक्रामत्। सा दीप्यमाना भ्राजमाना लेलायन्त्यतिष्ठत्। ता दीप्यमानां भ्राजमानां लेलायन्तीं देवा अभ्यध्यायन्।।१।। ते प्रजापतिमब्रुवन्। ह नामेमाम् आ इदमस्या ददामहा इति। स होवाच स्त्री वा एषा यच्छ्रीः। न वै स्त्रियं घ्नन्ति। उत त्वा अस्या जीवन्त्या एवाददत इति।।२।। तस्या अग्निरन्नाद्यमादत्त। सोमो राज्यम्। वरुणः साम्राज्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दर्शनानामास्तिकनास्तिकत्वविमर्शः

डॉ. हरिप्रसाद-अधिकारी
उपाचार्यः
तुलनात्मकधर्मदर्शनविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

❀ ❀ ❀

भारतीयदर्शनेषु मुख्यतः षड्दर्शनान्यास्तिकदर्शनत्वेन प्रसिद्धानि सन्ति। तानि च सांख्य-योग-न्याय-वैशेषिक-पूर्वोत्तरमीमांसापदवाच्यानि वर्तन्ते। एवमेव चार्वाक-जैन-बौद्धदर्शनानि नास्तिकत्वेन परिगण्यन्ते। भारतेऽन्यत्रापि च प्रायः सर्वेषु विश्वविद्यालयेषु महाविद्यालयेषु चेत्थमेवाध्ययनमध्यापनञ्च क्रियते। दर्शनानामास्तिकत्वनास्तिकत्वयोर्निर्धारणे किं मानमित्यत्र न तावत्स्पष्टतया साम्प्रदायिकदृष्ट्या च केनापि चिन्तितमिति धिया विषयमिममाश्रित्य विवेचनात्मकदिशा शास्त्राण्यनतिक्रम्य किञ्चित् प्रस्तूयते। प्रायशो विद्वद्भिरास्तिकनास्तिकयोर्निर्धारणे मनुप्रोक्तं पद्यमिदं प्रमाणत्वेनोपस्थाप्यते—

योऽवमन्येत द्वे मूले हेतुशास्त्राश्रयाद् द्विजः।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः।।

परं व्याकरणशास्त्रसमुन्नायकः पाणिनिमुनिस्तु "अस्ति नास्ति दिष्टं मतिः"[२] इति सूत्रं सूत्रयन् परलोकमतियुक्तायुक्तयोरेवास्तिकत्वं नास्तिकत्वञ्च प्रोवाच। सूत्रमिदं व्याख्यातृभिस्तत्परवर्तिवैय्याकरणैरेवं व्याख्यातम्—

(क) अस्ति परलोके मतिर्यस्य स आस्तिकः।

(ख) नास्ति परलोके मतिर्यस्य स नास्तिकः।

एवमेव लोकप्रसिद्धिमाश्रित्येदमपि कल्पयितुमुचितम्—

(क) अस्तीश्वरे विश्वासो यस्य स आस्तिकः।

---

१. मनुस्मृतिः-२।११; २. पाणिनीयाष्टाध्यायी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ख) नास्तीश्वरे विश्वासो यस्य स नास्तिकः।

एवं रीत्याऽऽस्तिकनास्तिकत्वयोर्निर्धारणे मानदण्डत्रयं सुस्थितम्—

१. वेदप्रामाण्यम्, २. परलोके विश्वासः, ३. ईश्वरे विश्वासश्च।

वैदिकपरम्परायां वेदानां सर्वोत्कृष्टं स्थानं स्वीक्रियते। वेदा धर्ममूलत्वेन स्मृतिमूलत्वेन च सम्यक् प्रतिष्ठिताः। वेदविरुद्धं किमप्यत्र सोढुं न शक्यते। वेदस्य सर्वज्ञानमयत्वं प्रतिपादयता स्वयमेवोक्तं मनुना—

यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः[१]।।

अत्र तावदिदमवधेयं यद् वेदप्रामाण्यमधिकृत्य प्राक्कालत एव दार्शनिकेषु विवादो दृष्टिपथमायाति। चार्वाक-जैन-बौद्धैः स्वस्वदृष्ट्या वेदानां समालोचनं खण्डनञ्च कृतं वर्तते। बौद्धविदुषा धर्मकीर्तिना जडतायाः पञ्चलिङ्गानि वर्णितानि, तेषु प्रथमं लिङ्गं वेदप्रामाण्यमेव वर्णितम्। तद्यथा—

वेदप्रामाण्यं कस्यचित् कर्तृवादः स्नाने धर्मेच्छा जातिवादावलेपः।
सन्तापारम्भः पापहानाय चेति ध्वस्तप्रज्ञानां पञ्चलिङ्गानि जाड्ये[२]।।

ख्यातनामा नैय्यायिको धर्मकीर्तिः किमर्थं वेदप्रामाण्यं जाड्यलक्षणत्वेनोपवर्णयामास, तथ्यस्यास्यावबोधाय किञ्चिद् बौद्धसिद्धान्तपरिशीलनमावश्यकं प्रतीयते। समासतो बौद्धदर्शनस्य वैशिष्ट्यचतुष्टयमवलोकयितुं शक्यते। यथा हि—

१. अनीश्वरवादः, २. अनात्मवादः, ३. स्वतःप्रामाण्यनिरासः (ग्रन्थस्य), ४. पुनर्जन्मनि विश्वासः।

अत्र तावत्प्रसङ्गोपात्तं वेदप्रामाण्यसिद्धान्तमेव विवेचयितुमुपक्रम्यते— बौद्धनये कस्याप्येकस्य स्वतःप्रामाण्यस्वीकरणं बुद्धेरुपेक्षाकरणमस्ति, पुनश्चैतेन जगतीतले पूर्णमतैक्यासम्भवाद् बहूनां धर्म-सम्प्रदायानाञ्च सत्त्वात्, तत्तद्धर्म-सम्प्रदायानाञ्च पृथक् पृथग् धर्मग्रन्था भविष्यन्ति। ते च सर्वे यदि स्वस्वधर्मीयं ग्रन्थं स्वतःप्रमाणं स्वीकुर्युस्तदा जगति सर्वधर्मसमभावकल्पनमेव व्यर्थं भविष्यति।

स्वतःप्रामाण्यविरुद्धं बौद्धा इत्थं चिन्तयन्ति—बुद्धिसाहाय्यं विना वेदप्रामाण्यस्य प्रमाणीकरणं कर्तुं न शक्यते। अतो बुद्ध्यधीनत्वाद् ग्रन्थस्वतः-

१. मनुस्मृतिः-२।६।

२. प्रमाणवार्तिकं स्ववृत्तिः-१।३४२ बौद्धदर्शने राहुलसांकृत्यायनेनोद्धृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रामाण्यवादः स्वीकर्तुं नैव शक्यते। प्रसिद्धो बौद्धविद्वान् राहुलसांकृत्यायनमहोदयो वेदप्रामाण्यखण्डनप्रसङ्गे लिलेख—

"कस्यापि ग्रन्थस्य स्वतःप्रामाण्यस्वीकरणं नाम तत्रोक्तविषयेषु सन्देहाभावो भवति, सन्देहाभावाच्च जिज्ञासाहानिर्जायते। जिज्ञासाहानेः कस्यापि नवीनचिन्तनस्य समाप्तिः, नवीनचिन्तनसमाप्तिश्च प्रगतेर्बाधिका भवति। एवमेव ग्रन्थस्य स्वतःप्रामाण्यस्वीकारेण तत्कर्तुरपि सर्वज्ञत्वं स्वीकर्तव्यं भविष्यति। अस्यामवस्थायां मनुष्यस्तु केवलं तस्य सर्वज्ञस्य सर्वशक्तिसम्पन्नस्य क्रीडासाधनमात्रं भविष्यति। एवं क्रीडासाधनभूतैः स्वस्य कृते शुभाशुभयोश्चयनं कथं कर्तुं शक्येत? परतन्त्रमानवस्य बहुषु धार्मिकविषयेषु ग्रन्थेषु च प्रवृत्तेः किं प्रयोजनम्?

अतो मुक्तिहेतोर्मनुष्यस्य कर्मस्वातन्त्र्यं परमावश्यकमस्ति, कर्मस्वातन्त्र्यार्थं बुद्धिस्वातन्त्र्यमावश्यकम्, बुद्धिस्वातन्त्र्यार्थं कस्यापि ग्रन्थस्य स्वतःप्रामाण्यमनावश्यकमनपेक्षितञ्च। वस्तुतो ग्रन्थप्रामाण्यं बुद्ध्यधीनं भवति, न तु बुद्धिप्रामाण्यं ग्रन्थाधीनम्[१]।

इत्थं विवेचनाधारेणास्तिकनास्तिकयोर्निर्धारणे केवलं वेदा न प्रमाणम्; अपि तु वस्तुतः पुनर्जन्मनि विश्वास एवास्तिकत्वसाधक इति। अत एव मूलमाध्यमिककारिकाप्रसन्नपदाटीकायां बौद्धविदुषाऽऽचार्यचन्द्रकीर्तिना कथ्यते—"अत्रैके परिचोदयन्ति—नास्तिकविशिष्टा माध्यमिका यस्मात् कुशलाकुशलं कर्म कर्तारं च फलं च सर्वं च लोकं भावस्वभावशून्यमिति ब्रुवते। नास्तिका अपि हि एतन्नास्तीति ब्रुवते। तस्मान्नास्तिकविशिष्टा माध्यमिका इति?

नैवम्, कुतः? प्रतीत्यसमुत्पादवादिनो हि माध्यमिकाः, हेतुप्रत्ययान् प्राप्य प्रतीत्यसमुत्पन्नत्वात् सर्वमेवेहलोकपरलोकं निःस्वभावं वर्णयन्ति। यथास्वरूपवादिनो नैव नास्तिकाः प्रतीत्यसमुत्पन्नत्वाद् भावस्वभावशून्यत्वेन न परलोकाद्यभावं प्रतिपन्नाः। किं तर्हि? ऐहलौकिकं वस्तुजातमुपलभ्य स्वभावतस्तस्य परलोकादिहागमनम्, इहलोकाच्च परलोकगमनमपश्यन्त इहलोकोपलब्धपदार्थसदृशपदार्थान्तरापवादं कुर्वन्ति। तथापि वस्तुस्वरूपेण अविद्यमानस्यैव ते नास्तित्वं प्रतिपन्ना इत्यमुना तावद्दर्शनेन साम्यमस्तीति चेत् नहि, कुतः संवृत्या माध्यमिकैरस्तित्वेनाभ्युपगमान्न तुल्यता वस्तुतस्तुल्यतेति चेत्, यद्यपि वस्तुतोऽसिद्धिस्तुल्या तथापि प्रतिपत्तृभेदात्तुल्यता। यथा हि कृतचौर्यं पुरुषमेकः सम्यगपरिज्ञायैव तदमित्रप्रेरितस्तं मिथ्या व्याचष्टे—चौर्यमनेन कृतमिति, अपरस्तु

१. बुद्धदर्शने पं. राहुलसांकृत्यायनस्य, ९-१० पृष्ठयोः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साक्षाद्दृष्ट्वा दूषयति। यद्यपि वस्तुतो नास्ति भेदस्तथापि परिज्ञातृभेदादेकस्तत्र मृषावादीत्युच्यते, अपरस्तु सत्यवादीति, एकश्च अयशसा चापुण्येन च सम्यक् परीक्ष्यमाणो युज्येत नापरः, एवमिहापि यथावद्विदितवस्तुस्वरूपाणां माध्यमिकानां ब्रुवतामवगच्छतां च वस्तुस्वरूपाभेदेऽपि यथावदविदितवस्तुस्वरूपैर्नास्तिकैः सह ज्ञानाभिधानयोर्नास्ति साम्यम्। यथैव हि उपेक्षासामान्येऽपि अप्रतिसंख्याय प्रतिसंख्याय उपेक्षकयोरिव पृथग्जनार्हतोर्जात्यन्धचक्षुष्मतोश्च विषमप्रपातप्रदेश-विनिश्चितसामान्येऽपि यथास्ति महान् विशेषः, तथा नास्तिकानां माध्यमिकानाञ्च विशेषो भविष्यतीति पूर्वाचार्याः''[१]।

एतेनेदं सुसिद्धं यद् बौद्धा नास्तिकत्वं नाङ्गीकुर्वन्ति। पाणिनिपरिभाषया चैते भवन्त्यास्तिकाः। एवमेव पुनर्जन्मकर्मफलस्वीकाराज्जैना अपि भवन्त्यास्तिकाः। किं तर्हि प्राचीनकालात्प्रवर्तमानो नास्तिकास्तिकयोर्विभागो विवादश्च समाप्तिं यास्यतः? प्रश्नस्यास्य समाधानाय गभीरं शास्त्रचिन्तनमपेक्ष्यते। यदि निराग्रहदृष्ट्या कार्यमिदं प्रारभ्यते चेदवश्यमेव किमपि सौहार्दकरं समाधानमासादयितुं शक्यते। वस्तुतो बौद्धाः किमपि प्रमाणप्रमेयादिकं न स्वीकुर्वन्तीति कृत्वा तन्नास्तिकत्वं साध्यते, परं वर्तमानकाले बहूनां लुप्तबौद्धग्रन्थानां प्राप्त्या तत्तत्त्वप्रियत्वं प्रमाणयितुं शक्यते। तत्त्वलक्षणं प्रतिपादयताऽऽचार्यनागार्जुनेनोट्टङ्कितं मध्यमकशास्त्रे—

अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् ।
निर्विकल्पमनानार्थमेतत्तत्त्वस्य लक्षणम्[२] ।।

एतत्पद्यतात्पर्यं प्रकाशयन्नाह चन्द्रकीर्तिः—परमार्थसत्यं कतमत्? यत्र ज्ञानस्याप्यप्रचारः कः पुनर्वादोऽक्षराणामिति? तत्त्वज्ञानफलं वर्णयता तेन पुनरलेखि—एतद्धर्मतत्त्वामृतप्रतिपन्नानां श्रावकाणां श्रुतचिन्ताभावनाक्रमात् प्रवर्तमानानां शीलसमाधिप्रज्ञात्मकस्कन्धत्रयामृतरसस्य उपयोगान्नियतमेव जरामरण-क्षयस्वभावनिर्वाणाधिगमो भवति[३]।

एतस्माद् बौद्धानां निर्वाणाभिमुखत्वं सिद्ध्यति। तेषां तत्त्वमप्यवाङ्मनस-गोचरमस्तीति 'यत्र ज्ञानस्याप्यप्रचारः' इति पूर्वकथनात् प्रमाणीभवति। अतः परलोकस्वीकरणादपि बौद्धा न चार्वाकवन्नास्तिककोटावागच्छन्तीति स्वतः

---

१. मध्यमकशास्त्रे प्रसन्नपदाटीकायाम् (बौद्धभारतीसंस्करणे १५६-१५७ पृष्ठ।
२. तत्रैव आत्मपरीक्षाप्रकरणे नवमं पद्यम्।
३. तत्रैव आत्मपरीक्षाप्रकरणे एकादशश्लोके (प्रसन्नपदा)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिस्फुटति। एवमेव जिनानुयायिनोऽपि कर्मफलं मुक्तिं चाङ्गीकुर्वन्ति। यथोक्तं स्याद्वादमञ्जर्याम्—

मुक्तोऽपि वाभ्येतु भवं भवो वा
भवस्थशून्योऽस्तु मितात्मवादे ।
षड्जीवकायं त्वमनन्तसंख्य-
माख्यस्तथा नाथ यथा न दोषः[1] ।।

श्लोकस्यास्य व्याख्यायां लिखितम्—न च क्षीणकर्मणां भवाधिकार इति।

अपि च—

दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः[2] ।।

अथ चास्तिकत्वनिर्धारणे यदीश्वरप्रामाण्यं स्वीक्रियेत तदा सांख्या मीमांसकाश्च नास्तिकतामाप्नुयुः। यतो हि सांख्यदर्शनोक्तपञ्चविंशतितत्त्वेषु ईश्वरतत्त्वं न विद्यते। जगतः समुत्पत्तिलयकार्याणि प्रकृतिरेव सम्पादयति। यथोक्तं सांख्यकारिकायाम्—

इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः।
प्रकृतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः।।

कारिकामिमां सुस्पष्टयन्नाह वाचस्पतिमिश्रमहोदयः कौमुद्याम्—इत्येष इति। आरभ्यत इति 'आरम्भः' सर्गो महदादिभूतान्तः प्रकृत्यैव कृतो नेश्वरेण, न ब्रह्मोपादानः, नाप्यकारणः। अकारणत्वे ह्यत्यन्तभावोऽत्यन्ताभावो वा स्यात्। न ब्रह्मोपादानः। चितिशक्तेरपरिणामात् नेश्वराधिष्ठितप्रकृतिकृतः, निर्व्यापारस्याधिष्ठातृत्वासम्भवात्। न हि निर्व्यापारस्तक्षा वास्याद्यधितिष्ठति। ईश्वराभावेऽचेतना प्रकृतिः कर्मणि कथं प्रवर्तते? इति शङ्कायां समुपस्थितायां समादधातीश्वरकृष्णः —

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ।।

पद्यस्यास्य तात्पर्यमित्थं प्रकाशितं सांख्यतत्त्वकौमुदीकारेण—"न ह्यवाप्तसकलेप्सितस्य भगवतो जगत् सृजतः किमप्यभिलषितं भवति। नास्ति कारुण्याद्

१. स्याद्वादमञ्जर्याः २९ तत्र पद्यम्; २. तत्रैव व्याख्यायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य सर्गे प्रवृत्तिः, प्राक्सर्गाज्जीवानामिन्द्रियशरीरविषयानुत्पत्तौ दुःखाभावेन कस्य प्रहाणेच्छा कारुण्यम्? सर्गोत्तरकालं दुःखिनोऽवलोक्य कारुण्याभ्युपगमे दुरुत्तरमितरेतराश्रयदूषणम्, कारुण्येन सृष्टिः सृष्ट्या च कारुण्यमिति[1]। अनया रीत्या सांख्याः स्पष्टत ईश्वरकारणवादं निराकुर्वन्ति। अत ईश्वरदृष्ट्या सांख्यानामास्तिकत्वं साधयितुं न शक्यते।

अत्रेदमप्यवधेयं यद् वेदनिन्दाकारणात् चार्वाक-जैन-बौद्धदर्शनानि नास्तिकानि मन्यन्ते चेत् सांख्या अपि वैदिकं मार्गं दृष्टवन्मन्यन्ते—

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्।।

श्लोकस्यास्य तात्पर्यं प्रकटयता पण्डितश्रीवाचस्पतिमिश्रेणोक्तं कौमुद्याम्—"तदेतत् सर्वमभिप्रेत्याह—'तद्विपरीतः श्रेयान्' इति। तस्माद् आनुश्रविकाद् दुःखापघातकोपायात् सोमपानादेरविशुद्धाद् अनित्यसातिशयफलात्, विपरीतो विशुद्धो हिंसादिसङ्कराभावाद् नित्यनिरतिशयफलः असकृद् अपुनरावृत्तिश्रुतेः[2]। इत्थं वैदिकोपायानां प्रतिषेधानन्तरमपि सांख्या नास्तिककोटौ न परिगणिता इति विचारणीयो विषयः।

एवमेव परम्परायामास्तिकत्वेन समादृतं मीमांसादर्शनमपि कदाचिदीश्वर-सृष्टिकर्तृत्वनिषेधकत्वात् तस्याफलदत्वसाधनाच्च नास्तिकत्वमापद्येत। वस्तुतस्तु सृष्टिकर्तृत्वेन कर्मफलदातृत्वेन चेश्वरप्रतिष्ठा सर्वदर्शनेषु दृश्यते। एतत् कार्यद्वयं विनेश्वरस्य प्रामाणिकत्वं प्रभुत्वञ्च कथं सिद्ध्येत्? यथोक्तं द्वादशदर्शन-सङ्ग्रहे—

नेश्वरममंसतैते फलदं किन्तु प्रमाणचिन्तायाम्।
प्रामाणिकं पुराणं जगुरीशं सावतारं च[3]।।

अत्र तथ्यस्यास्योल्लेखस्येदमेव कारणमस्ति यद् नास्तिकास्तिकयोर्निर्धारणे ईश्वरस्वीकरणमनिवार्यं नास्ति। अथ च कथङ्कारं वेदतात्पर्यनिर्णयपरायणे मीमांसाविषये नास्तिकतायाः प्रश्नः समुत्थाप्यते? इत्याश्चर्यं न विधेयं यतो हि कुमारिलभट्टपादसमयेऽपि मीमांसादर्शनसम्बन्धे विप्रतिपत्तयः समुत्थिता अवर्तन्त। तदुद्दिश्य श्लोकवार्तिकभूमिकायां स्पष्टीकरोत्याचार्यः कुमारिलः—

---

१. सांख्यतत्त्वकौमुदी-५६-५७ श्लोकौ; २. तत्रैव द्वितीयं पद्यम्।
३. द्वादशदर्शनसङ्ग्रहे मीमांसादर्शनप्रकरणे ९२ तमं पद्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रायेणैव हि मीमांसा लोके लोकायतीकृता ।
तामास्तिकपथे कर्तुमयं यत्नः कृतो मया[१] ।।

एतद्विवेचनानन्तरमिदं निर्गलितं यद् नास्तिकास्तिकानां निर्धारणे नेश्वरो मानदण्डायते, न च कर्मफलम्, केवलं वेदप्रामाण्यं तत्र हेतुर्दृश्यते। प्रामाण्यमेव नापि तु वेदनिन्दनाभाव एवास्तिकसाधकत्वं वर्तते। यतो हि वेदबाह्योऽवैदिको वा नास्तिक इति नोच्यते, किन्तु 'नास्तिको वेदनिन्दकः' इति मनुप्रोक्तपद्येन वेदनिन्दकस्यैव नास्तिकत्वं वर्णितम्।

अत्र तावत् कैर्दर्शनैर्वेदाः कियन्मात्रं निन्दिताः? कियती कीदृशी वा निन्दा सोढव्या? कीदृशी चासोढव्येति बोधोऽप्यावश्यकः। प्रथमं तावच्चार्वाककृतं वेदनिन्दनमुपस्थाप्यते[२] —

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्डनम् ।
बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ।।

त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः ।
जर्फरी-तुर्फरीत्यादि पण्डितानां वचः स्मृतम् ।।

ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह ।
मृतानां प्रेतकर्माणि न त्वन्यद्विद्यते क्वचित्[३] ।।

एभिः पद्यैर्विज्ञायते यत् चार्वाकाणां खण्डनं सुस्पष्टं वर्तते, तत्र सामान्यमतीनामपि सन्देहो न जायते। साक्षाद्वा परम्परया वा वेदस्य कमप्यंशं न स्वीकुर्वन्ति चार्वाकाः। वेदे किमपि सत्यं तथ्यं वा नास्ति तन्मते। इत्थं वेदस्य पूर्णरूपेणास्वीकारात् वैदिकैस्ते नास्तिकसंज्ञया सम्बोधिताः। यथा चार्वाका रुक्षवचसा वेदं निन्दन्ति न तथा निन्दन्ति जैनाः। ते मुख्यतो वेदविहितहिंसा-विषयमेव खण्डयन्ति। जैनसांख्ययोः खण्डनं प्रायः समानमेव वर्तते। तद्यथा—

न धर्महेतुर्विहितापि हिंसा नोत्सृष्टमन्यार्थमपोद्यते च।
स्वपुत्रघाताद् नृपतित्वलिप्सा सब्रह्मचारिस्फुरितं परेषाम्[२] ।।

श्लोकस्यास्य व्याख्याप्रसङ्गे स्याद्वादमञ्जर्यां हिंसाविषयो बहुविवेचितः। तत्र जैनैः सांख्यसहयोगोऽपि गृहीतो वेदविहितहिंसाप्रतिषेधाय। सांख्यमतत्वेन पद्यमिदमुद्धृतम्—

---

१. श्लोकवार्त्तिकप्रस्तावनायाम्।
२. सर्वदर्शनसङ्ग्रहे, चार्वाकदर्शनप्रकरणे, २०-२१ पृष्ठयोः; ३. स्याद्वादमञ्जर्यां ११ पद्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यूपं छित्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे नरके केन गम्यते[१] ।।

वेदान्तिनां मतमपि तत्रोद्धृतम्—

अन्धे तमसि मज्जेम पशुभिर्ये यजामहे।
हिंसा नाम भवेद्धर्मो न भूतो न भविष्यति।।

महाभारते व्यासेनाप्युक्तम्—

प्राणिघातात् तु यो धर्ममीहते मूढमानसः।
स वाञ्छति सुधावृष्टिं कृष्णाहिमुखकोटरात्।।

इत्थं प्रायो जैना न चार्वाकवद् वेदं खण्डयन्ति, न च परुषवचोभिर्निन्दन्ति, तेषां खण्डनं तु सयुक्तिकं, सतर्कं, सर्वदर्शनविमर्शनपूर्वकञ्च वर्तते। सर्वमाहत्य जैनखण्डनं सांख्यखण्डनं नातिशेते, तथापि सांख्या आस्तिका जैनाश्च नास्तिकाः समभवन्। एतद्रहस्यं सुधिय एवावगन्तुं प्रभवन्ति। एवमेव बौद्धानां वेदखण्डनस्य मूलेऽपि वैदिकी हिंसैवासीत्। गौतमबुद्धेन वेदमाश्रित्य प्रवर्तमानहिंसाकर्मणामथ च ब्राह्मणनामधारकजनवञ्चनपरायणानां जनानामेव निन्दा कृता, ब्राह्मणेन सह तस्य मनागपि विरोधो नासीत्। ब्राह्मणत्वनिर्धारणे कर्मणो महत्त्वं स्वीकुर्वता बुद्धेन कथितम्—

न जच्चा वसलो होति न जच्चा होति ब्राह्मणो ।
कम्मुना वसलो होति कम्मुना होति ब्राह्मणो[२] ।।

ब्राह्मणवर्गेऽग्निहोत्रकर्मकर्तुर्ब्राह्मणस्य प्रशंसापि कृता बुद्धेन—

यम्हा धम्मं विजानेय्य सम्मासं बुद्धदेसितं।
संक्कच्चं तं नमस्सेय अग्निहुत्तं व ब्राह्मणो।।

ब्राह्मणत्वं न बाह्यचिह्नेष्ववतिष्ठत्यपि तु यस्मिन् जने सत्यं धर्मश्च भवति, स एव वस्तुतो ब्राह्मण इति सुस्पष्टं निगदितं बुद्धेन—

न जटाहि न गोत्तेन न जच्चा होति ब्राह्मणो।
यम्हि सच्चं च धम्मो च सो सुची सो च ब्राह्मणो।।

---

१. स्याद्वादमञ्जर्यां ११ श्लोकव्याख्यायाम्।
२. बुद्धवचनम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्राह्मणस्योच्चतां वर्णयन् पुनराह गौतमो बुद्धः—

उसभं पवरं वीरं महेसिं विजिताविनं ।
अनेजं नहातकं बुद्धं तमहं ब्रूमि ब्राह्मणं[1] ।।

[संस्कृतानुवादः—

ऋषभं प्रवरं वीरं महर्षिं विजितेन्द्रियम् ।
अनेजं स्नातकं बुद्धं तमहं ब्रवीमि ब्राह्मणम् ।।]

एतदवलोकनेनेदं सिद्ध्यति यद् बुद्धेन वेदनाम्ना विहितहिंसाया विरोधः कृतः, ब्राह्मणस्य वास्तविकी परिभाषा च प्रदर्शिता, न तु चार्वाकवत् तत्खण्डनं विहितम्। बौद्धनैय्यायिकधुरन्धरो धर्मकीर्तिरपि न चार्वाकवद्वेदं खण्डयत्यपि तु तदपौरुषेयत्वनिराकरणे दत्तावधानो भवति। यथोक्तं तेन प्रमाणवार्तिके[2] —

गिरां मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात् ।
अपौरुषेयं सत्यार्थमिति केचित् प्रचक्षते ।।

अत्र प्रतिप्रश्नं कुर्वन्नाह सः —

गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात् ।
अपौरुषेयं मिथ्यार्थं किं नेत्यन्ये प्रचक्षते ।।

वेदापौरुषेयत्वविचारप्रसङ्गे बहवो विरोधाभासाः समुपस्थापिता धर्मकीर्तिना। यथा हि—

अवस्तुनि कथं वृत्तिः सम्बन्धस्यास्य वस्तुनः।
अपौरुषेयतापीष्टा कर्तृणामस्मृतेः किल।।
सत्यस्याप्यनुवक्तार इति धिग् व्यापकं तमः।।

इत्थं बौद्धानां वेदविषयकविचाराः समासेन प्रदर्शिताः। आपाततः सांख्य-जैन-बौद्धानां वेदखण्डनं समानमेव। परमेभिश्चार्वाकवद् मूलोच्छेदस्तु नैव कृतः। अतः परलोक-कर्मफलस्वीकारदृष्ट्या जैना बौद्धाश्चास्तिककोटौ परिगणयितुं शक्यन्ते, न तावदत्र कापि शास्त्रीया बाधा परिलक्ष्यते।

अत्रेदमप्यविस्मर्तव्यं यदस्ति नास्ति-व्यवहारः पारमार्थिकदशायां न सम्भवति। आस्तिकनास्तिकविवादशून्यतायां सत्यामेव निर्वाणमधिगम्यत इति साधयतोक्तमाचार्यनागार्जुनेन मध्यमकशास्त्रीयधातुपरीक्षाप्रकरणे—

१. धम्मपदे ब्राह्मणवर्गेऽवलोकनीयम्।
२. प्रमाणवार्तिके स्वार्थानुमानपरिच्छेदे २२५ श्लोकतः परिच्छेदान्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तित्वं ये तु पश्यन्ति नास्तित्वं चाल्पबुद्धयः।
भावानां ते न पश्यन्ति द्रष्टव्योपशमं शिवम्।।

पद्यमिदमित्थं व्याख्याति चन्द्रकीर्तिः—द्रष्टव्योपशमं विलक्षणं सर्वकल्पना-जालरहितं ज्ञानज्ञेयनिवृत्तिस्वभावं शिवं परमार्थस्वभावम्। परमार्थममरमजरमप्रपञ्चं निर्वाणं शून्यतास्वभावं ते न पश्यन्ति मन्दबुद्धितया, अस्तित्वं नास्तित्वं चाभिनिविष्टाः सन्त इति। यथोक्तमार्यरत्नावल्याम्—

नास्तिको दुर्गतिं याति सुगतिं यात्यनास्तिकः।
यथाभूतपरिज्ञानान्मोक्षमद्वयनिश्रितः।।

आर्यसमाधिराजसूत्रे चोक्तं भगवता—

अस्तीति नास्तीति उभेऽपि अन्ता, शुद्धी अशुद्धीति इमेऽपि अन्ता।
तस्मादुभे अन्तविवर्जयित्वा, मध्येऽपि स्थानं न करोति पण्डितः।।

अनया रीत्यायं नास्तिकास्तिकविवादः प्राक्कालिकविद्वद्वरैः सम्यग्विवेचितोऽपि सम्प्रति कालप्रभावात् लुप्तप्रायो दृश्यते। लोकाः सम्यक्शास्त्रालोडनं विनैव कांश्चनास्तिकत्वेन परिचिन्वन्ति, अन्याँश्च नास्तिकान् भावयन्ति। सामान्यतो नास्तिकशब्देन सम्प्रत्यधार्मिकजनो बुद्ध्यते। बौद्धा जैनाश्चापि धार्मिका मन्यन्ते। तर्हि धार्मिकत्वं नास्तिकत्वञ्च कथमेकत्र सङ्गच्छते? विचारणीयोऽयं विषयो विद्वद्वरैः।

एवमेव गौतमबुद्धोऽद्वयवादीत्युच्यते[१], आचार्यशङ्करस्त्वद्वैतवादी। अनयोर्वादयोः किमस्ति वैशिष्ट्यम्? येन शङ्कराचार्यः सम्प्रत्यास्तिकशिरोमणिरिव स्मर्यते। बौद्धास्तु नास्तिककलङ्कपङ्कादिदानीमपि न मुक्ताः। वस्तुतो गम्भीरतया निराग्रहबुद्ध्या विचार्यमाणे श्रुतिमत-बौद्धमतयोराश्चर्यकरं साम्यं समासाद्यते। शाङ्कराद्वैतमिव परमार्थतो निर्वाणस्योपदेशोऽसम्भवः, बुद्धेरविषयत्वात्। अतो बुद्धेन न किमपि देशितमुपदिष्टं वेति। तद्यथा—

सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः।
न क्वचित् कस्यचित् कश्चिद् धर्मो बुद्धेन देशितः।।

अपि च—

अनिर्वाणं हि निर्वाणं लोकनाथेन देशितम्।
आकाशेन कृतो ग्रन्थिराकाशेनैव मोचितः[२]।।

---

१. षडभिज्ञो दशबलोऽद्वयवादी विनायकः—अमरकोशे स्वर्गवर्गे।
२. मध्यमकशास्त्रे निर्वाणपरीक्षायां २४ तमं पद्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेव माण्डूक्योपनिषच्छ्रुतिरपि ब्रूते—

न निरोधो न चोत्पत्तिर्न बुद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता[१]।।

प्रायेण बौद्धाः शून्यवादिनः किमपि प्रमाणप्रमेयादिकं नाङ्गीकुर्वन्त्यत एव ते नास्तिका इति सनातनी धारणाऽस्ति, परं धारणेयं बौद्धप्रयुक्तशून्यशब्दतात्पर्य-बोधाभावादेव समुद्भूतेति मन्यन्ते बौद्धविद्वांसः। शून्यशब्दमाश्रित्य लिखितमाचार्य-नागार्जुनेन—'अपि च निःस्वभावं हि तथागतं व्याचक्षाणेन अविपरीतार्थाभिधित्सुना योगिना सता सर्वथा—

शून्यमिति न वक्तव्यमशून्यमिति वा भवेत्।
उभयं नोभयं चेति प्रज्ञप्त्यर्थं तु कथ्यते[२]।।

अस्य तात्पर्यं प्रकाशयँल्लिलेख प्रसन्नपदाकारः[३]—

सर्वमेतन्न वक्तव्यमस्माभिः किन्त्वनुक्ते यथावदवस्थितं प्रतिपत्ता प्रतिपत्तुं न समर्थ इत्यतो वयमपि आरोपतो व्यवहारसत्य एव व्यवहारार्थं विनेय-जनानुरोधेन शून्यमित्यपि ब्रूमः, अशून्यमित्यपि, नैव शून्यं नाशून्यमित्यपि ब्रूमः। अत एवाहते—'प्रज्ञप्त्यर्थं तु कथ्यते' इति।

बौद्धैर्व्यवहारदशायामेव शून्यशब्दप्रयोगो विधीयते, परमार्थतस्तु तेऽपि—

न शून्यं नापि चाशून्यं तस्मात् सर्वं विधीयते।
तथा सत्त्वादसत्त्वाच्च मध्यमा प्रतिपच्च सा[४]।।

एतच्च शून्यनिरूपणमद्वैतप्रतिष्ठापकैराचार्यशङ्करैरपि दशश्लोक्यां तद्वद्विहितमिति महदाश्चर्यकरो विषयः। तत्पद्यमप्यवलोकनीयमत्र—

न चैकं तदन्यद् द्वितीयं कुतः स्याद्
न वा केवलत्वं न चाकेवलत्वम्।
न शून्यं न चाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि[५]।।

---

१. सगौडपादीयकारिकाथर्ववेदीयमाण्डूक्योपनिषद् द्वितीयप्रकरणे ३२ तमं पद्यम्।
२. मध्यमकशास्त्रीयतथागतपरीक्षायामेकादशं पद्यम्।
३. तत्रैव श्लोकव्याख्यायाम्।
४. तत्रैव;
५. वेदान्तसन्दर्भे (दशश्लोक्या अन्तिमं पद्यम्)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वैततत्त्वं वाणीविषयो नास्तीति मधुसूदनसरस्वतीमुनिनालेखि सिद्धान्तबिन्दौ—"अद्वैतकत्वेन वागविषयत्वात्। अवचनेनैव प्रोवाच"[१]। एवमेव माध्यमिकैरप्युक्तम्—"वस्तुनिबन्धना हि प्रपञ्चाः स्युः, अवस्तुकश्च तथागतः। कुतः प्रपञ्चानां प्रवृत्तिसम्भवः। अतः प्रपञ्चातीतस्तथागतः[२]"।

वैदिकबौद्धयोस्तत्त्वसाम्यस्य दिङ्निर्देशमात्रमेतत्। सम्यक्परिशीलने कृते न जाने कियन्ति परस्परसम्बद्धानि तत्त्वानि प्रकटीभविष्यन्ति। अत्रैकमपरमपि तथ्यमवधेयं यद् बहव आधुनिककालिका विशिष्टा विश्वविश्रुताश्च विद्वांसो वैदिकबौद्धयोः साम्यं परस्पराश्रयत्वञ्च प्रतिपादयन्ति। यदि बौद्धाः परोक्षतया वेदानुयायिन एव तर्हि तन्नास्तिकत्वं कथं सिद्ध्यति? मनीषिप्रवरो दार्शनिकः डॉ. राधाकृष्णन्महोदयो भारतीयदर्शने लिलेख—"बुद्धस्य लक्ष्यमासीद् उपनिषदः श्रेष्ठविज्ञानवादं स्वीकृत्य तस्य मानवजातेर्दैनन्दिनव्यवहारे यथावश्यकं सुलभीकरणम्। ऐतिहासिकबौद्धधर्मस्य तात्पर्यमुपनिषत्तत्त्वानां जनसमूहे प्रचारः[३]"।

एवमेव बौद्धदर्शने वेदान्ते च कृतभूरिपरिश्रमः प्रो.चन्द्रधरशर्ममहोदयोऽपि बौद्धसिद्धान्तं श्रुतिमूलकमेव मन्यते—

अद्वैतवादस्य हि पूर्वभूमिं
मन्येऽहमेतं ननु बौद्धवादम्।
अयुक्तमेवास्त्यनयोर्विरोधो
यतः श्रुतिः सा जननी द्वयोर्हि।।[४]

एतद्विवेचनाधारेणेदं वक्तुं शक्यते यद् दर्शनानामास्तिकनास्तिकत्वयोर्निर्धारणं न तथा सुकरं यथा लोकैर्व्यवह्रियते। विषयेऽस्मिन् नवीनदृष्ट्या चिन्तनं प्रचलेदिति धिया लघुलेखोऽयं निबद्धः। अत्र विदुषां विवेचकानाञ्च सत्परामर्शा अपेक्ष्यन्ते।

।। इति शम् ।।

●

---

१. वेदान्तसन्दर्भे (दशश्लोक्या अन्तिमं पद्यम्)।

२. मध्यमकशास्त्रम्, तथागतपरीक्षायां १५ श्लोके प्रसन्नपदा।

३. Indian philosophy, part-1, page-471।

४. बौद्धदर्शन और वेदान्त (प्रस्तावनायाम्)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यकारणभावमीमांसा

डॉ. वृजकिशोरत्रिपाठी

प्रवक्ता (संस्कृतस्य)
राजकीयमहाविद्यालयः, फतेहपुरम्-आलापुरम्
अम्बेडकरनगरम्

❀ ❀ ❀

शास्त्रं सांख्यं नयवादीदतिकरुणमना मातुरर्थे पुरस्तात्
काणादीमक्षपादीञ्च गहनविषयां व्याकरोत् तर्कधीभ्यः।
व्यातेने जैमिनीयान्तदनु च परमां व्यासप्रोक्तां सुविद्यां
बौद्धं व्याभाष्य लोके स खलु विजयते लोकनाथोऽद्वितीयः।।
कार्यकारणभावोऽयं सर्वशास्त्रेषु वर्णितः।
तेभ्य उपाहरन् किञ्चिन्नवं व्याकुर्वेऽन्वहम्।।

इहानीदृशि जगति परिणमद्रूपे समेऽपि संस्कृता धर्मा उत्पादव्ययधर्मिणः, ते हि उत्पद्यन्ते क्षण एकस्मिन् विनश्यन्ति चापरस्मिन्। यथाहुः सौगतनयवादिनः सर्वे चित्तचैत्ताः प्रतीत्यसमुत्पन्ना उत्पादविनाशशालिन इति। अपि चाह भगवान् तथागतः—सर्वं दुःखं दुःखं, सर्वं स्वलक्षणं स्वलक्षणं, सर्वं क्षणिकं क्षणिकं सर्वं शून्यं शून्यमिति। ये श्रुतिप्रमाणाभिधायिनो नैयायिकादयस्ते काञ्चन पदार्थान्नित्यत्वेन पराञ्चानित्यत्वेनोरीकुर्वन्ति। तत्रानित्याः कार्याः कारणाल्लब्ध-सत्ताका नित्याश्चोत्पादविनाशरहिताः कार्यभावमननुभवन्त इति नास्त्येकेषामपि विमतिः। भवति कारणात्कार्योत्पत्तिरिति समानमतयोऽपि तीर्थका भिन्नदर्शनदृष्टयः कार्यकारणभावे तु विवदन्ते। तेषां हि कियन्तो ब्रह्मवादिनः 'एकस्य सतो विवर्तः कार्यजातं न वस्तुसदि'ति स्वीकुर्वन्ति। अन्ये तु 'सत असज्जायते' इति। 'सतः सज्जायते' इत्यपरे। 'असतः सज्जायते' इति च प्रमाणपटवो बौद्धा आमनन्ति। अथेदानीमेषामभिमता अनुक्रमेण विचार्यन्ते।

तत्र कार्यकारणभावविचारे वैदिकदर्शनपरम्परायामस्ति पद्धतिर्द्वयी। तत्रैका सत्कार्यवाद इत्यभिधाऽसत्कार्यवाद इति चापरा। सत्कार्यवादोऽपि विवर्तवादः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिणामवादश्चेति द्वौ सिद्धान्तौ स्तः। असत्कार्यवाद एक एव। इदानीं प्रथमं तावत्सत्कार्यवादं मीमांस्यते खण्डनाय। तथा हि—

विवर्तवादः (वेदान्तिमतम्)—एकस्याद्वितीयस्य सतो त्रैकालिकबाधरहितस्य ब्रह्मणो विवर्तोऽतात्त्विकोऽन्यथाभावः, रज्ज्वा सर्प इव कार्यजातं यावज्जगद्रूपं कार्यमिति भावः। न वस्तुसदित्यस्य वस्तुतः परमार्थतः सद् नास्तीति भावः।

अद्वैतवेदान्तिनः 'सतो ब्रह्मणः' असन्मिथ्यात्मकमिदं जगद्विवृतं जायत' इति, तेषाञ्चेत्थमभिप्रायः—'सदेव सोम्येदमग्र आसीत्', 'नित्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतिप्रमाणकं संसारप्राक्समये परं ब्रह्म एव व्यापकं नित्यः विज्ञानात्मकमस्ति, (तच्च सदासीत् सृष्टिसमये च 'स ऐक्षत बहु स्यां प्रजायेय' 'स ईक्षाञ्चक्रे' इति श्रुतिभिस्तस्यैव ब्रह्मण ईक्षापूर्वकं जगत्कर्तृत्वमवगम्यते। इह जगत्सृष्टौ एकमेव ब्रह्म अभिन्ननिमित्तोपादानकारणमस्ति। यद्यपि लोक एकस्य निमित्तत्वमुपादानत्वञ्च न प्रायेण दृश्यते। मृदादेरचेतनत्वात् कुलालादेश्च घटाद्याकारेण विचित्रपरिणामशक्तेरभावान्नैकस्य तत्त्वम्, तथापि सर्वज्ञस्य सर्वशक्तिमतः परमेश्वरस्योभयं घटते। ईक्षापूर्वककर्तृत्वश्रवणान्निमित्तत्त्वम्, प्रतिज्ञादृष्टान्तानुपरोधादित्यादिहेतुभिश्च तस्य प्रकृतित्वं सिद्धम्। प्रकृतित्वञ्चास्य ब्रह्मणो न विकाराभिप्रायेण, अपि तु विवर्ताभिप्रायेण बोध्यम्। यथा सर्पोपादानं रज्जुर्यथा वा रजतस्योपादानं शुक्तिरिति।

ननु 'तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः' इत्यादिश्रुतिभिर्ब्रह्मणः परिणामोऽयं संसार इत्यवगम्यते, तदा कथं जगद्विवर्तो ब्रह्मण इति चेन्न, नित्यस्य परिणामत्वेऽनित्यत्वापत्तेः, 'अस्थूलमनणु' (बृहदारण्यकोपनिषद्-३।८।८) इत्यादिभ्यश्च कूटस्थनित्यत्वावगमात्। 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' (श्वे. १।१) इत्यादिश्रुतिभिर्ब्रह्माधिष्ठानकमायाया एव जगतः परिणाम्युपादानत्वं सिद्ध्यति। न च जगतो ब्रह्मभिन्नमायोपादानकत्वे प्रतिज्ञादृष्टान्तोपरोधः स्यादेवेति वाच्यम्, ब्रह्मणि मायाया कल्पितत्वात्। ब्रह्मविषयायास्तदाश्रयायास्तस्यास्तदतिरिक्तसत्ताया अभावात्। न हि आरोपितस्याधिष्ठानातिरिक्तसत्ता सम्भवति। न च मायायाः स्वतन्त्रकर्तृत्वम्। तस्या जडत्वात् परमात्माधीनत्वात्, चेतनाधिष्ठानं विना जडस्य प्रवृत्त्ययोगात्। तस्माद् मायायाः कल्पितत्वाद् अधिष्ठानातिरिक्तत्वाभावाद् ब्रह्मणः सत्तया सत्तावत्त्या परिणाम्युपादानत्वे तदाश्रयस्य ब्रह्मणो वितर्तोपादानत्वं न विरुद्धम्, मायाया अपि प्रपञ्चोपादानभूताया अधिष्ठानत्वाद् ब्रह्मणः। एवञ्चाभिन्न-निमित्तोपादानत्वं ब्रह्मणो दृष्टान्तेनापि श्रूयते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथोर्णनाभिः सृजते गृह्यते च,
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम्।। (मु.उ. १।१।७)

एवञ्चास्य ब्रह्मणो विवर्तोपादानत्वं सिद्धम्। तच्च विवर्तकारणाज्ञान-विषयत्वम्। यथा शुक्तिविषयकमज्ञानं शुक्त्यधिष्ठानकं तदनतिरिक्तसत्ताकं रजतरूपेण परिणमते तथा ब्रह्मविषयिका माया ब्रह्मातिरिक्तसत्ताका जगद्रूपेण परिणमते। यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति, तथा मायोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति, उपाध्युपहितयोरनतिरिक्तत्वात्।

विवर्तवादे कार्यकारणयोस्सम्बन्धः

नन्वेवं ब्रह्माधिष्ठितमायापरिणामभूतं जगद् ब्रह्मानतिरिक्तं स्यात्, यतो हि—मायायाः परिणामभूतमिदं जगन्मायिकं मायाऽभिन्नं, माया च ब्रह्मानतिरिक्ता तथा च जगतोऽपि ब्रह्मानतिरिक्तं सिद्धम्। अथ च कार्यकारणयोर्भेद एव युक्तः। अभेदे सति कारणत्वं न स्यात्। न ह्येकं स्वयं स्वं प्रति कारणं कार्यञ्च दृष्टम्, कारणस्य कार्याव्यवहितप्राक्क्षणवर्तित्वात्। व्यवहारादपि भेद एव तयोः सिद्ध्यतीति चेत्, अत्रोच्यते—कार्यकारणयोर्वा भेद उच्यते वेदान्तिभिः; अपि तु कार्यस्य कारणादनन्यत्वमुच्यते। अनन्यत्वं तदव्यतिरेकेणाभावः। एवञ्चोभयोर्भेद एव निषिध्यते। यथा रज्जुविवर्ताः सर्पादयो न रज्जुव्यतिरेकेणोपलभ्यन्ते। एवं ब्रह्मविवर्ता माया तत्कार्यसमूहा न तद्व्यतिरेकेण सन्ति। एवञ्च, कार्यकारणयोरभेदः सूचितः। अभेदस्तु कार्यस्य कारणेन सह तद्व्यतिरेकेणानुपलब्धत्वम्। उक्तञ्चा-रम्भाधिकरणे भामत्यां श्रीवाचस्पतिमिश्रेण—'तस्मात् कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यते' इति भाष्यप्रतीकमादाय 'न खलु अनन्त्यत्व-मित्यभेदं ब्रूमः; किन्तु भेदं व्यासेधामः। ततश्च नाभेदाश्रयदोषप्रसङ्गः; किन्त्वभेदं व्यासेधद्भिर्वैशेषिकादिभिरस्मासु साहायकमेवाचरितम्' इति। अनेनेदमायाति अभेदमनुक्त्वा, भेदञ्च व्यासेधद्भिर्वेदान्तिभिः कार्यकारणयोराध्यासिकः सम्बन्धः स्वीक्रियत इति।

विवर्तवादनिरासः

ब्रह्मणो विवर्तभूतमिदं जगदिति सिद्धान्तो न युक्तः। यतो हि नित्यं शुद्धं बुद्धं मुक्तस्वभावं ब्रह्म, तस्माद् दृश्यमानमनित्यमशुद्धमबुद्धमयुक्तं जीवजाता-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुलीभूतं जगत्कथं प्रादुर्भवेत्, तत्र तिरोभवेच्च, विरुद्धधर्मकयोर्भेदव्याप्तत्वात्। न हि चेतनाज्जडं जडाद्वा चेतनं प्रादुर्भूतं तिरोभूतं च दृष्टम्, व्यवस्थाविरोधात्। यथा कारणं तथोपादेयं भवेदिति नियमो दृश्यते लोके। न हि ब्रह्मणि दुःखमोहादिकं केनचिदपि वेदान्तवाक्येनावधारितम्, मोहदुःखतत्साधनात्मकञ्चेदं जगत् तदभिन्नतया सुखमात्रावलिप्तस्याऽऽनन्दस्वरूपस्य ब्रह्मणो दुःखमोहतत्साधनात्मकत्वमापद्येत। तथा सति 'हेयं दुःखमनागतमि'ति योगोपदेशमनुसृत्य ब्रह्म सर्वैर्मुमुक्षिभिर्दूरादेवानभिलषितं सदुपेक्षितं स्यात्, तदा किं मोक्षसाधनमवशिष्येत। यद्यत्रोच्येत न हि ब्रह्म सच्चिदानन्दं जगद्रूपेण परिणमते, किन्तु तदाश्रिता मायेति। मायाया अधिष्ठानत्वात्, तस्याश्च तदनतिरेकाद् ब्रह्मणो विवर्तत्वेन जगदुच्यत इति। तत्रापि ब्रूमः—तमोरूपा अविद्या प्रकाशरूपं ब्रह्म कथमावृणोति, न हि सहस्रवर्षपार्यन्तिकमपि तमस्तरणिं तनुरपि तनूकरोति किम्पुनरावृतिकरणम्। यदि चाविद्यया ब्रह्मणस्तिरोधानम्, तदा निर्विशेषप्रकाशैकरसता न घटेत। निर्विशेषप्रकाशैकरसं चेद् ब्रह्म, तदा तस्याविद्यया तिरोधानं न घटेत।

ननु न ब्रह्मस्वरूपतिरोभावः; किन्तु तत्प्रकाशः तिरोभाव इति चेत्, किमयं प्रकाशस्तदभिन्नो भिन्नो वा? प्रथमे ब्रह्मस्वरूपनाशः प्रसज्येत। यतः प्रकाशप्रतिरोधो द्विधा—उत्पत्स्यमानप्रकाशस्योत्पत्तौ प्रतिरोधः, सतः प्रकाशस्य विनिवर्तनं वा। सतो ब्रह्मणोऽनतिरिक्तप्रकाशप्रतिरोधेन निवृत्तिरूपेण भाव्यम्, तथा ब्रह्मणो नाश एव पर्यवसानमिति। न द्वितीयः, सविशेषत्वापत्तेरिति। किञ्च मायां ब्रह्म सर्वात्मनाऽऽवृणोति एकदेशेन वा? नाद्यः, परिच्छिन्नाया मायाया अपरिच्छिन्नस्य ब्रह्मणोऽनावरकत्वात्। नापि द्वितीयः, तथा सति सावयवत्वेऽनित्यापत्तेरिति।

विवर्तवादे कार्यकारणयोस्सम्बन्धनिरासः

न च कारणे कार्यमपि अध्यस्तमपि किं न स्याद् विकारस्य वाचारम्भणत्वादिवेदान्तिसम्मतं कार्यकारणयोरध्याससम्बन्धोऽपि युक्तिसहः। तथा हि—कार्यस्याध्यस्तत्वे व्यवहारासम्भवात्, न हि अध्यस्तेन रजतादिना अलङ्कारादिः सम्भवति। न च व्यावहारिकमपि घटादिकार्यजातमध्यस्तमेव स्वस्मिन् कारणे, न च व्यवहारसम्भवः सर्वस्य व्यवहारस्याप्यध्यस्तत्वात्। अत एव मोक्षकाले सर्वस्य बाध इति वाच्यम्, तथा सति अध्यस्तस्य सर्वस्य कार्यस्य कारणेन सहाभेदो न स्यात्। न हि शुक्तौ भासमानस्य रजतस्य शुक्त्या सह अभेदो युज्यते। न वा अद्वैतमते ब्रह्मणि विवर्तितस्य प्रपञ्चस्य ब्रह्मणाऽभेदोऽङ्गीक्रियते। तस्मात् कारणे कार्याध्यासपक्षे न भेदः, अध्यस्तस्याभावाद् नाऽभेदस्तस्मादेवापि तु कश्चिदन्य एव सम्बन्धो मृग्यः कार्यकारणयोः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिणामवादः

'सतः सज्जायते' इति सांख्याः कपिलादयः। अस्यायमर्थः—सतो भावात्मकनित्यप्रकृतितः, सद् अव्यक्तावस्थामापन्नं कारणे विद्यमानमेव कार्यम्, जायते कारकव्यापारेणाभिव्यक्तं भवति। सांख्यमते सत्त्वरजस्तमोमय्या पुरुषसंयोग-माप्तया सुखदुःखमोहात्मिकया मूलप्रकृत्या महदाद्यारभ्य पञ्चमहाभूतपर्यन्तं व्यक्तमिदं कार्यजातं जगदाविर्भवति, न विवर्तते, न चोत्पद्यते। यथा कच्छपशरीरे विद्यमानान्येवाङ्गानि आविर्भवन्ति तथा तिरोभवन्ति, तथैव मूलप्रकृतिस्वरूपे कारणे विद्यमानमेव जगदाविर्भवति सर्गावस्थायाम्, प्रतिसर्गावस्थायाञ्च तत्रैव समवलीयते। अपि च यथा परिणतावस्थामापन्नं पयो दधि इति निगद्यते, तथैव सत्त्वरजस्तमसां साम्यावस्थारूपा मूलप्रकृतिरेव सत्त्वरजस्तमस्सु असाम्या-वस्थामापन्नेषु सत्सु महत्तत्त्वमिति कथ्यते। एवं सृष्टिरग्रेऽग्रे त्रयाणां गुणानां गौणप्रधानभावं प्राप्तानां सताम् अहङ्कारादिक्रमेण जायत इति। न चास्मिन् उत्पत्तेः प्राक् कार्यस्य कारणे विद्यमानत्वात् कारकव्यापारो व्यर्थतामेष्यतीति वाच्यम्, पृथुबुध्नोदरादिकार्याकारेण कारणं व्यवस्थापयतः कारकव्यापारस्यावैयर्थ्यात्।

सांख्यनये कार्यकारणयोस्सम्बन्धः

उत्पत्तेः पूर्वं सदेव कार्यं कारणादाविर्भवतीति सांख्यमतानुसारेण कार्यकारणयोरवस्थामात्रं भिद्यते, अतस्तयोस्तादात्म्यमेवोरीकर्त्तव्यम्। न हि सर्पन्ती गोधा अहिर्भवति; किन्तु गोधैव तथा नहि घटावस्थायां (पृथुबुध्नोदराकृतिं) प्राप्तं मृद्धेमत्वमाप्नोति; किन्तु मृदेव। सत्कार्यवादस्योपपत्तये कारिकेयमतीव व्युत्पादनकरी। सा च—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्।। (सां.का.९)

एते चावीतहेतवः। यद्यसत्क्रियते शशविषाणाद्यपि क्रियेत, न तु क्रियते, तस्मात्सदेव कार्यम्। यदि च तत्त्वादिषु पटादिकार्यं नास्ति, तदा पटाद्यर्थिनस्तन्त्वाद्युपादानं न गृहणीयुः, तत्कार्यशून्यत्वाद्वीरणादिवत्। यदि चासन्नेव पटस्तन्तुभ्यो भवति, ततः सर्वं कार्यं भवेदसत्त्वाविशेषात्, न तु भवत्यतः सर्वसम्भवाभावान्निश्चीयते—यदेव यत्रास्ति, तदेव ततो भवतीति।

शक्तस्य च कर्तृत्वं सर्वैरेवेष्यते। न च शक्तिविकलं शक्तं युक्तम्। शक्तिञ्च न कार्यादन्यां पश्यामः। शक्यञ्च क्रियते तेन नासतः शक्यत्वं युक्तम्। किञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यस्य कारणम्, तत्ततो भवति। न चासति कार्येऽस्येदं कारणमित्युपपद्यते। तस्मात्सदेव कार्यमिति मन्तव्यम्।

सांख्याभिमतसत्कार्यवादनिरासः

जगतः कारणं प्रधानमिति सांख्यानां मतं न युक्तमित्यतिविस्तरेणोक्तं भगवत्पादेन शङ्कराचार्येण ब्रह्मसूत्रशाङ्करभाष्ये ईक्षतेर्नाशब्दमिति (ब्र.सू. १।१।५) सूत्रादारब्धे ईक्षत्यधिकरणे, तत एव जिज्ञासुभिर्द्रष्टव्यम्, विषयविस्तरभयान्नेह प्रतन्यते।

यत्तावत्सत्कार्यवादोपपत्तये कारिकायां हेतव उपन्यस्तास्त अत्र विशीर्यन्ते। तथा हि—यत्तावदसदकरणादित्युक्तं, तन्न, प्रतिबन्धासिद्धेः। यदि नाम शशविषाणाद्यसत् क्रियमाणं न दृष्टम्, पटाद्यप्यसन्न क्रियत इति कुतः? यथैव हि शशविषाणादीनामसत्त्वमक्रियमाणत्वं सर्वलोकाविसंवादिना प्रत्यक्षादिना प्रमाणेन सिद्धम्, तथैव पटादीनां प्रागसत्त्वं क्रियमाणत्वञ्च सिद्धं किं नेष्यते? किं चासदकरणादसत्कार्यं नेष्टम्? तत्राप्येवं शक्यते वक्तुम्—यदि सत् क्रियते पुरुषाद्यपि क्रियेत? न तु क्रियते। तस्मादसत्कार्यमिति।

यत्तूक्तमुपादानग्रहणादिति, तदप्ययुक्तम्, निरुद्धत्वात्। यदि हि प्रागप्यस्ति कार्यम्, ततस्तदर्थं तत्कारणेषु न कश्चित्प्रवर्तेत, वैयर्थ्यात्। नहि लोके यस्य यदस्ति, स तदर्थं यतत इति। निष्पन्नस्य निष्पादनासम्भवः, तत्रानर्थको हेतुः स्यात्। यद्यसन्नेव पटस्तन्तुभिः क्रियते, वीरणादिरपि किं किं न क्रियत इति चेत्, न, वीरणादीनां तत्रासामर्थ्यात्। सामर्थ्यमेव कारणमिति चेत्, न, शक्तेः कारणधर्मत्वात्ततः पश्चाद्भवत्कार्यं कथं तदात्मकं स्यात्? योग्यतां विज्ञाय च प्रतिनियतकारणोपादानम्, न तु कार्यदर्शनान्न ह्यनिष्पन्नः पटो द्रष्टुं शक्यते। किं च सर्वं सर्वात्मकमित्येवंवादिनां वीरणादिष्वपि पटोऽस्तीति किं न तैः पटः क्रियते? कस्माच्च न तानि पटार्थिभिरुपादीयन्त इति। एतेन सर्वसम्भवाभावोऽपि प्रत्युक्तः। यथोक्तम्—शक्यं च क्रियते नासत्कर्त्तुं शक्यमिति, सत्कथं शक्यम्? न हि प्रधानं पुरुषो वा केनचित्कर्त्तुं शक्यते।

यच्चोक्तम्—कारणभावादिति, तदपि विरुद्धत्वादयुक्तम्। यदि हि प्रागप्यस्ति कार्यम्, तदा कारणेन किं कर्त्तव्यम्? अकिञ्चित्करं च कथं कारणम्? कार्यस्याभिव्यक्तिः कारणेन क्रियत इति चेत्, सा यद्यसती क्रियते ततोऽसत्कार्यं स्यात्। सती चेदभिव्यक्तिः, तदवस्थं कारणानर्थक्यम्। अभिव्यक्तेरप्यभिव्यक्तिः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियत इति चेत्, सापि सती स्यादसती वेत्यपर्यवसानम्। सर्वत्र सत्त्वाभ्युपगमे सर्वं सर्वदैवाभिव्यक्तमित्यानर्थक्यमेव कारणानाम्। यत्किञ्चित्प्रयोजनं कारकाणामुच्यते, तत्सर्वं सर्वाकारेण प्रागेवास्तीत्यानर्थक्यमेव कारकाणाम्। येन वाकारेण प्रागस्ति स तस्याकारः प्रागसन्नेव पश्चाद्धेतुभ्यो भवतीति कथन्नासत्कार्यम्।

कार्यकारणयोस्तादात्म्यनिरासः

न च कार्यकारणयोस्तादात्म्यसम्बन्धो युक्तः। स चासौ आत्मा तदात्मा तस्य भावस्तादात्म्यम्। यदि कार्यकारणयोरभेदश्चेद् घटस्येव रूपस्यापि स्पर्शेन्द्रिय-ग्राह्यत्वापत्तिः, कार्यकारणयोस्तुल्ययोगक्षेमतापत्तेः। स्पर्शादेश्च चक्षुर्ग्राह्यत्वापत्तिः स्यात्। किञ्च कपालघटयोरभेदे कारकव्यापारवैयर्थ्यं पूर्वमुक्तमस्त्येव। न हि कारणादन्यत् कार्यं किञ्चिदुत्पद्यत इति कारकादिव्यापारवैयर्थ्यं स्पष्टमेव। तन्तुभिरपि पटवदाच्छादनादिव्यवहाराः प्रसज्येरन्।

किञ्च, कार्यकारणयोरभेदे वस्तुनो नित्यत्वापत्तिरपि स्यात्। कारणं ह्येतत्पक्षे अविकृतमेव कार्यरूपतां भजते। तथा चाभिलापान्तरमात्रं स्यात्, न तु तत्त्वतो स्वरूपतो वा उभयोर्भेदः स्यात्। तस्मात्कार्यकारणयोरभेद इति न युक्तम्।

ननु नात्यन्ताभेद एव तादात्म्यं येनोक्तदोषाः स्युः, अपि तु भेदघटिताभेद एव तस्मात् कार्यकारणयोस्तत्त्वतोऽभेदेऽपि स्वरूपतो भेदोऽस्त्येव हेमात्मना सुवर्णकुण्डलयोरभेदेऽपि हेमपिण्डाकृत्या कुण्डलाकृत्या च भेदोऽनुभूयत एवेति चेत्, न भेदाभेदयोरेकत्र धर्मिणि सत्ययोः सहावस्थानाभावात्। न चाभेदस्तात्त्विको भेदोऽध्यस्त इति वाच्यम्, भेदस्यातात्त्विकत्वे वाङ्मात्रेण भेदः स्यात्, वस्तुतोऽभेदः स्यात्, तथा च पूर्वोक्त एव दोषः प्रसज्येत। किञ्च, कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत्। परस्पराभाव इति चेत्, किमयं कार्यकारणयोर्घटमृदोरस्ति न वा नो चेत्, एकत्वमेवास्ति, न च भेदः। अस्ति चेद्भेद एव नाभेदः। अपि च घटस्य मृदोऽभेदे यथा मृदात्मना घटशरावादयो न भिद्यन्ते, एवं घटात्मनापि न भिद्येरन्, घटस्य मृदोऽभेदात्। तथा मृदेव वस्तुसन्न घटादयः, भेदस्याप्रतिभासनात्। अथ मृदात्मनैवाभेदो न घटाद्यात्मना, तेन तु भेद एव शरावादेः। यदि मृदोऽभिन्नो घटस्तदा कथमयं शरावादिषु नानुवर्तते। नानुवर्तते चेत्कथं मृदोऽभिन्नः? ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते, ते ततो भिन्ना एव, यथा सूत्रात्कुसुमभेदाः। नानुवर्तन्ते चानुवर्तमानेऽपि मृदात्मकत्वे घटादयस्तस्मात्तेऽपि मृदो भिन्ना एवेति। तथा च न कार्यं सदुत्पद्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नैयायिकानामसत्कार्यवादः

नैयायिकानां वैशेषिकानाञ्च मते सतो नित्यपरमाणुतः असदनित्यं द्व्यणुकादिकं कार्यजातं जायते। परमाणूनामकारणत्वे तु जगत आकस्मिकत्वापत्तिः स्यादिति भावः। नैयायिकवैशेषिकाणां मते परमाणुतः कार्यद्रव्यस्य द्रव्यतश्च कार्यगुणादीनामुत्पत्तिः स्वीक्रियेत, स च वाद इत्थं समुत्तिष्ठते—घटपटादीनि कार्याणि द्रव्याणि सावयवानि स्वसमवायिकारणैरसमवायिकारणात्मक-संयोगसचिवैः कपालतन्त्वादिभिर्द्रव्यैरारभ्यमाणानि समनुभूतानि, तथा च यत्सावयवं तदसमवायि-कारणसंयोगसहभूतसमवायिकारणद्रव्यारब्धमिति सामान्यतस्तावद्व्याप्तिरवगम्यते। एषां मते सर्गादौ प्राणिनामदृष्टापेक्षया परमाणुषु कर्म उत्पद्यते, येन कर्मणा तेषां संयोगाद् द्व्यणुकाद्युत्पत्तिस्तत्क्रमेणैव महाभूतानामुत्पत्तिरिति। परमाणुगतेभ्यस्तु गुणेभ्यो गन्धरूपरसादिभ्यो द्व्यणुकादिकार्यद्रव्यगतानि गन्धरूपरसादीनि सम्भवन्ति। अतः केषाञ्चित्पदार्थानां नित्यत्वम्, केषाञ्चिच्चानित्यत्वम्, तत्र नित्यानां सर्वदा स्थायित्वाद् अनित्यानाञ्च नित्यपरमाण्वादिभ्य एवोत्पत्तिस्वीकारान्ना-स्त्यन्यस्यापेक्षा।

नैयायिकादीनां मते नित्यज्ञानेच्छाकृतिमानीश्वरः जीवानामदृष्टः सहकारिकारणेन परमाणुभ्यो द्व्यणुकादीन् पञ्चमहाभूतपर्यन्तान् पदार्थान् स्थावरजङ्गमानुत्पादयति। यथोक्तमाचार्येण विश्वनाथेन—यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यङ्कुरादिकमपि। न च तत्कर्तृत्वमस्मदादीनां सम्भवतीत्यतस्तत्कर्तृ-त्वेनेश्वरसिद्धिरिति (न्या.सि.मुक्ता. १ कारिका)।

नैयायिकाकानामसत्कार्यवादनिरासः

सत् परमाण्वादिभ्यो असद् द्व्यणुकादारभ्य महाभूतपर्यन्तं जगदिदं जायत इति कणभक्षाक्षपादानां मतमपि न युक्तम्। तथा हि—नैयायिकादिभिर्विभक्तानां परमाणूनां संयोगे जीवानामदृष्टः सहकारिकारणत्वेन स्वीक्रियते; किन्तु एतन्न घटते, अदृष्टस्य परमाणावभावात्, कार्यकारणभावस्य च सामानाधिकरण्येन नियमात्। अदृष्टश्च प्रतिजीवं भिन्नं भिन्नं प्रत्यात्मगतम् आत्माश्रितमित्यर्थः, कार्यञ्च परमाणुसमवेतं परमाण्वाश्रितमिति व्यधिकरणत्वान्न द्व्यणुकादि-कार्योत्पत्तिरिति।

अथ परमाणोः परमाण्वन्तरेण संयोगो यो भवति, तत्रापीदं विचार्यते स चैकदेशेन स्यात्? सर्वावच्छेदेन वा? यद्यभ्युपगम्येत सर्वावच्छेदेनेति। परमाणुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सह परमाण्वन्तरस्य समानाभिहारात् परमाण्वपेक्षया तदधिकपरिमाणयुतं द्व्यणुकं न स्यात्, तथा च संयोगे सत्यपि सर्वे परमाणव एव स्युर्न तु द्व्यणुकादिक्रमेण घटादिकं महद्द्रव्यम्, तथा सति जगदेवं न जायेत। यदि चैकदेशेन भवति संयोगः, तदैकदेशस्यावयवस्वरूपत्वात् सावयवत्वप्रसङ्गः परमाणोः प्रदेशवद्-द्रव्यस्य प्रदेशवता द्रव्येण सह संयोगस्य दृष्टत्वात् परमाणवः प्रदेशवन्तः स्युरिति ते मतहानिः स्यात्। यदि च प्रदेशाः कल्पिताः, न तु वास्तविकास्तदा प्रदेशाभावेन संयोगाभावात्, संयोगस्यासमवायिकारणस्य चासत्त्वेन कार्यद्रव्यस्य नोत्पत्तिः स्यात्।

नैयायिकाभिमतसमवायसम्बन्धनिरासः

यथा नैयायिकैरुररीक्रियते यत्कारणेन तन्त्वादिना समवायेन पटादिकार्य-मुत्पद्यत इति, तदपि न युक्तिमार्गागतम्। तथा हि—सम्बन्धः सत्त्ववतोर्द्रव्ययोर्दृष्टः, यथा घटपटयोरेकक्षणावच्छेदेन संयोग इति। अत्र तु परमाणुकाले द्व्यणुकमसत्, द्व्यणुककाले च द्व्यणुकातिरिक्तं परमाणुर्न, इति कथं परमाणुद्व्यणुकयोरेकक्षणा-वच्छिन्नः समवायः संसर्गतयावगतः स्यात्। किञ्च समवायसम्बन्धस्यापि दुर्निरूप्यत्वान्न तेन सम्बन्धेन कार्यावस्थानं सम्भवति। समवायेन कार्यम्प्रति तादात्म्येन द्रव्यं कारणमित्यस्ति च नैयायिकाभ्युपगमः। तथा हि—समवायः स्वयमसम्बद्ध एव विशिष्टव्यवहारो जनयति सम्बद्धो वा। नाद्यः, अतिप्रसङ्गात्। स्वरूपेणायं यथा घटं विशिनष्टि तथा सर्वं विशिंष्यात्। नियामकस्य कस्यचिदभावात्। न द्वितीयः, सम्बन्धान्तरेण वा स्वात्मकेन वा सम्बद्धः। आद्ये तदपि सम्बन्धान्तरं सम्बन्धान्तरेण सम्बद्धमानमनवस्थामापादयति। अप्रामाणि-कानन्तकल्पनमनवस्था। यदि स्वात्मकेन सम्बन्धेन सम्बन्धान्तरं सम्बद्धं विशिनष्टि चेत्, कोऽपराधः प्रथमस्य समवायस्य, स एव हि कुतो न सम्बद्धः स्वात्मकेन सम्बन्धेन। अस्त्वेवमिति चेत्, एवं सत्युक्तयुक्त्या सत्ताद्येव कुतो न स्वात्मकेन सम्बन्धेन तादात्म्यकेन विशिष्टव्यवहारं जनयेदिति गतं समवायेन।

ईश्वराक्षेपः—यदपि नैयायिकादीनां मते द्व्यणुकादीनामारम्भकत्वमीश्व-राधीनमिति, तदपि न युक्तिसहम्, ईश्वरे प्रमाणाभावात्। न च जगत्कर्तृकत्वादि-नानुमीयत इति वाच्यम्, सर्वस्यापि कार्यस्य चेतनमनपेक्ष्य प्रतीत्यसमुत्पन्नत्वात्, अनुमानस्याप्रयोजकत्वात्। न च वेदप्रामाण्यादीश्वरोऽस्तीति गम्यते, ईश्वरकृतत्वाद् वेदप्रामाण्यं तस्माच्चेश्वरसिद्धिरित्यन्योन्याश्रयात्, वेदस्य प्रामाण्यानङ्गीकाराच्च। न चापौरुषेयवाक्यं वेदः, स च सकलपुम्दोषरहितत्वात् प्रामाण्यं भजत इति वाच्यम्, वेदानामपौरुषेयत्वाभावात्। वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवद्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति प्रयोगात्, तस्य स्वार्थपरायणैः कल्पितत्वात्। किञ्च, ईश्वरस्य जगत्कर्तृत्वे तस्य वैषम्यनैर्घृण्यदोषः स्यादेव। अपि च स्वतो वा तस्य जगन्निर्माणे प्रयोजनाभावान्न परमाणुयोजनरूपं कर्म ईश्वरे सम्भवति। न च स्वतः परमाणुषु तत्सम्भवति, अचेतनत्वात्। तस्मादीश्वरेण परमाणुभिरवयवी कश्चिन्नारभ्यते किन्तु वक्तव्यश्चेत्, एवं वक्तव्यं परमाणव एव संहताः सन्तः कार्यजनकाः। न च तैरपि कार्येण कश्चित् सम्बन्धः सम्भवतीति ज्ञेयम्।

सौगतानां प्रतीत्यसमुत्पादः

शून्यतैव जगतः परमार्थता इति वदतां बौद्धानां मते "असतः सज्जायते" अर्थाद् अभावाद् भावो जायत इत्यर्थः। विनष्टाद्धि किल बीजादङ्कुर उत्पद्यते, नष्टाच्च दुग्धाद्दधि, विनष्टाच्च मृत्पिण्डाद् घट इत्येवमभावग्रस्तेभ्यो बीजादिभ्योऽङ्कुराद्युत्पत्तिदर्शनात्, सर्वे कार्यरूपा भावा अभावकारणकाः कार्यत्वाद् बीजनाशोत्तरोत्पन्नाङ्कुरादिवदित्यनुमीयते।

सौगता हि मन्यन्ते जगतः कर्त्ता न कोऽपि चेतनो न वाऽचेतन;, पूर्वोक्तरीत्या निरस्तत्वात्। न च स्वत एव भावा उत्पद्यन्ते, प्रयोजनाभावात्, उत्पादवैयर्थ्यात्, अतिप्रसङ्गाच्च। स्वतः सर्वस्य सर्वोत्पत्तिप्रसङ्गः स्यात्। न च परत एवोत्पादः सम्भवति, परस्य चेतनस्य विषयस्य विषयदृष्टिप्रयोजनाभावात्। तथा हि भोक्ता चेतनः कर्त्ता चेत् स्वानुकूलमेव सुखमयीं सृष्टिं कुर्यात्। भोक्तृणाञ्चानेकत्वाद् अविशेषात् सर्वेषां कर्तृत्वात् परस्परविसंवादे सृष्टिरेव न भवेत्। अभोक्तुश्चेतनस्य कर्तृत्वे प्रयोजनाभावः, वैषम्यादिदोषप्रसङ्गाच्च, परस्याचेतनस्य स्वतः कर्तृत्वानुपपत्तेः। एवं च परस्मिन् कार्यस्वभावाभावादेव न तत उत्पत्तिः। न च द्वाभ्यामेव स्वपराभ्यां हेतुभ्यामुत्पद्यत इति साम्प्रतम्। पृथग् हेतुत्वासम्भवाद् मिलितहेतोरपि नास्ति सम्भवः। प्रत्येकमनुपलब्धस्य समुदायेऽप्यनुपलम्भात्। न चाकारणमेवोत्पद्यन्ते भावा इति युक्तम्, अतिप्रसङ्गात् सर्वस्य सर्वत्रोत्पत्तिप्रसङ्गात्। अत एवोक्तं नागार्जुनेन—

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्नाः जातु विद्यन्ते भावाः क्वचन केचन ।। (मा.का. ३)

अतो नास्ति भावानामुत्पाद एवंविधः। यथोक्तं शालिस्तम्बसूत्रेऽपि—"स चायं बीजहेतुकोऽङ्कुरोत्पद्यमानो न स्वयं कृतो न परकृतः, नोभयकृतः नाप्यहेतुसमुत्पन्नो नेश्वरकालाणुप्रकृतिस्वभावसम्भूत" इति। तथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बीजस्य सतो यथाङ्कुरो न च यो बीजु स चैव अङ्कुरः ।
न च अन्यु ततो न चैव तदेवमनुच्छेद अशाश्वतधर्मता ।।
(ललितवि. १३।१०२)

माध्यमिककारिकायामप्युक्तं नागार्जुनेन—

प्रतीत्य यद् यद् भवति न हि तावत्तदेव तत्।
न चान्यदपि तत्तस्मान्नोच्छिन्नं नापि शाश्वतम्।। (म.शा.१८।७)

एवं भावानामुत्पादो न सम्भवति। उत्पादप्रतिषेधाच्च निरोधादिप्रतिषेधः। उत्पन्नस्य उपलब्धस्य च निरोधादयः सम्भवन्ति। यथोक्तं नागार्जुनेन मङ्गलश्लोकेषु—

अनिरोधमनुत्पादमनुच्छेदमशाश्वतम् ।
अनेकार्थमनानार्थमनागममनिर्गमम् ।।१।।
यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवम् ।
देशयामास सम्बुद्धस्तं वन्दे वदतां वरम् ।।२।।

तत्र विरोधो नाम क्षणभङ्गः, उत्पादनमुत्पादः, आत्मभावोन्मज्जनम्, उच्छित्तिरुच्छेदः प्रबन्धविच्छेदः शाश्वतो नित्यः सर्वकालावस्थितः। एकार्थोऽभिन्नार्थः, न पृथगित्यर्थः। नानार्थो भिन्नार्थः। आगतिरागमो विप्रकृष्टदेशात् सन्निकृष्टदेशगमनम्। निर्गतिर्गमनम्, सन्निकृष्टदेशाद् विप्रकृष्टदेशगमनम्। एवं निरोधादिरहितः प्रतीत्यसमुत्पादः शून्यतालक्षणः। 'यः प्रतीत्यसमुत्पादः शून्यता तां प्रचक्षते' इत्युक्तेः। सुगतसमये माध्यमिकशास्त्रे प्रतीत्यसमुत्पादः शून्यतेति वर्णितम्। स एव प्रतीत्यसमुत्पादः कार्यकारणः स्वीक्रियत इति।

प्रतीत्यसमुत्पादशब्दार्थः

प्राप्त्यर्थः प्रतिरुपसर्गः, एतिर्गत्यर्थो धातुः, तस्मात् ल्यप्प्रत्ययः। प्रतीत्य-शब्दो ल्यबन्तः प्राप्तौ अपेक्षायां वा वर्तते। समुत्पूर्वं पद्धातोर्घञि भावे समुत्पादशब्दः प्रादुर्भावे वर्तते। ततश्च हेतुप्रत्ययापेक्षो भावानामुत्पादः प्रतीत्यसमुत्पादपदार्थः, अथवा समुत्पद्यत इति समुत्पादः कर्मणि घञ्।

अन्ये त्वाहुः—इतिर्गमनं विनाशः, इतौ साधुस्तत्र साधुरिति पाणिनिसूत्रेण इतिशब्दाद् यत्प्रत्यये इत्यः तद्धितान्तो विनाश्यार्थः। प्रतिशब्दो वीप्सार्थः। तथा च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यम् इत्यम् प्रतीति प्रतीत्यं वीप्सायामव्ययीभावः। प्रतीत्यं समुत्पादः प्रतीत्यसमुत्पाद इति। तथा च इत्यम् इत्यम्प्रति उत्पाद इत्यर्थः। एवञ्च प्रतिशब्दस्य इत्येन योगः, न तु समुत्पादेन। एवम् इत्यशब्दोऽपि प्रतिना योगमनुभूय तेन सह समुत्पादेन युज्यते। न तु इत्यस्योत्पाद इत्योत्पाद इति कृत्वा पुनः प्रतिना योगः, तथा सति इत्येन वीप्सायोगो न स्यात्। वीप्सापक्षे अनेकहेतुव्याप्तिः कार्यस्यापेक्षते। प्रतिगतः प्रतिरुद्धो वा इत्योत्पाद इत्यादिरर्थो नोपयुज्यते। आचार्यचन्द्रकीर्तिरेतन्न मन्यते। तथा हि "प्रतीत्यसमुत्पादो वा भिक्षवो देशयामि" "यः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति" इत्यादौ तथा व्युत्पत्तिसम्भवेऽपि चक्षुः प्रतीत्यरूपाणि चोत्पद्यते चक्षुर्विज्ञानमित्यादौ तथासम्भवात्। अत्र वीप्सार्थस्यासम्भवात्। एकचक्षुः प्रतीत्यैकविज्ञानोत्पादाद् वीप्सार्थाभावात्। प्रतीत्यशब्दस्य प्राप्यार्थसद्भावे तु हेतुमेकं प्रतीत्योत्पत्तावपि तत्सम्भवात्।

एवञ्च हेतुं प्राप्य हेतुसमुदायरूपप्रत्ययं वा प्राप्य भावानामुत्पत्तिरिति उभयत्रापि प्राप्यार्थकप्रतीत्यशब्दस्यार्थसम्भवात्, ल्यबन्तप्रतीत्यशब्द एव युक्तः। ल्यबन्तेन समासो वा भवतु। आचार्यनागार्जुनेनापि प्रतीत्य इत्यस्य ल्यबन्तार्थ एव प्राप्य इत्यर्थः स्वीकृतः। यथोक्तम्—"तत् तत् प्राप्य यदुत्पन्नं नोत्पन्नं तत् स्वभावतः"। न चारूपिणां विज्ञानानां चक्षुरादिभिः कथं प्राप्तिः, रूपिणामेव प्राप्तेर्दर्शनादिति वाच्यम्, प्राप्तेरत्रापेक्षार्थत्वात्। तथा प्राप्य इत्यस्य अपेक्ष्येत्यर्थः, न संयुज्येत्यर्थः। एवञ्च हेतुं प्राप्य अपेक्ष्य समुत्पादः, प्रत्ययं वा प्राप्य अपेक्ष्य समुत्पादः प्रतीत्यसमुत्पाद इति युक्ततरम्। अस्मिन्नेवार्थे इदमपि समाहितं भवति— 'अस्मिन् सति इदं भवति, अस्योत्पादादिदमुत्पद्यते, तत् प्रतीत्यसमुत्पादः' इति। यथा ह्रस्वं प्राप्य प्रतीत्य अपेक्ष्य दीर्घो भवतीति। एवं हेतुप्रत्ययापेक्षं भावानां प्रादुर्भावः सौगतसमये स्वीकृतः। तस्माद्भावानां विषमहेत्वहेतुसम्भूतं स्वपरोभयकृतत्वं वा प्रतिषिद्धं भवति।

प्रतीत्यसमुत्पादव्याख्यानम्

यदुक्तं हेतुप्रत्ययं प्राप्य अपेक्ष्य भावाः प्रादुर्भवन्तीति तद् व्याख्यायते— हेतुः कारणम्। प्रत्ययश्च हेतुसमुदायः। यथोक्तम्—

चत्वारः प्रत्यया हेतुश्चालम्बनमनन्तरम् ।
तथैवाधिपतेयं च प्रत्ययो नास्ति पञ्चमः ।। (मा.का. १।४)

तत्र निर्वर्तको हेतुः। यो हि यस्य निर्वर्तको बीजभावेनावस्थितः, स तस्य हेतुप्रत्यय उत्पद्यमानो धर्मः, येनालम्बनेनोत्पद्यते स तस्यालम्बनप्रत्ययः। यथा रूपं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्षुर्विज्ञानस्य। कारणस्यानन्तरो निरोधः कार्यस्योत्पत्तिप्रत्ययः। तद् यदा बीजस्यानन्तरो निरोधः कार्यस्योत्पत्तिप्रत्ययः। तद् यथा बीजस्यानन्तरो निरोधः अङ्कुरस्योत्पादप्रत्ययः। यस्मिन् सति यद्भवति तत्तस्याधिपतिप्रत्ययः। यथा चक्षुर्विज्ञानस्याधिपतिप्रत्ययः। एते चत्वारः प्रत्ययाः, तान् प्रतीत्यभावः प्रादुर्भावः।

संक्षेपतो हि प्रतीत्यसमुत्पाद उक्तो भगवता तथागतेन—"उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैषां धर्माणां धर्मता। धर्मस्थितता धर्मनियामकता प्रतीत्यसमुत्पादानुलोमता"। अस्यायमर्थः—तथागतानां बुद्धानां मते धर्माणां कार्याणां कारणानाञ्च या धर्मता कार्यकारणभावरूपा एषा उत्पादादनुत्पादात् स्थिता। धत्ते इति धर्मः कारणम्। ध्रियत इति धर्मः कारणम्। यस्मिन् सति यदुत्पद्यते असति नोत्पद्यते तत्तस्य कारणं कार्यञ्च। उत्पादानुत्पादावन्वयव्यतिरेकौ।

धर्मस्थितता नाम धर्मनियामकता। धर्मस्य हि कार्यस्य कारणादनतिप्रसङ्गेन कालविशेषे स्थितिर्भवतीति स्वार्थिकस्तल्प्रत्ययः। सा च धर्मनियामकता, धर्मता प्रतीत्यसमुत्पादानुलोमतारूपा। कारणे सति तत्प्रतीत्य प्राप्य समुत्पादानुलोमताऽनुसारिता या सैव धर्मता। सा चोत्पादानुत्पादात्मा धर्माणां स्थिता। धर्मता कार्यकारणभावः। धर्मः कारणं कार्यञ्च।

अयं प्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यां भवति—हेतूपनिबन्धतः, प्रत्ययोपनिबन्धतश्च। हेतोरेकस्य कार्येणोपनिबन्धतः। प्रत्ययानां मिलितानां नानाकारणानां कार्येणोपनिबन्धतः। हेतूपनिबन्ध एकैककारणसम्बन्धः। प्रत्ययोपनिबन्धः कालसमुदायसम्बन्धः। स पुनः प्रतीत्यसमुत्पादो द्विविधः—बाह्यः, आध्यात्मिकश्च।

तत्र बाह्यकार्ये हेतूपनिबन्धस्योदाहरणं बीजादिफलपर्यन्तम्। प्रत्ययोपनिबन्धस्योदाहरणं बीजादङ्कुरजनने महाभूतादिधातूनां समवायः। आध्यात्मिककार्ये हेतूपनिबन्धस्योदाहरणमविद्यादिदौर्मनस्यान्तम्। प्रत्ययोपनिबन्धस्योदाहरणं पञ्चभूतान्यहङ्कारप्रत्ययरूपो विज्ञानधातुश्चेति षण्णां धातूनां समवायः।

अत्रोदाहरणानि विस्तरेण प्रस्तूयन्ते। तथा हि—बाह्यस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धः—यदिदं बीजादङ्कुरोऽङ्कुरात्पत्रं पत्रात्काण्डं काण्डान्नालो नालाद् गर्भो गर्भाच्छुक्रः शुक्रात्पुष्पं पुष्पात्फलम्। असति बीजे नाङ्कुरमेवमसति अङ्कुरे पत्रं न भवति यावदसति पुष्पे फलं न भवति। सति तु बीजेऽङ्कुरो भवति यावत् पुष्पे सति फलं भवति। एवं बीजाङ्कुरणे कार्यकारणभाव उत्पादानुत्पादाभ्यामन्वय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यतिरेकाभ्यां निर्धार्यते। तत्र बीजस्य नैव भवति ज्ञानमहमङ्कुरं निर्वर्तयामीति। अङ्कुरस्यापि नैव भवति ज्ञानमहं बीजान्निवर्तित इति। एवं फलपर्यन्तं बोध्यम्। तस्मादसत्यपि चैतन्ये बीजादीनामसत्यपि चान्यस्मिन् अधिष्ठातरि उक्तरूपेण कार्यकारणभावो दृश्यते। इति बाह्ये हेतूपनिबन्धः प्रतीत्यसमुत्पादः। बाह्यस्य प्रत्ययोपनिबन्धः प्रतीत्यसमुत्पादस्योच्यते। प्रत्ययो हेतूनां समवायः। हेतुं हेतुं प्रत्ययन्ते हेत्वन्तराणि इति तेषामयमानानां हेतूनां समवायः प्रत्ययः।

यथा षण्णां धातूनां समवायाद् बीजहेतुरङ्कुरो जायते। तत्र च पृथिवी धातुर्बीजस्य सङ्ग्रहकृत्यं करोति, यतोऽङ्कुरः कठिनो भवति। अब्धातुर्बीजं स्नेहयति; तेजोधातुर्बीजं परिपाचयति; आकाशधातुर्बीजस्यानावरणकृत्यं करोति, ऋतुरपि बीजस्य परिणामं करोति। तदेषामविकलानां धातूनां समवाये बीजे रोहति अङ्कुरो नान्यथा। तत्र पृथिव्यादिधातूनां नैव भवति ज्ञानमस्माभिर्बीजस्य सङ्ग्रहादिकृत्यं निर्वर्त्यत इति। एवमङ्कुरस्यापि नैव भवति अहमेभिः धातुभिर्निर्वर्तित इति। **इति प्रत्ययोपनिबन्धः।**

एवमाध्यात्मिकः प्रतीत्यसमुत्पादोऽपि द्वाभ्यां हेतुप्रत्ययोपनिबन्धाभ्यां भवति। तत्रास्याध्यात्मिकस्य हेतूपनिबन्धो यथा—अविद्यातः संस्कारः संस्काराद् विज्ञानम्, एवं दौर्मनस्यानां बोध्यम्। अविद्यादयः सन्ति—अविद्या, संस्कारविज्ञानम्, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानम्, भवः, जातिः, जरा, मरणम्, शोकः, परिदेवः, दुःखं, दौर्मनस्यमिति। एवमविद्या चेन्नाभविष्यद् नैव संस्कारा अजनिष्यन्त। तत्राविद्याया नैव भवति अहं संस्कारं निर्वर्तयामि। संस्कारस्यापि नैव भवति अहमविद्यया निर्वृत्त इति। एवमग्रेऽपि बोध्यम्। तथा सत्सु अविद्यादिषु स्वयमचेतनेषु चेतनान्तरानधिष्ठितेष्वपि संस्कारादीनामुत्पत्तिः। बीजादित इवाङ्कुरादीनाम्। इदं प्रतीत्य प्राप्येदमुत्पद्यत इत्येतावन्मात्रस्य दृष्टत्वात्। चेतनाधिष्ठानस्यानुपलब्धेरित्याध्यात्मिकस्य प्रतीत्यसमुत्पादस्य हेतूपनिबन्धः।

तस्य प्रत्ययोपनिबन्ध उच्यते—पृथिव्यादिपञ्चभूतविज्ञानधातूनां षण्णां समवायाद् भवति कायः। तत्र कायस्य पृथिवी काठिन्यं निर्वर्तयति। अब्धातुः स्नेहयति कायम्। तेजोधातुः कायस्याशितपीतं परिपाचयति। वायुस्तस्य श्वासादिकार्यं करोति। आकाशमस्यान्तः सुषिरभावं करोति। विज्ञानधातुरालय-विज्ञानं नामरूपादि अभिनिर्वर्तयति। विज्ञानधातुश्चायं नामरूपाङ्कुरं पञ्चविज्ञान-कार्यसंयुक्तं सास्रवं च मनोविज्ञानं निर्वर्तयति आलयविज्ञानरूपः। नाम देवदत्तादि-रूपं शौक्ल्यादि तस्याश्रयः शरीरं नामरूपशब्देनोच्यते। तस्य नामरूपात्मकस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शरीरस्य सूक्ष्मावस्था कललबुद्बुदादिकाक्रान्ता नामरूपम्, स एवाङ्कुरः। शब्दादिविषयकानि पञ्चविज्ञानानि कार्याणि, तैः संयुक्तमङ्कुरं योऽभिनिर्वर्तयति तथा आस्रवति अनुगच्छति कर्त्तारमित्यास्रवः कर्म तत्सहितं समनन्तरप्रत्ययरूप-मनोविज्ञानं योऽभिनिर्वर्तयति स विज्ञानधातुरिति। अयं भावः—विज्ञानधातुः, पञ्चविज्ञानयुक्तं नामरूपं कर्मसहितं मनोविज्ञानञ्चोत्पादयति। एवं यदा आध्यात्मिकाः पृथिव्यादिधातवो भवन्त्यविकलास्तदा कार्यस्योत्पत्तिर्नान्यथा। तत्र पृथिव्यादिधातूनां नैव भवति वयं कायस्य काठिन्यादि निर्वर्तयाम इति। कायस्यापि नैव भवति ज्ञानमेभिर्निर्वर्तित इति। एवं कार्यकारणभावः सुगतसमये निश्चितस्तत्र न चेतनापेक्षा। **इत्युक्तः प्रतीत्यसमुत्पादः।**

नन्वयं प्रतीत्यसमुत्पादः क्षणभङ्गवादे[1] सङ्घटते। तथा च क्षणभङ्गवादे कार्यकारणभावः 'अस्मिन् सतीदं भवति तदभाव' तदभाव इत्यन्वयव्यतिरेकानु-विधायी न सम्भवतीति चेदत्रोच्यते—अविनष्टादेव कारणात् कार्यं भवतीति नः पक्षः। न चैवं कार्यकारणयोर्यौगपद्यप्रसङ्गः। तथा हि, प्रथमक्षणभाविकारण-मासादितात्मलाभमविनष्टमेव प्रतीत्य प्राप्य द्वितीयक्षणे कार्यं जायते, तच्च तथा जायमानमविनष्टादेव जायते, प्रथमे क्षणे तस्याविनष्टत्वात्। न च तर्हि द्वितीयक्षणे कार्यसत्ताकालेऽपि अनुवर्तमिति वाच्यम्, द्वितीयक्षणे विनष्टत्वाद् अनुवर्तनाभावात्। सत्यामप्यनुवृत्तौ न तदानीं तस्य कारणत्वम्, निष्पन्ने कारणे तस्याकिञ्चित्करत्वात्। अतो न विनष्टात् कारणात् कार्योत्पत्तिरिति पक्षो युक्तः। यदि नाशादेव कार्योत्पत्तिः स्यात्तदा तस्याविशेषात्सर्वं सर्वस्माज्जायेत, न चास्ति तथा, तस्माद् हेतुम्प्राप्य जायमानं कार्यं न विनष्टात्कारणाज्जायते; किन्तु पूर्वक्षणभाविनीं कारणसत्ताम्प्रतीत्यैवेति ध्येयम्। तथा चास्मिन् पक्षे स्वहेतुप्रत्ययसमुत्थितात् कारणस्य शक्तिप्रतिनियमाद् हेतोर्यत्कार्यं यतः प्रथमक्षणभाविना कारणादनन्तरं जातं किञ्चिद्विशिष्टं द्वितीये क्षणे सन्निधिः सद्भावो यस्य तत् कार्यं तत् कारणं जनयतीति जन्यन्ते वा तदाश्रित्य कार्यमित्युच्यते। यदनन्तरमेव कार्योदयः, स एव व्यापारः। तथा च कारणसत्तासमनन्तरमेवाङ्कुरादेरुदयात् कारणसत्तैव व्यापारशब्दवाच्या। किमन्येन व्यापारेण। न च व्यापाराभावे कार्यकारणयोः परस्परमपेक्षा न स्यादिति चेत्, न, इदमेव कार्यस्य कारणेऽपेक्षा यत्तदनन्तरभावित्वम्। कारणस्यापि कार्ये इदमेव व्यापारो यत्कार्योदयकाले सदा सन्निहितत्वम्। न च सत्ताव्यतिरेकेण व्यापारः पदार्थस्यास्ति कश्चित्। एवञ्च सर्वेषामपि भावानां हेतुत्वमुत्तरकालिकव्यापारमन्तरेण भविष्यतीति सिद्धम्।

१. क्षणभङ्गवादस्य स्वातन्त्र्येण व्याख्येयत्वादतिविस्तरभयान्नेह विस्तीर्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षणिकत्वपक्षे आनन्तर्यमात्रमेव कार्यकारणव्यवस्थानिबन्धनम्। तदप्यानन्तर्यं नियतमेवान्यथातिप्रसङ्गात्। उक्तञ्च मध्यमकशास्त्रे नागार्जुनेन—

प्रतीत्य कारकः कार्यं तं प्रतीत्य च कारकम् ।
कर्म प्रवर्तते नान्यत् पश्यामः सिद्धिकारणम् ।। (मा.८।१२)

सुगतनये कार्यकारणयोस्सम्बन्धः

सुगतानामभिमते कार्यकारणयोस्सम्बन्धः कार्यत्वं कार्यत्वञ्चेत्येव। यथोक्तं हेतुबिन्दुटीकायाम्—"किं रूपः पुनरसौ कार्यकारणभावोऽनुपलम्भसहायप्रत्यक्षनिबन्धन इत्याह—तद्भावे भावस्तदभावेऽभावश्च" इति। य एव हि कारणाभिमतस्य भावे भाव एव। कार्यत्वेनाभिमतस्य भावः। तदभावे कारणत्वाभिमतस्याभावे अभाव एव कार्यत्वेनाभिमतस्याभावश्च। स एव कार्यकारणभावो नान्य इति। एतेन कार्यकारणयोर्नियामकः कार्यकारणाभ्यामन्यः सम्बन्धः कश्चिदस्तीति तीर्थकानामभ्युपगमः परास्तः। तथा हि—कार्यकारणाभ्यामन्यो भवन् स सम्बन्धः स्वभावतोऽप्रतिपन्नकार्यकारणरूपयोर्वा भवेत्, स्वभावेनैव कार्यकारणात्मनोर्वा, नाद्यः, सर्वत्रैव कार्यकारणभावप्रसङ्गात्। सर्वत्रैवाकार्यकारणभूतेऽपि वस्तुनि तन्नियमकारणाभावात् कार्यकारणत्वासङ्गः स्यादिति भावः। ततः सर्वं सर्वस्य कार्यं स्यात्।

ननु नास्ति स्वरूपतः कार्यकारणयोरग्निधूमयोः कार्यकारणभावः; किन्तु अन्ययोगात्तद्भवतीति चेत्, न, अन्ययोगेऽपि भावानां प्रतिनियतरूपत्यागेन रूपान्तरयुक्तत्वाभावात्। यतो नान्ययोगस्तेषां पूर्वरूपं नाशयति विनाशहेत्वयोगात्। न चान्ययोगादपूर्वमेव कार्यकारणत्वमुत्पद्यत इति वाच्यम्, तस्मात्पूर्वस्य पूर्वरूपादकार्यकारणरूपादर्थान्तरत्वप्रसङ्गात्, तथा च विरुद्धयोर्द्वयोर्भावयोरसम्भविनी एकत्रापत्तिः प्रसज्येत। अपि च पश्चादुत्पद्यमानः कार्यकारणभावः पूर्वतनाकार्यकारणभावाद्भिन्नोऽभिन्नो वा? नाद्यः, तत्स्वभावानापत्तेः। न हि तेषु निष्पन्नेष्वनिष्पन्नो भिन्नहेतुको वा तत्स्वभावो भवति। तथा चात्राकारणकार्ययोर्वह्निधूमयोः स्वकारणाभ्यां निष्पन्नयोः सतोरनिष्पन्नः कार्यकारणभावो न अन्ययोगान्निष्पन्नः सन् तयोः स्वभावो भवितुमर्हति। विरुद्धधर्मवत्त्वं कारणभेदवत्त्वं वा भेदहेतुः। तथा चात्र न तावेवाकारणकार्यभूतौ वह्निधूमौ कारणकार्यभावापन्नौ किन्तु भिन्नावेव। ततश्चेन्न भेदः, एकं द्रव्यं विश्वं स्यादिति प्रसज्येत। ततश्च पूर्वके वस्तुनी तदवस्थे एवेति न तयोरन्ययोगेऽपि कार्यकारणरूपतापत्तिः।

नापि द्वितीयः, स्वभावत एव तयोः कार्यकारणरूपत्वात्, अन्यस्य तस्य कार्यकारणभावरूपसम्बन्धस्य वैयर्थ्यात्। ननु तयोस्ताद्रूप्येऽपि कारणबुद्धावस्योप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगान्न वैयर्थ्यमिति चेत्, न, तद्भावभावित्वमात्रनिबन्धनायाः कार्यकारण-बुद्धेरर्थान्तरनिमित्ताभावात्। एवं हि न कार्यकारणभावबुद्धिः सम्बन्धनिमित्तिकेति भावः। कार्यकारणयोर्नियामकः कार्यकारणयोः सम्बन्ध उपलब्धिलक्षणप्राप्तो न वा? नाद्यः, तस्योपलब्धिलक्षणप्राप्तस्य कार्यकारणरूपविवेकिना रूपान्तरेणाप्रतिभास-नात्। तथाविधस्यापि ग्रहणकल्पनायामतिप्रसङ्गात्। न द्वितीयः, उपलब्धिलक्षण-प्राप्तविरहेण तेन कार्यकारणबुद्धेर्नियमाभावात्। न हि तदर्थान्तरं स्वसत्तामात्रेण कार्यकारणबुद्धिं प्रवर्तयति। सदा सन्निहितत्वेनास्य तयोः सर्वदोदयप्रसङ्गात्। न सम्बन्धः स्वयमगृहीतः सन् सम्बन्धिनौ नियमयति—इत्ययुक्ताऽस्यानुपलब्धि-लक्षणप्राप्ततेति। न च सम्बन्धो नास्ति विशेषणं येन तस्य ग्रहणमपेक्षेत, किन्तूपलक्षणमिति वाच्यम्, दृष्टस्य तस्योपलक्षणायोगात्, कार्यकारणबुद्ध्योस्तन्नि-बन्धनतोपगमाच्च। तद्बुद्धिनिबन्धनतोपगमे चास्योपलक्षणायोगात्। न हि यन्निमित्तो योऽन्यत्रातद्बुद्धिभाजि तद्व्यवसायः, स तदुपलक्षणे युक्तः। देवदत्ते दण्डिव्यव-सायवद् दण्डोपलक्षणे।

किञ्च कार्यकारणयोः सम्बन्धः कार्यकारणाभ्यामन्यो भवन् स्वयं सम्बद्धो विशिष्टबुद्धिनियामकोऽसम्बद्धो वा? नाद्यः, सम्बद्धोऽपि स्वेनैव सम्बद्धः सम्बन्धान्तेरण वा? नाद्यः, असम्भवात्। न ह्यतिकुशलोऽपि नटः स्वस्कन्धमारोढुं शक्नोति, न द्वितीयः, सम्बन्धान्तरकल्पनायामनवस्थापातात्। अथ चेद्द्वितीयस्तदेष्टापत्तिः, कार्यकारणयोः कार्यत्वं कारणत्वमेव कार्यकारणभाव-मित्यभ्युपगमात्। किञ्च स्वभावतः कार्यकारणभावमापन्नयोः कार्यकारणात्मनो-स्ताभ्यामसहभावित्वं स्यात्सम्बन्धस्य। ततश्च कार्यकारणकाले तस्यासन्निधानात् कथं कार्यकारणबुद्धिहेतुता स्यात्? कार्यकारणात्मना विरुद्धयोरारोप्य कार्यकारण-बुद्धिहेतुत्वकल्पनायाञ्च कल्पितविषय एव कार्यकारणताध्यवसायः स्यात्, न वस्तुविषयः। स च कार्यकारणताध्यवसायविशिष्टभावाभावनिबन्धनोऽभ्युपगत एवेति व्यर्थं सम्बन्धः कल्प्यते। कल्पितविषयत्वे चास्याध्यवसायस्यापि वैयर्थ्यमस्त्येव, सम्बन्धकल्पनायाः कार्यकाले कारणस्य विरोधात्, कार्यकारणयोरयौगपद्याच्च। न ह्ययुगपत्सम्भविनोर्विशिष्टप्रत्ययप्रतीतिरिति।

अथाभ्युपगम्येत कल्प्यमानोऽप्ययं सम्बन्धः कार्यकारणभावाभ्यां सहिताभ्यां जन्यते। तत्र किं सहिताभ्यां ताभ्यां जन्यते एकैकेन वा? नाद्यः, अयुगपत्स्थिताभ्यां ताभ्यामेककार्यजनकत्वाभावात्। नान्त्यः, प्रत्येकजन्यः कथं कार्यकारणभावः स्यात्। कार्येण जन्यमानः कार्यभावः स्यात्। कारणेन जन्यमानश्च कारणभाव इति। किञ्च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदा कारणेन जन्यते तदा किं स्वकार्यसहितो जन्यते, अथ केवलः? नाद्यः, यदि स्वकार्यसहितस्तदुभयोरन्यत एव भावात् परस्परमसम्बन्ध इति कार्यसम्बन्धितास्य हीयेत। नन्वेकसामग्र्यधीनतैवानयोः सम्बन्ध इति कथं परस्परासम्बन्ध उच्यत इति चेत्, न, कार्येणापि सममस्य कार्यकारणभावस्य सम्बन्धस्य प्रकृतत्वात्। एक-सामग्र्यधीनतेष्टौ च तदुत्पत्तेः पूर्वं कारणं न कारणं स्यात्। नान्त्यः, केवलोऽपि किं स्वकार्यात् प्राग्जन्यते पश्चाद्वा? नाद्यः, कारणस्य क्षणिकत्वेन तमेव जनयित्वा ध्वंसात् कथं स्वकार्यकरणत्वम्। तस्यां चासत्यां कथं तदपेक्षमस्य कारणत्वं स्यात्। कारणे चासति कथमकारणेन कार्यकारणसम्बन्धो जन्यते। न द्वितीयः, अथ स्वकार्यं कृत्वा पश्चाज्जन्येत तदाऽपि स्वकार्यकाल एव विनष्टत्वात् कारणस्या-सतस्तदुत्तरकालभाविकार्यकारणभावजननं कुतः कार्यकारणभावश्च सम्बन्ध उच्यते भवता। न च कार्येण जन्योऽपि कार्यकारणयोर्नियामकः। कार्याज्जायमानः कार्यप्राग्भाविकारणेन सह कार्यस्य नियामकत्वाभावादिति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधवोद्वाहमीमांसा

डॉ.कमलाकान्तत्रिपाठी
अध्यक्षः, पूर्वमीमांसाविभागस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी

❀ ❀ ❀

प्रकृतविषयस्य धर्मशास्त्रमूलत्वादादौ धर्मशास्त्रपदार्थोऽपि भवति प्रतिपिपादयिषितः। तत्तु वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकं तत्तत्स्मृति-प्रवर्तकप्रणीतम्। ते च मन्वत्रिविष्णवङ्गिरोहारीतयाज्ञवल्क्ययमापस्तम्बसंवर्तकात्या-यनबृहस्पतिपराशरव्यासशङ्खलिखितदक्षगौतमशातातपवसिष्ठादयो धर्मशास्त्रप्रवर्तका एव। तथा हि—

"तेषामप्यङ्गिरोव्यासगौतमात्र्युशनोयमाः।
वसिष्ठदक्षसंवर्तशातातपपराशराः।।
विष्णवापस्तम्बहारीताः शङ्खः कात्यायनो गुरुः।
प्रचेता नारदो योगी बोधायनमनू तथा।।
सुमन्तुः काश्यपो बभ्रुः पैठिनो व्याघ्र एव च।
सत्यव्रतो भरद्वाजो गार्ग्यः काष्णर्याजिनिस्तथा।।
जाबालिर्जमदग्निश्च यौगाक्षिर्ब्रह्मसम्भवः।
इति धर्मप्रणीतारः षट्त्रिंशदृषयः स्मृताः।।

इति पैठिनोक्ता ऋषयो धर्मशास्त्रप्रणेतारो भवन्ति। महाभारतरामायणसांख्य-पातञ्जलपाशुपतवैष्णवादीनाञ्च धर्मशास्त्र एवान्तर्भावः। पुराणानामपि व्यास-प्रणीतत्वेनात्रैव समावेशः। एतेषां स्मृतिसंज्ञानां ग्रन्थानां धर्मशास्त्रत्वं वेदानाञ्च तन्मूलत्वमिति सनातनसरणिः।

विधवाविषये यत् किमपि वक्तव्यं तद् धर्मशास्त्रं पुरस्कृत्यैव, अन्यथा तस्याप्रामाण्यमापद्येत। विधवापरिग्रहविषये भवन्ति अनुकूलाः प्रतिकूलाश्च स्मृतयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताः सर्वा उद्दिश्य विचार्यते किं विधवापरिग्रहः कर्तव्यः, अथवा न कर्तव्यः। एतस्मिन्नेव प्रसङ्गे जीवत्येव पत्यौ याः परित्यक्ताः सन्ति, तासां परिग्रहः कार्यो न वेत्यपि विचारविषयः। यासां पतयोऽयोग्यास्तासां कृतेऽपि विचारो द्रष्टव्यः। अत्र विधवापदमेतासामप्युपलक्षणम्। परिग्रहः जायात्वेन स्वीकारः। विधवापरिग्रह-विषयेऽनुकूलाश्च स्मृतयः—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते[१]।।

उद्वाहिताऽपि सा कन्या न चेत् सम्प्राप्तमैथुना।
पुनः संस्कारमर्हेत यथा कन्या तथैव सा[२]।।

वरो यद्यन्यजातीयः पतितः क्लीब एव वा।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा।।
ऊढाऽपि देया सान्यस्मै सहाभरणभूषया।। (कात्यायनः)

तथा चापरार्के नारदः—

'प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत्।
त्रीनृतून् समतिक्रम्य कन्याऽन्यं वरयेद् वरम्।।

सम्बन्धतत्त्वे च वसिष्ठः—

कुलशीलविहीनस्य पश्चाद्धि पतितस्य च।
अपस्मारिविधर्मस्य रोगिणां वेशधारिणाम्।।
दत्तामपि हरेत् कन्यां सगोत्रोढां तथैव च।। इति।

विधवापरिग्रहविषये प्रतिकूलाश्च स्मृतयः—

नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्।।
न विवाहविधावुक्तं विधवावेदनं क्वचित्।।
कामन्तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु[३]।।

---

१. पाराशरीयधर्मशा. ४।३०; २. नारदः, निर्णयसिन्धौ, पृ.२३०।
३. मनुस्मृतिः-९।६४-६५ तथा ५।१५७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वेति मिताक्षरायां विष्णुः।

अत्रोभयविधानामपि स्मृतीनां शिष्टपरिगृहीतत्वाद् एकतरस्या बाधे प्रमाणाभावाद् विकल्पः। न च भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणमिति विष्णुस्मृते-र्भर्त्रन्वारोहणाभावे ब्रह्मचर्यविधानात्—

'मृते भर्तरि या नारी ब्रह्मचर्यविवर्जिता।
पातयेत् स्वैरिणी सा तु निरये स्वकुलत्रयम्' ।।

इति वृद्धगर्गस्मृत्या

'मनसापीह दुष्टेन याऽन्यं भावयति प्रियम् ।
सा याति नरकं घोरं तेनैवाघेन निश्चितम्' ।। इति।

वृद्धपराशरवचनाच्च ब्रह्मचर्यपालानाभावे महादोषकीर्तनाद् ब्रह्मचर्यपालनमेव युक्तं न पुनःपरिग्रहः, पुनःपरिग्रहे ब्रह्मचर्यहानान्नरकगमनापत्तेरिति वाच्यम्, आपत्सु नारीणामन्यपतिविधानानुगुणस्मृत्यनुरोधेन पित्रादिभिरन्यस्मै वराय प्रतिपादनात् पूर्वमेव स्वेच्छाचारे स्वैरिणीत्वसम्पातात् कुलाधःपातनरकावाप्तिहेतुता। विवाहस्य धर्मार्थत्वात् प्रजार्थत्वाच्च धर्मे दम्पत्योः सहाधिकारित्वात् पत्यौ विपन्ने उभयोरप्यभावेनान्यपतिलाभात् परपूर्वाया अपि प्रजाधर्मयोः प्राप्तिसम्भवात् सम्भाव्येत निःश्रेयसता। अतो विधवानां स्वेच्छाचारे दोषः, न तु पुनःपरिग्रहे द्वितीयेन पत्या सह कर्तव्याचरणे। ब्रह्मचारिणोऽवकरतादोषवत्।

ब्रह्मचर्यव्रतमङ्गीकुर्वतः प्रयत्नेनाप्रयत्नेन वा रेत उत्सर्गे 'ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' इति निर्ऋतिदेवताकगर्दभद्रव्यकयागः शुद्ध्यर्थे विहितः। एवमपि पारलौकिकी शुद्धिस्तस्य। अत एव शिष्टास्त्यजन्ति तानवकीर्णिनो ब्रह्मचारिण इति व्यक्तं तृतीये उत्तरतन्त्रे[1]। अयं दोषो ब्रह्मचारिण एव, न तु कृतसमावर्तनस्य स्वीकृतगार्हस्थ्यस्य। तस्य प्रत्युत 'ऋतौ भार्यामुपेयादि'ति शास्त्रेण गमनस्य विहितत्वात्। तथैव विधवानामपि परिग्रहात् पूर्वं दोषो न तदुत्तरमिति सिद्धो विकल्पः। अपि च "विधवा विधातृका भवति, विधवनाद्वा विधावनाद् वेति चर्मशिराः, अपि वा धव इति मनुष्यनाम, तद्वियोगाद् विधवा इति नैरुक्तवचनेन विशेषेण धवनात् कम्पनाद् विधवा, सा हि भर्तृमरणाद्विधूता भवति, विशेषेण धावनाद् विधवा, सा हि भर्तुरभावादनुरुध्यमाना पुंभिर्यतस्ततो धावति, अथवा परिविहीना विधवा भवतीति विधवापदशक्यतावच्छेदकमपि

१. ब्रह्मसूत्रे-३।४।अधि. ११-१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिग्रहात् पूर्वमेव। ततः परं तस्यां विधवात्वाभावादेव नातिक्रमदोषशालितेति विकल्प एवायाति।

नन्वेवमपि लौकिकसुरतादिसुखाधिक्यात् सर्वासामपि पुरुषान्तरसङ्ग्रहे प्रवृत्तिः स्यात्, ततः 'कामं तु क्षपयेद्देहम्, आसीदामरणात् क्षान्ता नियता ब्रह्मचारिणी'त्यादिविधवाधर्माणामविषयत्वापत्तिः स्यादिति चेत्, न, नियमपालने फलस्याधिक्यात् तथाविधोत्कृष्टफलाभिलाषिणीनां तत्र प्रवृत्तिसम्भवान्नाविषयता। [1]'फलस्य कर्मनिष्पत्तेस्तेषां लोकवत् परिमाणतः फलविशेषः स्यात्' इति अर्थवादाधिकरणे महर्षिजैमिनिनाऽपि फलतारतम्यस्य प्रतिपादितत्वादिति प्रथमः पक्षः।

सत्यम्, विकल्प आश्रयितुं शक्येत यदि प्रकारान्तरेणोभयोर्व्यवस्था न स्यात्। 'एकार्थास्तु विकल्पेरन्' इति द्वादशिकन्यायेन एकप्रयोजनकयोर्द्वयोरङ्गयोर्विहितयोर्विकल्पो भवति। यथा 'अग्निहोत्रं जुहोती'ति विहितहोमार्थत्वेन 'दध्ना जुहोति, पयसा जुहोति, यवाग्वा जुहोति' इत्येवमादिवाक्यविहितानां दध्यादीनां विकल्पो भवति, एकेनैव द्रव्येण होमोपकारलाभाद् मिश्रीकरणे समुच्चये वा निरपेक्षविधानेनायुक्तत्वात् समेषामपि वाक्यानां बाधात्। एवमेव 'व्रीहिभिर्यजेत, यवैर्यजेत' इत्यत्रापि विकल्प एव। प्रकृते तु 'पतिरन्यो विधीयते, नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभि'रित्यत्र एकस्य विधिविषयत्वाद् अन्यस्य च निषेधविषयत्वान्न पूर्वोक्तन्यायेन विकल्पः; अपि तु 'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः' इति निषेधः पूर्वं प्राप्तिमपेक्षते। प्राप्तौ सत्यां प्रतिषेध इति न्यायात्। यथा 'न ब्राह्मणं हन्यात्' इति प्रतिषेधो द्वेषादिना हनने प्रवृत्तं प्रत्येव प्रवर्तते, अन्यथा हननेऽप्रवृत्तं प्रत्येव शास्त्रस्य प्रामाण्योपपत्तौ द्वेषादिना प्रवृत्तस्य पुरुषस्य निवृत्तिर्न स्यात्। प्रकृते च प्राप्तिर्यद्यपि रागादिनाऽपि सम्भाव्यते, तथापि ततः पूर्वं 'पतिरन्यो विधीयते' इति प्रवृत्त्यङ्गीकारे शास्त्रप्राप्तस्य प्रतिषेधे विकल्पो भवति। यथा 'अतिरात्रे षोडशिनं गृह्णाति' इति शास्त्रप्राप्तस्य अतिरात्रे षोडशिग्रहस्य 'नातिरात्रे षोडशिनं गृह्णाति' इति प्रतिषेधे विकल्पः, तथापि अतिरात्रे यथा षोडशिग्रहस्य प्राप्तिः शास्त्रादेव, न तु प्रकारान्तरात्, तथा प्रकृते न तादृशी स्थितिः। शास्त्रं विनापि रागादिना प्राप्तिसम्भवात्। अतो न विकल्पः। शास्त्रप्राप्तस्य प्रतिषेधे विकल्पाङ्गीकारात्। विकल्पस्याष्टदोषदुष्टत्वाच्च। अतः—

'नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु'।।

---

१. निरुक्ते, अ.३पा.३खं. १५; १. जैमिनिसूत्रम्—१।२।१७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिनिषेधशास्त्राणां विधवापरिग्रहनिष्ठानिष्टसाधनताबोधनान्निवर्तनाप्रतिपादकत्वेन विधवानामपरिग्रहस्यैव धर्मत्वम्। नन्वेवम् 'पतिरन्यो विधीयते, ऊढापि देया सान्यस्मै सहाभरणभूषया' इत्यादिशास्त्राणां का गतिरिति चेत्, श्रूयताम्, तेषामभ्यनुज्ञाविधित्वाङ्गीकारान्न दोषः। विवाहानृतवदनविधिवत्। विवाहानृतवदनविधेरग्निहोत्रादिविधिवन्नेष्टजनकत्वम्; अपि तु 'नानृतं वदेदि'ति निषेधस्य अतिक्रमनिमित्तदोषाजनकत्वमेवाक्षिप्यते। एवमिहापि नान्यस्मिन्निति निषेधस्य अतिक्रमनिमित्तदोषाजनकत्वमात्रमिति द्वितीयः पक्षः।

'पतिरन्यो विधीयते, ऊढाऽपि देया साऽन्यस्मै सहाभरणभूषया' इत्येवमादीनां न विवाहानृतवदनवदभ्यनुज्ञाविधित्वं भवितुमर्हति।

अपत्यलोभाद् या तु स्त्री भर्तारमतिवर्तते।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते[१]।।

नान्योत्पन्ना प्रजास्तीह न चाप्यन्यपरिग्रहे।
न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते।। (मनु. ५।१६२)

विधवाकबरीबन्धो भर्तृबन्धाय जायते।
शिरसो वपनं कार्यं जटा धार्याऽथवा तया।। (मदनरत्ने स्कान्दे)

पर्यङ्कशायिनी नारी विधवा पातयेत् पतिम्।
मृते भर्तरि या जीवेद् ब्रह्मचर्यविवर्जिता।
पातयेत् स्वैरिणी सा तु निरये स्वकुलत्रयम्।। (वृद्धगर्गः)

इत्येवमादिनिन्दावचनैः प्रतिरोधात्। अपि च—

मृते जीवति वा पत्यौ या नान्यमुपगच्छति।
सेह कीर्तिमवाप्नोति मोदते चोमया सह।। (याज्ञ.आ. ७५)

इति याज्ञवल्क्यवचनेन मृते जीवति वा भर्तरि अन्यगमनाभावे उमासाहचर्यपुरःसरमोदकीर्त्यवाप्तिनिश्चयाद् नोद्वाहोऽस्ति विधवानामिति निश्चयदार्ढ्येन अतिक्रमे महान् दोष एव प्रतीयते। नियोगोऽपि क्वचित् स्मृतिषु यो दृश्यते सोऽपि प्रमाणविधुरः। तथा हि मनुराह—

नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित्।
न विवाहविधावुक्तं विधवावेदनं पुनः।।

१. मनुस्मृतिः-५।१६१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः।
मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति।।
स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः।।
ततः प्रभृति ये मोहात् प्रमीतपतिकां स्त्रियम्।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः[१]।। इति।

एवं यत् क्वचिद् नियोगप्रतिपादनं तदपि शिष्टस्मृतिविरोधान्न प्रामाणिकम्। एवं तर्हि का गतिः पुनरिति, श्रूयताम्—

पूर्वोक्तानि यानि निन्दावचनानि तानि निन्दान्यथानुपपत्त्या न प्रतिषेधकल्पकानि विधवाभिरन्यः पुरुषो न स्वीकर्तव्य इति, येन च 'पतिरन्यो विधीयते, ऊढाऽपि देया सान्यस्मै सहाभरणभूषये'त्यादिवचनैर्विरोध आशङ्क्येत; अपि तु—

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु।।
आसीदामरणात् क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्[२]।।
आर्ताऽऽर्ते मुदिते हृष्टा प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता।।
मृते भर्तरि या नारी समारोहेद् हुताशनम्।
सारुन्धतीसमाचारा स्वर्गलोके महीयते[३]।।
पत्यौ मृतेऽपि या योषिद् वैधव्यं पालयेत् क्वचित्।
सा पुनः प्राप्य भर्तारं स्वर्गलोकं समश्नुते[४]।।

इत्येवमादिवचनप्रतिपादितपातिव्रत्यधर्मवैधव्यपालनविधिस्तावकत्वेन 'पतिरन्यो विधीयते, ऊढाऽपि देया सान्यस्मै सहाभरणभूषया' इत्यादिवचनैः सह 'पातयेत्

१. मनुस्मृतिः-९।६५-६८।
२. मनुस्मृतिः-५।१५७-१५८।
३. हारीतस्मृतिः;
४. निर्णयसिन्धौ काशीखण्डे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वैरिणी सा तु निरये स्वकुलत्रयम्, सेह निन्दामवाप्नोति पतिलोकाच्च हीयते' इत्येवमादीनि सर्वाण्यपि निन्दावचनानि अर्थवादरूपाणि स्वीक्रियन्ते। अतः 'पातिव्रत्यमनुतिष्ठेत्, वैधव्यं पालयेत्' इत्येवंरूपे विधावेव सर्वेषां तात्पर्यमिति न कोऽपि विरोधलेशावतारः। यथोक्तं वार्तिककारमिश्रैः—

'या निन्दा तन्मात्रपर्यवसायिनी, सा निषेधफला। विधिपरा तु स्तुत्यर्था जायते, तदुपपादनस्य दृष्टार्थत्वादिति'[१]। सूत्रकारोऽपि ब्रूते—'न चेदन्यं प्रकल्पयेत्, प्रक्लृप्तावर्थवादः स्यादानर्थक्यात् परसामर्थ्याच्चेति'[२]।

तथा हि—'जर्तिलयवाग्वा वा जुहुयात् गवीधुग्यवाग्वा वा जुहुयात्' न ग्राम्यान् पशून् हिनस्ति नारण्यान् अथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च पयसाऽग्निहोत्रं जुहुयात्' इत्यत्र विधेरनाहुतिरिति च निन्दया निषेधस्यानुमानाद् विधिनिषेधावुभाविति विकल्पे प्राप्ते सिद्धान्तसूत्रमिदम्। यदि प्रत्यक्षो विधिः सन्निहितो न स्यात्, ततः षोडशिग्रहणवदेकेन शिष्ट्वा अन्येन प्रतिषेधः स्यात्। अत्र तु 'पयसा अग्निहोत्रं जुहुयात्' इत्यन्यस्य विधेः प्रक्लृप्तत्वात् तच्छेषभूतोऽयमर्थवादः स्यात्, अन्यथा निषेधेनैकवाक्यतां विना निन्दात्वस्यैवानिश्चयेन अनाहुतित्वकथनस्य निषेधकल्पकत्वस्यैवासम्भवाद् आनर्थक्यं स्यात्। कथञ्चित् कल्पितस्यापि निषेधस्य विकल्पापादकत्वात्, अत्र च पयोद्रव्यविधानादेवानर्थक्यस्यापरिहाराद् यवागूस्तुतिनिन्दयोः कथं स्तुत्यर्थत्व-मित्याशङ्कायां परसामर्थ्यादित्युक्तम्। ग्राम्याणामारण्यानाञ्च पशूनां हिंसानापादनेन प्रशस्तानामपि जर्तिलगवीधुकानां पयःप्रयोगापेक्षया दुष्टत्वात् पयः प्रशस्ततरमिति परेण पयोविधिनान्वये सामर्थ्यादित्यभिप्रायः। एवमेकवाक्यत्वे सम्भवति अनेकादृष्टसम्पृक्तवाक्यभेदापादकविधित्वाङ्गीकारस्यायोगाज्जुहुयादिति लिङोऽपि स्तुतिप्रयोजनकतैव। एवमत्रापि विधिपूर्वकाभरणसहकृतविधवोद्वाहस्यानियतपुरुष-संसर्गापेक्षया प्रशस्तत्वात् पातिव्रत्यानुष्ठानवैधव्यपालनापेक्षया दुष्टत्वात् पाति-व्रत्यानुष्ठानं वैधव्यपालनञ्चैव प्रशस्ततरमिति 'ऊढापि देया साऽन्यस्मै, पतिरन्यो विधीयते' इत्येवमादीनामपि स्तुत्यर्थत्वमिति सर्वोपपन्नमिति तृतीयः पक्षः।

सत्यम्। अर्थवादः सर्वोऽपि स्याद् यदि विधवाप्रदानतन्निन्दावचनानि एकत्र स्युः, पातिव्रत्यानुष्ठानवैधव्यपालनविधिसन्निधौ, न त्वेवमस्ति, भिन्नासु स्मृतिषु तत्तद्वचनानामुपलभ्यमानत्वात्। एकस्यर्षेर्विधवोद्वाहेऽभ्यनुज्ञानाद् अन्यस्य

१. तन्त्रवार्तिकम्-१।२।११।
२. जै.सू. १०।८।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चातथात्वात् परस्परं विरोधे नैकतरस्यैवानुष्ठाने विनिगमकं किञ्चिदस्तीति न्यायानुसरणमेव ज्यायः। तथा चोक्तमस्ति—

स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः।
अर्थशास्त्रात्तु बलवद् धर्मशास्त्रमिति स्थितिः[१]।। इति।

मीमांसायां[२] स्मृत्यधिकरणे स्मृतीनां प्रामाण्यं न स्वातन्त्र्येण, तासां पुरुषनिर्मितत्वेन पुरुषाणाञ्च भ्रमप्रमादादिदोषदूषितत्वादप्रामाण्यमेवापद्येत। अतश्च तासां प्रामाण्यावधारणाय किञ्चिद् मूलमवश्यमेव गवेषणीयम्। प्रत्यक्षादीनां धर्माधर्माविषयत्वान्न तन्मूलकत्वम्। भ्रान्त्यादिमूलकत्वमपि न सम्भवति। तत्कारणाज्ञानादिकल्पने गौरवात्। अतो वेदमूलकत्वमेव तासाम्। यतो हि ता वेदप्रामाण्याभ्युपगन्तृत्वतदुदितकर्मानुष्ठातृत्वलक्षणशिष्टत्रैवर्णिकपरिगृहीताः सन्ति। ते हि अष्टकाकलञ्जभक्षणादिकं धर्माधर्मत्वेन परिगृह्णन्तो वेददर्शिन एव सन्ति। वेदस्य प्रत्यक्षपठितस्यैव तन्मूलत्वम्। एवं सति स्मृतिप्रणयनस्य वैयर्थ्यं न शङ्कनीयमेव। शाखान्तरोपसंहारेण मन्त्रार्थवादोपोद्धारेण न्यायेन सिद्धस्यार्थस्य निरूपणेन च तत्प्रणयनस्य सार्थक्योपपत्तेः। न हि सर्वाः शाखा एकेन पुरुषेणाध्येतुं मन्त्रार्थवादेभ्यो विधयः कल्पयितुं न्यायसिद्धा अर्थाश्च कथयितुं शक्यन्ते। मन्वादीनां सर्वज्ञत्वेन तत्सर्वं विधातुं शक्यत्वात् स्मृतिकरणं सप्रयोजनम्। तथा हि—'अष्टकाः कर्तव्याः, गुरुरनुगन्तव्यः., तडागं खनितव्यम्, प्रपाः प्रवर्तयितव्याः, शिखाकर्म कर्तव्यमि'त्येवमादीनां स्मृतीनाम्—

'यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम्।
संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली।।

एषा वै संवत्सरस्य पत्नी या अष्टकाः, तस्माच्छ्रेयांसं पूर्वं यन्तं पापीयान् पश्चादन्वेति, स्थलया उदकं परिगृह्णन्ति, धन्वन्निव प्रपा, यत्र बाणाः सम्पतन्ति कुमारा विशिखा इवेत्येवमादयो वेदा मूलम्। एवं वेदमूलत्वेनैव स्मृतीनां प्रामाण्यं सिध्यति नान्यथा। यस्या अपि स्मृतेर्मूलभूतो वेदो न दृश्यते, तस्या अपि नित्यानुमेयो वेदो मूलमिति केचित्। तथा सति विरुद्धयोरपि स्मृत्योर्मूलत्वं यदि दृश्यते, तदा विकल्पो भवति। यदि एकस्या मूलत्वमन्यस्याश्च तदभावस्तदा समूलाया एवानुष्ठानम्। श्रुतिविरुद्धायाः स्मृतेरप्रामाण्यमेवेति व्यक्तं विरोधाधिकरणे[३]। यथा 'औदुम्बरीं स्पृष्ट्वोद्गायति' इत्येतया श्रुत्या 'औदुम्बरी सर्वा वेष्टितव्या' इत्यस्याः

---

१. याज्ञवल्क्यस्मृतिः, व्यवहाराध्यायः-२१।
२. अ.१ पा.३ अधि.१; १. मी.,अ.१, पा.३, अधि. २।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मृतेर्बाधादप्रामाण्यम्। यथा चोक्तं भाष्यकारैः—'तस्मादुक्तं श्रुतिविरुद्धा स्मृतिरप्रमाणमिति। अतश्च सर्ववेष्टनादि नादरणीयम्''[1] इति। यत्र स्मृतौ लोभादिहेतुदर्शनं भवति, तस्या अपि प्रामाण्यं नास्तीति तत्रैव व्यक्तम्। एवं स्थिते—विवाहविधौ विनियुक्तानां मन्त्राणां लिङ्गाद् एकभर्तृकत्वमेव नारीणां निश्चीयते। तथा हि सप्तपदीसङ्क्रमणे सप्तमो मन्त्रः—''सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु'' इत्यत्र पत्यनुव्रतत्वं पत्न्याः स्पष्टमेव प्रतीयते।

वधूहृदयालम्भने विनियुक्तो मन्त्रोऽपि तथैवास्ति—

''मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्' इति।

अत्र दम्पत्योरेकचित्तत्वादिप्रतिपादनाद् नान्यगामित्वं विधवानां निश्चीयते। अश्मारोहणे विनियुक्ते—'आरोहेममश्मानमश्मेव त्वं स्थिरा भव अभितिष्ठ प्रतन्यतोऽवबाधस्व पृतनायतः' इति मन्त्रे अश्मेव त्वं स्थिरा भवेति दार्ढ्यसम्पादनलिङ्गात् पातिव्रत्यानुष्ठानमेव परमो धर्म इति प्रतीयते। अपि च—

'इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं संसृजस्वाधा जिव्री विदथमावदाथः' इति वधूप्रवेशमन्त्रे गृह एव सन्तत्युपलक्षिता या वध्वा प्रियत्वसमृद्धिः, गृहपत्नीत्वाय सावधानत्वं पत्या साकं शरीरस्य मिश्रीकरणं जीर्णतापर्यन्तवियोगवैधुर्यपुरःसरयज्ञसम्बन्धिवार्ताकरणञ्च यत् प्रतिपाद्यते, तेन—

'नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित्।
न विवाहविधावुक्तं विधवावेदनं पुनः'।।

इति मनुवचनमेव परिपुष्टं भवति। अत एव—

पुनः पत्नीमग्निरदादायुषा सह वर्चसा।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम्[2]।।

इति मन्त्रेण पित्रा पूर्वं दत्तायाः कन्यायाः पुनरग्निकर्तृकदानमुच्यते। एतेन 'अग्निसन्निधिसंस्काराद् भार्यात्वमुपजायते' इति सिध्यति। पुनश्च तस्याः पत्ये दीर्घायुष्ट्वाय यदाशीर्वचनं तन्नूनमेव वैधव्यं दुरितनिमित्तकमिति द्योतयति। एवं दुरितविनाशाय विधवाभिराजीवनं स्मृत्युपपादितो ब्रह्मचर्यसचिवो धर्म एवानुष्ठेय-

१. मी.,शा.भा., तत्रैव-१।३।३; २. ऋ. सं. ८।३।२७।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तत्तुल्याभिरन्याभिरपि परित्यक्ताभिः। तथा सति 'पतिरन्यो विधीयते' इत्येवमादीनां वेदमूलकत्वाभावात् प्रत्युत विरुद्धश्रुतिभिर्विरोधाधिकरणन्यायेन बाधादप्रामाण्यमेवेति चतुर्थः पक्षः। न त्वेतद् युक्तमिव। यद्यप्युद्वाहिकेषु मन्त्रेषु पूर्वोक्तेन प्रकारेण पातिव्रत्यानुष्ठानं वैधव्यपरिपालनञ्च सिध्यति। परमधर्मत्वेन तदेवेष्टम्। तत्र न कोऽपि विवादलेशावकाशः। तथापि विधवोद्वाहस्यापद्धर्मत्वेन प्रतिपादिकानां स्मृतीनां न मूलप्रमाणदर्शनाभावमात्रेणाप्रामाण्यं स्थापयितुं शक्यते। शिष्टत्रैवर्णिक-परिगृहीतानां तासामात्यन्तिकबाधस्यानौचित्यात्। तथा सति तासां यावन्मूलप्रमाण-दर्शनमननुष्ठानलक्षणमप्रामाण्यमेवाङ्गीकर्तुं शक्यत इति वार्तिककारमतमेव समीचीनं प्रतिभाति। न सर्वथापि विधवावेदने मूलं नास्तीति वक्तुं शक्यते। कुत्रचित्तस्यापि सम्भवात्। तथा हि मन्त्रोऽश्विदेवताकः—

कुहस्विद्दोषा कुहवस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः।
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ[1]।। इति।

हे अश्विनौ! युवां रात्रौ क्व भवतः क्व वा दिवा। क्व चाभिप्राप्तिं कुरुथः क्व वा वसथः। कतमो यजमानो युवां सहस्थाने स्वाभिमुख्येन कुरुते। कथमिव? शयने विधवा देवरमिव, या काचित् स्त्री पुरुषमिवेत्यक्षरार्थः। अत्र देवरेणाश्विनावुपमीयेते, विधवया च यजमानः। प्रसिद्धानामेवोपमानत्वमिति नियमात् शयने विधवाकर्तृकं देवराभिमुखीकरणमेवापदि विधवावेदनं द्योतयति। इत्थम्—

पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ।
उद्वाहिताऽपि सा कन्या न चेत्सम्प्राप्तमैथुना ।
पुनः संस्कारमर्हेत यथा कन्या तथैव सा ।
ऊढाऽपि देया सान्यस्मै सहाभरणभूषया ।।

इत्यादिस्मृतीनां पूर्वोक्तस्य मूलत्वस्य दृश्यमानत्वान्न प्रामाण्यवैधुर्य्यम्। अत एवाप्राप्तमैथुनानामपुत्राणां बालविधवानां पुनरुद्वाहः श्रुतिसिद्ध एव स्मृतिषु दृश्यत इति तद्वचनानुसारेणैव यथावदनुष्ठाने न कोऽपि दोषः। एवं सति यानि तन्निन्दावचनानि तानि 'न हि निन्दा निन्दितुं प्रवर्तते, अपि तु विधेयं स्तोतुमि'ति न्यायेन विधेयस्तावकतयैवाङ्गीकरणीयानीति पञ्चमः पक्षः। इदमपरं मतम्। भूयसामनुग्रह इति न्यायाद् अनेकमन्त्रवर्णस्मृतिप्राप्तविधवानुद्वाहस्यैव धर्म्यत्व-

१. तत्रैव-७।८।१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मस्तीति मन्तव्यम्। विधवेव देवरमिति मन्त्रवर्णस्यापुत्राया विधवायाः पुत्रार्थत्वेन नियोगमूलत्वमेव कथञ्चिदापादयितुं शक्यते। तेन च नोद्वाहस्तासां सिध्यति। नियोगस्याभ्यनुज्ञाऽस्त्येव स्मृतिषु। तथा च गौतमस्मृतिः—

'अपतिरपत्यलिप्सुर्देवरात्'[१] इति।

तवल्काराणां ब्राह्मणेऽपि—

'यद्वा प्रथमेऽहनि रेतः सिच्यते स गर्भः सम्भवत्यथ यत्र तत् सिच्यते मुधेव तत्परासिच्यते'[२] इति श्रूयते।

एतेन प्रथमगमन एव यदि गर्भस्य सम्भवस्तदा नोपेयाद् देवरः पिण्डगोत्रार्षसम्बन्धिनो वा। अयं नियोगः सर्वथा कुलविच्छेदे सम्प्रसक्त एव प्रावर्तत। स च नियोगः कलौ 'देवरेण सुतोत्पत्तिर्दत्ता कन्या न दीयत' इत्यादि-पुराणवचनेन निषिद्ध इति निश्चीयते। एवं विधवोद्वाहो न वैध इति निन्दावचनानामपि विधवोद्वाहनिषेधकल्पकत्वमेव सम्यक्। अत एवानुगमनाभावे शीलरक्षणमुक्तं काशीखण्डे—

अनुयाति न भर्तारं यदि दैवात् कथञ्चन।
तत्रापि शीलं संरक्षेत् शीलभङ्गात् पतत्यधः।।
तद्वैगुण्यादपि स्वर्गात् पतिः पतति नान्यथा।
तस्याः पिता च माता च भ्रातृवर्गस्तथैव च।। इति।

अपि च, अनन्यपूर्वाया एव कन्याया विवाहस्य 'गृहस्थः सदृशीं भार्यां विन्देतानन्यपूर्वां यवीयसीम्, पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः। नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः'[३] इत्यादिवचनैर्विहितत्वादकन्याभूताया विधवाया विवाहस्य प्रसक्तिरेव नास्ति। कन्याविवाहश्च रजोदर्शनात् प्रागेव प्रशस्त इति व्यक्तं गृह्यसङ्ग्रहे। यथा—

व्यञ्जनैस्तु समुत्पन्ने सोमो भुञ्जीत कन्यकाम्।
पयोधरैस्तु गन्धर्वा रजसाग्निः प्रकीर्तितः।।
तस्मादव्यञ्जनोपेतामरजामपयोधराम्।
अभुक्तां चैव सोमाद्यैः कन्यकां तु प्रशस्यते।।इति।।

१. गौतमधर्ममूत्रम्-२।९।४।
२. तत्रैव, मिताक्षरावृत्तावुद्धृतम्;
३. गौतमधर्मसूत्रम्—१।४।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं यत्र सोमाद्यैर्भुक्तत्वे कन्यकाविवाहस्याप्राशस्त्यं प्रतिपाद्यते किं पुनरन्यपुरुषभुक्तत्वे विधवाविवाहस्य।

यद्युच्येत, उभयविधश्रुतिस्मृतिदर्शनात् कथं विधवोद्वाहविषयाया अननुष्ठेयलक्षणमप्रामाण्यमिति। आचारादर्शनादिति ब्रूमः। न हि लोके भूयान् विधवोद्वाहाचारो दृश्यते, न च रामायणमहाभारतेतिहासपुराणादिषु श्रूयते। यत्र कुत्रचिद् दृश्यते स न वैधो धर्म्यो वा। रत्यादिमूलक एवासावस्तीति निश्चेतुं शक्यते। 'भूयसामनुग्रह'[१] इति न्यायादेव। श्रुतिस्मृतिसिद्धोऽपि पदार्थो यदि आचारपरम्पराबहिर्भूतस्तदा नासावनुष्ठेय इति किं पुनर्यो भूयसीभिः श्रुतिभिः स्मृतिभिश्च विरुद्ध आचारपरम्पराबहिर्भूतः शिष्टविगर्हितश्च भवति। एतादृग्विषये सदाचार एव नियामको भवति। अत आचारेष्वदर्शनाद् विधवोद्वाहस्य नानुष्ठेयत्वम्। आचारविरुद्धेऽनुष्ठीयमाने लोकनिन्दा नियतैव। यथाह मनुः —

'अपत्यलोभाद् या तु स्त्री भर्तारमतिवर्तते।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते'[२]।। इति।

आचारानुगते तु भूयसी प्रतिष्ठा। यथाह भगवान् स एव—

अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्।।
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्यव्यवस्थिता।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः'[३]।। इति।

एवमनन्यपूर्विकाया असपिण्डाया असमानार्षगोत्रजायाः कन्याया एव विवाहेन पत्नीत्वनिष्पत्तौ अन्यस्यास्तदभावाद् यानि अन्यावेदनप्रतिपादकानि वचनानि तानि वाग्दत्तापराणि व्याख्येयानि। तथा सति न परस्परविरोधसम्भावनाऽपि। वाङ्मनोदानमात्रेण पतित्वस्य पत्नीत्वस्य चाभावात्। तथा हि अपरार्कस्मृतिचन्द्रिकायां वसिष्ठः —

'अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं वरो यदि।
न च मन्त्रोपनीता स्यात् कुमारी पितुरेव सा'[४]।।

---

१. त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ।।
२. मनुस्मृतिः-५।१६१; ३. तत्रैव-५।१५९-१६०।
४. निर्णयसिन्धौ २३० पृष्ठे उद्धृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ऊढापि देया सान्यस्मै सहाभरणभूषया' इत्यादिवचनैरन्यजातीयक्लीब-पतितविकर्मस्थसगोत्रदासदीर्घामयत्वानां विशेषणानां पतित्वानुत्पादकत्वादेव छलादिना तैः सह विवाहे जातेऽपि कालान्तरे दोषज्ञाने कन्याया वरान्तरेण पुनरुद्वाहो निश्चीयते। एतादृक्स्थले कन्यायां पत्नीत्वस्यैवानिष्पत्त्या पुनराच्छिद्य संस्कारो भवत्येव।

एवमेव 'नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ' इति पराशरवचनस्यापि वाग्दत्तापरत्वमेव। वाग्दत्ताया मनोदत्तायाश्च पुनर्भूत्वं स्मर्यमाणं 'दत्ताक्षताया: कन्याया: पुनर्दानं परस्य च' इति कलिवर्ज्यप्रकरणेन पुनर्दाननिषेधेन दृढीकृतं पराशरवचनेन बाध्यते। कलौ वाग्दत्ताया मनोदत्तायाश्च अभीष्टपतिमरणानन्तरं परस्मै पुनर्दानं भवति, पुनर्भूत्वमपि तयोर्नास्तीति तदीयवचनतात्पर्यम्।

'सा चेदक्षतयोनिः स्याद् गतप्रत्यागतापि या।
पौनर्भवेण भर्त्रा सा पुनः संस्कारमर्हति' ।।

इति मानवं वचनं पुनर्भूपरमेव। तस्याश्च दानसंस्कारयोरभावात् कामप्राबल्यादभिमतान्यभर्तृस्वीकार एवेति तदीयसन्तानस्य न धर्म्यत्वम्। अत एव श्राद्धादिषु निषेधस्तयोः। इत्थं वाग्दत्तापरत्वेन पराशरादिवचनानां तात्पर्यावसायान्न विधवायाः पुनरुद्वाहः शास्त्रसम्मतः। अत एव निगमः —

'अप्रमत्ता वै रक्षत तन्तुमेनं मा वः क्षेत्रे परबीजान्यवाप्सुरि'त्यनेन शुद्धसन्ततिसंरक्षणार्थं स्त्रीषु परबीजावापं सम्भावयन् तं प्रतिषेधति। अयमेव कर्तुः पुत्र इति व्यवस्थायां मूलत्वेनोपन्यस्तो भाष्यवार्तिकयोः[१]। स्थितादुत्तरम्—

'ब्रह्मचर्यं चरेद्वापि प्रविशेद्वा हुताशनमि'ति मानववचनेन तथा 'सहानुगमनं शस्तं वैधव्यस्याथ पालनमि'ति ब्रह्मवैवर्तपुराणवचनेन विधवानां ब्रह्मचर्यमथवा हुताशनप्रवेश इति द्वावेव धर्मौ। तत्र निबन्धकाराणां 'कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते' इति ब्रह्मवैवर्तपुराणवचनमुपन्यस्य तद्ब्रह्मचर्याशक्यत्व-परमिति कथनेन ब्रह्मचर्यपालनाभावे सहानुगमनमेवेति नियमो भवति। कलौ तु अधर्मभूयिष्ठत्वात् पुरुषाणां ब्रह्मचर्यच्युतिसन्देहः पदे पदे सम्भाव्यते। अत एव—

'दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ।
कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः'।।

१. मी.द.१.२.१३;

१. निर्णयसिन्धौ ४४० पृष्ठे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैर्घकालिकब्रह्मचर्यनिषेधः सङ्गच्छते। एवमाहत्य कलौ सहानुगमनमेवावशिष्यते। यत्र शासने सहानुगमनमपराधेषु गणितं कुत्रचिदनुष्ठितेऽपि सम्बन्धिनो दण्डभाजो भवन्ति, तत्र विधवाभिः किं विधेयमिति प्रश्नः स्थाने आयाति। यदि सर्वथा ब्रह्मचर्यपालनाशक्यता तदाऽनियतपुरुषसंसर्गापेक्षया नियतपुरुषस्वीकार एव ज्यायान्। तत्र कथंविधः पुरुषोऽसौ भविष्यतीति मनुराह—

'सा चेदक्षतयोनिः स्याद् गतप्रत्यागताऽपि वा।
पौनर्भवेण भर्त्रा सा पुनः संस्कारमर्हति'।। इति।

पौनर्भवः पुनर्भूपुत्रः। यथाह स एव—

'या वा पत्या परित्यक्ता विधवा वा स्वयेच्छया।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते[१]'।। इति।

अत्र न ज्ञातीनां न च धर्मशास्त्रस्य सम्मतिरस्ति। काम एव पुरुषान्तराश्रयप्रयोजकः। अतस्तादृक्संस्कारो भार्यात्वप्रयोजक एव, न तु पत्नीत्वप्रयोजकः। पत्नीत्वन्तु धर्मकार्यसहकारप्रयोजको धर्मः। 'पत्युर्नो यज्ञसंयोगे' इति पाणिनेरनुशासनात्। स च शास्त्रबोधितविवाहसंस्कारं विना न ज्ञातुं शक्यते। भार्यात्वं तु ग्रासाच्छादनादिना वेश्यासाधारणम्। अतो न शास्त्रैकसमधिगम्यम्। एवं तथाविधानां विधवानां पौनर्भवादीनामेव तत्समानधर्माणां कृते स्वीकृतिः। अतः कुलीनो न तामङ्गीकुर्यात्। अतो मनुः—

'गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि।
उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्[२]'।।

इत्यनेन तस्मै सवर्णां लक्षणान्वितां कन्यामनुशास्ति। एवं सति पौनर्भवस्वीकारापेक्षया तज्जनिताशास्त्रीयपुत्रप्राप्त्यपेक्षया चोभयलोकानुगुणब्रह्मचर्यमेवावशिष्यत इति सनातनमर्यादा।

●

१. मनुस्मृतिः-९।१७५; २. तत्रैव-४।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालविवेचनम्

डॉ० देवीप्रसादत्रिपाठी
प्राध्यापकः, ज्योतिषविभागे
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे
नवदेहल्याम्

❀ ❀ ❀

इह खलु संसारे सर्वेषु कार्येषु यथार्थकालस्यावश्यकता प्रतीयते। तत्र प्रथमं जिज्ञासा उत्पद्यते यत् कोऽस्ति कालः? 'कल् संख्याने' इत्यस्माद्धातोः कर्त्तरि घञ् प्रत्ययेन निष्पद्यते। कलयति गणयतीत्यपि काल-परिभाषा भवति। कालो द्विधात्मकः। एकस्तु लोकानां (भूर्भुवादीनाम्) अन्तकृतः, द्वितीयः कलनात्मकः। कलनात्मकोऽपि द्विविधः स्थूलो सूक्ष्मश्च। तत्र स्थूलः व्यवहारयोग्यो मूर्तसंज्ञकः सूक्ष्मश्चाव्यावहारिकोऽमूर्तसंज्ञकः। उक्तञ्च सूर्यसिद्धान्ते—

लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः।
स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते[1]।।

मूर्तामूर्तकालयोः परिभाषा

प्राणादिः कालः मूर्तसंज्ञकस्तथा च त्रुट्यादिकालोऽमूर्तसंज्ञकोऽस्ति। अनयोः कालयोर्विवेचनं सूर्यसिद्धान्ते विस्तरेण वर्तते। तद्यथा—

प्राणादिः कथितो मूर्तस्त्रुट्याद्योऽमूर्तसंज्ञकः।
षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता।।
नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्।
तत् त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा[2]।।

---

१. सूर्यसिद्धान्तः, १.१०।
२. तत्रैव, १.११-१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूर्तकालः

सुखासीनस्य स्वस्थपुरुषस्यैकश्वासोच्छ्वासान्तर्वर्तिकालः प्राणसंज्ञको भवति। स च दशगुर्वक्षरोच्चारणकालेन समो भवति। अग्रे स्पष्टमस्ति यथा—

६ प्राणाः	=	१	विनाडी
६० विनाडी	=	१	नाडी
६० नाडिकाः	=	१	अहोरात्रम्
३० अहोरात्राणि	=	१	मासः
१२ मासाः	=	१	वत्सरम्।

कालविभागगणनायां मूर्तकालसन्दर्भे भास्कराचार्योऽपि तथैव वक्ति। यथा—

गुर्वक्षरैः खेन्दुमितैरसुस्तैः षड्भिः पलैस्तैर्घटिका खषड्भिः।।
स्याद्वा घटीषष्टिरहः खरामैर्मासो दिनैस्तैर्द्विकुभिश्च वर्षम्।
क्षेत्रे समाद्येन समा विभागाः स्युश्चक्राश्यंशकलाविलिप्ताः[१]।।

१० गुर्वक्षरोच्चार्यमाणकालः[२]	=	१	असुः (प्राणः)
६ असुः	=	१	पलम्
६० पलानि	=	१	घटिका
६० घट्यः	=	१	अहोरात्रम्
३० अहोरात्राणि	=	१	मासः
१२ मासाः	=	१	वर्षम्।

प्रसङ्गेऽस्मिन्नेवार्यभट्टोऽपि कथयति।[३] कफवातपित्तद्योतिका नाडी यावता कालेनैकरूपां गतिं वहति, स नाडीसंज्ञकः कालः। घटिकायन्त्रेण यः काल उत्पद्यते, स घटीसंज्ञको दण्डयन्त्रेणोत्पन्नः कालश्च दण्डसंज्ञको भवति। यन्त्रभेदेन नामभेदोऽभवत्। नाडी-दण्ड-घट्यश्च समानार्थकाः समानकालबोधकाश्च।

१. सि.शि.का., श्लो. १७-१८।

२. द्विमात्रो गुरुः। तथा—सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः। (वृत्तरत्नाकरे, १.९) द्रष्टव्यम्—यदक्षरं सानुस्वारं विसर्गान्तं दीर्घं यस्याक्षरस्य परतः संयोगस्तल्लघ्वपि गुरुसंज्ञं ज्ञेयम्। गुर्वक्षरस्योच्चार्यमाणस्य यावान् कालस्तद्दशकेनैकोऽसुः प्राणः। (वासनाभाष्ये)

३. वर्षं द्वादश मासास्त्रिंशाद्दिवसो भवेत् स मासस्तु। षष्टिर्नाड्यो दिवसः षष्टिश्च विनाडिका नाडी। गुर्वक्षराणि षष्टिर्विनाडिकार्क्षी षडेव वा प्राणः। आर्यभट्टीयकालक्रियापादः, श्लो. १-२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' इत्यादिनात्र वि-उपसर्गेण तत्षष्टिभागात्मकः कालो विघटिकात्मको भवति। सर्वमेतादृशं व्यवहारे दृश्यते।

अमूर्तकालः

त्रुटितत्परनिमेषात्मककालः सूक्ष्मत्वादमूर्तसंज्ञकः। स च व्यवहारेणैव यन्त्रादिना गणयितुं शक्यते। अस्मिन् प्रसङ्गे नारदेनोक्तम्—

सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते।
तत्षष्ट्या रेणुरित्युक्तो रेणुषष्ट्या लवः स्मृतः।।
तत्षष्ट्या लीक्षकं प्रोक्तं तत्षष्ट्या प्राण उच्यते।।

यथा—

सूच्या पद्मपत्रभेदनकालः	=	१ त्रुटिः
६० त्रुटयः	=	१ रेणुः
६० रेणवः	=	१ लवः
६० लवाः	=	१ लीक्षकम्
६० लीक्षकाणि	=	१ प्राणः[१]।

प्रसङ्गेऽस्मिन् भास्कराचार्यस्य विचारः —

योऽक्ष्णोर्निमेषस्य खरामभागः स तत्परस्तच्छतभाग उक्ता।
त्रुटिर्निमेषैर्धृतिभिश्च काष्ठा तत् त्रिंशता सद् गणकैः कलोक्ता।।
त्रिंशत्कलाऽऽर्क्षी घटिका क्षणः स्यान्नाडीद्वयं तैः खगुणैर्दिनं च।।[२]

स्पष्टमस्ति भास्कराचार्यानुसारेण कालगणनाप्रकारः —

लोचनयोः पक्ष्मपातकालः	=	१ निमेषः
निमेषः/३०	=	१ तत्परः, १ तत्परः/१००=१त्रुटिः।

अर्थात्—

१ निमेषः	=	३० तत्परः
१ तत्परः	=	१०० त्रुटयः

१ त्रुटिः = १ तत्परः/१०० = (निमेषः/३०) ÷ १००= निमेषः/३०००

१. उद्धृतम्—सूर्यसिद्धान्ततत्त्वामृतभाष्ये, पृ.७।
२. सि.शि., श्लो. १६-१७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निमेषः	=	३००० त्रुटयः (सूक्ष्मकालः)		
१८ निमेषाः	=	१ काष्ठा		
३० काष्ठाः	=	१ कला		
३० कला	=	१ नक्षत्रघटिका		
२ घटिका	=	१ क्षणः	=	मुहूर्तम्
३० मुहूर्तानि	=	१ दिनम्	=	३० क्षणाः
१ दिनम् (स्थूलकालः)	=	२१६०० असवः		

कालगणनाप्रसङ्गे सङ्गीतमकरन्दे नारदेन गदितं यत्[१]—

१०० पद्मपत्रस्य सूचीभेदकालः	=	१ क्षणः
८ क्षणाः	=	१ लवः
८ लवाः	=	१ काष्ठा
८ काष्ठाः	=	१ निमेषः
८ निमेषाः	=	१ कला।

अत्र भारतीयकालगणनया सम्बन्धः पाश्चात्त्यकालगणनया सह प्रस्तूयते—

सूच्या पद्मपत्रभेदकालः[२]	=	१ त्रुटिः = १/३२४०००० सेकेण्डानि
६० त्रुटयः	=	१ रेणुः = सेकेण्डानि
६० रेणवः	=	१ लवः = १/९०० सेकेण्डानि
६० लवाः	=	१ लीक्षकम् = १/१५ सेकेण्डानि
६० लीक्षकाणि	=	१ प्राणः = ४ सेकेण्डमितानि।
१ प्राणः	=	गुर्वक्षरोच्चारणकालः = १० विपलानि = ४ सेकेण्डानि

---

१. उपर्युपरि विन्यस्य पद्मपत्रशतं सकृत्। स कालः सूचिसम्भेदात् तत्क्षणश्च कलं प्रति।।
लवः क्षणैरष्टभिः स्यात् काष्ठा चाष्टलवात्मिका। अष्टकाष्ठा निमेषः स्यान्निमेषैरष्टभिः कला।।
ताभ्यां चैव चतुर्भागश्चतुर्भानामनुद्रुतः। अनुद्रुताभ्यां बिन्दुश्च बिन्दुभ्यां तु लघुर्भवेत्।।
लघुद्वन्द्वं गुरुश्चैव त्रिलघुः प्लुतमुच्यते। इति मानगतिः प्रोक्ता तालज्ञैः पूर्वसूरिभिः।।

२. कुत्रचित्। असुः ४५ निमेषैस्तुल्यः स्वीकृतः। यद्येवं कल्प्यते तदा त्रुटेर्मानम् = १/३३७५० सेकेण्डानि। सि.शि., पं. केदारदत्तजोशी (सम्पा.), प्रथमभागः, पृ. १२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ पलम्	=	६ प्राणाः = ६० विपलानि = २४ सेकेण्डानि
२.५ पलानि	=	६० सेकेण्डानि= १ मिनटम्
१ विपलम्	=	१ गुर्वक्षरोच्चारणकालः/१० = २/५सेकेण्डानि।
१ नाडी	=	६० पलानि = १ दण्डः = २४ मिनटानि
६० नाड्यः	=	१ नाक्षत्राहोरात्रम् = २४ घण्टाः
२.५ नाड्यः (दण्डाः)	=	१ होरा (घण्टा)
३० अहोरात्राणि	=	१ मासः
१२ मासाः	=	१ वर्षम्
३६० दिव्याहोरात्राणि	=	१ दिव्यवर्षम् (मानववर्षम्)
१२००० दिव्यवर्षाणि	=	दिव्ययुगम् = महायुगम् = ४.३२×१०^{६} वर्षाणि
७१ दिव्ययुगानि	=	१ मन्वन्तरम् = ३.०६७२×१०^{८} वर्षाणि
१४ मन्वन्तराणि	=	१ कल्पम् ४.३२×१०^{९} वर्षाणि
२ कल्पे	=	१ ब्राह्म-अहोरात्रम् = ८.६८×१०^{९} वर्षाणि
३६० ब्राह्मदिनानि	=	१ ब्राह्मवर्षम् = ३.११०४×१०^{१२} वर्षाणि
५० ब्राह्मवर्षाणि	=	१ परार्धम् = १.५५५२×१०^{१४} वर्षाणि
ब्रह्मणः पूर्णायुः	=	२ परार्धे = ३.११०४×१०^{१४} वर्षाणि।

कालगणना मनुस्मृत्यनुसारम्

पौराणिकी कालगणना एव मनुस्मृतौ दृश्यते। सृष्टेः प्राक् सर्वमन्धकारभूतं प्रसुप्तवदज्ञातलक्षणं तर्कातीतं किमप्यचिन्त्यमेवासीदिति मनुः।[१] ब्रह्माण्डस्य महदण्डे परिवत्सरं (३११०४००००००० मानववर्षाणि) यावदुषित्वा तस्याण्डस्य विभाजनमकरोत्।[२] विभक्ते तदण्डे परिगणनाः प्रारब्धवान्। यथा—

कालं कालविभक्तीश्च नक्षत्राणि ग्रहास्तथा।
सरितः सागराञ्छैलान् समानि विषयाणि च।।[३]

कालगणना निमेषतोऽत्र प्रस्तूयते—

१ निमेषः	=	पक्ष्मपातकालः	= ०.४४४....विपलानि
			= ०.१७७७७....सेकेण्डानि वा

१. मनुस्मृतिः, १.५,१२।
२. तत्रैव, १.२४;
३. तत्रैव, १.९, ६०-७३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८ निमेषाः = १ काष्ठा = ८ विपलानि = ३ १/५ सेकेण्डानि
३० काष्ठाः = १ कला = ४ पलानि = १ मिनटं ३६ सेकेण्डानि
३० कलाः = १ मुहूर्तम् = २ घटी = ४८ मिनटानि
३० मुहूर्तानि = १ अहोरात्रम् = ६० घटी = २४ होराः
१५ अहोरात्रम् = १ पक्षः (मानवः)
२ पक्षौ = १ मासः (मानवः) = १ अहोरात्रम् (पित्र्यम्)
६ मासाः = १ अयनम् (मानवः) = दिनं रात्रिर्वा (दिव्यम्)
१२ मासाः = १ वर्षम् (मानवः) = १ अहोरात्रम् (दिव्यम्)
३६० दिव्याहोरात्राणि = ३६० वर्षम् (मानवः) = १ वर्षम् (दिव्यम्)
४०००दिव्यवर्षाणि = १४४०००० मानववर्षाणि = सत्ययुगमानम्
४०० दिव्यवर्षाणि = १४४००० मानववर्षाणि = सत्ययुगसन्ध्यामानम्
४०० दिव्यवर्षाणि = १४४००० मानववर्षाणि = सत्ययुगसन्ध्यांशमानम्
४८०० दिव्यवर्षाणि = १७२८००० मानववर्षाणि = सत्ययुगस्य पूर्णमानम्
३००० दिव्यवर्षाणि = १०८०००० मानववर्षाणि = त्रेताया मानम्
३०० दिव्यवर्षाणि = १०८००० मानववर्षाणि = त्रेतायाः सन्ध्यामानम्
३०० दिव्यवर्षाणि = १०८००० मानववर्षाणि = त्रेतायाः सन्ध्यांशमानम्
३६०० दिव्यवर्षाणि = १२९६००० मानववर्षाणि = त्रेतायाः पूर्णमानम्
२०००दिव्यवर्षाणि = ७२०००० मानववर्षाणि = द्वापरस्य मानम्
२०० दिव्यवर्षाणि = ७२००० मानववर्षाणि = द्वापरस्य सन्ध्यामानम्
२०० दिव्यवर्षाणि = ७२००० मानववर्षाणि = द्वापरस्य सन्ध्यांशमानम्
२४०० दिव्यवर्षाणि = ८६४००० मानववर्षाणि = द्वापरस्य पूर्णमानम्
१००० दिव्यवर्षाणि = ३६०००० मानववर्षाणि = कलियुगस्य मानम्
१०० दिव्यवर्षाणि = ३६००० मानववर्षाणि = कलियुगस्य सन्ध्यामानम्
१०० दिव्यवर्षाणि = ३६००० मानववर्षाणि = कलियुगस्य सन्ध्यांशमानम्
१२०० दिव्यवर्षाणि = ४३२००० मानववर्षाणि = कलियुगस्य पूर्णमानम्
१२००० दिव्यवर्षाणि = ४३२०००० मानववर्षाणि = चतुर्युगस्य मानम्
१२००० × ७१ = ८५२००० दिव्यवर्षाणि = ३०६७२०००० मानववर्षाणि
= मन्वन्तरमानम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२०००००० दिव्यवर्षाणि = ४३२०००००० मानववर्षाणि = ब्रह्मणो दिनम्

२४०००००० दिव्यवर्षाणि = ८६४०००००० मानववर्षाणि = ब्रह्मणोऽहोरात्रम्

श्रीमद्भागवतानुसारं कालगणना[१]

२ परमाणू	=	१ अणुः (अतिसूक्ष्मो विभागरहितः परमाणुः)
३ परमाणवः	=	१ त्रसरेणुः (प्रकाशकिरणेऽवलोकितमाना धूलिकणाः)
३ त्रसरेणुजन्यकालः	=	१ त्रुटिः
१०० त्रुटयः	=	१ वेधः
३ वेधाः	=	१ लवः
३ लवाः	=	१ निमेषः
३ निमेषाः	=	१ क्षणः
५ क्षणानि	=	१ काष्ठा
१५ काष्ठाः	=	१ लघुः
१५ लघवः	=	१ नाडिका (दण्डः)
२ नाडिके	=	१ मुहूर्तम्
६ वा ७ नाडिकाः	=	१ प्रहरः = १ यामः = १/४ दिवा रात्रिर्वा
८ प्रहराः	=	१ अहोरात्रम्
१५ अहोरात्रम्	=	१ पक्षः
२ पक्षौ	=	१ मासः = पितॄणामहोरात्रम्
२ मासौ	=	१ ऋतुः
६ मासाः	=	१ अयनम्
२ अयने	=	१ वर्षम् (देवानामहोरात्रम्)
१०० वर्षाणि	=	परमायुः मनुष्याणाम्
३६० वर्षाणि	=	१ दिव्यवर्षम्
१२००० दिव्यवर्षाणि	=	१ चतुर्युगमानम् (सन्ध्यासन्ध्यांशसहितम्)
४८०० दिव्यवर्षाणि	=	१ सत्ययुगमानम् (सन्ध्यासन्ध्यांशसहितम्)
३६०० दिव्यवर्षाणि	=	१ त्रेतायुगमानम् (सन्ध्यासन्ध्यांशसहितम्)

१. श्रीमद्भागवते, ३।११।१-३७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४०० दिव्यवर्षाणि	=	१ द्वापरयुगमानम् (सन्ध्यासन्ध्यांशसहितम्)
१२०० दिव्यवर्षाणि	=	१ कलियुगमानम् (सन्ध्यासन्ध्यांशसहितम्)
१००० चतुर्युगानि	=	१ ब्रह्मणो दिवसः (एकः कल्पः)
१००० चतुर्युगानि	=	ब्रह्मणो रात्रिः (एकः कल्पः)
१ कल्पः	=	१४ मनवः
७१ ६/१४ चतुर्युगानि	=	१ मनुः
२००० चतुर्युगानि	=	ब्रह्मणोऽहोरात्रम्
२००० × ३६० चतुर्युगानि	=	ब्रह्मवर्षम् (७२०००० चतुर्युगानि)
७२०००० × १०० चतुर्युगानि	=	ब्रह्मणः परमायुः (७२००००००चतुर्युगानि)
परमायुः/२	=	३६०००००० चतुर्युगानि = परार्धम्
२ परार्धम्	=	७२००००००० ब्रह्मणः परमायुः
ब्रह्मणः परमायुः	=	श्रीहरेरेको निमेषः

एतावद् कालगणनायाः प्रारूपं सर्वेषु पुराणेषु महाभारते च दरीदृश्यते।[१]

कालस्य महिमवर्णनम्

पुराणेषु कालविवेचनप्रसङ्गे कालपरिभाषया सह कालस्य माहात्म्यमपि प्रदर्शितं विद्यते। अत्र केचनांशा उपस्थाप्यन्ते। यथा—

अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः।
कलनात् सर्वभूतानां स कालः परिकीर्तितः[२]।।
अनादिरेष भगवान् कालोऽनन्तोऽजरोऽमरः।
सर्वगत्वात् स्वतन्त्रत्वात् सर्वात्मत्वान्महेश्वरः।।
ब्रह्मणो बहवो रुद्रा ह्यन्ये नारायणादयः।
एको हि भगवानीशः कालः कविरिति श्रुतिः।।
ब्रह्मनारायणेशानां त्रयाणां प्राकृतो लयः।
प्रोच्यते कालयोगेन पुनरेव च सम्भवः।।

---

१. म.भा.शान्तिपर्व, अ. २३१; वनपर्व, अ. १४९, १८८।
२. विष्णुपुराणे, १।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं ब्रह्मा च भूतानि वासुदेवोऽपि शङ्करः।
कालेनैव च सृज्यन्ते स एव ग्रसते पुनः।।[१]
तस्मात् कालात्मकं विश्वं स एव परमेश्वरः।
अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः।।
कर्षणात् सर्वभूतानां स तु सङ्कर्षणः स्मृतः।
सर्वभूतसमित्वाच्च स रुद्रः परिकीर्तितः।।
अनादिनिधनत्वेन स महान् परमेश्वरः।।[२]

भारतीयदर्शनशास्त्रेषु कालसत्ता

दार्शनिकदृष्ट्या काल एको गूढतमो विषयोऽस्ति। दर्शनशास्त्रेषु कालतत्त्वस्य वर्णनं सूक्ष्मरूपेण क्रियते। यद्यपि कलनात्मकस्य कालस्य सूक्ष्मविचारा अत्र नैव दृश्यन्ते; परन्तु कालस्य व्यक्तरूपस्य वैचारिकं निरूपणं दर्शनशास्त्रे कृतवन्त आचार्याः। सांख्यदर्शने तु कालस्य कापि सत्ता नास्ति। यतस्तस्य मते यानुपाधीनाधृत्य कालभेदः क्रियते, त एव उपाधयः कालव्यवहारे हेतवः। यथा—

"कालश्च वैशेषिकाभिमते एको न अनागतादिव्यवहारभेदं प्रवर्तयितुमर्हति। तस्मादयं यैरुपाधिभेदैरनन्तादिभेदं प्रतिपद्यते सन्तु त एवोपाधयः, येऽनागतादिव्यवहारहेतवः कृतमन्तर्गडुना कालेनेति सांख्याचार्याः"[३]।

सांख्यशास्त्रानुसारं कालभेदा उपाधिकृत उपाधय एव सन्ति। अत्र कालनामकस्य कस्यापि बाह्यवस्तुनः सत्ता नास्ति; परन्तु परवर्तिनामाचार्याणामनुसारमाकाशस्य तन्मात्रास्ति कालः। यथोक्तं सांख्यसूत्रे—'दिक्कालाकाशादिभ्यः' इति न्यायवैशेषिकानां मते त्वेकं द्रव्यमस्ति। अयं बाह्यसत्तात्मकोऽस्तीत्यनुमानेन सिद्ध्यति। परापरचिरक्षिप्रादिलिङ्गेनास्यानुमानं भवति। यथोक्तम्—'कालः परापरव्यतिकरं यौगपद्यचिरक्षिप्रप्रत्ययलिङ्गम्। तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तौ अन्यनिमित्ताभावाद् यदत्र निमित्तं स कालः'[४]।

वैशेषिकशास्त्रानुसारं तु काल एव सर्वस्य हेतुरस्ति। यद्यपि न्यायेष्वन्येषु ग्रन्थेषु काल आचार्यैरतिरिक्ततयानुमोदितः; किन्तु नैयायिकेषु श्रीरघुनाथ-

१. कूर्मपुराणे-५।२३-२४, २१-२२; २. विष्णुधर्मोत्तरपुराणे-१।७२।३।
३. तत्त्वकौमुदी, सांख्यकारिका-३३; ४. प्रशस्तपादभाष्ये, पृ. ३३२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिरोमणिना कालस्य पृथक् सत्ता नाङ्गीक्रियते। एषां मते तु नेश्वराद् भिन्नौ दिक्कालौ। एतैरनयोरीश्वर एवान्तर्भावः कृतः। तद्यथा—

'दिक्कालौ नेश्वरादतिरिच्येते मानाभावात्। तत्तन्निमित्त-विशेषसमवधानवशादीश्वरादेव तत्तत्कार्यविशेषाणामुत्पत्तेः'[१]।

योगदर्शनेऽपि कालस्य कापि सुदृढा सत्ता न स्वीकृता। कालोऽवास्तविको वस्तुशून्यः, तथा च बुद्धिभेदादेव कालभेदो भवति।[२] यथा—'क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम्'[३]। प्रसङ्गेऽस्मिन् महर्षिव्यासदेवप्रणीतभाष्ये उद्धृतमस्ति यत्—'यथाऽपकर्षपर्यन्तं द्रव्यं परमाणुरेवं परमापकर्षपर्यन्तः कालः क्षणः, यावता वा समयेन चलितः परमाणुः पूर्वदेशं जह्यादुत्तरदेशमुपसम्पद्येत स कालः क्षणः। तत्प्रवाहाविच्छेदस्तु क्रमः। क्षणतत्क्रमयोर्नास्ति वस्तुसमाहार इति बुद्धिसमाहारो मुहूर्ताहोरात्रादयः'[४]। क्षणो योगसूत्रानुसारं कालस्य सूक्ष्मात्सूक्ष्मतरो भागः परमाणुरूपोऽविभाज्योंऽश एवास्ति। यथा—'क्षणः सर्वान्त्यः कालावयवो .....'[५]। कालस्य सापेक्षस्वरूपस्य कल्पनाऽस्ति योगवासिष्ठे। कालस्य लघुदीर्घता सदैव सापेक्षाऽस्ति। यथा—'देशदैर्घ्यं यथा नास्ति कालदैर्घ्यं तथाङ्गणे'[६]। अद्वैतदर्शनानुसारेणापि कालस्य कापि वास्तविकी सत्ता नास्ति। मधुसूदनसरस्वत्या सिद्धान्तबिन्दुग्रन्थे कालस्याविद्यायामन्तर्भावो दृश्यते[७]। परब्रह्मण्यस्य प्रातिभासिकसत्ताऽध्यारोपिताऽस्ति। ये कालस्याधारे भेदोपभेदा क्रियन्ते, ते वस्तुतोऽविद्याजन्याः। सर्वेषां प्रपञ्चानां विलयो भवति विद्यायाः प्रादुर्भावे। तत्रैव कालस्यापि विलयो भवति[८]।

व्याकरणशास्त्रे कालविचारः

व्यापारव्यतिरेकेण कालमेकं प्रचक्षते।
नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम्।।
दृष्टिप्रस्थसुवर्णादि मूर्तिभेदाय कल्पते।
क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका।।[९]

---

१. पदार्थतत्त्वनिरूपणे, पृ. १-२।
२. पातञ्जलयोगसूत्रम्, ४.३३;पा.योगप्रदीपे,गीताप्रेस,पृ.२६२।
३. तत्रैव, ३.५२;
४. व्यासभाष्ये, ३.५२, पृ. ४०३।
५. राजर्षिभोजदेवप्रणीतवृत्तिः, ३.५२, पृ. ४०५;
६. योगवासिष्ठः, ३.२०. १२।
७. सिद्धान्तबिन्दुः;
८. श्रीमद्भागवतम्, ३.२६.१६।
९. वाक्यपदीये कालसमुद्देशे, श्लो. १-२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवविधं कालमानम्

प्राचीनैः कालगणनार्थं नवधा कालमानं स्वीकृतम्। उक्तञ्च सूर्यसिद्धान्ते—

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।
सौरञ्च सावनं चान्द्रमार्क्षमानानि वै नव।।[१]

अर्थात्—१. ब्राह्मम्, २. दिव्यम्, ३. पित्र्यम्, ४. प्राजापत्यम्, ५. गौरवम्, ६. सौरम्, ७. सावनम्, ८. चान्द्रम्, ९. आर्क्षम्। एतानि नवविधकालमानानि सन्ति। आचार्यभास्करेणापि एतेषामुल्लेखः सौरचान्द्रार्क्षादिक्रमेण सिद्धान्तशिरोमणौ कृतः।[२] एषु सावनानां चतुर्णामेव व्यवहारः प्रत्यक्षतो दृश्यते। उक्तञ्च यथा—

चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः।
बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः[३]।।

एतदतिरिक्तं षष्टिसंवत्सराणां गणना बार्हस्पत्यमानेन भवति।

सौरमानम्

सूर्यस्य द्वादशराशिभोगकाल एकं सौरवर्षम्। एकराशेर्भोगकाल एकः सौरमासो भवति। अर्थाद् यदा सूर्य एकं भचक्रं स्वगत्या प्रपूरयति, तदा एकं सौरवर्षम्। एकराशेर्भोगकाल एको मासस्तथा चैकांऽशभोगकालः सौरदिनम्। एकस्मिन् सौरवर्षे ३६० दिनानि भवन्ति। यदा एकराशिं हित्वा द्वितीयराशिं याति सूर्यः सोऽस्ति तस्य सङ्क्रान्तिकालः। सङ्क्रान्त्या सङ्क्रान्तिं यावत् सौरमासो भवति। अत एवोक्तं भास्कराचार्येण—'रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं, द्युरात्रं च देवासुराणां तदेव'[४]। सौरमानेनैव दिनरात्र्यो षडशीतिमुखानां सङ्क्रान्तीनाम् अयनगोलयोः सङ्क्रान्तिपुण्यकालानाञ्च समीचीनं ज्ञानं भवति। उक्तञ्च सूर्यसिद्धान्ते—

सौरेण द्युतिशोर्मानं षडशीतिमुखानि च।
अयनं विषुवच्चैव सङ्क्रान्तेः पुण्यकालता[५]।।

---

१. सूर्यसिद्धान्ते, १४.१।
२. एवं पृथग् मानव-दैव-जैव-पैत्रार्क्ष-सौरन्दवसावनानि।
ब्राह्मं च काले नवमं प्रमाणं ग्रहास्तु साध्या मनुजैः स्वमानात्।। (सि.शि.,का.मा., श्लो. ३२)
३. सूर्यसिद्धान्ते, १४.२।
४. सि.शि., म.का. श्लो. १९।
५. सूर्यसिद्धान्ते, १४.३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षडशीतिमुखानि

बृहत्कालपरिमाणानां गणना सौरमानेनैव भवति। तुलार्कसङ्क्रमणतः प्रति षडशीति(८६)दिवसैरेकैकं षडशीतिमुखं भवति। षडशीतितुलाराशेः प्रारभ्य धनुमीनमिथुनकन्याख्येषु द्विस्वभावराशिषु पूर्णं भवति[१]। यथा—

प्रथमषडशीतिमुखम्—तुलायाः —	तुलायाः	–	३० अंशाः
	वृश्चिकस्य	–	३० अंशाः
	धनुषः	–	२६ अंशाः
			८६ अंशाः
द्वितीयषडशीतिमुखम् —	धनुषः	–	४ अंशाः
	मकरस्य	–	३० अंशाः
	कुम्भस्य	–	३० अंशाः
	मीनस्य	–	२२ अंशाः
			८६ अंशाः
तृतीयषडशीतिमुखम् —	मीनस्य	–	८ अंशाः
	मेषस्य	–	३० अंशाः
	वृषस्य	–	३० अंशाः
	मिथुनस्य	–	१८ अंशाः
			८६ अंशाः
चतुर्थषडशीतिमुखम् —	मिथुनस्य	–	१२ अंशाः
	कर्कस्य	–	३० अंशाः
	सिंहस्य	–	३० अंशाः
	कन्यायाः	–	१४ अंशाः
			८६ अंशाः

उपर्युक्तचतुर्षु षडशीतिमुखेषु सौरदिनानि ८६×४=३४४ भवन्ति। एकस्मिन् सौरवर्षे ३६० दिनानि भवन्ति। ३६० - ३४४= १६ दिवसाः सौरवर्षेऽवशिष्यन्ते। कन्यायाः सौरदिवसा अवशिष्यन्ते। रवेः षडशीतिमुखराशिषु सङ्क्रमणमपि षडशीतिमुखसंज्ञकमेव भवति। तथा चाह श्रीरामाचार्यः—

१. सूर्यसिद्धान्ते-१४.४-५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

षडशीत्याननं चापनृयुक्कन्याझषे भवेत्।
तुलाजौ विषुवं विष्णुपदं सिंहालिगोघटे।।[१]

कन्याया अवशिष्टषोडशांशात्मकः कालो यज्ञकालसदृशो भवति। अस्मिन् समये श्राद्धादिकर्म कृत्वाऽक्षयफलं प्राप्नोति। उक्तञ्च सूर्यसिद्धान्ते—

ततश्शेषे तु कन्याया यान्यहानि तु षोडश।
क्रतुभिस्तानि तुल्यानि पितृणां दत्तमक्षयम्।।[२]

सूर्यसङ्क्रान्तेर्राशिभेदात् सङ्क्रान्तेर्नामान्यपि पृथक्-पृथक् सन्ति। यथा—

राशिनामानि	सङ्क्रान्तेर्नामानि	ऋतोर्नामानि
१. मेषः	विषुवत्	वसन्तः
२. वृषः	विष्णुपदी	ग्रीष्मः
३. मिथुनः	षडशीतिः	ग्रीष्मः
४. कर्कः	अयनः	वर्षा
५. सिंहः	विष्णुपदी	वर्षा
६. कन्या	षडशीतिः	शरद्
७. तुला	विषुवत्	शरद्
८. वृश्चिकः	विष्णुपदी	हेमन्तः
९. धनुः	षडशीतिः	हेमन्तः
१०. मकरः	अयनः	शिशिरः
११. कुम्भः	विष्णुपदी	शिशिरः
१२. मीनः	षडशीतिः	वसन्तः

सूर्यस्य सङ्क्रमणवशादेवायनगोलर्त्वादीनां विभागो भवति। सूर्यो यदा कर्के प्रविशति तदा दक्षिणायनम्, यदा च मकरे प्रविशति तदोत्तरायणं प्रारभ्यते। एवमेव मेषादित उत्तरगोलस्तुलादितो याम्यगोलः। द्वयोर्द्वयोः राश्योरेकैकमृतुर्भवति। यथा— मकरकुम्भयोः शिशिरः, मीनमेषयोर्वसन्तः, वृषमिथुनयोर्ग्रीष्म इत्यादयः। अस्मिन् विषये सिद्धान्तशेखरे श्रीपतिना उल्लिखितम्—

मृगादिराशिद्वयभानुभोगात् षडर्तवः स्युः शिशिरो वसन्तः।
ग्रीष्मश्च वर्षाश्च शरच्च तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः[३]।।

१. मुहूर्तचिन्तामणौ-३।४।
२. सूर्यसिद्धान्ते, १४.६;
३. सिद्धान्तशेखरे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वराशौ सङ्क्रमणं कृत्वाऽर्कस्याग्रिमराशौ गमनमेव सङ्क्रान्तिशब्देन ज्ञायते। यदा रविकेन्द्रं राश्यादौ भवति स सङ्क्रान्तेर्मध्यकाल उच्यते। पूर्वाभिमुखं गच्छतोऽर्को यदाग्रिमराश्यादिबिन्दोः स्पर्शं करोति, स सङ्क्रान्तेरारम्भकालः। यदार्कबिम्बस्य पश्चिमभागो राश्यादिबिन्दुगतो भवति तदा सङ्क्रान्तेरवसान इति। केन्द्राभिप्रायेण सङ्क्रान्तेः प्राक् परे च यः कालः, सोऽस्ति स्नानदानादौ सङ्क्रान्तेः पुण्यकालः। सङ्क्रान्तिसाधनार्थमनुपातः—

$$\frac{\text{रविबिम्बकलामानम्} \times ६०}{\text{रविगतिकला}} = \text{सङ्क्रान्तिकालः।}$$

अत्र यदि रविबिम्बकलामानम् = ३२, रविगतिकला = ६०, तदोत्थापनेन—

$$\frac{६० \times ३२}{६०} = ३२ \text{ सङ्क्रान्तिकालः}$$

अतः षोडशघटिकाः प्राक्-पराश्च सङ्क्रान्तेः पुण्यकालः। यथा मुहूर्तचिन्तामणौ—सङ्क्रान्तिकालादुभयत्र नाडिकाः पुण्या मताः षोडशषोडशोर्ध्वगाः[१]।

चान्द्रमानम्

यस्मिन् दिने रवीन्द्वोर्युतिर्भवति, सा एव स्थितिरमावास्या। अमान्ते रवीन्दू राश्याद्यवयवेन समौ भवतः। अमान्तादमान्तं यावद् यः कालो भवति, स चान्द्रमास इच्युच्यते। यथोक्तं भास्कराचार्येण—'रवीन्द्वोर्युतेः संयुतिर्यावदन्या विधोर्मास एतच्च पैत्र्यं द्युरात्रम्'[२]। त्रिंशत्तिथ्यात्मको भवति चान्द्रमासः। एकस्मिन् मासे द्वौ पक्षौ भवतः कृष्णशुक्लभेदेन। पञ्चदशतिथ्यात्मक एकः पक्षः। रविचन्द्रान्तरांशवशेन तिथेर्मानं द्वादशांशसमं भवति। यथा—चन्द्रार्कयोरेकस्या युतेर्द्वितीययुतिकालपर्यन्तमन्तरांशाः षष्ट्यधिकं त्रिशतम्। एतन्मिन्नन्तरांशे त्रिंशत्तिथयो लभ्यन्ते तथा एकस्य तिथेर्मानं किम्? इत्यनुपातद्वारा प्रदर्श्यते—

$$\frac{३६० \times १}{३०} = १२^{\circ} \text{ तिथेर्मानम्}$$

उक्तञ्च सूर्यसिद्धान्ते—

अर्काद्विनिस्सृतः प्राचीं यद्यात्माहरहश्शशी।
तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः[३]॥

---

१. मुहूर्तचिन्तामणौ संक्रान्तिप्रकरणे, श्लो. ५।
२. सि.शि., म.का.,श्लो. १९;
३. सूर्यसिद्धान्ते, १४.१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकस्मिन् चान्द्रमासे कति सावनदिवसा भवन्ति। विषयेऽस्मिन् भास्कराचार्येण कथितम्—

कालेन येनैति पुनः शशीनं कामन् भचक्रं विवरेण गत्योः।
मासः स चान्द्रोऽङ्कयमाः कुरामाः पूर्णेषवस्तत्कुदिनप्रमाणम्[१]।।

दर्शान्ते किल शशिः रविणा युतो भवति। ततो द्वावपि पूर्वाभिमुखं गच्छतः। शशिः शीघ्रगत्या प्रत्यहं गत्यन्तरेणाग्रतो याति। एवं गच्छंश्चन्द्रकला-२१६०० तुल्यमन्तरं यदा भवति तदा पुनः उभयोर्योगः। तयोः कालयोरन्तरालं चान्द्रमासः। तत्प्रमाणमनुपातेन—

चन्द्रगतिः — सूर्यगतिः = गत्यन्तरम्।

$$\frac{१ \text{ सावनदिनम्} \times २१६०० \text{ कलाः}}{\text{गत्यन्तरम्}} = \text{चान्द्रमासे सावनदिनानां संख्या।}$$

चान्द्रमासे २९ दिनानि, ३१ घटिका, ५० पलानि भवन्ति सावनमानेन।

नाक्षत्रमानम्

नक्षत्रमण्डलस्यैकं परिभ्रमणं नाक्षत्रं दिनमुच्यते।[२] यथा—अश्विनीसंयुक्ता पूर्णमासी यस्मिन् मासे स आश्विनमासः, कृतिकायुतः कार्तिक इत्यादयः। अनेन प्रकारेण द्वादशमासा भवन्ति। कार्तिकमासादीनां पूर्णिमासु कृत्तिकादि द्वयं द्वयं नक्षत्रयोगेन मासा भवन्ति। कार्तिकादिगणनया आश्विन-भाद्रपद-फाल्गुनमासेषु त्रयं त्रयं नक्षत्राणां संयोगैर्मासा भवन्ति। यथा—

१. चैत्रः	चित्रास्वाती
२. वैशाखः	विशाखाऽनुराधा च
३. ज्येष्ठः	ज्येष्ठा मूलश्च
४. आषाढः	पूर्वाषाढा, उत्तराषाढा च
५. श्रावणः	श्रवणः धनिष्ठा च
६. भाद्रपदः	शतभिषा, पूर्वाभाद्रपदा, उत्तराभाद्रपदा च

१. सि.शि., म.वा., श्लो.९।
२. भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते।
नाक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः।।
कार्तिकादिषु संयोगे कृत्तिकादि द्वयं द्वयम्।
अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासास्त्रयः स्मृताः।। (सू.सि. १४,१५-१६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७.	आश्विनः	रेवती, अश्विनी, भरणी च
८.	कार्तिकः	कृतिका रोहिणी च
९.	मार्गशीर्षः	मृगशिरा, आर्द्रा च
१०.	पौषः	पुनर्वसुः पुष्यश्च
११.	माघः	आश्लेषा मघा च
१२.	फाल्गुनः	पूर्वाफाल्गुनी, उत्तराफाल्गुनी हस्तश्च।

एकनक्षत्रस्योदयात् पुनस्तस्य नक्षत्रस्योदयपर्यन्तं नाक्षत्रं दिनम्। नाक्षत्रदिनमानमार्क्षषष्टिघटिकामितं भवति। स्पष्टरूपेण नाक्षत्रदिनमानम् = ५९ घटिका ५० पलानि १० विपलात्मकं भवति।

नक्षत्रदिवसस्य गणनारम्भो मेषसम्पाताद् भवति। नाक्षत्रदिनञ्च मेषसम्पातानुक्रमिकोल्लङ्घनद्वयमध्यवर्तिकालावधिः परन्तु इदमहो मध्यमसौराह्नात् किञ्चिदल्पमर्थाद् यद्यथा मेषसम्पातो याम्योत्तरवृत्तं मध्यमसौरमध्याह्ने उल्लङ्घयति, तर्हि श्वः स याम्योत्तरवृत्तं मध्यं सौरमध्याह्नात् किञ्चित् पूर्वमुल्लङ्घयिष्यति। इदञ्च वेधेन निर्णीयते। भिन्नतेयं भुवः सूर्यः परितः परिभ्रमणादेव। स्पष्टार्थं निम्नाङ्कितं चित्रं द्रष्टव्यम्—



चित्रे 'अ'स्थानाय अद्य नाक्षत्रमध्याह्नः सौरमध्याह्नसमः, अर्थात् सूर्यं प्रति रेखा, मेषसम्पातं प्रति रेखा एकैव। श्वो भुवः सूर्यं परितो भ्रमणशीलत्वात् कोणीयगतेश्च प्रतिदिनमेकांशमितत्वादंशैकमितकोणीयान्तरे भविष्यति, अर्थात् सूर्यं प्रति कर्षिता रेखा मेघसम्पातप्रोतरेखाया अंशैकमितकोणीयान्तरे भविष्यति (द्वे मेषसम्पातप्रोतरेखे समानान्तरे एव मेषसम्पातबिन्दोः सुदूरवर्तित्वाद्) अत एव 'अ'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थानं सौरमध्याह्नं नाक्षत्रमध्याह्नात् पश्चाद् लभ्यते, अर्थाद् नाक्षत्रमध्याह्नं सौरमध्याह्नात् पूर्वं भवति[१]।

यतः पृथिव्यंशैककोणं स्वाक्षभ्रमणे प्रायः $\frac{२४ \times ६०}{३६०} = ४$ मिनटात्मककालेन गच्छति। अत एव नाक्षत्रदिनं सावनदिनात् ४ मिनटात्मकं न्यूनं भवति। नाक्षत्रमध्याह्नं सावनमध्याह्नात् ४ मिनटात्मककालेन पूर्वं भवति।

LIBRARY Gurukul Kangri Vishwavidyalaya HARDWAR

सावनमानम्

रवेरेकस्मादुदयाद् द्वितीयमुदयं यावत् सावनं दिनं प्रकीर्तितम्। अर्थात् सूर्यस्योदयद्वयान्तर्वर्ती कालः सावनं दिनं भवतीति। सर्वत्र दिनानां व्यवहारः सावनमानेनैव भवति। यज्ञकालस्य सूतकस्य चान्द्रायणव्रतस्य दिनमासाब्दपतीनां च निर्णयोऽपि सावनमानेन भवति। ग्रहाणां दैनन्दिनी मध्यमा गतिरप्युक्तमानेन ग्राह्या भवति[२]।

सूर्यस्य मध्यमगतिमानेन मध्यमसावनदिनमानम्, तथा च स्पष्टगतिमानेन स्पष्टसावनदिनमानं प्रकीर्तितम्। अत एव सावनात्मकाहर्गणसाधनान्तरं भास्करोक्तम्—'दशशिरः पुरि मध्यमभास्करे क्षितिजसन्निधिगे सति भास्करः'[३]। एकस्मिन् सौरवर्षे कति सावनदिनानि भवन्त्येतदर्थं भास्कराचार्यः सावनदिनोत्पत्तौ एवमाह वासनाभाष्ये—'अथ समायां भूभावभीष्टकर्कटकेन त्रिज्यामिताङ्कैरङ्कितेन वृत्तं दिगङ्कितं भगणांशैश्चाङ्कितं कृत्वा तत्र प्राचीचिह्नाद्दक्षिणतो नातिदूरे प्रदेशे उत्तरेऽयने वृत्तमध्यस्थितेन कीलेन रवेरुदयो वेध्यः। ततोऽनन्तरं वर्षमेकं रव्युदया गणनीयाः। ते च पञ्चषष्ट्यधिकशतत्रय तुल्या (३६५) भवन्ति। तत्रान्तिमोदयः पूर्वोदयस्थानादासन्नो दक्षिण एव भवति। तयोरन्तरं विगणय्य ग्राह्यम्। ततोऽन्यस्मिन् दिने पुनरुदयो वेध्यः, स तु पूर्वचिह्नादुत्तरत एव भवति। तदप्युत्तरमन्तरं ग्राह्यम्। ततोऽनुपातः—यद्यन्तरद्वितयकलाभिरेकीकृताभिः षष्टि—घटिका लभ्यन्ते, तदा दक्षिणेनान्तरेण किमिति। अत्र लभ्यन्ते पञ्चदशघाकास्त्रिंशत् पलानि सार्धानि द्वाविंशतिर्विपलानि १५/३०/२२/३० आभिर्घटीभिः सहितानि

---

१. अर्वाचीनं ज्योतिर्विज्ञानम्, पृ. ४१।

२. उदयादुदयं भानोः सावनं तत्प्रकीर्त्यते।
सावनानि स्युरेतानि यज्ञकालविधिस्तु तैः।।
सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा।
मध्यमाग्रहभुक्तिश्च सावनेन प्रकीर्त्यते।। (सूर्यसिद्धान्ते, १४.१८-१९)

३. सि.शि. ग्रहानयनाध्याये, श्लो.४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चषष्ट्यधिकशतत्रयतुल्यानि सावनदिनान्येकस्मिन् रव्यब्दे भवन्ति ३६५/१५/३०/२२/३० ततोऽनुपातः। यद्येकेन वर्षेणैतावन्ति कुदिनानि तदा कल्पवर्षैः किमिति। एवं ये लभ्यन्ते ते भवन्ति सावनदिवसाः कल्पे। उक्तञ्च गोलाध्याये—

पञ्चाङ्गरामास्तिथयः खरामाः सार्धद्विदस्रा कुदिनाद्यमब्दे।
अस्यार्कमासोऽर्कलवः प्रदिष्टस्त्रिंशद्दिनः सावनमास एव[1]।।

एकस्मिन् सौरवर्षे सावनदिनमानं ३६५ दिनानि १५ घटिकाः ३१.५ पलान्यस्ति; परन्तु सूक्ष्मवेधेन सावनदिनमानं ३६५ दिनानि १५ घटिकाः २२.९ पलान्यायाति। भास्करोक्तसावनदिनमानमधिकतरं सूक्ष्मवेधसिद्धमानासन्नं वर्तते।

सूक्ष्मवर्षानयनम्

पिंकार्ड-फ्रैञ्चज्योतिर्विदा सूर्यप्रश्वा-नक्षत्रयोरन्तरं वेधसिद्धम् १ अप्रैल, १६६९ तमे दिने पारिसमध्यम ०/३/४७ आवर(घण्टा)समये ९८/५९/३६ अंशाद्यं लब्धम्, कालान्तरेण लाकेलनाम्ना १७५४ अप्रैल २/३ दिनयोर्वेधेन तयोर्मध्ये पूर्वोक्तं ९८/५९/३६ अंशाद्यमन्तरमेव कदा भवतीति गणितेन अप्रैल-द्वितीयदिने ११ अंश १० मिनट ४५ सेकेण्डतुल्यः कालः साधितः। उक्तवेधयोर्मध्ये २७७५९ दिनं ११ घण्टा ६ मिनट ५८ सेकेण्डमितः कालो गतः। यथा ख्रिष्टवर्षे १७४५-१६६९ = ७६ प्रश्वानक्षत्रं परितः सूर्यप्रदक्षिणाः ७६/१/११/६/५८ वर्षादिकाले पूरिताः। ७६ वर्षेषु ५८ वर्षाणि ३६५ दिनात्मकानि। १८ वर्षाणि च ३६६ दिनात्मकानि भवन्ति, तस्मात्—

वर्षाणि		दिनानि		अहर्गणः
५८	×	३६५	=	२११७०
१८	×	३६६	=	६५८८
७६ अब्देषु			=	२७७५८ अहर्गणः

२७७५८ अहर्गणः + १/११/६/५८ = २७७५९/११/६/५८ - ७६ प्रदक्षिणा दिवसाः। अयमुक्तदिनगणः ७६ नक्षत्रवर्षमानं भवितुमर्हति। एवमसकृत्कृत्वा लब्धानां मध्यमानं सूक्ष्मवर्षमानं ३६५/१५/२२.९ दिनात्मकं भवति। अतः सौरोक्तमानवर्षमानं सार्धाष्टपलैर्दीर्घतरमित्युपपन्नम्[2]।

---

१. सि.शि. मध्यमगतिवासना, श्लो.८।

२. केतकीग्रहगणितभाष्ये, पृ. २८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बार्हस्पत्यमानम्

वैशाखादिषु कृष्णे च योगात् पञ्चदशे तिथौ।
कार्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा[1]।।

'बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं संहितिकाः वदन्ती'ति[2] सिद्धान्त-शिरोमणेर्वचनम्। कल्पसावनदिनैः कल्पयुगभगणास्तदा एकेन सावनदिनेन किमित्यनुपातेन फलमेकस्मिन् दिने गुरोर्गतिमानम्। गुरोर्मध्यमगतिमानम् = ५ कला। यदि गुरोर्मध्यमगतिमाने एकं दिनमुपलभ्यते, तदा एकस्यां राशौ किमिति? फलं गुरोः राशिभोगकालः सौरदिवसेषु। अनुपातः प्रदर्श्यते—

$$\frac{१\ \text{दिनम्} \times १\ \text{राशौ}}{५'} = \frac{१ \times (१\times३०\times६०)}{५'} = \frac{१\times१८००'}{५'} = \frac{१८००'}{५'} = ३६०\ \text{दिनानि}$$

षष्ट्युत्तरत्रिंशतं दिनात्मकमेकं सौरवर्षं भवति। गुरोर्द्वितीयराशिप्रवेशस्य यः समयो भवति, स एव कालो द्वितीयसंवत्सरस्यापि प्रवेशकालो भवतीत्याचार्या वदन्ति। यद्यैकस्मिन् वर्षे स्फुटगुरोरेकराशिसञ्चारो भवेत्, तदासौ शुद्धसंवत्सरो जायते। एकस्मिन्नेव वर्षे यदि गुरुर्द्विराशिचारं कृत्वा पुनर्वक्रो भवति, पूर्वराशिं चासौ नैति तदा तु 'लुप्तसंवत्सरो महातिचारश्च' इति कथ्यते। यदि द्विराशिचारं कृत्वा वक्रितः पुनः पूर्वराशिमायाति, तदा 'अतिचारः' कथ्यते। उक्तञ्च बृहत्संहितायाम्—

यत्रैकराशिसञ्चारो मार्गगत्या गुरोर्भवेत्।
शुद्धसंवत्सरः स स्यात् सर्वेषां च शुभप्रदः।।
यत्र द्विराशिसञ्चारो ह्यतिचारः स कथ्यते।
लुप्ताब्दश्च यदाब्दान्ते पूर्वं भं नैति वक्रितः।।
महातिचारसंज्ञोऽसौ सर्वलोकभयङ्करः[3]।।

स्फुटगुरोः सञ्चारो यस्मिन् वत्सरे न भवति, स 'अधिसंवत्सरः'। अस्मिन् विषये ज्योतिर्विदाभरणे कालिदासेन कथितम्, यथा—

गुरुसङ्क्रमयुग्मवत्समा गदिता सा ननु लुप्तसंज्ञिका।
विबुधै रहिता शुभे तु याऽधिसमागीष्पतिसङ्क्रमोज्झिता।।[4]

---

१. सूर्यसिद्धान्ते मानाध्याये, श्लो. १७; २. सि.शि.,ग.म. का., श्लो.३०।
३. उद्धृतं दिग्देशकालज्ञाने, पृ. १७७; ४. ज्योतिर्विदाभरणे-८.१२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एषां शुद्ध-लुप्तमहातिचार-लघ्वतिचाराधिसंवत्सराणाञ्च विशेषविचारः संहिताग्रन्थेषूपलभ्यते।

विजयादिसंवत्सराणां प्रारम्भो गुरुसंवत्सरे प्राप्यते। तस्य कारणमस्ति यत् सृष्ट्यादौ विजयसंवत्सरस्य प्रारम्भकाल आसीत्। अतो गुरुसंवत्सरेषु विजयादीनां षष्टिसंवत्सराणां गणना क्रियते। साम्प्रतं व्यवहारे प्रभवादिषष्टिसंवत्सराणां प्रयोगो दृश्यते। अस्य कारणमस्ति यत् शकादौ प्रभवसंवत्सरस्य प्रभावोऽभवत्। तस्मात् कालात् प्रभवादयः संवत्सरा व्यवहारे पञ्चाङ्गादिषु दृश्यन्ते। अथात्र प्रसङ्गवशात् प्रभवादिसंवत्सराणां नामानि क्रमश्च प्रदर्श्यते। प्रसङ्गेऽस्मिन्नग्निपुराणस्य १३९ तमाऽध्यायस्य १-१३ श्लोकाः संवत्सराणां फलादिकार्थमवलोकनीया। प्रभवादयो संवत्सरास्त्रिषु वर्गेषु विभक्ताः सन्ति। आदितो विंशतिपर्यन्तं ब्रह्मविंशतिका, एकविंशतितश्चत्वारिंशत्पर्यन्तं विष्णुविंशतिका, एकचत्वारिंशततः षष्टिपर्यन्तं रुद्रविंशतिका इति।[१] स्पष्टार्थमधो द्रष्टव्यम्।

ब्रह्मविंशतिका—१. प्रभवः, २. विभवः, ३. शुक्लः, ४. प्रमोदः, ५. प्रजापतिः, ६. अङ्गिरा, ७. श्रीमुखः, ८. भावः, ९. युवा, १०. धाता, ११. ईश्वरः, १२. बहुधान्यः, १३. प्रमाथी, १४. विक्रमः, १५. वृषः, १६. चित्रभानुः, १७. सुभानुः, १८. तारणः, १९. पार्थिवः, २०. व्ययः।

विष्णुविंशतिका— २१. सर्वजित्, २२. सर्वधारी, २३. विरोधी, २४. विकृतः, २५. खरः, २६. नन्दनः, २७. विजयः, २८. जयः, २९. मन्मथः, ३०.दुर्मुखः, ३१. हेमलम्बः, ३२. विलम्बः, ३३. विकारी, ३४. शार्वरी, ३५. प्लवः, ३६. शुभकृत्, ३७. शोभकृत्, ३८. क्रोधी, ३९. विश्वावसुः, ४०. पराभवः।

रुद्रविंशतिका—४१. प्लवङ्गः, ४२. कीलकः, ४३. सौम्यः, ४४. साधारणः, ४५. विरोधकृत्, ४६. परिधावी, ४७. प्रमादी, ४८. आनन्दः, ४९. राक्षसः, ५०. नलः, ५१. पिङ्गलः, ५२. कालयुक्तः, ५३. सिद्धार्थी, ५४. रौद्रः, ५५. दुर्मतिः, ५६. दुन्दुभिः, ५७. रुधिरोद्गामी, ५८. रक्ताक्षः, ५९. क्रोधनः, ६०. क्षयः।

पैत्र्यमानम्

सकृदुद्गतमब्दार्धं पश्यन्त्यर्कं सुरासुराः।
पितरः शशिगा पक्षं स्वदिनं च तरा भुवि।।[२]

---

१. मानसागरी, पृ. ८; २. सूर्यसिद्धान्ते, १२.७४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकचन्द्रमासतुल्यं पित्र्यदिनं भवति। चन्द्रबिम्बपृष्ठवासिनां पितृणां कृते पञ्चदशदिनानि यावत् सूर्यदर्शनं भवति, अर्थात् पञ्चदशदिनात्मकं दिनं पञ्चदशदिनात्मिका च रात्रिर्भवति। द्वयोः पक्षयोः संयोगेन एकचान्द्रमासमित-महोरात्रं भवति। अमुं विषयमाश्रित्य भास्कराचार्येण सिद्धान्तशिरोमणौ गोलाध्याये त्रिप्रश्नाधिकारे पितृदिवसस्योदयास्तादिकालानामपि विवेचनं कृतम्। यथा—

विधूर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति।
पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे दर्शे यतोऽस्माद्द्युदलं तदैषाम्।।
भार्धान्तरत्वान्न विधोरधस्थं तस्मान्निशीथः खलु पौर्णमास्याम्।
कृष्णे रविः पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम्।।[1]

अत्रायमाशयो यत् चन्द्रस्योर्ध्वभागे पितरो वसन्ति। ते (चन्द्रपृष्ठनिवासिनः पितृगणाः) च सुधादीधितिं चन्द्रं स्वाध आमनन्ति। तेऽमान्ते रविं निजमस्तकोर्ध्वे पश्यन्ति, यतो मस्तकोपरि सूर्यदर्शनादमान्तकालः पितृणां दिनार्धकालो वर्तते। एवञ्च पूर्णान्तकाले सूर्यः पितृणामधो याम्योत्तरवृत्ते भवतीति। अत एव पूर्णिमान्त-कालस्तेषां निशार्धकालः। पूर्णिमान्ते चन्द्रः सूर्यात् षड्भान्तरे स्थितो भवति। यतो दर्शे द्युदलं पूर्वं च निशार्धमिति हेतोः। पितृणां कृते कृष्णपक्षदले सूर्यस्योदयो भवति शुक्लपक्षदले चास्तम्। अर्थात् कृष्णपक्षस्य च सार्धसप्तम्यां तिथौ सूर्यास्त-काल इति भास्कराचार्यस्याभिप्रायः। अयमभिप्रायो निम्नचित्रेण स्पष्टो भवति।



भास्करोक्तिस्तत्र स्थूलदृष्ट्या समीचीना वर्तते। तस्य सूक्ष्मं विवेचनं चैवम्—यतो यदा सूर्यचन्द्रौ राश्याद्यवयवैः समानौ, तदा अमान्तकालः। यदि

१. सि.शि., गो.त्रि.वा., श्लो. १३-१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदवसरे संयोगाच्चन्द्रशराभावस्तदैकस्मिन्नेव सूत्रे सूर्यचन्द्रौ भवेताम्। अमान्ते सूर्यश्चन्द्रपृष्ठोपरि तिष्ठति। तदानीं पितृणां मध्याह्नकालो भवति। मध्याह्नकाल एव पितृणां दिनदलमिति स्फुटम्। परं शरविशिष्टामान्तकालः पितृणां मध्याह्नकालो न भवति। अस्मिन् विषये विस्तृतरूपेण चन्द्रगोलविमर्शे कथयन्त्याचार्याः श्रीरामचन्द्रपाण्डेयमहोदयाः—शरविशिष्टामान्ते यद्ययनसन्धिकालश्चेत्, तदानीं कदम्बप्रोतध्रुवप्रोतवृत्तयोरैक्यात् पितृणां याम्योत्तरवृत्त एव रविः स्थास्यति खस्वस्तिकादितरबिन्दौ। याम्योत्तरवृत्ते कुत्रापि स्थित्या दिनार्धकालः स्यादेव। अयनसन्धिकालेतरकाले ध्रुवप्रोतवृत्तकदम्बप्रोत्तवृत्तयोर्भिन्नत्वात् तदानीममान्ते न दिनार्धकाल इति। अतोऽमान्ते निजमस्तकोर्ध्वे पितरो रविं सर्वदा पश्यन्ति किं वा अमान्ते दिनार्धकालः पितृणामिति सर्वथा न समीचीनम्। स्थूलदृष्ट्या व्यवहारार्थमङ्गीकर्तुं शक्यते, वास्तवार्थं तु अग्रे विचारः करिष्यते। पौर्णमास्याञ्च भार्धान्तरत्वाद् रवेरधःस्थित्या निशीथः खलु जायते पितृणाम्। अत्रापि किञ्चिद् विचारः क्रियते—

अत्रापि चेत् चन्द्रशराभावविशिष्टः पूर्णान्तस्तदानीमपि रविचन्द्रयोरेकसूत्रे स्थित्या, चन्द्राच्च षड्भान्तरे रविस्तदानीं चन्द्राधो भूः, भूमेरधः पितृणां याम्योत्तरेऽधः खस्वस्तिके रविः स्थास्यति। एवमस्यां स्थितौ पितृणां निशार्धकालेति सिद्धमेव पौर्णमास्याम्। चन्द्रशरविशिष्टपूर्णान्ते च अयनसन्धिकालश्चेत्, तदानीं ध्रुवप्रोतकदम्बप्रोतयोरैक्याद् ध्रुवप्रोतवृत्तस्य च चन्द्रकेन्द्रानुरोधेन याम्योत्तरवृत्तत्वात् पितृणामधो याम्योत्तरवृत्तेऽधः खस्वस्तिकादितरबिन्दौ रविः स्थास्यति। तर्हि अधो याम्योत्तरवृत्तस्य कस्मिन्नपि बिन्दौ रवेः स्थित्या रात्र्यर्धकालो भवत्येव। अतश्चन्द्रशरविशिष्टपूर्णान्ते अयनसन्धिकालावस्थायामधो याम्योत्तरवृत्ते स्थितत्वाद्रवेः पितृणां पौर्णमास्यां निशार्द्धकालः सिद्धः। अयनसन्धिकालेतरकाले दिनार्धवन्निशार्धकालोऽपि न भवितुमर्हति पौर्णमास्याम्[१]।

शरविशिष्टामान्ते अयनसन्धिकालेतरावस्थायां पितृणां मध्याह्नकालोऽमान्त-कालाद् भिन्नकाले भवति। अस्यानयनस्य विधिरत्र प्रस्तूयते—सदा सूर्योऽमान्त-काले याम्योत्तरवृत्ते न तिष्ठति। चन्द्रशरसत्त्वे चन्द्रोपरिगतध्रुवप्रोतधरातले चन्द्रगोलीयं याम्योत्तरवृत्तम्। तद्वृत्तधरातलतो भिन्नध्रुवप्रोतवृत्ते सूर्यः। तस्माच्चन्द्र-शरसत्त्वे अमान्तकाले सूर्यश्चन्द्रगोलीययाम्योत्तरवृत्ततो नतो भवति। रविनतकालस्य ज्ञानं यदि भवेत्, तर्हि शरविशिष्टामान्ते पितृणां मध्याह्न-दिनार्ध-निशार्धकालानां ज्ञानं स्पष्टरूपेण भविष्यति। अयमभिप्रायो निम्नचित्रेण स्पष्टो भवति—

---

१. चन्द्रगोलविमर्शः, पृ. २००।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षेत्रपरिचयः

ख = चन्द्रखमध्यम् (पितृणां खमध्यम्), ध्रु = ध्रुवस्थानम्, सू = रविस्थानम्, ध्रुख = पितृणां याम्योत्तरवृत्तम्; ध्रुसू = सूर्यगतध्रुवप्रोतवृत्तम्। ध्रुखसू चापजात्ये—ध्रुख = लम्बांशाः, ध्रुसू = रविद्युज्याचापांशाः, सूख = रविनतांशाः। यदि एतेषामवयवानां ज्ञानं भवेत्, तदा चापजात्येसिद्धान्तेन ध्रुवसंलग्नकोणस्य ज्ञानमपि भवितुं शक्यते, स एव कोणो रविनतकालरूपो वर्तते। एतेषामवयवानां ज्ञानं क्रियते—

इत्थमत्र चन्द्रगोलीय-रविनतांश-द्युज्याचापांश-लम्बांशानां ज्ञानमपेक्षितमस्ति।



लम्बांशमानम्

क्षेत्रपरिचयः

भू = भूकेन्द्रम्, पखत = चन्द्रकेन्द्रीययाम्योत्तरवृत्तम्, च = चन्द्रकेन्द्रम्, ख = खस्वस्तिकम् (पितृणाम्), पख = लम्बांशाः (चन्द्रगोलीय), प = परिणत-ध्रुवस्थानम्, ध्रुच = चन्द्रद्युज्याचापांशाः, ध्रुवस्थानस्य (ध्रुवतारायाः) अनन्तदूरत्वात् चध्रु, भूध्रु रेखे समानान्तरे। अतो रेखागणितेन (१ अध्यायः २९प्र)।∵ भूध्रु-चध्रु-रेखे समानान्तरे,∴∠ ध्रुभूच =∠ खचप। अर्थाद् ध्रुच- चापम् = पख-चापम्। चन्द्रद्युज्याचापांशमानं चन्द्रगोलीयलम्बांशमानेन समम्। अतो लम्बांशज्ञानं जातम्।

नतांशसाधनम्



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भू = भूकेन्द्रम्, च = चन्द्रबिम्बकेन्द्रम्, सू = सूर्यः, ध्रु = ध्रुवः, ख = चन्द्रगोलीयखमध्यम्, प = परिणतरविः (चन्द्रगोलीयरविः), चसू = बिम्बान्तरसूत्रम्, भूसू = रविकर्णः, भूच = चन्द्रकर्णः।

∠ चभूस = स्पष्टान्तरांशाः, ∠ खचसू = सितांशाः, त्रिभुज भूचसू-अनुपातः—

$$\frac{\text{ज्या} \angle \text{ सू भू च} \times \text{भू सू}}{\text{सू च}} = \text{ज्या} \angle \text{ भू च सू}$$

ज्या ∠ भूचसू = ज्या ∠ सूचख(∵ कोणज्याकोणोनभार्धाशज्यातुल्या भवति)।

$$\therefore \frac{\text{स्पष्टान्तरांशाः} \times \text{रविकर्णः}}{\text{बिम्बान्तरसूत्रम्}} = \text{ज्या} \angle \text{ सूचख} = \text{सितांशज्या अस्याश्चापम्} =$$

प ख, रविनतांशाः चन्द्रगोलीयाः।

द्युज्याचापांशज्ञानम्



क्षेत्रम्–५

सू = सूर्यः, ख = खमध्यम् (पितृणाम्), च = चन्द्रकेन्द्रम्, भू = भूकेन्द्रम्, चसू = बिम्बान्तरसूत्रम्, चत = चन्द्रगोलीयनाडीवृत्तम्, सून = रविक्रान्तिज्या, चल = चन्द्रक्रान्तिज्या, भूच = चन्द्रकर्णः, भून = भूगोलीयनाडीवृत्तम्, चअ = चन्द्रगोलीयत्रिज्यासूत्रम्, अक = चन्द्रगोलीयक्रान्तिज्या। कखअग = याम्योत्तरवृत्तम्, रविक्राज्या = चन्द्रक्राज्या = सूत (संस्कारज्या)।

Δच सू तΔच अ क अनयोः साजात्यादनुपातः—

$$\frac{\text{सू त} \times \text{च अ}}{\text{च सू}} = \text{अ क} = \frac{\text{संस्कारज्या} \times \text{त्रिज्या}}{\text{बिम्बान्तरसूत्रम्}} = \text{चन्द्रगोलीयक्राज्या}$$

अस्याश्चापम् = चा = रविक्रान्तिः, ९०-चाप = द्युज्याचापं, चन्द्रगोलीयम्। चापीयावयवत्रयाणां ज्ञानं सम्पन्नं जातम्।

तथात्वे लम्बांशनतांशद्युज्याचापांशेति अवयवत्रयाणां ज्ञाने सति चापजात्यसिद्धान्तेन ध्रुवसंलग्नं ∠ सुधुख-कोणस्थं ज्ञानं सुगमम्। अयमेव कोणो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नतकालः। अस्य कोणस्य मानं चापीयत्रिकोणमित्याः 'भूकोटिजीवा त्रिगुणा हतोना' इत्यादिसिद्धान्तेन सुकरम्। अतो द्युज्याचापं लम्बांशान्तर्गतकोणमानं नतकालांशसममायाति। नतकालांशान्तरितोऽमान्तात् पितृणां दिनार्धकाल इति।

अतः पितृ-अहोरात्रस्य सन्दर्भे, भास्कराचार्यस्य विचारः स्थूलं प्रतिभाति। यथा स्पष्टम्—ख = खस्वस्तिकम्, भू = भूकेन्द्रम्, च = चन्द्रकेन्द्रम्



नचट = चन्द्रकक्षा, लंसूंखसूल = रविकक्षा, लंल = गर्भक्षितिजम्, भू सू = रविकर्णः; भू च = चन्द्रकर्ण; सू च चन्द्रमण्डलीयगर्भक्षितिजम्, सूं = सूर्यः उदयकालिकः, सू = अस्तकालिकः सूर्यः। दिनरात्रिव्यवस्था गर्भक्षितिजानुरोधेनेति। अतोऽत्र सूं बिन्दौ स्थिते सूर्ये तिथ्यानयनम्—

भू सूं च अनुपातः—

$$\frac{\text{ज्या} \angle \text{भू च सूं} \times \text{भू च}}{\text{भू सू}} = \text{ज्या} \angle \text{भू सू च} = \frac{\text{त्रिज्या} \times \text{चन्द्रकर्णः}}{\text{रविकर्णः}}$$

ज्या ∠ भू सूं च = ज्या ∠ सूं भू लं, अस्याश्चापम् = च = सूं लं।

२७० + चाप = सूर्योदयकालिकान्तरांशाः।

द्वादशभक्तेन तिथयो भवन्तीति नियमात्

$$\frac{\text{२७० + चाप}}{\text{१२}} = \text{सूर्योदयकालिकास्तिथयः}$$

$$\frac{\text{२७०}}{\text{१२}} + \frac{\text{चा}}{\text{१२}} = \frac{\text{४५}}{\text{२}} + \frac{\text{चा}}{\text{१२}}$$

$$= \text{२२} + \frac{\text{१}}{\text{२}} + \frac{\text{चा}}{\text{१२}} = \text{१५} + \text{७} + \frac{\text{१}}{\text{२}} + \frac{\text{चा}}{\text{१२}} = \text{सूर्योदयकालिकतिथिः।}$$

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो भास्कराचार्यानुसारेण कृष्णपक्षस्य सार्द्धसप्तम्यां सूर्योदयो न भवति पितृणां कृते; परन्तु सार्द्धसप्तमीतः चापद्वादशांशाधिके काले सूर्योदयो भवति।

सूर्यास्ते—

Δभू च सू अनुपातः—

$$\frac{\text{ज्या} \angle \text{भू च सू} \times \text{भू च}}{\text{भू सू}} = \text{ज्या भू सू च} = \frac{\text{त्रिज्या} \times \text{चन्द्रकर्णः}}{\text{रविकर्णः}}$$

ज्या $\angle$ भू सू च = ज्या सू भू ल, अस्याश्चापम् = सू ल = चापम्

९० − चा = सूर्यास्तकालिकान्तरांशाः, द्वादशेन भक्तेन $\frac{\text{९० − च}}{\text{१२}}$ = अस्ततिथिः

$$\frac{\text{९०}}{\text{१२}} - \frac{\text{चा}}{\text{१२}} = \text{७}\frac{\text{६}}{\text{१२}} - \frac{\text{चा}}{\text{१२}} = \text{७}\frac{\text{१}}{\text{२}} - \frac{\text{चा}}{\text{१२}}$$ अस्तकालिकतिथिः।



श्रीमता भास्कराचार्येण पक्षदले पितृणां कृते सूर्योदयास्तमानं कल्पितम्, तन्न समीचीनम्। उपरिनिर्दिष्टक्षेत्रदर्शनेन शुक्लपक्षस्य सार्धसप्तमीतिथेः प्राक् $\frac{\text{चा}}{\text{१२}}$ तुल्यतिथिमाने सूर्यास्तो भवतीति।

पितृणामहोरात्रे दिनार्ध-निशार्ध-सूर्योदयास्तकालानां निर्देशो भास्कराचार्येण सामान्यव्यावहारिकदृष्टिमादाय कृत इति कथितुं शक्यते।

अत्राचार्यरामचन्द्रमहोदयेन 'चन्द्रगोलविमर्शे' पितृणां समयविभागचक्रं कृतम्, तन्मया प्रस्तूयते। यथा—

तिथयः	कालः	पितृणां घण्टामिनटात्मकः कालः
शुक्लपक्षस्य तिथयः		
१	मध्याह्नः	१२.४८
२	,,	१.३६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३	,,	२.२४
४	,,	३.१२
५	अपराह्णः	४.००
६	,,	४.४८
७	,,	५.३६
८	सायं	६.२४
९	,,	७.१२
१०	रात्रिः	८.००
११	,,	८.४८
१२	,,	९.३६
१३	,,	१०.२४
१४	,,	११.१२
१५	मध्यरात्रिः	१२.००

कृष्णपक्षस्य तिथयः		
१	मध्यरात्रिः	१२.४८
२	,,	१.३६
३	,,	२.२४
४	मध्यरात्रिः	३.१२
५	उषः	४.००
६	,,	४.४८
७	,,	५.३६
८	प्रातः	६.२४
९	,,	७.१२
१०	दिवसः	८.००
११	,,	८.४८
१२	,,	९.३६
१३	,,	१०.२४
१४	,,	११.१२
३०	मध्याह्नः	१२.००

दैवमानम्

सूर्यस्य द्वादशराशिभोगकाल एकः सौरवर्षोऽस्ति। सौरवर्षमेव देवासुराणामहोरात्रमस्ति; किन्तु यद्देवानां दिनं भवति, सा एवासुराणां रजनी, असुराणां दिनं देवानां रात्रिः। अस्मिन् विषये भास्करोक्तम्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रं च देवासुराणां तदेव[१]।

सूर्यसिद्धान्ते—

सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्।
यत् प्रोक्तं तद् भवेद्दिव्यं मनोर्भगणपूरणात्[२]।।

देवासुराणां क्षितिजवृत्तं नाडीवृत्तं वर्तते। एवमत्र विचार्यते शास्त्रानुसारेण मेरौ (उत्तरीध्रुवस्थानम्) देवानां निवासस्थानम्, असुराणाञ्च सुमेरौ (दक्षिण-ध्रुवस्थानम्) इति। अनयोः स्थानयोर्मध्ये १८० अंशात्मकं दैर्घ्यमानमस्ति। यस्मिन् दिने सूर्यो वसन्तसम्पातबिन्दौ आगच्छति, तद्दिनं विषुवद्दिनं कथ्यते। विषुवद्दिनस्थं रविं देवासुराः स्वक्षितिजवृत्ते पश्यन्ति। क्रान्तिनाडीवृत्तयोः पूर्वसम्पातः सायनमेषः, पश्चिमसम्पातश्च सायनतुलादिबिन्दुः। सायनमेषतुलयोरर्क-सङ्क्रमणमेव विषुवद्दिनमस्ति। अतो द्वयोर्विषुवद्दिनयोः रवेर्भ्रमणं नाडीमण्डले भवति। तेन देवासुराः सूर्यं विषुवद्दिने स्वक्षितिजे पश्यन्ति। विषुवद्वृत्ताद् उत्तरदिशि (उत्तरगोले) मेषादिषडहोरात्रवृत्तानि स्थितानि सन्ति। एतेषु राशिषु भ्रमन्तं सूर्यं देवाः षण्मासपर्यन्तमवलोकयन्ति। यस्मिन् दिने सूर्यो वसन्तसम्पातबिन्दुतः (विषुवद्वृत्तात्) नवत्यंशे स्थितो भवति, तदानीमयं बिन्दुः सूर्यस्य परमक्रान्तिं सूचयति। परमक्रान्तिबिन्दुरेव देवानां मध्याह्नः, दानवानाञ्च मध्यरात्रिर्भवति। यदा सूर्यो विषुवद्वृत्ताद् दक्षिणगोले तुलादिषड्राशिषु भ्रमणं करोति, तदा दानवास्तमर्कं षण्मासपर्यन्तमवलोकयन्ति। दक्षिणगोलेऽपि विषुवद्वृत्ताद् नवत्यंशे स्थितं सूर्यं दानवाः सर्वोन्नतरूपेण खे पश्यन्ति। इयमस्ति सूर्यस्य परमक्रान्तिः।

एवमपि कथितुं शक्यते यत् सायनमेषादौ देवानां सूर्योदयः, दैत्यानाञ्च सूर्यास्तः। मिथुनान्ते देवानां मध्याह्नमसुराणाञ्च मध्यरात्रिः। कन्यान्ते देवानां सूर्यास्तो दैत्यानाञ्च सूर्योदयो भवति। कन्यान्तं तुलादौ दैत्यानां स्पष्टरूपेण सूर्योदयो भवति। धनुरन्ते तेषां मध्याह्नभूर्मीनान्ते च सूर्यास्तो भवतीति। अतः स्पष्टमस्ति यद् नाडीवृत्तमेव देवासुराणां विभाजकः।

मानुषमानम्

ज्ञेयं विमिश्रं तु मनुष्यमानं मानैश्चतुर्भिर्व्यवहारवृत्तेः।।
वर्षायनर्तुयुगपूर्वकमत्र सौरान्मासास्तथा च तिथयस्तुहिनांशुमानात्।
यत् कृच्छ्रसूतकचिकित्सितवासराद्यं तत्सावनाच्च घटिकादिकमार्क्षमानात्[३]।।

---

१. सि.शि., कालमानाध्यायः, श्लो. १९; २. सू.सि., मानाध्यायः, श्लो. २०।
३. सि.शि. कालमानाध्याये, श्लो. ३०-३१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुष्यमानं तु मिश्रितमस्ति। अत्रैव व्यवहारे चत्वारि मानानि सन्ति। वत्सरायनर्तुयुगादीनां व्यवहारः सौरमानात् प्रवर्त्तते इहलोके। मासानां तिथीनाञ्च गणना चान्द्रमासाद् भवति। व्रतोपवासचिकित्सितसूतकवासराद्यर्कसावनमानाद् घटिकादिकं नाक्षत्रादेव। एवं सौरचान्द्रसावननाक्षत्रमानैश्चतुर्भिरेभिर्मिश्रितैर्मनुष्यमानं सिद्धम्।

सूर्यसिद्धान्ते मानवमानस्य चर्चा प्राजापत्यमानरूपेणोद्धृताऽस्ति। यथा—

मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम्।
न तत्र द्युनिशोर्भेदो ब्राह्मं कल्पः प्रकीर्तितम्[1]।।

मनोः काल एव प्राजापत्यसंज्ञया बोध्यते, तत्र दिननिशयोर्भेदो नास्ति।

ब्राह्ममानम्

खखाभ्रदन्तसागरैर्युगाग्नियुग्मभूगुणैः।
क्रमेण सूर्यवत्सरैः कृतादयो युगाङ्घ्रयः।।
स्वसन्ध्यकास्तदंशकैर्निजार्कभागसम्मितैः।
युताश्च तद्युतौ युगं रदाब्धयोऽयुताहताः।।
मनुः क्षमानगैर्युगैर्युगेन्दुभिश्च तैर्भवेत्।
दिनं सरोजजन्मनो निशा च तत्प्रमाणिका।।

सन्धयः स्युर्मनूनां कृताब्दैः समा आदिमध्यावसानेषु तैर्मिश्रितैः।
स्याद् युगानां सहस्रं दिनं वेधसः सोऽपि कल्पो द्युरात्रं तु कल्पद्वयम्।।
शतायुः शतानन्द एवं प्रदिष्टस्तदायुर्महाकल्प इत्युक्तमाद्यैः।
यतोऽनादिमानेष कालस्ततोऽहं न वेद्म्यत्र पद्मोद्भवा ये गतास्तान्[2]।।

स्पष्टार्थं प्रस्तूयते

एकस्मिन् महायुगे ४३२०००० सौरवर्षाणि भवन्ति। सत्यत्रेताद्वापरकलि-युगानां युगपादानां योगमेकं महायुगमस्ति। एकं सहस्रं महायुगानां ब्रह्मणो दिनं रात्रि-श्चापि एतेषामेव वर्षाणां भवति। अतो ब्रह्मणोऽहोरात्रमानं द्विसहस्रमहायुगानां भवति।

∵१ महायुगम् = ४३२०००० सौरवर्षाणि १०००∴ महायुगमानम् = ब्रह्मणो दिवसः।
∴१००० × २ = २००० महायुगानाम् = ब्रह्मणोऽहोरात्रमानम्।
∴४३२००००×२०००= ८६४००००००० ब्रह्मणोऽहोरात्रम्।

१. सू.सि., मा. श्लो. २१; २. सि.शि., ग.म.का., श्लो. २१-२५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ + ३ + २ + १ = १० कृतत्रेताद्वापरकलियुगानां धर्मपादानां योगः,

∵ ४३२०००० सौरवर्षाणि = १ महायुगम्।

$= \frac{४३२०००० \times ४}{१०}$ = १७२८००० कृतयुगमानम्।

$= \frac{४३२००० \times ३}{१०}$ = १२९६०००त्रेताया मानम्।

$\frac{४३२०००० \times २}{१०}$ = ८६४००० द्वापरस्य मानम्।

$\frac{४३२०००० \times १}{१०}$ = ४३२०० कलियुगस्य मानम्।

एतेषां योगः = ४३२०००० महायुगप्रमाणम्।

स्वस्वयुगद्वादशांशतुल्यौ सन्ध्यासन्ध्यांशमानौ, यथा—

कृतयुगस्य	—	आदौ सन्ध्यावर्षाणि	=	१४४०००
		शुद्धयुगमानम्	=	१४४००००
		अन्ते सन्ध्यांशवर्षाणि	=	१४४०००
त्रेतायाः	—	आदौ सन्ध्यावर्षाणि	=	१०८०००
		शुद्धयुगमानम्	=	१०८००००
		अन्ते सन्ध्यांशवर्षाणि	=	१०८०००
द्वापरस्य	—	आदौ सन्ध्यावर्षाणि	=	७२०००
		शुद्धयुगमानम्	=	७२००००
		अन्ते सन्ध्यांशवर्षाणि	=	७२०००
कलेः	—	आदौ सन्ध्यावर्षाणि	=	३६०००
		शुद्धयुगमानम्	=	३६००००
		अन्ते सन्ध्यांशवर्षाणि	=	३६०००
एतेषां योगः			=	४३२०००० महायुगम्

∵ ७१ महायुगानाम् = १ मनुः, १४ मनुः = एककल्पः, ∴ ७१×१४= ९९४ महायुगानि।

एको मनोः सन्धिः कृतयुगवर्षप्रमाणं भवति। चतुर्दशानां मनूनां सन्धयः पञ्चदशसंख्याका भवन्ति। यदि एकसन्धिमाने कृतयुगवर्षप्रमाणं लभ्यन्ते, तदा पञ्चदशे किमिति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

$$\frac{१७२८००० \times १५}{१} = २५९२०००० \text{ वर्षाणि।}$$

यदि एकस्मिन् महायुगे ४३२०००० वर्षाणि भवन्ति, तदा २५९२०००० वर्षेषु कति महायुगानि भविष्यन्ति?

$$\frac{२५९२००००}{४३२००००} = ६ \text{ महायुगानि।}$$

९९४ + ६ = १००० महायुगानि = ब्रह्मणो दिवसः।

१ महायुगम् = ४३२०००० सौरवर्षाणि

१००० महायुगानि = १ ब्रह्मणो दिवसः

४३२०००० × १००० = ४३२००००००० सौरवर्षात्मको ब्रह्मदिवसः।

४३२००००००० × २ = ८६४००००००० अहोरात्रं सौरवर्षात्मकम्।

८६४००००००० × ३० = २५९२००००००० मासाः।

२५९२००००००० × १२ = ३११०४००००००० वर्षाणि।

३११०४००००००० × १०० = ३११०४०००००००००० सौरवर्षात्मिका ब्रह्मण आयुः।

एवमेव सूर्यसिद्धान्तेऽपि दृश्यते।[१] कल्पो ब्रह्मण एकं दिनम्। कल्पद्वयं ब्रह्मणोऽहोरात्रम्। अनेनाहोरात्रप्रमाणेन ब्रह्मणः परमायुर्वर्षशतम्। यथा सूर्यसिद्धान्ते—

परमायुः शतं तस्य तयाहोरात्रसंख्यया।
आयुषोर्धमितं तस्य शेषकल्पोऽयमादिमः[२] ।।

ब्रह्मण आयुविषये आचार्यभास्करस्य मतम्—

तथावर्तमानस्य कस्यायुषोऽर्धं गतं सार्धवर्षाष्टकं केचिदूचुः।
भवत्वागमः कोऽपि नास्योपयोगो ग्रहा वर्तमानद्युयायात् प्रसाध्याः[३] ।।

अयमाशयः—आचार्यो वक्ति—तथा वर्तमानस्य ब्रह्मण आयुकालस्य किं गतमिति न वेद्मि। तत्र केचिदाचार्या आयुषोऽर्धं गतं केचित् सार्धवर्षाष्टकं गतमित्यूचुः। तत्रागमः प्रमाणम्। इहागमद्वैविध्ये कः प्रमाणमित्यत्रास्माकं नाग्रहः, अतोऽस्य गतैर्वर्षैर्दिनैरपि प्रयोजनाभावः। ग्रहास्तु वर्तमानस्य दिवसस्य गतात् साध्याः।

ब्रह्मदिनादौ सृष्ट्यारम्भो दिनान्ते च लय इति सर्वमुक्तम्। इदानीं ब्रह्मणः कियन्मितमायुर्गतम्। अस्य गणिते प्रयोजनाभावात् तस्य चर्चाऽपि प्रयोजनशून्येत्याचार्यस्य भावः। दिनान्ते रव्यादीनुपसंहृत्य संशेते ब्रह्मेति।

१. सू.सि.,म., श्लो. १५-२०; २. तत्रैव, श्लो. २१; ३. सि.शि., ग.का., श्लो. २६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो ब्रह्मणो दिवस एव मानवानां व्यवहारकार्यार्थम्, तदेव विचार्यम्। यथा भास्कराचार्यः —

यतः सृष्टिरेषां दिनादौ दिनान्ते लयस्तेषु सत्स्वेव तच्चारचिन्ता।
अतो युज्यते कुर्वते तां पुनर्येऽप्यसत्स्वेषु तेभ्यो महद्भ्यो नमोऽस्तु[१]।।

यत एषां ग्रहाणां दिनादौ सृष्टिर्दिनान्ते लयः। यदि महाकल्पगताद् ग्रहाः साध्यन्ते, तर्हि यावन्त्योऽस्य विभावर्य्यो गतास्तासु ग्रहाभाव एव। अतो विद्यमानेष्वेव ग्रहेषु तच्चारचिन्ता कर्त्तुं युज्यते। यत्तु कैश्चिदविद्यमानेष्वपि तेषु महाकल्पगताद्वर्तमानाः कृतास्तान् प्रति वक्रोक्त्या सोपहासमाह—'तेभ्यो महद्भ्यो नमोऽस्तु' इति।

कल्पादितः शकादिवत्सरं यावत् कियन्तः सौराब्दा गता। अस्मिन् प्रसङ्गे शिरोमणौ भास्करेणोक्तम्—यदत्र ब्रह्मण आदितः षण्मनवो व्यतीताः। सम्प्रति सप्तमो वैवस्वतमनुः प्रचलतीति। ये षण्मनवो व्यतीतास्ते सन्ति—स्वायम्भुवः, स्वारोचिषः, उत्तमजः, तामसः, रैवतः, चाक्षुषः। वर्तमानमनोः २७ महायुगान्यपि व्यतीतानि। वर्तमाने २८तमे महायुगेऽपि त्रीणि युगानि गतानि। तदतिरिक्ताः कलेरादितः शकादिं यावत् ३१७९ सौराब्दाः व्यतीताः[२]। इत्थमुक्तविधिना कल्पादितः शकादिं यावत् १९७२९४७१७९ सौराब्दा गताः। यथा—

६ मनवः = ६ × ७१ म यु = ४२६ म यु =		
४३२०००० × ४२६	=	१८४०३२००००
७ सन्धयः = १७२८०००×७	=	१२०९६०००
२७ म.यु. = ४३२०००० × २७	=	११६६४००००
कृतयुगवर्षमानम्	=	१७२८०००
त्रेतायुगवर्षमानम्	=	१२९६०००
द्वापरयुगमानम्	=	४६४०००
कलिगतवर्षमानम्	=	५१०१
शकादौ सौरवर्षाणि गतानि	=	१९७२९४७१७९

१. तत्रैव, श्लो. २७।

२. याता षण्मनवो युगानि भमितान्यन्यद् युगाङ्घ्रित्रयं
नन्दाद्रीन्दुगुणास्तथा शकनृपस्यान्ते कलेर्वत्सराः।
गोऽद्रीन्द्वद्रिकृताङ्कदस्रनगगोचन्द्राः शकाब्दान्विताः
सर्वे सङ्कलिताः पितामहदिने स्युर्वर्तमाने गताः।।
स्वायम्भुवो मनुरभूत् प्रथमस्ततोऽमी स्वारोचिषोत्तमजतामसरैवताख्याः।
षष्ठस्तु चाक्षुष इति प्रथितः पृथिव्याम् वैवस्वतस्तदनु सम्प्रति सप्तमोऽयम्।।
(सि.शि., ग.का.,श्लो. २८-२९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तमानशकवर्षाणि = १९२२
एतानि वर्षाणि व्यतीतानि = १९७२४९१०१

क्षयाधिमासविवेचनम्

अमान्तादमान्तं यावत् चान्द्रमासो भवति। यस्मिन् चान्द्रमासे सूर्यस्य सङ्क्रान्तिर्न भवति, स मासोऽधिमास उच्यते, तथा च यस्मिन् मासे सूर्यस्य द्वौ सङ्क्रान्ती भवतः, सः क्षयमासो ज्ञेयः। क्षयमासस्तु कदाचिदेव सम्भवति परन्त्वधिमासस्तु निश्चितकाले द्वात्रिंशन्मासानन्तरमवश्यमेवागच्छति।[1] शिरोमणौ कथितं भास्कराचार्येण—

असङ्क्रान्तिमासोऽधिमासः स्फुटं स्याद्
द्विसङ्क्रान्तिमासः क्षयाख्यः कदाचित्।
क्षयः कार्तिकादित्रये नान्यतः स्यात्
तदा वर्षमध्येऽधिमासद्वयञ्च[2] ।।

कल्परविमासाः कल्पचान्द्रमासेभ्यो यावद्भिरधिका भवन्ति, तेऽधिमास-संज्ञकाः। सावनानां चान्द्राणां चान्तरमवमानि (क्षयानि) उच्यन्ते। सावनदिनेभ्यः चान्द्रदिवसा यावद्भिरधिका भवन्ति, ते दिनक्षयाः। स्पष्टार्थम्—

चान्द्रमासाः—सौरमासाः = अधिमासाः।

∵ चान्द्रदिनानि—सावनदिनानि = क्षयदिनानि।

∴ चान्द्रदिनानि—क्षयदिनानि = सावनदिनानि।

∵ चा.मा.—सौ.मा. = अधि. मा.। त्रिंशद्गुणनेन दिनानि भवन्ति।

चा.दि.—सौ.दि. = अधि.दि.। चा.दि. = अधि.दि.+सौ.दि.।

प्रकारान्तरेण—

अन्तरं तरणिचन्द्रचक्रजं यद्भवेत् स विधुमाससञ्चयः।
चन्द्रचक्रदिवसैक्यमूनितं चन्द्रमासभदिनैर्दिनक्षयाः[3] ।।

चन्द्रभगण—रविभगण = चान्द्रमासः। च.भ.—च.मा. = रवि-भगणः। अमावास्यायां सूर्यचन्द्रौ एकराश्यां भवतः। चन्द्रापेक्षया सूर्यो गतेरल्पत्वाद् मन्दं

---

१. द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा।
घटिकानां चतुष्टयेन पतन्ति क्षयाधिमासकाः।।
२. सि.शि., ग.अ., श्लो.६।
३. सि.शि.,भ., श्लो. १३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दं गच्छति। चन्द्रः सूर्यस्यापेक्षया शीघ्रमेकं भगणं पूरयति। यस्मिन् समये सूर्य एकं राशिं भोगयति, तस्मिन्नेव समये चन्द्रस्त्रयोदशराशीन् भोगयति। अर्थाद् एकस्मिन् चान्द्रमासे सूर्य एकं राशिं भोगयति, चन्द्रश्च त्रयोदशराशीन्।

१३—१ = १२ मासाः, अर्थात् चन्द्रभगण—रविभगण = चान्द्रमासः। 'कालेन येनैति पुनः शशीनम्' इत्यादिना चन्द्रगतिकला—सूर्यगतिकला = गत्यन्तरकला।

$$\because \text{१} \frac{\text{सावनदिनम्} \times \text{चक्रकला}}{\text{गत्यन्तरकला}} = \text{चान्द्रमासान्तस्य सावनदिनसंख्याः।}$$

$$\frac{\text{१ चान्द्रमासः} \times \text{क.कु.दि.}}{\text{चान्द्रमासान्त-सावनदिनानि}} = \text{क.चा.मा. उत्थापनेन।}$$

$$= \frac{\text{१ चा.मा.} \times \text{क.कु.दि.}}{\frac{\text{१} \times \text{चक्रकला}}{\text{च.ग.क.—र.ग.क}}} = \frac{\text{१} \times \text{क.कु.दि.}}{\text{१}} \div \frac{\text{१} \times \text{चक्र कला}}{\text{च.ग.क.-र.ग.क}} =$$

$$= \frac{\text{१} \times \text{क.कु.दि.}}{\text{१}} \times \frac{\text{च.ग.क.—र.ग.क}}{\text{१} \times \text{चक्रकला}} = \frac{\text{क.कु.दि.(च.ग.क.—र.ग.क)}}{\text{चक्रकला}}$$

$$\frac{\text{च.ग.क.} \times \text{क.कु. दि.}}{\text{चक्रकला}} - \frac{\text{र.ग.क.} \times \text{क.कु.दि.}}{\text{चक्रकला}}$$

= च.क.भ.—र.क.भ. = क.चा.मा.उपपन्नम्।

क्षयदिनस्योत्पत्तिः

क.चा.दि.—क.सा.दि. = क.क्ष.दि। ∵ क.सा.दि. = क.न.भ.—क.र.भ.।

∴ क.क्ष.दि. = क.चा.दि.—(क.न.भ.—क.र.भ)

∵ क.च.भ.—क.र.भ. = क.च.मा.। ∴ क.च.भ.—क.चा.मा. = क.र.भ.।

∴ क.क्ष.दि.=क.चा.दि.—[क.न.भ.(क.च.भ.-क.चा.मा.)] उपपन्नम्।

प्रकारान्तरेणाधिमासोपपत्तिः

इन्दुमण्डलगुणेन्दुसंगुणबन्धचक्रविवरेऽधिमासकाः।
खेचरोच्चभगणान्तरोन्मिताः सन्ति मन्दचलकेन्द्रपर्य्ययाः[१]।।

∵ क.चा.मा.-क.सौ.मा. = कल्प-अधिमासाः। परं क.चा.मा. = क.च.भ.—क.र.भ.।

∴ कल्पाधिमास = क.च.भ.–क.र.भ.–क.सौ.मा.।∵ क.सौ.मा. = १२ × क.र.भ.।

१. सि.शि.,भ., श्लो. १४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

∴ कल्पाधिमासः = क.च.भ.—क.र.भ.—१२क.र.भ. = क.च.भ.—१३ क.र.भ। उपपन्नम्।

पुनः कति मासानामाभ्यन्तरेऽधिमास आगच्छतीत्यस्मिन् प्रसङ्गे भास्कराचार्यस्य विचाराः—

चान्द्रोनसौरेण हृतात्तु चान्द्रादवाप्तसौरैर्दशनैर्दलाढ्यैः।
मासैर्भवेच्चान्द्रमसोऽधिमासः कल्पेऽपि कल्प्या अनुपाततोऽतः।।
सौरान्मासादैन्दवः स्याल्लघीयान्यस्मात्तस्मात्संख्यया तेऽधिकाः स्युः।
चान्द्राः कल्पे सौरचान्द्रान्तरे ये मासास्तज्ज्ञैस्तेऽधिमासाः प्रदिष्टाः[1]।।

स्पष्टार्थमधिमासोपपत्तिः

एकस्मिन् सौरमासे सावनदिनसंख्यामानम् = ३०/२६/१७/३१/५२/३०।

एकस्मिन् चान्द्रमासे सावनदिनसंख्यामानम् = २९/३१/५०/०/०।

द्वयोरन्तरम् = ०/५४/२७/३१/५२/३० (शेषः)।

$$= \frac{१ \text{ सौरमासः} \times १ \text{ चान्द्रमासान्तर्गतसावने}}{\text{शेषः}} = \text{सौरमानान्त एकोऽधिमासः।}$$

$$= \frac{१ \text{ सौरमासः} \times २९ \times ३१ \times ५०}{०/५४/२७/३१/५२/३०} = ३२/१५/३१/२८/२७ \text{ सौरमासाः।}$$

एतेषां मासानामनन्तरे द्वितीयोऽधिमास आगच्छति।

$$\frac{१ \text{ अधिमासः} \times \text{क.सौ.मा.}}{३२/१५/३१.....} = \text{कल्पाधिमासः।}$$ क.चा.मा.— क.सौ.मा. = कल्पाधिमासा। उपपन्नम्।

अवमोपपत्तिः

शशाङ्कमासोनितसावनेन त्रिंशद्धृतां लब्धदिनैस्तु चान्द्रैः।
रुद्रांशकोनाब्धिरसैः क्षयाहः स्यात्सावनोऽतश्च युगेऽनुपातात्[2]।।

युगे चान्द्राणां सावनानां च दिनानां यदन्तरं तान्यवमानि। अत एकस्मिन्मासे चान्द्रसावनान्तरं कुदिनात्मकं गृहीतम्। तत्र दिवसाः पूर्णमष्टाविंशतिघटिका दश पानीयपलानि च (०.२८.१०)। इदमेकस्मिञ्चान्द्रमासे त्रिंशत्तिथ्यात्मके कुदिनात्मकमवमखण्डम्। यद्यनेन त्रिंशच्चान्द्राणि दिनानि लभ्यन्ते, तदा सम्पूर्णेनैकेनावमेन कियन्तीति त्रैराशिकेन लब्धै रुद्रांशकोनाब्धिरसैः (६३/

१. सि.शि., गो.म.ग., श्लो. १०-११; २. सि.शि., म. गतिवासना, श्लो. १२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४/३३) एकः क्षयाहो भवति। स च सावनः। अखण्डस्य रूपस्य सावनेच्छाकल्पनात्। अतोऽनुपातात्कल्पेऽपि।

सावनमासदिवसाः = ३०
चान्द्रमासान्तर्गतसावनदिवसाः = २९/३१/५०
शेषः = ०/२८/१० क्षयात्मकम् ।

$$\frac{\text{चान्द्रमासदिनानि} \times १ \text{ दिवसः}}{६} = \text{चान्द्रदिवसाः}$$

$$\frac{३० \text{ ति.} \times १ \text{ दि.}}{०/२८/१०} = ६३/५४/३३$$ चान्द्रदिवसाः, एतेषु दिवसेषु एको दिवसः क्षयो भवति।

$$\frac{१ \text{ क्ष.दि.} \times \text{क.चा.दि.}}{६३/५४/३३} = \text{कल्पक्षयदिनादि।}$$

भास्करोपरि कमलाकरभट्टस्याक्षेपः

असङ्क्रान्तिमासो हि चान्द्रोऽधिमासो द्विसङ्क्रान्तिमासः क्षयाख्यस्तदानीम्।
क्षयाख्यः कदाचित् ततः प्राक् च पश्चादवश्यं हि तत्राधिमासद्वयं स्यात्।।
स्फुटैर्लक्षणैर्यैरयं तानि सर्वेष्वपि स्युर्मधोश्चन्द्रमासेषु काले।
अतोऽयं क्षयः सर्वचान्द्रेष्वपीत्थं न जानन्ति सद्वासनाज्ञानशून्याः।।
इदानीन्तनार्थं न शास्त्रं प्रवृत्तं न सत् कार्तिकादित्रयोत्थं तदुक्तम्।
सुयुक्ता न मदुक्तिरप्यत्र शास्त्रे भवेत् कार्यवर्यस्य या दृग्विरुद्धा।।

भास्कराचार्यः सूर्यमन्दोच्चबिन्दुं ७८ अंशात्मकं स्थिरं मत्वा कार्तिकादित्रिषु मासेषु क्षयमासो भविष्यतीति कथयति। यतस्तदा रविः परमं नीचराशौ भवेत्; परन्त्वस्य खण्डनं सयुक्तिकं कमलाकरभट्टेन कृतम्, ते कथयन्ति यद् मन्दोच्चबिन्दुरपि गतिशीलो वर्तते। यथोच्चबिन्दुर्गतिशीलोऽस्ति, तथैव नीचबिन्दुरपि। अतः सर्वेषु मासेषु क्षयमासो भवितुमर्हति। कार्तिकादिषु त्रिषु मासेष्वेव क्षयमासो भविष्यतीति कथनं युक्तिसङ्गतं नास्तीति भट्टस्याशयः समीचीनं प्रतिभातीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बौद्धनये प्रमाणविमर्शः

डॉ. देवीप्रसादद्विवेदी
प्राध्यापकः (अंशकालिकः)
भाषाविज्ञानविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

'प्रमेयसिद्धिः प्रमाणाद्धि' सिद्धान्तमिममुररीकृत्य सर्वेषु नास्तिकास्तिक-दर्शनेषु प्रमाणविमर्शो विहितः। प्रमीयते वस्तु साध्यतेऽनेनेति प्रमाणम्। प्रोपसर्गपूर्वकमाधातोः करणे ल्युटि कृते प्रमाणशब्दसिद्धिर्भवति। तेन प्रमायाः साधकतमं कारणं प्रमाणं कथ्यते। सर्वेषु दर्शनेषु संख्यालक्षणगोचरफलविषयतया विप्रतिपत्त्या निरूपितं प्रमाणम्। तत्र प्रत्यक्षमेव प्रमाणमिति **चार्वाकाः**। प्रत्यक्षमनुमानञ्चेति **बौद्धाः**। प्रत्यक्षमनुमानमुपमानमिति **वैशेषिकाः**। शब्दोऽपि **नैयायिकाः**। अर्थापत्तिरपीति **भाट्टाः**। अनुपलब्धिरपीति **ब्रह्माद्वैतवादिनः**। एवमेतेऽन्येऽपि ऐतिह्यादयः प्रमाणभेदा निरूपिताः।

अथेदानीं सौगतसमये प्रमाणविचारः प्रस्तूयते। तत्र प्रमाकरणं प्रमाणम्, प्रमीयते अनेनेति व्युत्पत्तेः। प्रमा च सम्यग्ज्ञानम्। अविसंवादकं ज्ञानं सम्यग् ज्ञानम्। ज्ञाने सम्यक्त्वमविसंवादकत्वं वा स्वप्रदर्शितार्थप्रापकत्वं यथार्थत्वं वा, यथार्थत्वं नाम अर्थमनतिक्रम्य विद्यमानत्वम्। लोके च पूर्वप्रदर्शितमर्थं प्रापयन् संवादक उच्यते। ज्ञानमपि स्वयं प्रदर्शितमर्थं प्रापयत् संवादकमुच्यते। ज्ञानस्य प्रापकत्वं नाम स्वप्रकाशितेऽर्थे प्रवर्तकत्वम्, तच्च प्रवृत्तिविषयप्रकाशकत्वम्। न हि बलादेव ज्ञानमर्थे प्रवर्तयत्येव। अर्थाधिगतिः प्रमाणफलम्। अधिगते चार्थे प्रवर्तितः पुरुषः प्रापितश्चार्थः प्रमाणेन। एतदधिकं तु किं ज्ञानेन कार्यम्। ज्ञानस्यार्थप्रकाशः तद्द्वारा प्रवृत्तिर्वा कार्यम्। यदि च प्रमाणान्तरेणार्थप्रकाशो जातस्तदा तमर्थं प्रकाशयद् ज्ञानं न प्रमा भवति। तादृशेन ज्ञानेन नाधिकं किञ्चित् कृतं पूर्वज्ञानकृतात्। तस्मादधिगतविषयकज्ञानमप्रमाणम्। तथा चानधिगताबाधितविषयकज्ञानत्वं प्रमात्वमिति स्थितम्।

तादृशसम्यग्ज्ञानेन सर्वपुरुषार्थसिद्धिर्भवति। हेयोपादेयोऽर्थः पुरुषार्थः। पुरुषेण हि प्रेक्षावता किञ्चिद् हेयं किञ्चिदुपादेयं भवति। उपेक्षणीयमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुपादेयत्वाद्धेयकोटौ एवान्तर्भवति। हेयोपादेयार्थस्य हानमुपादानं वा सम्यग्ज्ञानाधीनम्। न हि अबुद्ध्वा कश्चिद् हातुमुपादातुं वा प्रवर्तते। न च हानोपादाने मिथ्याज्ञानात् सम्भवति, अप्रापकत्वाद् विसंवादित्वाद् वा मिथ्याज्ञानानाम्। न हि शुक्तौ रजतमिति ज्ञानं रजतं प्रापयति। विसंवादि च तज्ज्ञानं यत् शुक्तिं रजतं गोचरयति। नैयायिकैरप्युक्तम्। तद्वति तत्प्रकारकं ज्ञानं प्रमा, तद्विपरीतमप्रमेति। मिथ्याज्ञानस्य प्रवर्तकत्वेऽपि ज्ञानप्रतिपाद्यार्थप्रापकत्वं नास्ति।

उक्तञ्च न्यायबिन्दौ—'सम्यग्ज्ञानपूर्विका सर्वपुरुषार्थसिद्धिरिति'[१]। तादृश-सम्यग्ज्ञानं प्रमाणम्।

प्रमाभेदः

दर्शनान्तरे प्रमाविषये अस्ति विप्रतिपत्तिः संख्यालक्षणगोचरफलविषया, तथापीह बौद्धे समये द्विविधं सम्यग्ज्ञानं प्रत्यक्षमनुमानञ्चेति। अन्यदर्शन-सम्मतानामन्येषां शब्दादीनां प्रमाणानां प्रामाण्यं नास्ति। अस्ति चेद् अनुमान एवान्तर्भावस्तेषाम्।

प्रत्यक्षविमर्शः

प्रतिगतमक्षं प्रत्यक्षम्। 'अत्यादयः क्रान्ताद्यर्थे द्वितीययेति' वार्तिकेन समासे प्रत्यक्षम्, अक्षाश्रितं ज्ञानम्। अथवा अक्षिणी प्रतीति विग्रहे 'लक्षणेनाभिप्रती आभि-मुख्ये' (पा.सू. २-१-१४) इति सूत्रेण समासे 'प्रतिपरसमनुभ्योऽक्ष्णः' (ग. १४८) इति गणसूत्रेण टचि प्रत्यक्षमिति रूपम्। तत्पुरुषसमासपक्षे न परवल्लिङ्गम्, 'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः' (वा. १५-४५) इति वार्तिकेन निषेधात्। प्रत्यक्षशब्दो विशेष्यनिघ्नः। अतः स एव समासो युक्तः। अव्ययीभावपक्षे तु प्रत्यक्षशब्दस्य नेत्राभिमुख्यमर्थः प्रत्यक्षं घटः, नेत्राभिमुख्यं घटस्येत्यर्थः।

एतच्चाक्षाश्रितत्वमक्षाभिमुख्यं वा प्रत्यक्षशब्दस्य व्युत्पत्तिनिमित्तम्, न तु प्रयोगनिमित्तम्। अन्यथा मानसादिप्रत्यक्षे एतन्निमित्ताभावात् प्रत्यक्षत्वं न स्यात्। तस्मात् साक्षात्कारिज्ञानत्वं प्रत्यक्षपदप्रवृत्तिनिमित्तं बोध्यम्।

तत्र न्यायबिन्दौ आचार्येण धर्मकीर्तिना कल्पनापोढमभ्रान्तं प्रत्यक्ष-मित्युक्तम्। प्रत्यक्षं साक्षात्कारिज्ञानं कल्पनापोढमभ्रान्तं वेदितव्यम्। प्रत्यक्षमनूद्य कल्पनापोढत्वादि विधीयते। प्रत्यक्षं च प्रसिद्धमिन्द्रियान्वयव्यतिरेकानुविधायिष्वर्थेषु लोके साक्षात्कारिविज्ञानम्, तदनूद्य कल्पनापोढत्वादि तत्र प्रमात्वप्रयोजकं विधीयते।

कल्पनया अपोढमपेतं कल्पनापोढम्। कल्पनास्वभावरहितमित्यर्थः। अभ्रान्तमविपर्यस्तं भ्रमभिन्नमित्यर्थः। एतद्द्वयं प्रत्यक्षविशेषणं

१. न्यायबिन्दुः, १.१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विप्रतिपत्तिनिरासार्थम्। तथा हि अभ्रान्तग्रहणाभावे गच्छद्वृक्षदर्शनं शुक्तौ रजतदर्शनञ्च प्रत्यक्षं प्रमा स्यात्। तस्माद् अभ्रान्तग्रहणम्। कल्पनापोढग्रहणाभावे चानुमानादावपि लक्षणं प्रसज्येतेति तद्ग्रहणम्।

कल्पनाविमर्शः

का नाम कल्पना यया रहितं प्रत्यक्षमित्युक्तम्। उच्यते, 'अभिलापसंसर्गयोग्यप्रतिभासप्रतीतिः कल्पना'[१]।

अयमर्थः—अभिलप्यतेऽनेनेति अभिलापः शब्दः। अभिलापेन शब्देन संसर्गः अभिलापसंसर्गः। अभिलापसंसर्गाय योग्य आधेयाभासो यस्यां सा अभिलापसंसर्गयोग्यप्रतिभासा सा एषा प्रतीतिरिति व्युत्पत्तिः। आभासो ज्ञानेऽर्थाकारता। अभिलापसंसर्गो नाम एकस्मिन् ज्ञानेऽभिधेयाकारस्याभिधानाकारेण सह ग्राह्याकारतया शीलनम्। एकत्र ज्ञानेऽभिधेयाभिधानाकारौ प्रविष्टौ यदा भवतस्तदा तज्ज्ञानेन संसृष्टौ अभिधानाभिधेयौ भवतः। अभिलापसंसर्गयोग्याभिधेयाभासवती प्रतीतिः कल्पना। शाब्दबोधस्थले अनुमानादौ च तथा सम्भवः। शाब्दबोधे शब्दस्य तदर्थस्य च ग्राह्यत्वम्। भवति च तत्र शब्देन सहाभिधेयस्य ज्ञानविषयतया प्रतीतिरिति सा कल्पना। प्रत्यक्षे च न तथा। तत्र काचित् प्रतीतिरभिलापसंसृष्टाभासा भवति। यथा गृहीतसङ्केतस्य घटार्थकल्पना घटशब्दसंसृष्टाभासा भवति। काचित् प्रतीतिस्तु अभिलापासंसृष्टाभासापि अभिलापसंसर्गयोग्याभासा भवति। यथा अव्युत्पन्नसङ्केतस्य बालकस्य प्रतीतिः। तस्या अपि कल्पनाया सङ्ग्रहाय योग्येति निवेशः। ग्राह्यो ह्यर्थो विज्ञानं जनयन् नियतप्रतिभासं करोति। यथा रूपं चक्षुर्विज्ञानं जनयन्नियतप्रतिभासं करोति। विकल्पविज्ञानं तु अर्थान्नोत्पद्यत इति प्रतिभासनियमहेतोरभावाद् अनियतप्रतिभासाद् विकल्पविज्ञानं हि नार्थसन्निधिमपेक्षते, असन्निहितविषयं तद्विज्ञानम्। पूर्वदृष्टापरदृष्टञ्चार्थमेकीकुर्वद् विज्ञानमसन्निहितविषयकं पूर्वदृष्टस्यासन्निहितत्वात्। असन्निहितविषयकञ्च विज्ञानमर्थनिरपेक्षम्। अनपेक्षञ्चानियतप्रतिभासम्। तादृशज्ञानमभिलापसंसर्गयोग्यम्। नेन्द्रियविज्ञानं तादृशम्। सन्निहितार्थमात्रग्राहित्वाद् अर्थसापेक्षं तत्। अर्थस्य च प्रतिभासनियमहेतुत्वान्नियतप्रतिभासं विज्ञानम्।

तत्त्वसङ्ग्रहेऽपि कथितम्—

'प्रत्यक्षं कल्पनापोढमभ्रान्तमभिलापिनी।

प्रतीतिः कल्पना..... ।।' इति।

तथा चेन्द्रियविज्ञानं नाभिलापसंसर्गयोग्यम्। असन्निहितविषयञ्च विज्ञानं कल्पना तया रहितं प्रत्यक्षम्।

१. न्यायबिन्दुः, १.५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभ्रान्तमित्यस्य भ्रमरहितमित्यर्थः। भ्रमश्च काचकामलतिमिरादिनयनदोषात् सम्भवति। स च बाधितविषयकः। न संवादिविज्ञानमिति तन्न प्रत्यक्षम्।

प्रत्यक्षभेदः

तच्च प्रत्यक्षं विज्ञानं चतुर्विधम्—इन्द्रियज्ञानम्, मनोविज्ञानम्, आत्मसंवेदनम्, योगिज्ञानञ्चेति।

इन्द्रियज्ञानम्

इन्द्रियस्य ज्ञानमिन्द्रियज्ञानम्। इन्द्रियाणि चक्षुरादीनि। इन्द्रियाश्रितं यद् विज्ञानं तत् प्रत्यक्षम्।

मनोविज्ञानम्

स्वविषयानन्तरविषयसहकारिणेन्द्रियविज्ञानेन समनन्तरप्रत्ययेन जनितं यत् तन्मनोविज्ञानम्[1]।

आत्मसंवेदनप्रत्यक्षम्

'सर्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षम्'[2]। चित्तमर्थमात्रग्राहिविज्ञानम्, चैत्ता विशेषावस्थाग्राहिणः सुखदुःखादयः। चित्तचैत्तविज्ञानं प्रत्यक्षम्। नास्ति काचिदवस्था चित्तस्य यस्यामात्मसंवेदनं न स्यात्। सुखादय एव स्फुटानुभवात् स्वसंविदिताः। येन हि रूपेण आत्मा वेद्यते, तद्रूपमात्मसंवेदनं प्रत्यक्षम्। एतच्च ज्ञानरूपं वेदनमात्मनः साक्षात्कारि अभ्रान्तञ्च तस्मात् प्रत्यक्षम्।

योगिप्रत्यक्षम्

भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानम्[3]।

प्रमाणेन दृष्टोऽर्थः सद्भूतो भूतार्थः। यथा चत्वार्यार्यसत्यानि। भूतार्थस्य भावना पुनः पुनश्चेतसि विनिवेशनम्। तस्या भावनायाः प्रकर्षः, भाव्यमानार्थाभासस्य ज्ञानस्य संस्फुटत्वारम्भः। प्रकर्षपर्यन्तो यदा स्फुटाभत्वमीषदसम्पूर्णो भवति, तदा तस्य नास्ति प्रकर्षगतिः। ततः सम्पूर्णावस्थायाः प्राक्तन्यवस्था स्फुटाभत्वप्रकर्षपर्यन्तमुच्यते। तस्मात् पर्यन्ताद् यज्ज्ञातं भाव्यमानं सन्निहितमिव, तस्य स्फुटाकारावगाहिज्ञानं योगिनः प्रत्यक्षम्। स्फुटत्वारम्भावस्था भावनाप्रकर्षः। अभ्रकव्यवहितमिव यदा भाव्यमानं पश्यति, सा प्रकर्षपर्यन्तावस्था, करतलामलकमिव भाव्यमानस्य यद्दर्शनं तज्ज्ञानं योगिप्रत्यक्षम्। तच्च स्फुटाभम्। स्फुटाभत्वादेव निर्विकल्पकम्।

---

१. सिद्धान्तबिन्दुः, २. न्यायबिन्दुः, १।१०; ३. तदेव—१।११।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

योगः समाधिः। सोऽस्यास्तीति योगी। एवं चातुर्विध्यं प्रत्यक्षस्य व्याख्यातम्।

प्रत्यक्षविषयविमर्शः

तस्य चतुर्विधस्य प्रत्यक्षस्य विषयो बोद्धव्यः स्वलक्षणम्। स्वमसाधारणं लक्षणं तत्त्वं स्वलक्षणम्। द्विविधं हि वस्तुनस्तत्त्वं साधारणमसाधारणञ्चेति। साधारणमसामान्यं स्वलक्षणं प्रत्यक्षग्राह्यम्। सामान्यञ्च अनुमानविषयः। द्विविधो हि प्रमाणस्य विषयो ग्राह्यश्च यदाकारं प्रमाणमुत्पद्यते। प्रापणीयश्च यमध्यवस्यति। अन्यो ग्राह्योऽन्योऽध्यवसेयः। प्रत्यक्षस्य हि क्षण एको ग्राह्यः। अध्यवसेयस्तु प्रत्यक्षबलेनोत्पन्नेन निश्चयेन सन्तान एव। सन्तान एव क्षणभङ्गवादे प्रत्यक्षस्य प्रापणीयः, क्षणस्य प्रापयितुमशक्यत्वात्।

स्वलक्षणञ्च अर्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदः। प्रतिभासः अकारः। प्रत्यक्षविषय एव स्वलक्षणम्, तस्यैव परमार्थसत्त्वात्। परमार्थोऽ-नारोपितरूपम्। तेनानारोपितरूपेणास्तीति परमार्थसत्। अनुमानेन हि आरोपितोऽर्थो गृह्यते। परमार्थसदेव अर्थक्रियासमर्थम्। अर्थस्य क्रिया हानोपादानरूपा। तस्य हानोपादानस्य सामर्थ्यं परमार्थसति एव वस्तुनि नारोपितेऽस्ति।

तदयमर्थो यस्मादर्थक्रियासमर्थं परमार्थसदुच्यते सन्निधानासन्निधानाभ्याञ्च ज्ञानप्रतिभासस्य भेदकोऽर्थोऽर्थक्रियासमर्थः, तस्मात् स एकः परमार्थसत्। तत एव हि प्रत्यक्षविषयाद् अर्थक्रिया प्राप्यते, न विकल्पविषयात्। सामान्यञ्च यद्रूपं तदनुमानस्य विषयः।

प्रत्यक्षफलविमर्शः

अर्थप्रतीतिरेव प्रत्यक्षप्रमाणफलम्। सा च प्रतीतिः प्रत्यक्षा। प्रापकं ज्ञानं प्रमाणम्। अर्थादुत्पन्नज्ञानस्य प्रत्यक्षस्यास्ति कश्चिदवश्यकर्तव्यः प्रापकव्यापारः प्रापणरूपो येन कृतेनार्थः प्रापितो भवति। तदेव प्रमाणफलम्। एतदनुष्ठानात् प्रापकं भवति ज्ञानम्। प्रापणञ्च ज्ञानेन न केवलमर्थाविनाभावाद् भवति। प्रवृत्तिविषयप्रदर्शनमेव प्रापकस्य प्रत्यक्षस्य प्रापणव्यापारः। तत् प्रदर्शनं प्रतीतिः, अर्थदर्शनरूपं प्रमाणस्य फलम्।

ननु प्रत्यक्षार्थप्रतीतिस्तदवगमो वा प्रत्यक्षस्य फलं तर्हि किमिति तत् प्रमाणम्। न च प्रत्यक्षप्रतीतिरेव प्रमाणं तत् फलञ्चेति युज्यत इति चेदुच्यते, अर्थसारूप्यमत्र प्रमाणम्। अर्थेन सह ज्ञानस्य यत् सारूप्यं सादृश्यं तदेव प्रमाणं ज्ञानस्य। ज्ञानं हि सम्भवद् अर्थाकारं भवति। यथा नीलादर्थादुत्पद्यमानं ज्ञानं नीलाकारं नीलसदृशं वा भवति। तच्च सारूप्यं सादृश्यमाकार आभास इति व्यपदिश्यते। ज्ञानेऽर्थाकारसादृश्यं प्रमाणम्। तत् सारूप्यसामर्थ्यादेव अर्थप्रतीतिसिद्धिर्भवति। यथा नीलनिर्भासाद् विज्ञानान्नीलस्य प्रतीतिरवसीयते। न हि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चक्षुष उत्पद्यमानं ज्ञानं नीलस्येति शक्यते व्यवस्थापयितुं यावज्ज्ञाने तस्मिन् नीलाकारता नीलसारूप्यं वा न व्यवस्थितं भवति। नीलसदृशं तु विज्ञानं नीलप्रतीतिकारकं भवति। एकस्यापि वस्तुनः किञ्चिद् रूपं प्रमाणं फलं किञ्चिद्रूपमिति न विरुध्यते। प्रत्यक्षज्ञानस्य ह्यर्थसारूप्यं प्रमाणमर्थप्रतीतिः फलमिति भावः। एकस्मिन्नेव विज्ञाने व्यवस्थापकमर्थसारूप्यं व्यवस्थाप्यमर्थप्रतीतिरिति। एवं प्रत्यक्षस्य विषयः फलं स्वरूपं भेदश्चैतत् सर्वं व्याख्यातम्। कल्पनापोढत्वम-भ्रान्तत्वं स्वरूपम्, स्वलक्षणं विषयः। अर्थप्रतीतिः फलम्। इन्द्रियजन्यादिचत्वारो भेदाः। अर्थसारूप्यमस्य प्रमाणम्। एतेनान्येषां मतं निरस्तं वेदितव्यम्।

अनुमानविमर्शः

वस्तुनोऽसाधारणरूपं स्वलक्षणमुक्तम्, अन्यत् स्वलक्षणात् सामान्यं रूपम्। तच्चानुमानगम्यम्। सकलवह्निसाधारणं रूपं समारोप्यमाणम्। क्षणिकस्य सर्वस्य स्वलक्षणत्वात्, तद्ग्राहि अनुमानम्।

अनुमानस्यापि प्रमाणफलव्यवस्था प्रत्यक्षवद् बोध्या। यथा नीलाकारस्योत्पद्यमानस्यानुमानस्य नीलप्रतीतिः फलम्। सा च प्रतीतिर्विकल्परूपा। नीलसारूप्यमस्यानुमानस्य प्रमाणम्।

अनुमीयते अनेनेति अनुमानम्, करणसाधनेन मानशब्देन सारूप्यलक्षणं प्रमाणमभिधीयते। लिङ्गग्रहणात् सम्बन्धस्मरणस्य पश्चान्मानमनुमानम्। गृहीते पक्षधर्मे स्मृते च साध्यसाधनसम्बन्धेऽनुमानं प्रवर्तत इति पश्चात्कालभाव्युच्यते। यथा अर्थाविनाभावित्वाद् अर्थं प्रापयत् प्रत्यक्षं प्रमाणं तथा अर्थाविनाभावादर्थं परिच्छिन्नं प्रापयद् अनुमानं प्रमाणम्। तच्च द्विधा स्वार्थं परार्थञ्चेति। येन स्वयं प्रतिपद्यते तत् स्वार्थम्। येन च परं प्रतिपादयति तत् परार्थम्।

स्वार्थानुमानम्

त्रिरूपाल्लिङ्गाद् यदनुमेयं ज्ञानं तत् स्वार्थानुमानम्। लिङ्ग्यते गम्यते अनेनार्थ इति लिङ्गम्। अनुमेयोऽत्र जिज्ञासितविशेषो धर्मी। जिज्ञासितो ज्ञातुमिष्टो विशेषो धर्मो यस्य धर्मिणः स जिज्ञासितविशेषो धर्मी पक्षः। साध्यधर्मसामान्येन समानोऽर्थः सपक्षः। न सपक्षः असपक्षो विपक्ष इति। एवञ्च अनुमेयपक्षसत्त्वं सपक्षसत्त्वं विपक्षासत्त्वमित्येतत् त्रिरूपं लिङ्गस्य बोध्यम्। तदेव लिङ्गं यत् पक्षे सत् सपक्षे सद् विपक्षे असन्निश्चितम्।

तस्य त्रिरूपस्य लिङ्गस्य त्रयः प्रकाराः—अनुपलब्धिः, स्वभावः, कार्यञ्चेति। उपलब्धिर्ज्ञानम्। न उपलब्धिरनुपलब्धिः। प्रतिषेधस्य साध्यस्यानुपलब्धिरुक्तरूपेण त्रिधा। विधेयस्य साध्यस्य स्वभावोऽपि पक्षसत्त्वादिना त्रिरूपः। एवं कार्यमपि त्रिरूपम्। अनुपलब्धिरर्थाभावावेदिका। स्वभावकार्ये तु भावबोधके इति विज्ञेयम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुपलब्धेरुदाहरणं यथा—अत्र प्रदेशविशेषे घटो नोपलभ्यते, उपलब्धिलक्षण-प्राप्तस्यानुपलब्धेः। अत्र क्वचित् प्रदेशविशेषो धर्मी, घटाभावः साध्यः, उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरिति हेतुः। उपलब्धिर्ज्ञानं तस्या लक्षणं जनिका सामग्री तया हि अनुपलब्धिर्लक्ष्यते। उपलब्धिलक्षणप्राप्तिरुपलम्भप्रत्ययान्तरसाकल्यं स्वभावविशेषश्च। उपलम्भप्रत्ययाश्चत्वारोऽधिपतिसहकारिसमनन्तरालम्बनरूपाः। तेषु आलम्बनप्रत्ययं परित्यज्य प्रत्ययान्तराणां समवधानम् उपलब्धिलक्षणप्राप्तिः। अथवा स्वभावविशेष एव सा। स च स्वभावः सत्सु अन्येषु समनन्तरादिप्रत्ययेषु यत्प्रत्यक्ष एव भवति, स स्वभावः। एवञ्चानुपलब्धिरभावावेदिका।

द्वितीयो लिङ्गभेदः स्वभावः, स च स्वसत्तामात्रभाविनि साध्यधर्मे हेतुः। यथा वृक्षोऽयं शिंशपात्वात्। तत्र स्वस्यात्मनो हेतोः सत्तामपेक्ष्यैव विद्यमानो भवति, न तु हेतुसत्ताया व्यतिरिक्तं कञ्चिद् हेतुमपेक्षते। स स्वसत्तामात्रभावी साध्यः। तस्मिन् साध्ये यो हेतुः, स स्वभावः। यथात्र दृष्टान्ते वृक्षत्वं शिंशपातिरिक्तं न किञ्चिद् उच्चत्वादिकमपेक्षते। अयं हेतुः स्वभावः तादात्म्यप्रयोज्यः।

तृतीयो लिङ्गभेदः कार्यमिति। यथा—अग्निरत्र धूमात्। धूमः कार्यं वह्नेरिति लोकदृष्टम्। न हि धूमोऽग्निं विहायोत्पद्यते, तेन लिङ्गेन वह्निसिद्धिः साध्यस्य साधनेन सह अव्यभिचरितसम्बन्धोऽविनाभावो वा तादात्म्यात् स्वभावात्, साध्यादुत्पत्तेश्च सिध्यति। साध्यसाधनयोर्गम्यगमकभावतादात्म्योत्पत्त्यधीन इति भावः। अत एवोक्तम्—

कार्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनान्न च दर्शनात्।।

एवञ्च पक्षसपक्षदर्शनाद् विपक्षादर्शनाद् अन्वयव्यतिरेकाभ्यां साध्यसाधनयोरविनाभावस्य निश्चयो जायते। अविनाभावस्य सम्बन्धस्य प्रयोजकौ तदुत्पत्तिस्तदात्मत्वं द्वावेव स्थितौ।

परार्थानुमानम्

त्रिरूपलिङ्गाख्यानं परार्थानुमानम्। पक्षसत्त्वादि त्रिरूपं लिङ्गस्योक्तम्, त्रिरूपस्य लिङ्गस्य आख्यानं कथनं वचनं वा परार्थानुमानम्। त्रिरूपलिङ्गाख्यानात् त्रिरूपलिङ्गस्मृतिरुत्पद्यते, स्मृतेश्चानुमानं भवति। तस्यानुमानस्य यद्यपि साक्षात् त्रिरूपं लिङ्गमेव कारणम्, तथापि परम्परया तदाख्याने कारणत्वोपचारो भवति। अत एव त्रिरूपलिङ्गाख्यानं परार्थानुमानमिति न्यायबिन्दौ व्युत्पादितम्।

अनुमानस्य निमित्तं त्रिरूपं लिङ्गम्। तच्च स्वयं प्रतीतं परेण वा प्रतिपादितं सद् अनुमानस्य निमित्तं भवतीति अनुमानद्वैविध्यं जातम्। तच्च परार्थानुमानं द्विविधं प्रयोगभेदाद् भवति। प्रयोगस्य अभिधानशब्दस्य भेदादेव द्वैविध्यं न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनरर्थतो भेदः। तच्च द्वैविध्यं साधर्म्यवद् वैधर्म्यवच्चेति। सधर्मस्य भावः साधर्म्यम्। विधर्मस्य भावो वैधर्म्यम्। दृष्टान्तधर्मिणा साध्यधर्मिणः सादृश्यं हेतुकृतं साधर्म्यमुच्यते। असादृश्यं च हेतुकृतं वैधर्म्यमुच्यते। साधर्म्ये यथा यत् कृतकं तदनित्यं यथा घटः, तथा च कृतकः शब्दः। वैधर्म्ये यथा—यन्नित्यं तत्कृतकं दृष्टं यथा आकाशम्, शब्दस्तु कृतक इति। कृतकत्वाकृतकत्वकृतं शब्दाकाशयोः साध्यदृष्टान्तधर्मिणोरसादृश्यमिहाभिधेयम्। पूर्वस्मिन् प्रयोगे कृतकत्वकृतं साध्यदृष्टान्तधर्मिणोः सादृश्यमभिधेयम्।

अत्रापि त्रिरूपस्य लिङ्गस्य त्रयः प्रकाराः—अनुपलब्धिः, स्वभावः, कार्यञ्चेति। यथोदाहरणानि—

साधर्म्यवत्परार्थानुमानस्य अनुपलब्धिभेदस्योदाहरणम्—यदुपलब्धिलक्षणं प्राप्तं सन्नोपलभ्यते सोऽसद्व्यवहारविषयः सिद्धः। यथान्यः कश्चिद्दृष्टः शशविषाणादिः, साध्यधर्मिणोऽन्यो दृष्टान्त इत्यर्थः। अयं भावः—उपलब्धिलक्षणं प्राप्तोऽपि यो न दृश्यते, सोऽसद्व्यवहारविषयः सिद्धः। यथान्यः कश्चिद् दृष्टः शशविषाणादिः। दृश्यानुपलम्भात् साधर्म्यात् क्वचित् प्रदेशविशेषे तथा उपलब्धि-लक्षणप्राप्तोऽपि घटो नोपलभ्यते। दृश्यमनुपलब्धमसद्व्यवहारयोग्यमेव।

स्वभावहेतोः साधर्म्यवतः प्रयोगो यथा—यत्सत् तत् सर्वमनित्यं यथा घटादिः। सत्त्वेन स्वभावेन हेतुना पक्षदृष्टान्तयोः साधर्म्यमत्र।

कार्यहेतोः साधर्म्यवतः प्रयोगो यथा—यत्र धूमस्तत्राग्निः, यथा महानसादौ, अस्ति चेह धूम इहापि सिद्ध एवाग्निरिति।

त्रिरूपलिङ्गप्रकारत्रयस्य वैधर्म्यवतः प्रयोगाः—

अनुपलब्धिहेतोर्वैधर्म्यवतः प्रयोगो यथा—यत् सद् उपलब्धिलक्षणं प्राप्तं तदुपलभ्यत एव यथा नीलादिविशेषः। न चैवमिहोपलब्धिलक्षणप्राप्तस्य सतो घटस्योपलब्धिः। अत्र सत्त्वासत्त्वेन नीलघटयोर्वैधर्म्यम्। दृष्टान्ते सत्त्वेनोपलब्धिः साध्यते पक्षे च घटे उपलब्ध्यभावेनासत्त्वं साध्यते।

स्वभावहेतोर्वैधर्म्यवतः प्रयोगो यथा—असत्यनित्यत्वे नास्ति सत्त्वमुत्पत्तिमत्वं वा कृतकत्वं वा, स च शब्द उत्पत्तिमान् कृतको वा। अत्र हेत्वभावेन साध्याभावो व्याप्त उक्तः। साध्यस्यानित्यत्वरूपस्याभावः सत्त्वादिहेतोरभावेन व्याप्तः। पक्षे च शब्दे सत्त्वादिसद्भावादनित्यत्वं साध्यते।

कार्यहेतोर्वैधर्म्यवतः प्रयोगो यथा—असत्यग्नौ न भवत्येव धूमः, अत्र चास्ति। अत्रापि वह्न्यभावो धूमाभावेन व्याप्तः। एवं संक्षेपेण स्वार्थपरार्थानुमानमत्र प्रदर्शितम्, विस्तरेण न्यायबिन्दौ प्रतिपादितम्, तत्रैव विस्तरार्थिना द्रष्टव्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीनीलकण्ठदीक्षितस्य शिवलीलार्णवः

डॉ. ददन-उपाध्यायः
सहायकसम्पादकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

इह खलु महतः हर्षप्रकर्षस्य विषयोऽयं यद् प्रज्ञाधनैः प्रतिभाभासुरहृदयैः महाकविभिः श्रीनीलकण्ठदीक्षितैः प्रणीतं शिवलीलार्णवनाम महाकाव्यं श्रीपरब्रह्मपरमेश्वरशिवस्वरूपस्य सुन्दरेश्वरस्य श्रवणमनननिदिध्यासनाख्यसंस्तव-स्वरूपं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य प्रकाशनसंस्थानेन प्रकाशतामानीतम्। तस्य शिवलीलार्णवस्यात्र परिचयात्मको विमर्शः प्रस्तूयते।

शिवलीलार्णवमहाकाव्यस्य रचयिता भरद्वाजगोत्रीयः श्रीनीलकण्ठदीक्षितोऽस्ति। महाकाव्यमिदं द्वाविंशतिसर्गात्मकम्। महाकाव्यस्यास्य वर्ण्यविषयो मदुरैस्थितस्य हालास्यनाथस्याख्यानं विद्यते। यथा तेनैवोक्तम्—

लीलां चतुष्षष्टिमिमां प्रणीतां हालास्यनेतुस्तरुणेन्दुमौलेः।
श्रीनीलकण्ठे मयि कर्णजाहमानीय मीनाक्षि! चिरं दयेथाः ।।

(शिवली. २२.९६)

नीलकण्ठदीक्षितस्य व्यक्तित्वम्

श्रीनारायणदीक्षितस्यात्मजः श्रीनीलकण्ठदीक्षितः सप्तदशशताब्द्यां स्वजनुषा भारतभुवमलञ्चकार। अस्य मातुर्नाम भूमिदेवी आसीत्। अयं भारद्वाजगोत्रीयः कर्मनिष्ठः श्रोत्रियो याज्ञिको ब्राह्मणश्चासीत्। महानुभावोऽयं स्वकीयब्राह्मणत्वोपरि गर्वमनुभवति स्म। अस्य गुरुः श्रीवेङ्कटेश्वरः 'अय्यादीक्षितः' इत्यपरनामासीत्। स्वकीयाद् भ्रातृव्यादप्पयदीक्षिताद् व्याकरणं धर्मशास्त्रञ्चाधीतवान्। स्वयं गङ्गावतरणस्य पुष्पिकायां स्वपरिचयमुपस्थापितवान्। यथा—श्रीमद्भरद्वाजकुल-जलधिकौस्तुभश्रीनीलकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्वाहकमहा-व्रतवाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्चादीक्षितपौत्रेण नारायणदीक्षितात्मजेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीनीलकण्ठदीक्षितेन ....। स्वकीये महाकाव्ये तस्याप्पयदीक्षितस्य नाम सबहुमानं स्मृतवान्। यथा—

कालेन शम्भुः किल तावतापि कलाश्चतुष्षष्टिमिताः प्रणिन्ये ।
द्वासप्ततिः प्राप्य समाः प्रबन्धाञ्छतं व्यधादप्पयदीक्षितेन्द्रः ।।

(शिवली. १.६)

मदुरैनगरस्य तिरुमलनायकादीनां राज्ञां सचिवपदे पञ्चत्रिंशद्वर्षं यावत् कार्यं कृतवान्। तत एकोनषष्ट्यधिकषोडशशततमे वर्षे सेवानिवृत्तः ताम्रपर्ण्यास्तटे पालामदुईग्रामे आश्रमं निर्माय जीवनयापनं कृतवान्। ग्रामोऽयं राज्ञः अग्रहाररूपेण प्राप्तः। अस्मिन् ग्रामे श्रीदीक्षितस्य समाधिस्थलमद्यापि विद्यमानं वर्तत इति श्रूयते। अयं परमशैवो याज्ञिक आसीत्। शैवागमसिद्धान्तप्रचारायैव काव्यमिदं प्रणीतम्।

तस्य कृतित्वम्

श्रीनीलकण्ठदीक्षितस्यानेके ग्रन्थाः समुपलभ्यन्ते। इमे अवलोकनीयाः सन्ति—

१. अघविवेकः	–	धर्मशास्त्रस्य
२. कैय्यटव्याख्या	–	व्याकरणस्य
३. शिवतत्त्वरहस्यम्	–	दर्शनस्य
४. शिवलीलार्णवः	–	द्वाविंशतिसर्गात्मकं महाकाव्यम्।
५. गङ्गावतरणम्	–	अष्टसर्गात्मकं महाकाव्यम्।
६. कलिविडम्बनम्	–	खण्डकाव्यम्
७. सभारञ्जनम्	–	,,
८. शान्तिविलासः	–	,,
९. अन्यायदेशशतकम्	–	,,
१०. वैराग्यशतकम्	–	,,
११. आनन्दसागरस्तवः	–	भक्तिकाव्यम्
१२. शिवोत्कर्षमञ्जरी	–	,,
१३. चण्डीरहस्यम्	–	,,
१४. रामायणसारसङ्ग्रहः	–	,,
१५. रघुवीरस्तवः	–	भक्तिकाव्यम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१६. नलचरितनाटकम् – दृश्यकाव्यम्
१७. नीलकण्ठविजयम् – चम्पूकाव्यम्
१८. मुकुन्दविलासः – (अप्रकाशितम्)

ग्रन्थसरणिमवलोक्य ज्ञायते यदयं श्रीनीलकण्ठदीक्षितः सर्वशास्त्रकोविदो लेखनकलानिपुणश्चासीत्। स्वकीयग्रन्थवैभवेन संस्कृतसाहित्यवाङ्मयस्य श्रीवृद्धिं कृतवान्।

शिवलीलार्णवः

श्रीनीलकण्ठदीक्षितप्रणीतः शिवलीलार्णवो द्वाविंशतिसर्गात्मकं महाकाव्यमस्ति। शिवा च शिवश्च शिवौ, लीलाश्च लीलाश्च लीलाः, शिवयोः लीला अर्णव इव, शिवलीला एवार्णवो वा तमधिकृत्य कृतो ग्रन्थः शिवलीलार्णवः। यद्यपि शिवलीलाः समुद्र इवावगाह्यमानाः सन्ति, तथाप्यत्र काव्ये चतुष्षष्टिलीलानां वर्णनं वर्तते। यथा स्वयं कविनैवोक्तम्—

लीलां चतुष्षष्टिमिमां प्रणीतां हालास्यनेतुस्तरुणेन्दुमौलेः ।
श्रीनीलकण्ठे मयि कर्णजाहमानीय मीनाक्षि! चिरं दयेथाः ।।

(शिवली. २२.९६)

काव्यस्यास्याख्यानं स्कान्दस्यागस्त्यसंहितायाः गृहीतम्, तदेव कविवर्णनानैपुण्येन काव्यरूपेण प्रस्तौति महाकविः। तत्र शिवतत्त्वविषये कश्चिद् विचारः प्रस्तूयते। शेतेऽस्मिन् सर्वमिति शिवः, व्युत्पत्त्याऽनया शीङ्शयने धातोः वन्प्रत्यये कृते निपातनाद् ह्रस्वे जाते शिवशब्दः निष्पद्यते। यस्मिन् समस्तः प्रपञ्चः शेते, अवस्थितो भवति। यत्र समस्तः प्रपञ्च उत्पद्यते, तिष्ठति, लीयते च तत्तत्त्वं शिव इति। अनेन शिवशब्दः सर्वजगदधिष्ठानस्य वाचकोऽस्ति। शिव एव जगतो निमित्तोपादानकारणम्। संसारस्य श्रेयसः सम्पादनात् शङ्करः कथ्यते। स्वयं भूतसिद्धनित्यानादिस्वरूपत्वात् शम्भुः, अविकारी-निश्चल-सर्वविक्रियाशून्यत्वात् स्थाणुः, समस्तस्य संसारस्य लयस्थानत्वात् शर्वः, मृडः, रुद्र इत्यभिधीयते। अयं महान् ईश्वरः, देवो वेति, महेश्वरः, महेशः महादेवो वास्ति। सम्पूर्णचराचरभूतस्य पतिः, पालकः, अधिष्ठाता, अतो भूतेशः, भूतपतिरयम्। समस्तानां पशूनां जीवानामधिपतिः आत्मा, तस्मात्पशुपतिः। अनेन प्रकारेण शिवस्यानन्तानि नामानि अनन्तान् गुणान् प्रकटयन्ति। तापत्रयविनाशकस्य त्रिशूलधारिणो भूतपतेर्भवानीपतेरष्टमूर्तेः शिवस्य महिमा अगमः, अगोचरः, अकथनीयश्च वर्तते। तस्य महिमानं गणयितुं वागधिष्ठातृदेवी शारदाऽपि नैव क्षमा। सुष्ठूक्तं पुष्पदन्ताचार्यैः शिवमहिम्नःस्तोत्रे—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ।। (शिवम., श्लोक ३२)

स एव शिवो देवानामप्यधीश्वरः, सर्वश्रेष्ठः सर्वपूज्यश्चास्ति। श्वेताश्वतरोपनिषदि प्रोक्तम्—

तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।
पतिं पतीनां परमं परस्ताद् विदाम देवं भुवनेशमीड्यम् ।।
(श्वेता. ६.७)

अथर्वशिरस्युपनिषद्यपि कथितम्—

'यत् सूक्ष्मं तद् वैद्युतं, यद् वैद्युतं तत्परं ब्रह्म, यत्परं ब्रह्म स एकः, य एकः स रुद्रः स ईशानः, य ईशानः स भगवान् महेश्वरः'।
(अथर्वशि. ३)

सर्वागमसारभूतमव्याजकारुण्यामृताब्धि शिवतत्त्वमेवैकमालम्बं त्रयाणां जगताम्। तदेवोक्तं शिवलीलार्णवे श्रीनीलकण्ठदीक्षितेन—

आलम्बमेकं जगतां त्रयाणामव्याजकारुण्यसुधानिधानम् ।
तं तादृशं त्वामपहाय शम्भो! किं तावदन्यैरिह किम्पचानैः ।।
(शिवली. २२.९२)

अतः शिवतत्त्वमेव श्रोतव्यं मन्तव्यं ध्यातव्यं द्रष्टव्यं वर्तते। यथोक्तं तत्रैव—

श्रोतव्यं निधिरस्ति कोऽपि निहितो हालास्य इत्यग्रतो
मन्तव्यं स निधिर्जगन्निधिरिति न्यायैरथोच्चावचैः।
ध्यातव्यं हृदि मूललिङ्गमथ च श्रीसुन्दरेशाभिधं
द्रष्टव्यं शफरेक्षणासहचरं तत्त्वं ततः शाङ्करम्।। (शिवली. २२.९५)

लीलातत्त्वम्

अथ लीलातत्त्वोपरि विदुषां दृष्टिराक्षिप्यते। 'लयनं लीः' इति व्युत्पत्त्या 'लीङ् श्लेषणे' (दि.आ.अ.) धातोः 'सम्पदादित्वात् क्विप्' (वा.३.३.१०८) इति क्विप्प्रत्यये कृते, लियं लातीति व्युत्पत्त्या 'ला आदाने' (अ.प.अ.) धातोः 'आतोऽनुपसर्गे कः' (पा. ३.२.३) इति कप्रत्यये कृते लीलाशब्दो निष्पद्यते, ''लेलायनं लीला' इति व्युत्पत्त्या 'लेला दीप्तौ' इति कण्ड्वादिधातोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'षिद्भिदादिभ्योऽङ्' (पा. ३.३.१०४) इति अङ्, 'अप्रत्ययात्' (पा. ३.३.१०२) इति 'अ'प्रत्यये वा कृते लीलाशब्दो निष्पद्यते, तस्माद् वाग्वेषचेष्टितैः श्लिष्टा प्रियस्यानुकृतिर्लीला कथ्यते। यथोक्तं हैमे—

लीला केलिविलासश्च शृङ्गारभावजा क्रिया। (हैम. २.५२०)

अमरकोशेऽपि शृङ्गारभावजा क्रिया लीला कथिता, यथा तत्रोक्तम्—

हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः। (अमर.१.७.३२)

नाटकरत्नकोशेऽप्युक्तम्—

लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम् ।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ।
विहृतं चेति मन्तव्या दश स्त्रीणां स्वभावजाः ।।

साहित्यदर्पणेऽपि लीलाशब्दस्य व्याख्यानं कृतं श्रीविश्वनाथमहापात्रैः। तद्यथा—

अङ्गैर्वेषैरलङ्कारैः प्रेमभिर्वचनैरपि ।
प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ।। (सा.द. ३.१४०)

विश्वकोशेऽपि लीलाशब्द व्याख्यातः। यथा—

लीलां विदुः केलिविलासखेलाशृङ्गारभावप्रभवक्रियासु। इति।
(विश्व. १५२.४५)

सा लीला प्रकटाप्रकटभेदेन द्विधा भवति। यथोक्तं पद्मपुराणे—

प्रकटाप्रकटा चेति लीला सेयं द्विधोच्यते।

पुराणेषु भगवतः शिवस्यासंख्या लीला वर्णिताः। तस्य लीलाः समुद्र इव मानवैरनवगाह्या विद्यन्ते। मानवाः स्वविवेकबुद्ध्या शिवस्य लीलां वर्णयन्ति। श्रीनीलकण्ठदीक्षितोऽपि शिवस्य लीलामसंख्येयामनवगाह्यां च सिन्धुमिव मत्वा चतुष्षष्टिलीलानां वर्णनं कृतवान् काव्येऽस्मिन्। यथा तैरेवोक्तम्—

लीलास्वनन्तास्वपि यस्य दृष्टा लीला चतुष्षष्टिरियं पुराणे। (शि., २२.९१)

परब्रह्मणः परमेश्वरस्य शिवस्य चतुष्षष्टिलीलानां वर्णनं कृतं महाकविना दीक्षितेन। पुनश्च तासामुद्देशकथनपूर्वकमन्तिमे द्वाविंशे सर्गे देवैः कृते सुन्दरेश्वरस्य स्तुतौ वर्णनमस्ति। येन चतुष्षष्टिलीलानां परिज्ञानं सङ्क्षेपण भवितुमर्हति। ते च श्लोकाः तत्रैव काव्ये (२२/६१-९६) अवलोकनीयाः शिवस्वरूपस्य सुन्दरेश्वरस्य माहात्म्यं वर्णयता महाकविना तत्रैवोक्तम्। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोगाङ्गपूजावसरे पुरारेः समागतास्तत्र सुराः समस्ताः।
आलोक्य लीलायितमद्भुतं तद् भक्त्या नतास्तुष्टुवुरिन्दुचूडम् ।।
क्व ते दया वाङ्मनसातिभूमिः क्व दुर्लभो वा त्वदवाप्त्युपायः।
अहो जितं सुन्दरनाथ! मर्त्यैरहो जितं तत्र च दीनदीनैः।।
गुप्तं वृथा कोटिभिरागमानां गुप्तं वृथाहो गुरुभिः पुराणैः।
कोणे यदत्र त्वमिहानुकम्पाकोशालयद्वारमपावृणोषि ।।
अस्माभिरज्ञानपि तारयद्भिः कियान् प्रकर्षो विबुधेषु कार्यः।
इति त्वया चिन्तयता किमीश! प्रतारिता स्मस्त्रिदिवार्पणेन ।।
पाण्ड्यप्रियं त्वां विदती शिवापि पाण्ड्यात्मजासीद्यदि का कथा नः।
पाण्ड्येषु जायेमहि खञ्जरीटाः कोयष्टयः कोलकिशोरका वा ।।
लीलासु ते लब्धसरूपभावा ग्राम्या इमे पाण्डुषु चन्द्रमौले!।
जिघ्रन्ति केचिद् विलिखन्ति केचिच्चर्वन्ति केचिदवतंसमिन्दुम् ।।
त्वं तावदत्यन्तमृदुः प्रजासु त्वत्तोऽपि मृद्वी गृहिणी तवेयम् ।
अद्यायतौ वा चरतोः किलैवमात्मैकशेषो भविता ध्रुवं वाम् ।।
कैवल्यदानाय कृतप्रतिज्ञौ काशीपतिः पाण्ड्यपतिर्युवां द्वौ ।
शिष्यैकविश्रान्तममुष्य दानं सार्वत्रिकं तारकमेव शम्भो! ।।
विश्वस्य दीर्घां श्रवणादिभङ्गीं वीतोद्यमाः स्मश्चिरमीश! मोक्षे ।
सम्प्रत्यवाबुद्ध्यत वाक्यशेषपञ्चाक्षरीयं मधुरा विनेति ।।
ये ये जना यद्यदिहार्थयन्ते तत्तन्निरस्तोपधि तेषु तेषु ।
ओमित्यलोभादनुजानतः किमोमित्यभिख्यैव तवेयमासीत् ।।
अन्वेषणीयं किमनाहते ते तत्त्वं हताः स्मो वयमागमौघैः।
विस्पष्टमत्राहत एव तत्त्वं वेत्रेण पाण्ड्यस्य यदीक्षितं तत् ।।
स्वरूपमेतत् तव सुन्दरेश! शुद्धा दयेत्येव तु लक्षयामः।
कदम्बमूलन्तु तटस्थलक्ष्म कारुण्यसिन्धो! तव तर्कयामः।।

(शिवली. २२.४९-६०)

अन्ते महाकविः श्रीनीलकण्ठदीक्षितोऽद्भुतं शिवलीलार्णवकाव्यं शिवयोः चरणकमलेष्वर्पयति। प्रकारेणानेन शिवलीलार्णवः सम्पूर्णतां याति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यसमीक्षा

श्रीमद्भरद्वाजकुलावतंसेन श्रीमदाच्चादीक्षितपौत्रेण नारायणदीक्षितात्मजेन श्रीनीलकण्ठदीक्षितेन विरचितेऽस्मिन् शिवलीलार्णवे महाकाव्ये द्वाविंशतिः सर्गाः शिवभक्तितत्पराणां मीनाक्षीसहितसुन्दरेश्वरसमुपासकानां पाण्ड्यवंशोद्भवानां विंशत्यधिकानां भूपानां वर्णनं विद्यते। अत्र शान्तरसः प्रधानरूपेण वर्णितः, अन्येषामपि सर्वेषां रसानां वर्णनमुपलभ्यते। स्कान्दस्यागस्त्यसंहितातो वृत्तमुद्भावितम्। आदौ वस्तुनिर्देशात्मकं मङ्गलमाचरितम्। यथा—

पूतं स्वतः पूततरं यद् गाङ्गं पयः शङ्करमौलिसङ्गात् ।
तत्पातु मातुः प्रणयापराधपादाहतैः पूततमं ततो नः ।।

(शिवली० १.१)

खलनिन्दाप्रसङ्गे कविः कथयति यद् ब्रह्मा सृष्टिकाले दुर्बुद्धीनां खलानां वक्त्रं लशुनैर्निम्बसारैश्च पूरितवान्, तेनैव तेषां मुखे पूतिगन्धः तिक्तभावश्च विद्यते। यथा—

आपूर्य वक्त्रं लशुनैर्विधाता किं निम्बसारैः कुधियामसिञ्चत् ।
न चेत् कथं वाचि ततः क्षरन्त्यां स पूतिगन्धः स च तिक्तभावः ।।

(शिवली० १.४३)

एकवृत्तमयैः पद्यैर्नातिस्वल्पा नातिदीर्घा द्वाविंशतिः सर्गाः काव्येऽत्र वर्तन्ते। विंशैकविंशौ सर्गौ नानावृत्तमयौ रचितौ। अस्य काव्यस्य वृत्तनिर्धारणमस्मत्कृते परिशिष्टेऽवलोकनीयम्। काव्येऽस्मिन् अष्टाविंशतिच्छन्दसां प्रयोगो विहितः। तत्र द्रुतविलम्बितस्य छटामवलोकयन्तु सुधयः—

यदि मरुद् विजितं विजितं मनो यदि मनो विजितं विजितं जगत् ।
जितवतां मरुतं च तदर्वतां किमभिधेयमतस्त्रिजगज्जये ।।

(शिवली० २१.४१)

महाकविना युग्मक-कलापक-कुलक-चक्कलकानां पद्यानां प्रयोगो विहितः। कुलकस्य प्रयोगमवलोकयन्तु विज्ञाः। 'पञ्चभिः कुलकं मतम्' इत्यनया रीत्या कुलकस्य प्रयोगः। यथा—

चूडासङ्घटितसुवर्णपद्मदामव्यामिश्रग्रथितविलम्बिमौक्तिकौघा ।
प्रालम्बालकनिकरान्तराललक्ष्यव्यावल्गच्छफरविलोललोचनश्रीः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्णाभ्यां मदनकराङ्गुलीयकाभं ताटङ्कं मणिखचितं विभूषयन्ती ।
अव्याजस्मितभणितान्तरालदृश्यप्रत्यग्रप्रसृमरदन्तकुन्तपङ्क्तिः ।।
वक्त्रेन्दुव्यतिषजदेणभीतिहेतोर्वैयाघ्रं नखमधिकन्धरं दधाना ।
त्रातुं त्रीनिव तनयान् विधीशविष्णुंस्त्रीन् वक्षोरुध्वलयान् समुद्वहन्ती ।।
अभ्यग्रोन्मिषदमरद्रुपल्लवाभे कुर्वाणा कुवलयकन्दुकं कराग्रे ।
सौवर्णाम्बरविलसन्नितम्बबिम्बव्यालम्बिस्फुटमणिमेखलाकलापा ।।
अम्बाम्बेत्यमृतरसं गिरा किरन्ती मञ्जीरक्वणितमनोहरं चरन्ती ।
सा बाला स्वयमभजन्नृपालपत्न्याः पर्यङ्कं श्रुतिशिखरैः कृताभ्यसूयम् ।।

(शिवली० ६. ७२-७६)

सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासरप्रातर्मध्याह्नमृगयाशैलर्तुवननदीसागरादीनां च वर्णनं यत्र तत्र काव्येऽत्र समुपलभ्यते। नदीवर्णनप्रसङ्गे ताम्रपर्णीं नदीं वर्णयता महाकविना प्रोक्तं यत् ताम्रपर्णीं विहाय शङ्करस्य गङ्गां प्रति प्रीतिः कैतके सत्यपि अर्के प्रीतिरिव वर्तते। यथा—

यां सर्वरत्नैकखनिं विहाय गङ्गामधात् केन गुणेन शम्भुः ।
का प्रीतिरर्के सति कैतकेऽपि न हीश्वरा पर्यनुयोज्यशीलाः ।।

(शिवली० २.२३)

वसन्तर्तुं वर्णयन् कविः कथयति—

अध्वर्युं मलयसमीरमन्यपुष्टं होतारं वनभुवि सामगं द्विरोकम् ।
ब्रह्माणं मधुमपि सादरं वृणाना आजह्रुर्मदनमष्टाध्वरं युवानः ।।

(शिवली० ६.१६)

नगरवर्णनक्रमे कविश्चतुर्थे सर्गे मधुरां पुरीमवर्णयत्।

तत्र तस्या मधुराया नगर्य्या नामसार्थक्यं वर्णयति। यथा—

दिव्यैः सुधामयैर्मेघैर्देवो जीमूतवाहनः ।
नगरं सेचयामास नवीनं त्रीण्यहानि सः ।।
मधुरोदकसंसिक्ता मधुरेयं महापुरी ।
इत्यश्रूयत तत्रत्यैर्दिव्या वागशरीरिणी ।। (शिवली० १०५-१०६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नवनवानां शब्दानां प्रयोगे तु महाकविः श्रीनीलकण्ठो माघमपि अतिशेते। प्रतीयते शब्दपुनरुक्तिस्तु नगण्या वर्तते। अतः मम मनसि भासते, यत्—

नवसर्गे गते माघे रिक्ता तस्य सरस्वती ।
नवसर्गप्रयोगेऽपि जितानेन सरस्वती ।।

एकस्य शब्दस्य बहुष्वर्थेषु चैकत्र प्रयोगो दृश्यतेऽस्मिन् काव्ये। पुष्करशब्दस्य चतुर्ष्वर्थेषु प्रयोगोऽवलोकयन्तु सहृदयाः—

पुष्करैरभिषिच्येशौ पुष्करोपहृतैरयम् ।
पुष्करैरेव चानर्च पुष्करं गाहितुं पुनः ।। (शिवली० ४.३५)

अत्र चतुर्णां पुष्करपदानां जलशुण्डादण्डपद्मव्योमानीति क्रमेणार्थाः सन्ति। जितशब्दस्य प्रयोगच्छटा सहृदयमनांसि जयति। अवलोकयन्तु तावत्—

जिता त्वया यत् पृथिवी न तज्जितं जिताश्च यद्देवि! सुरा न तज्जितम् ।
अनेन यूना यदनन्यनिर्जितं जितं वधूजन्म तदूर्जितं जितम् ।।

(शिवली० ११.४७)

अलङ्काराणां प्रयोगे कविः सर्वत्र दत्तावधानो दृश्यते। अस्मिन् काव्ये उपमारूपकोत्प्रेक्षाविरोधाभासव्यतिरेकदीपकादीनामलङ्काराणां रामणीयकं द्रष्टुं शक्यते।

तत्रोपमां पश्यन्तु—

क्षुद्रद्वीपमिव चण्डमारुता शुष्कगुल्ममिव दानपावकः ।
ध्वान्तवृन्दमिव भास्करोदयस्तद्बलं नरबलं व्यनीनशत् ।।

(शिवली० १०.८१)

उत्प्रेक्षाया छटापि प्रेक्षणीया वर्तते। तत्र हरो विवाहसमये काञ्चनमम्बरं धृतवान्। तस्य वर्णनमवलोकयन्तु—

दिगम्बरः काञ्चनमम्बरं हरो बभारेति न विस्मयाय नः ।
तनुत्विषा तस्य दिशो दशापि यत् प्रतप्तकार्तस्वरभास्वरीकृता ।।

(शिवली० ११.२८)

शङ्कराय जनानां कस्तूरिकाकर्पूरार्पणं प्रति कवेरुत्प्रेक्षावलोकनीयास्ति। यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृष्णार्जुनाभ्यां परिपूज्य लिङ्गमासादिता सिद्धय इत्यवेत्य ।
कस्तूरिकाभिर्घनसारकैश्च लिम्पन्ति लोका खलु लिङ्गमेतत् ।।

(शिवली० २.५४)

महाकविरयं कस्यापि वस्तुन आलङ्कारिकं चित्रणं कर्तुं सिद्धहस्तः प्रतिभाति। नारीनिर्माणविषये विचारोऽवलोकनीयः, तद्यथा—

दुर्दान्तं मदनमवेक्ष्य निर्ममे किं वर्मैकं युवसु वधूमयं विधाता ।
यद्योगे मदनशराः प्रसूनमात्रं यत्त्यागे कुलिशदशाममी वहन्ति ।।

(शिवली० ६.२८)

राज्ञः प्रतापस्य कीर्तेर्मनोहरं वर्णनमवलोकयन्तु—

भेरीरवश्चलति योजनमेव यावत् तावत् ततो दशगुणं चलितः प्रतापः ।
कीर्तिस्ततो दशगुणं व्यचलत् ततोऽपि चेलुस्ततो दशगुणं विमता विदूरे ।।

(शिवली० ९.१५)

कान्तासम्मितोपदेशाय काव्यं भवति; परन्तु कुलशेखरेण नृपेण पुत्रस्य मलयध्वजस्य शिक्षणमाध्यमेन लोकान् उपदिशति कविः। तद्यथा—

धृतां चिराय त्रिजगद्धुरन्धरे धुरं धरायास्तनयेऽवरोपयन् ।
स्वतः स्थितं धर्मपथेऽपि तं पुनः शशास धर्मं सुतवत्सलो नृपः ।।

(शिवली० ५.१२)

उपदेशोऽयं बाणस्य शुकनाशोपदेशं स्मारयति। एकस्मिन् स्थले कन्यामुपदिशति माता। यथा—

शुश्रूषष्व प्रेयसः पादपद्मं क्षान्त्या धृत्या प्रेमवत्या च भक्त्या ।
लब्ध्वा पुत्रं राज्यभारेऽभिषिच्य द्रष्टास्मि त्वां स्वं पदं प्रत्युपेताम् ।।

(शिवली. १३.४०)

अयं शकुन्तलां प्रति कण्वस्योपदेशमुखेन कालिदासमनुगमयति।

शैवदर्शनतत्त्वं महाकविः स्वप्रतिभाचातुर्येण काव्ये समुपस्थापयति। शिवभक्तिप्रवणत्वात् शान्तरसप्रधानमिदं काव्यम्; किन्तु रसानामन्येषामपि वर्णनमङ्गत्वेन कृतम्। युद्धवर्णनप्रसङ्गे वीररसस्यानुभूतिर्भवति। मध्ये मध्ये शृङ्गाररसस्य मार्दवमविस्मरणीयमस्ति। कुचद्वयस्य वर्णनप्रसङ्गे कविः कथयति। तद्यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परस्परस्पर्ध्यपि तत् कुचद्वयं विजेतुकामं किल मेरुमन्दरौ ।
तथा समेतं समये मिथः स्वयं यथोपलभ्येत न किञ्चिदन्तरम् ।।

(शिवली० ११.६६)

नायिकायाः सौन्दर्यवर्णनप्रसङ्गे कवेः काव्यपाटवतावलोकनीया वर्तते। यथा—

उपासितुं सा पतिमुत्पलप्रियं करे च कर्णे च निवेशितोत्पला ।
बभार भूयो नयनोत्पले ततः स्वयं बभूवोत्पलदामकोमला ।।

(शिवली० ११.६९)

वैदर्भीरीतिप्रधानमिदं काव्यं प्रसादगुणगुम्फितं विराजते। काव्ये शास्त्रान्तरस्य पुटपाकोऽपि सहृदयान् शास्त्रविचारणायामुन्मुखीकरोति। वेदान्तस्यैकेश्वरवादस्य सिद्धान्तं महता कौशलेनोपस्थापयति महाकविः श्रीदीक्षितः। यथा—

एकं किल ब्रह्म यदद्वितीयं वक्तुं चतस्रः श्रुतयोऽपि नालम् ।
तादृग्विधान्येव भजन्ति तस्य ब्रह्माणि पञ्चावयवत्वमुद्राम् ।।

(शिवली० २.४९)

पञ्चावयवत्वमुद्रा शङ्करस्य सद्योजातवामदेवतत्पुरुषाघोरेशानाख्य-मुखपञ्चकत्वं स्मारयति। षष्ठसर्गे ऋषीणां शास्त्रचर्चाप्रसङ्गे सर्वदर्शनानां मतमुपस्थापितम्। शिवागमप्रतिष्ठापनाचार्यो महाकविः श्रीनीलकण्ठदीक्षितः शिवैकनिष्ठतां प्रतिपादयति। यथा—

शिवं यजाग्नौ शिवमर्च भास्करे शिवं स्मरान्तः शिवमेव कीर्त्तय ।
शिवं द्विजेषु प्रतिपूजयानिशं शिवैकनिष्ठो भव तात! सर्वथा ।।
शिवात् परं नास्ति यथा तथैव नः शिवोऽपि नान्यो मधुरेश्वरादिति ।
सुनिश्चितालम्बितसुन्दरेश्वरः सुखं महीं पालय शाश्वतीः समाः ।।

(शिवली० ५.२८-२९)

काशीपतेर्विश्वेश्वरस्य तारकमन्त्रदानेन कैवल्यप्रदानस्य माहात्म्यं वर्णयति कविः। यथा—

कैवल्यदानाय कृतप्रतिज्ञौ काशीपतिः पाण्ड्यपतिर्युवां द्वौ ।
शिष्यैकविश्रान्तममुष्य दानं सार्वत्रिकं तारकमेव शम्भोः ।।

(शिवली० २२.५६)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवस्य समुत्कृष्टदयालुतां वर्णयन् तस्य 'ऊँ' इति नामसार्थक्यं प्रतिपादयति कविः। यथा—

ये ये जना यद्यदिहार्थयन्ते तत्तन्निरस्तोपधि तेषु तेषु ।
ओमित्यलोभादनुजानतः किमोमित्यभिख्यैव तवेयमासीत् ।।

(शिवली० २२.५८)

अनन्तलीलाकारिणः शिवस्य चतुष्षष्टिलीलानां वर्णनमत्र विहितम्। अन्तिमे द्वाविंशे सर्गे तासां गणनामपि कृता सुरस्तुतिव्याजेन।

संस्करणस्यास्य वैशिष्ट्यम्

यद्यपि ग्रन्थस्यास्य प्रकाशनमितः पूर्वमप्यभवत्; किन्तु मूलमात्रप्रकाशनेनास्य रहस्योद्घाटनं न भवति। पादटिप्पणीपरिशिष्टादिना विभूष्य विस्तृतया पुरोवाचा ग्रन्थस्यालोडनं कृतम्, तेन प्राप्तं रत्नमपि सहृदयानां समक्षमुपस्थापितमस्मिन् संस्करणे, तथापि पूर्वसंस्करणस्याधमर्ण्यं बिभ्रन् कृतज्ञतां व्याहरामि। ग्रन्थस्यान्ते प्रथमपरिशिष्टे सूक्तिरत्नानि समुद्धृतानि। द्वितीये परिशिष्टे काव्ये प्रयुक्तानि प्रमुखशब्दरत्नानि प्रस्तुतानि, यस्यावलोकनेन महाकवेर्नव-नवशब्दप्रयोगचातुरी प्रकटिता भवति। तृतीये परिशिष्टे वृत्तनिर्धारणं प्रस्तुतं, येन काव्यस्यास्य बहुवृत्तताया ज्ञानं भवति, अथ च छन्दोनिर्धारणप्रक्रियायाः प्रयोजनं लक्षणादिकज्ञानपुरस्सरं काव्यकर्त्तुः छन्दःप्रागल्भ्यं ज्ञातुं शक्यते चतुर्थे परिशिष्टे श्लोकानुक्रमणी चानुसन्धानकार्यसहायिका प्रस्तुता भविष्यतीति। पुरोवाग्भागे काव्यस्य कथासारः समीक्षा च यथामति प्रस्तूयते। तस्मात् पूर्वसंस्करणस्य विद्यमानत्वेऽपि संस्करणस्यास्य वैशिष्ट्यमक्षुण्णमिति विभावयामि। यथा कविना शब्दार्थप्रयोगे सुष्ठूक्तम्—

यानेव शब्दान् वयमालपामो यानेव चार्थान् वयमुल्लिखामः ।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति ।।

(शिवली० १.१३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघु-ग्रन्थमाला
[६०]

पराम्बास्तुतिशतकम्

प्रणेता सम्पादकश्च
श्रीविद्याधरदत्तपाण्डेयः
ऋषिमन्दिरम्, नई कालोनी
देवरिया

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः
वि.सं. २०५८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

सर्वचैतन्यरूपां वामाद्यां विद्याञ्च धीमहि ।
या नः बुद्धिं प्रचोदयात् ।। (देवीभागवते)

मङ्गलभूतायाः त्रिपदागायत्र्याः सृष्टेरादौ स्थितायाः सर्वचैतन्यरूपाया आद्याया विद्याया ज्ञानस्वरूपाया ध्यानं कुर्महे, या अस्माकं बुद्धिं प्रेरयति, श्रीदेवीभक्तिं प्रवर्तयतीति भावैर्देवीं स्तुवता मया, पुनः स्तवनरूपेणैव किञ्चिद्विनिवेदनीयं प्रस्तूयते—

यद्यपि चराचरात्मकजगत उत्पत्तिस्थितिसंहारकारणभूताया मनोवाञ्छितफल-कल्पलतारूपायाः स्वल्पोपलब्धपाद्यपुष्पाद्युपचारैः प्रसाद्यमानायाः सद्यः सर्वशक्ति-सम्पत्प्रदानशीलायाः पराम्बाया अर्चनवन्दनादीनामस्मिन् अखण्डे भारतवर्षे नैको ग्रामो नगरं महानगरं वनं पर्वतं वा विद्यते, यत्र मृण्मयी प्रस्तरमयी धातुमयी काष्ठमयी विशिष्टा विशिष्टाश्च वा प्रतिमा नास्ति, यत्र तत्रत्या जनाः सर्वसाधारणाः स्त्रियः सर्वे समानरूपेण पर्वणि पर्वणि उत्सवे अन्येष्वपि शुभावसरेषु सङ्घीभूय पृथक्-पृथक् च पूजनं न कुर्वते वरं च नाधिगच्छन्ति।

एतादृशे देवीपूजापरायणे देशे तत्राप्युत्तरप्रदेशीयसरयूपारीणब्राह्मणकुले तत्रापि येन तपसाराधनया च देवी प्रसादिता तस्य पराशरनामर्षेर्गोत्रे पवित्रे प्रसूतस्य मे हृदये देवीपराम्बाचरणारविन्दे भक्तिभावना न भवेदित्यत्र न हि किञ्चित्कारणं भवितुमर्हति, तथापि मम मित्रस्य चुनारे मिर्जापुरस्थस्य डॉ. रामप्यारेमिश्र-व्याकरणशास्त्राचार्यमहोदयस्य प्रश्नोत्तरव्याजेन स्वमनसि पराम्बा-भक्तिप्रादुर्भावस्य कानिचित् कारणान्युद्ध्रियन्ते प्रथमतस्तु कथनीयमेतद् यन्मदीयं कुलं जनपदेऽस्मिन् परम्परया प्रसिद्धेषु विद्वत्कुलेष्वन्यतमतया विख्यातं विशुद्धाचारव्यवहारशीलतया सर्वसाधारणजनानां च सम्मानभाजनमस्ति। मम पितृपितामहपितृव्यादीनां "**ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च**" इति महाभाष्योक्तिमनुसृत्य षडङ्गवेदानामध्ययनमध्यापनं व्यसनमासीत्। तैः स्वभवन एव स्थित्वा पाठशालारूपेण निःस्वार्थतया छात्रा अध्यापिता भवन्ति स्म। तत्रासन्नवर्तिनो दूरतश्चागत्य स्थित्वा चाधीयन्ते स्मान्तेवासिनः। छात्राणां भोजनावासप्रबन्धं च गुरव एव कुर्वन्ति स्म। तत्र नियमतो व्याकरण-काव्यकोश-ज्योतिष-वेद-पुराण-कर्मकाण्डादिग्रन्थानामध्यापनक्रमो निरन्तरं प्राचलत्। मम

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितामहस्य श्रीपण्डितमहावीरदत्तपाण्डेयस्य, तज्ज्येष्ठभ्रातुः श्रीकृष्णदत्तपाण्डेयस्य, मध्यमभ्रातुः श्रीविष्णुदत्तपाण्डेयस्य चोत्कृष्टवैदुष्यतया मम ग्रामस्थपाठशालाया यशः सुदूरं प्रसृतम्। फलतो विद्यार्थिनां संख्या वृद्धिमुपगता। तत्र क्वचिदध्यापनं प्रचलति स्म, क्वचित्पुराणेतिहासकथा, क्वचिच्च श्रावका आगत्य स्वजन्मपत्री-फलादेशं ग्रहशान्तेरुपायं च पृच्छन्ति स्म। तत्र गुरुजना ग्रहशान्त्यैऽभीष्टसिद्ध्यै च प्रतिपादयन्ति बहुश उपायाः, किन्तु समस्तवाञ्छासिद्धिप्रदा करुणावरुणालया पराम्बा श्रीदुर्गादेव्येवेति। सैव सरलतया प्रसीदति। तस्मात् सैवाराधनीयेति बहुधा श्रुतं मया स्वबाल्यावस्थायामिति पुनः पुनः श्रीदेवीमाहात्म्यश्रवणेन मम कोमलमानसपटले सर्वकामदुघा पराम्बैवाराधनीयेति श्रुत्वा भक्तिभावो दृढतयाङ्कितः श्रीजगदम्बायाश्चरणारविन्दे।

अपरञ्च ममाराध्यपितृचरणैः पण्डितप्रवरश्रीऋषिराजदत्तपाण्डेयमहोदयैर्मयि एकाकिनि तनयेऽधिकस्नेहतया ममाध्ययनाय जगज्जननी विन्ध्यवासिनी देवी बहुश आराधिता। तस्याः सन्निधौ सङ्कल्पश्च तेन कृतो यन्मदीयतनयो यदा व्याकरणाचार्यपरीक्षामुत्तरिष्यति तदा तव स्थाने श्रीमद्भागवतं महापुराणं श्रावयिष्यतीति। ममाचार्यपरीक्षोत्तीर्णतानन्तरं पूज्यपादतातप्रवरैः स्वसङ्कल्पवार्ता कथिता। तेषामेवादेशाच्छ्रीविन्ध्यवासिनीदेवीसन्निधावेकवारं श्रीमद्भागवतं तथा देवीभागवतं बहुवर्षाणि निरन्तरं तत्र श्रावितम्। एवं श्रीदेवीभक्तिं प्रति मनः-प्रवणताया निरन्तरता समागता।

एवमेव मम पूज्यपितामहभ्रातृपादैः प्रसिद्धैर्विद्वद्वरेण्यैः कृताः कारिताश्च सफलशक्त्यर्चाप्रयोगा मया स्वयं दृष्टास्तथा तैः कथ्यमाना आकर्णिताश्चेति।

पितृचरणारविन्दानां पितामहभ्रातृचरणारविन्दानामादेशात्स्वयमपि देव्याः कृतमाराधनम्। तत्फलान्यपि स्वजीवने सदैव लब्धानि। यथा शिक्षाकाले श्रेष्ठा गुरवः प्राप्ताः। तातपादानामर्थकार्श्येऽपि पठने कोऽप्यन्तरायो नागतः, चञ्चलमपि मे मनोऽध्ययने सरलतया प्रवर्तितम्। अप्रतिमप्रतिभानां श्रीयमुनाप्रसादपाण्डेय-वैयाकरणधुरीणश्रीनारायणदत्तत्रिपाठिसदृशसहृदयगुरूणां सकाशाद् वाराणस्यां नव्यव्याकरणन्यायकाव्यकोशादीनां शिक्षाधिगता। तत्रानेके सुहृद्वराः, मान्याः सन्तो महात्मानो सन्मार्गदर्शकाः संन्यासिनोऽपि मिलिताः। १९४७ ईसवीये वर्षे आचार्यपरीक्षोत्तीर्णतासमकालमेवाङ्ग्लमाध्यमिकविद्यालयेऽध्यापकत्वरूपा जीविकाऽपि प्राप्ता। ततः शनैः शनैः पितृचरणानामर्थचिन्तापि दूरिता। क्षेत्राणि क्रीतानि। तातपादानां सर्वेषु क्षेत्रेषु साहाय्यं कृतम्।१९५९ ईसवीयाब्दे तातपादेषु वाराणस्यां शिवसायुज्यमुपेतेषु तच्छत्रच्छायायामपगतायामकस्माच्छिरस्यापतितं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुर्भरमपि परिवारभारं गृहीतम्। पराम्बाराधनाबलेनैव परिवारः पालितः। पञ्च पुत्रास्तिस्रः कन्याश्चावाप्ताः, पञ्च पौत्रा अपि सम्प्रति सन्ति। आर्थिकस्थितेरुन्नयनकाले सम्मुखागताः प्रबला अपि रिपवो जगदम्बाप्रसादादेव पराजयं प्रापिताः। देवरियानगरे स्वनदवानाम्नि ग्रामे च भवनानि निर्मापितानि। प्रतिष्ठापि सर्वक्षेत्रेष्वर्जिता। जीवने अनेकेऽसाध्या रोगा अपि प्रकटितास्तेऽपि तत्कृपयैव नष्टाः। एवं पराम्बानुकम्पाया अगणितानि सुखान्यनुभूतानि। एते स्वकीया अनुभवा अपि देवीभक्तिदार्ढ्यवर्धने कारणीभूताः। यद्यपि दैवदुर्विपाकतया पुत्रद्वयमृत्युरूपासह्यक्लेशोऽप्यनुभूतो जीवने। तमपि पराम्बानुकम्पामेव मन्यमानोऽनायासेन सहे। एतस्याभिव्यक्तिः पराम्बास्तुति-शतके—

जननि तव विधानं नैव जानन्ति केचि-
दुपकृतिपरिपाटी योगिभिश्चाप्यगम्या।
समविषमविधौ ते भाति यन्नानुकूलं
यदपि च परिणामे सौख्यदं नूनमेव ।। इत्यादिश्लोकेषु कृता।

अन्यच्च, यदा स्वतः शास्त्राणामध्ययने तदर्थावगमे स्वकीये प्रवेशे जाते पुराणानि पठितानि श्रीदुर्गासप्तशतीप्रभृतयो ग्रन्थाश्चाधीतास्तदा तु सर्वत्रैवैतदेवोग्दीतं पठितं यद् देवी पराम्बैव चराचरात्मकजगत एव नहि अपि तु निखिलब्रह्माण्डानां जननी। लूतेव सैव निमित्तोपादानकारणभूता। सैवाखण्डब्रह्माण्डनायिका। सैव नित्या शाश्वती च सैवात्मानं विश्वरूपेण विवर्तयति। सैव सृष्टिपालनसंहारार्थं ब्रह्मविष्णुशङ्कररूपाणि प्रकटयति। सैव स्वयं महाकाली-महालक्ष्मी-महासरस्वती भूत्वा ब्रह्मविष्णुरुद्राणां शक्तिरूपा सती सृष्टिकार्याणि करोति पालयति संहरति च। साम्बैव पुत्रदारतनयादिभौतिकसुखदात्री, यथोक्तं श्रीदुर्गासप्तशतीस्तोत्रे—

स्तुता सम्पूजिता पुष्पैर्धूपदीपादिभिस्तथा ।
ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम् ।।

इति द्वादशाध्याये पठितम्। सैव मोक्षमपि ददाति, यथा—

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ।।

इति चतुर्थाध्याये द्रष्टव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सैव साम्राज्यं ज्ञानमपि ददाति। यथा राजा सुरथः मेधसो मुनेरुपदेशेन देवीमाराध्य परस्मिन् जन्मनि सावर्णिमन्वन्तराधिपतित्वं प्राप। समाधिनामा वैश्यश्च दुर्लभं ज्ञानमपि प्राप्तवान्।

सैव पराम्बा प्रचण्डानपि शत्रून् नाशयति। देवैराराधिता सा प्रकटिता भूत्वा महिषासुर-शुम्भ-निशुम्भसदृशान् दुर्धर्षान् राक्षसान् नाशितवतीति सर्वं सप्तशती-पाठादेवावगम्यते।

देव्यथर्वशीर्षे देवीसूक्ते तु देव्या स्वयं कथितं यदहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मकं जगत्। शून्यं चाशून्यं च। अहं विज्ञानाविज्ञाने अहमानन्दानन्दे। अहं ब्रह्माब्रह्मणी वेदितव्ये। अहं पञ्चभूतान्यपञ्चभूतानि। अहमखिलं जगद् इत्यादि (अथर्वशीर्षे)। एवं देवीसूक्तेऽपि—"अहं रुद्रेभिर्व-सुभिश्चरामि अहमादित्यैरुत विश्वेदेवैः.....परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूव" इत्यष्टाभिः सूक्तैस्तदेव स्पष्टं भवति यत्पराम्बैव सच्चिदानन्दब्रह्मरूपा। सैव कर्तुमकर्तुमन्यथाकर्तुं च समर्था। सा सर्वदेवजननी सुखाराध्या। सैव साधकानां कामार्थदायिनी अस्तीत्यादि पठितमेव।

पुराणेतिहासपठनेनैतद्विज्ञातं भवति यद्भगवतः सर्वेष्ववतारेषु देव्याराधना कृता सर्वैः। यथा रामावतारे श्रीरामचन्द्रं पतिं प्राप्तुं सखीभिः सह गत्वा पुष्पवाटिकायां श्रीसीतया श्रीगिरिजादेवी समाराधिता। अरण्ये श्रीजानक्या रावणेनापहृताया प्राप्तये ऋष्यमूकपर्वते स्थितेन श्रीरामचन्द्रेण नवरात्रविधिना व्रतानुष्ठानपूर्वकं देव्या आराधनं कृतम्। श्रीकृष्णावतारेऽपि भगवतैव कंसभयात्स्वरक्षार्थं नन्दव्रजे श्री-यशोदागर्भाद्देव्या जन्मनः, तस्या आनयनस्य, तत्र प्रापणस्य चोपदेशः कृतः। तथा कृते सति भगवतः श्रीकृष्णस्य कंसाद् रक्षणं जातम्। ततः स्यमन्तकमणिहरण-कलङ्कपङ्कमार्जनार्थं गतस्य परावर्तनावध्यतिक्रमणे जातेप्यनागतस्य श्रीकृष्णस्य पुनः प्राप्तये यदुवंशिनो जगदम्बाशरणमेव गत्वाऽऽराधनां कृतवन्तः। नन्दव्रजकुमारि-काभिः कृष्णं पतिं प्राप्तुं देव्याः सिकतामयीर्मूर्तीं रचयित्वा देवी आराधिता, तथा—

'कात्यायनि महामाये महायोगिन्यधीश्वरि।
नन्दगोपसुतं कृष्णं पतिं मे कुरु ते नमः'।।

इति मन्त्रं जपित्वा च देव्या वाञ्छितं वरं प्राप्तम्। इत्यादिसर्वं श्रीमद्भागवते पठितम्।

एवञ्च देशकालपरिस्थितेरनुकूलत्वात्, वंशपरम्पराप्राप्तत्वात्, पितापितामह-मुखात्कथाप्रसङ्गावसरे देव्याराधनमहिमश्रवणात्, तद्द्वारा कृतसिद्धप्रयोगदर्शनात्,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तातपादद्वारा ममाध्ययनार्थं कृतसङ्कल्पश्रवणात्, स्वजीवने स्वयमेव प्रतिपदं साफल्योपलब्ध्यनुभवात्, श्रीदुर्गासप्तशती-पुराणेतिहास-रामायणादिपठनाच्च श्रीपराम्बाभक्तौ मे परम्परातो बीजरूपेण स्थिता श्रद्धा क्रमशोऽङ्कुरिता पुष्पिता फलिता सम्प्रति च निश्चलतां गता विराजते। एवमनवरतमेधमानया सुस्थिरया देवीभक्त्या तत्प्रसादाय स्वगृह एव द्विवारं श्रीशतचण्डीपाठानुष्ठानमपि कारितम्। तदनुकम्पया तत्प्रेरणयैव शब्दार्थसुवर्णाक्षराणां वृत्तगुणैर्ग्रथितैका प्रस्तुतपराम्बास्तुतिशतकरूपा रम्या मालिका पराम्बाचरणारविन्दयोः समर्पिता चेति, यथा—

'मनसि संस्थितयैव शिवे त्वया रचयिता स्तुतिपद्यसुमालिका।
सविनयं चरणेषु समर्प्यते मुदितया कृपया परिगृह्यताम्'।। इति।

ततः पराम्बाप्रेरणयैव गतशारदनवरात्रानन्तरमेव पद्मभूषणप्रवरा वैदुष्य-यशश्चुम्बितदिक्चक्रवलया **डॉ. विद्यानिवासमिश्रमहोदया** एतत्प्रकाशनप्रबन्धार्थं निवेदिताः। तैश्च महानुभावैः स्वकीयस्वाभाविकौदार्यपारवश्यात्सहर्षं समस्तो भारः स्वीकृतः। माननीयैः पद्मभूषणविभूषितैः श्रीमिश्रमहोदयैः कृतं महत्तममुपकारभारं सहर्षं शिरसा वहामः, बहुशः कृतज्ञतां प्रकटयन्तस्तेषां चिरायुष्याय यशसे नैरुज्यादिसुखप्राप्तये च पराम्बाचरणारविन्देषु सविनयं प्रार्थयामहे।

एतस्य पुस्तकस्य पाण्डुलिपिसंशोधनार्थं मम मातुलेयेन **श्रीसुदामाप्रसाद-द्विवेदिना** परिश्रमः कृतस्तदर्थं तस्मै शुभाशिषो दीयन्ते।

अन्ते च पाठकाः सुधियो विद्वद्वरेण्याश्च सादरं निवेद्यन्ते यदेतस्मिन् लिखितनिवेदने स्वमनसि पराम्बाभक्तिप्रादुर्भावस्य यानि यानि कारणानि लिखितानि तान्यस्मिन् 'पराम्बास्तुतिशतके' यत्र यत्र श्लोकेषु निःस्यूतानि भवन्ति चाभिव्यक्तानि।

ममायं सुदृढो विश्वासो यद् एतत्पराम्बास्तुतिशतकपाठेन श्रीदेवीचरणा-रविन्दयोर्भक्तिरनुदिनं वृद्धिं गमिष्यतीति—

प्रीत्यै च ते पठतु यः स्तुतिपद्यमाला-
मेनां समर्पयतु चेच्चरणारविन्दे।
तस्मै प्रसीद जगदम्ब दयासुधाब्धे
दातुं सदैव च वरान् मनसोऽनुकूलान्।।

इति जगदम्बाचरणारविन्दे प्रार्थना कृता मयेति निवेदयति—

विद्याधरदत्तपाण्डेयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीविद्याधरदत्तपाण्डेयविरचितं

पराम्बास्तुतिशतकम्

पराम्बामेव तां ध्यात्वा सर्वकारणकारणाम् ।
स्तुतिं कर्तुं प्रवृत्तोऽस्मि तस्याः सद्यःप्रसादिनीम् ।।१।।

अन्वयः—(अहम्) सर्वकारणकारणां तां पराम्बाम् एव ध्यात्वा तस्याः सद्यःप्रसादिनीं स्तुतिं कर्तुं प्रवृत्तः अस्मि।

अर्थः—मैं समस्त कारणों की कारण उस पराम्बा का ही ध्यान कर उसे सद्यः प्रसन्न करने वाली स्तुति की रचना करने में प्रवृत्त हुआ हूँ।।१।।

स्फुरिततिग्मतडिद्द्युतिसुप्रभां प्रणततापहरां हरिवाहनाम् ।
विशिखशूलगदासिधनुर्धरां त्रिनयनां च भजे मनसाऽम्बिकाम् ।।२।।

अन्वयः—स्फुरिततिग्मतडिद्द्युतिसुप्रभाम्, प्रणततापहराम्, हरिवाहनाम्, विशिखशूलगदासिधनुर्धराम्, त्रिनयनां च अम्बिकां मनसा भजे।

अर्थः—चमकती हुई बिजली की तीव्र द्युति के सदृश जिसकी सुन्दर प्रभा है, शरणागत जनों के दैहिक, दैविक और भौतिक तापों का जो हरण करती है, सिंह जिसका वाहन है तथा जो बाण, शूल, गदा, खड्ग और धनुष धारण करती है, उस त्रिनयना श्री अम्बिका देवी का मैं मन से भजन करता हूँ।।२।।

त्रिभुवनं ललितं परिकल्प्य या विहरते च सुखेन समन्ततः ।
हरति चाशु विहृत्य यदृच्छया भवतु सा जयिनी जननी शिवा ।।३।।

अन्वयः—या ललितं त्रिभुवनं परिकल्प्य सुखेन विहरते, विहृत्य च यदृच्छया आशु हरति च सा जननी शिवा जयिनी भवतु।

अर्थः—जो अपने सङ्कल्प से सुन्दर तीनों (भूलोक, पाताल और स्वर्ग) लोकों की रचना कर उन पर सुख से क्रीडा करती है और विहार कर अपनी इच्छा से पुनः उन्हें समेट लेती है, उस अम्बा पार्वती की सदा जय हो।।३।।

तव कथं करवाणि विचिन्तनं जननि मानसमस्त्यतिचञ्चलम् ।
विषयसक्तमदो हि मनागपि न रमते चरणे रमणे तव ।।४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—हे जननि तव विचिन्तनं कथं करवाणि? हि मानसम् अतिचञ्चलम् अस्ति। विषयसक्तम् अदः रमणे तव चरणे मनाग् अपि न रमते।

अर्थः—हे माँ, तेरा चिन्तन मैं कैसे करुँ; क्योंकि मन अतिचञ्चल है। विषयों में आसक्त हुआ वह आपके रमणीय चरण में थोड़ा भी रमण नहीं करता है, अर्थात् आनन्द का अनुभव नहीं करता है।।४।।

भुवि न कोऽपि नरः करुणार्णवे तव कृपारहितो न हि मोहितः ।
इति विचिन्त्य च मां शरणागतं सपदि पालय लालयं चाम्बिके ।।५।।

अन्वयः—हे करुणार्णवे अम्बिके तव कृपारहितः कः अपि नरः भुवि न (अस्ति यः) मोहितः न हि (भवेत्) इति विचिन्त्य शरणागतं मां सपदि लालय पालय च।

अर्थः—हे दयासागर अम्बिके, तेरी कृपा से वञ्चित कोई भी मनुष्य इस धरती पर नहीं है, जो मोहग्रस्त न हुआ हो। ऐसा विचार कर मैं आपकी शरण में आया हुआ हूँ। शीघ्रतापूर्वक मेरा लालन-पालन करें।।५।।

तव कृपाऽकथनीयमहीयसी दृशि दिशाप्यतिविस्मयकारिणी ।
दुरितदानवदर्पनिपातिनी भव भवानि सदा वरदायिनी ।।६।।

अन्वयः—हे भवानि, तव कृपा अकथनीयमहीयसी (अस्ति) दृशि दिशा अपि अतिविस्मयकारिणी अस्ति। (त्वम्) दुरितदानवदर्पनिपातिनी (असि) मे च सदा वरदायिनी भव।

अर्थः—हे भवानी माँ, तेरी कृपा की महत्ता अवर्णनीय है। तेरी कृपादृष्टि की दिशा भी अत्यन्त आश्चर्यजनक है तथा आप पापरूपी दानवों के गर्व को नष्ट करने वाली हैं। सदा आप मेरे लिए वर देने वाली हों।।६।।

जगदशेषमनित्यमवस्तु यत् सदसदीश्वरि भाति च वस्तुतः ।
सुतकलत्रधनादिमनोरमं निखिलमम्ब च ते कृतिकौशलम् ।।७।।

अन्वयः—हे ईश्वरि, यत् सद् असद् अशेषं जगद् अनित्यम् अवस्तु च (अस्ति; किन्तु) सुतकलत्रधनादिमनोरमं (सत्) वस्तुतः च भाति। हे अम्ब, निखिलं ते कृतिकौशलम् अस्ति।

अर्थः—हे ईश्वरि, यह कार्य-कारणरूप समस्त जगत् जो अनित्य और अवास्तविक है; किन्तु पुत्र, पत्नी एवं धन आदि से मन को आनन्दित करता हुआ वास्तविक प्रतीत हो रहा है। वह सब आपकी रचना कला की ही कुशलता है।।७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चरितमम्ब न ते कियदद्भुतं विरचने भुवने तव का समा ।
विततनीलवितानमिवाम्बरं विरचितं च कया वद चान्यया ।।८।।

अन्वयः—हे अम्ब, तव चरितं कियद् अद्भुतं न (अस्ति) भुवने विरचने तव का समा? विततनीलवितानम् इव इदम् अम्बरं (त्वत्) अन्यया कया विरचितम् (इति) वद।

अर्थः—हे अम्ब, तेरे आश्चर्यजनक चरित में क्या विक्षणता नहीं है? सभी लोको में रचना करने में तुम्हारे समान कौन है, तू ही बता कि विस्तृत नील वितान सदृश इस आकाश की रचना आपके सिवा दूसरे किसके द्वारा की गयी है?।।८।।

तपति यज्जगती रविरुष्णगुर्नयति दूरमसौ च घनं तमः ।
चरति चाविरतं नभसीश्वरि त्वमसि तत्र च हेतुरहेतुकी ।।९।।

अन्वयः—असौ उष्णगुः रविः यत् जगती तपति घनं तमः च दूरं नयति नभसि अविरतं च चरति। हे ईश्वरि! तत्र च त्वम् एव अहेतुकी हेतुः असि।

अर्थः—उष्ण किरणों वाला वह सूर्य जो समस्त लोकों को तपाता है, गहन अन्धकार को दूर करता है तथा आकाश में निरन्तर चलता रहता है, उसमें भी तू ही निःस्वार्थ हेतु है।।९।।

तव च शक्तिलवेन गरीयसी वहति चाब्धिवनान्यगदिग्गजान् ।
मृदुलशस्यदला हरिताञ्चलाऽन्ववति साप्यवनी जननीनिभा ।।१०।।

अन्वयः—(हे जननि), गरीयसी सा अवनी तव शक्तिलवेन अब्धिवनानि अगदिग्गजान् च वहति। मृदुलशस्यदला हरिताञ्चला च (सती) जननीनिभा (सर्वान्) अन्ववति।

अर्थः—हे माँ, वह विशाल पृथिवी भी तेरी शक्ति के सूक्ष्मतम अंशमात्र से समुद्रों, अरण्यों, पर्वतों और दिग्गजों को भी अपने ऊपर वहन करती है। साथ ही कोमल मधुर फलों एवं पत्रों से युक्त तथा हरे-भरे अञ्चलों से विभूषित होती हुई सम्पूर्ण जगत् का पालन करती है।।१०।।

अरणितः कृश उद्गत एधितो वहति चैव हुतं स हुताशनः ।
भवति सर्वभुगप्यभिवन्दितः श्रुतिगते तव नाम्नि न किं भवेत् ।।११।।

अन्वयः—स हुताशनः अरणितः कृशः उद्गतः एधितः च हुतं वहति, सर्वभुग् अपि अभिवन्दितः भवति। तव नाम्नि श्रुतिगते किं न भवेत्?

अर्थः—हे अम्ब, वह अग्नि जो अरणि-मन्थन द्वारा अति अल्प मात्रा में प्रकट होकर बहुत ही दीप्त हो जाता है तथा हवन की गयी वस्तुओं को अभीष्ट

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवताओं के पास पहुँचाता है, साथ ही पवित्र तथा अपवित्र सभी वस्तुओं का भोजन करने पर भी सबके द्वारा अभिवन्दित होता है; क्योंकि तुम्हारे 'स्वाहा' नाम के कान में पड़ने पर क्या नहीं हो सकता? (तुम्हारे नामों के श्रवण की ही यह महत्ता है)।।११।।

त्वदधिगत्य च शब्दगुणं नभः स्तुतिमदो विदधाति च तेन ते।
पुनरवाप्य ततोऽन्यगुणं हि तद् विदितमस्त्यवकाशदतागुणि ।।१२।।

अन्वयः—(हे अम्ब) अदः नभः त्वत् शब्दगुणम् अधिगत्य तेन ते स्तुतिं विदधाति। ततः तद् (त्वत्) अन्यगुणं पुनरवाप्य अवकाशदतागुणि विदितम् अस्ति।

अर्थ—हे माँ, वह आकाश आपसे शब्दगुण पाकर उससे आपकी स्तुति करता है। इस कारण आपसे उसे दूसरा गुण भी प्राप्त हुआ, जिससे वह शब्द से अतिरिक्त समस्त जगत् को रहने के लिए अवकाश देना भी उसका दूसरा गुण प्रसिद्ध हो गया।।१२।।

क्रमश आविरभूत्तव वर्ष्मणः सलिलमम्ब सलीलमुदूर्मिभिः ।
सुरसरिद्वरवारिभिरर्चति चरणकञ्जमहो जडता कुतः ।।१३।।

अन्वयः—(हे) अम्ब, सलिलं तव वर्ष्मणः क्रमशः आविरभूत्, ततः उदूर्मिभिः सुरसरिद्वरवारिभिः (तव) चरणकञ्जम् अर्चति (तथापि) अहो! जडता कुतः?

अर्थः—हे अम्ब, यह जल आपके शरीर से क्रमशः (आकाश आदि क्रम से) प्रकट हुआ। तदनन्तर वह उत्ताल तरङ्गों वाले श्रेष्ठ गङ्गाजल से आपके चरणकमलों का अर्चन करता है, तथापि आश्चर्य है कि वह कैसे जड कहा जाता है।।१३।।

यदि न तेऽस्तु दया च समीरणे स्पृशतु रूपमृते नु कुतोऽन्वसौ।
व्यभिचरन्नपि हेतुपरम्परां गिरिनिपातनवेगबलः कथम् ।।१४।।

अन्वयः—(हे अम्ब) यदि समीरणे ते दया न अस्तु (तदा) असौ रूपम् ऋते कुतः स्पृशतु। (तथा च) हेतुपरम्परां व्यभिचरन् गीरिनिपातनवेगबलः कथं (भवेत्)।

अर्थः—हे माँ, यदि वायु पर आपकी अनुकम्पा न हो, तो रूपवान् न होने पर भी किसी भी वस्तु का स्पर्श कैसे करता? एवं हेतु के न रहने पर भी पर्वतों को भी धराशायी करने का अपार वेग और बल उसमें कैसे आ जाता?।।१४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जननि ते गुणवर्णनलालसा सुरुचिरैर्निजकाव्यनिबन्धनैः ।
मनसि मेऽतिचिराय विराजते सफलतां लभतां प्रतिभेश्वरि ।।१५।।

अन्वयः—हे प्रतिभेश्वरि जननि, सुरुचिरैः निजकाव्यनिबन्धनैः ते गुण-वर्णनलालसा मे मनसि अतिचिराय विराजते, सा सफलतां लभताम् ।

अर्थः—हे प्रतिभा की अधीश्वरी माँ, अतिसुन्दर स्वरचित काव्यकला के द्वारा आपके गुणों के वर्णन करने की लालसा चिरकाल से मेरे मन में है। वह आपकी अनुकम्पा से सफलता प्राप्त करे।।१५।।

वितर मे रुचिरार्थपदावलीः स्फुरतु काव्यकलालसिता मतिः ।
विरचयानि सुवृत्तगुणैर्यथा तव मुदे च सुवर्णसुमालिकाम् ।।१६।।

अन्वयः—(हे अम्ब) मे रुचिरार्थपदावलीः वितर। काव्यकलालसिता मतिः स्फुरतु। यथा तव मुदे सुवृत्तगुणैः सुवर्णसुमालिकाम् विरचयानि।

अर्थः—हे माँ, मुझे मनोहर अर्थ एवं शब्दावली प्रदान करें तथा काव्यकला से युक्त प्रतिभा भी स्फुरित हो, जिनसे सुन्दर छन्दरूपी सूत्रों से सुन्दर शब्दरूपी स्वर्ण की दर्शनीय माला की आपकी प्रसन्नता हेतु मैं रचना कर सकूँ।।१६।।

नवरसै रसितास्तु मयोदिता स्तुतिरियं विबुधेषु यथा श्रुतिः ।
गुणसुवृत्तिसुरीतिचमत्कृतिप्रकृतिचारुतनुः सदलङ्कृतिः ।।१७।।

अन्वयः—मयोदिता इयं स्तुतिः गुणसुवृत्तिसुरीतिचमत्कृतिप्रकृतिचारुतनुः सदलङ्कृतिः सती विबुधेषु नवरसैः तथा रसिता अस्तु यथा श्रुतिः रसिता (भवति)।

अर्थः—हे अम्ब, मेरे द्वारा रचित यह स्तुति (प्रसाद आदि) गुणों (मधुरा आदि) वृत्तियों (पाञ्चाली, वैदर्भी आदि) रीतिओं, चमत्कारों, प्राकृतिक सौन्दर्य एवं सुन्दर अलङ्कारों से विभूषित होकर अभिनव रसों के कारण विशिष्ट विद्वानों में उसी प्रकार आस्वाद्य हो, जैसे श्रुति होती है।।१७।।

तव च रूपमहो कथयानि किं त्वमसि सुन्दरताजननी शिवे ।
तव च कान्तिलवेन जगत्त्रयी भवति कान्तिमती हरते मतिम् ।।१८।।

अन्वयः—अहो! हे शिवे, तव रूपं किं कथयानि? त्वं सुन्दरताजननी असि। तव कान्तिलवेन जगत्त्रयी कान्तिमती भवति मतिं च हरते।

अर्थः—हे शिवे, तेरे सौन्दर्य का मैं कैसे वर्णन करूँ? तू तो सुन्दता की जन्मदात्री हो। तेरे सौन्दर्य के एक क्षुद्र अंशमात्र से ही तीनों लोक सौन्दर्य से विभूषित होते हैं तथा लोगों की मति आकृष्ट कर लेते हैं।।१८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तव चरित्रसुधाम्बुधिपारगा विपुलशक्तिसुरा अपि नाभवन् ।
तमपि पारयितुं प्रयतेऽधमः कथनलौल्यमहो दुरतिक्रमम् ।।१९।।

अन्वयः—(हे अम्ब, यद्यपि) विपुलशक्तिसुराः अपि तव चरित्रसुधाम्बुधि-पारगाः न अभवन्। तम् अपि अहम् अधमः पारयितुं प्रयते। अहो! कथनलौल्यं दुरतिक्रमम् अस्ति।

अर्थः—यद्यपि अपारशक्तिसम्पन्न देवगण भी आपके अपार चरित्रसुधासिन्धु के पारगामी न हुए, तथापि अतिक्षुद्र व्यक्ति मैं उसे पार करने का प्रयत्न कर रहा हूँ। यद्यपि यह असम्भव है, तथापि आपके गुणवर्णन का लोभ इतना तीव्र हो गया है कि उसका अतिक्रमण नहीं किया जा सकता।।१९।।

वितरिता नरता द्विजजन्मता श्रुतिपरायणता च शिवे त्वया ।
अथ च नो क्रियतां तव वन्दनं कथमहोऽनृणताऽधिगता भवेत् ।।२०।।

अन्वयः—हे शिवे, त्वया मे नरता, द्विजजन्मता, श्रुतिपरायणता च वितरिता। अथ च तव वन्दनं नो क्रियतां तदा अहो अनृणता कथम् अधिगता भवेत्।

अर्थः—हे शिवे, आपने मुझे मनुष्य शरीर, उत्तम ब्राह्मण कुल और वेद-शास्त्र अध्ययन करने का पवित्र कार्य दिया। तब भी यदि आपका स्तवन न किया जाय, तो आपके ऋण से मुक्ति कैसे मिल सकती है।।२०।।

गलितमोहकयौवनमम्बिके पलितमुण्डवितुण्डहतप्रभम् ।
धृतशिखान्तककर्षणपीडितं नय च मां शरणं हरणं रुजाम् ।।२१।।

अन्वयः—हे अम्बिके, गलितमोहकयौवनं पलितमुण्डवितुण्डहतप्रभं धृतशिखान्तककर्षणपीडितं च मां रुजां हरणं शरणं नय।

अर्थः—हे अम्बिके, मेरा मोहक यौवन ढल गया, शिर के बाल पक गये, दाँत मेरे टूट गये हैं, शरीर की प्रभा भी क्षीण हो गयी है, यमराज मेरी शिखा पकड़ कर अपनी ओर खींच रहा है, उससे मुझे असह्य पीड़ा हो रही है। अतः शीघ्र ही तुम सब प्रकार के रोगों का हरण करने वाले अपने शरण में मुझे ले लो।।२१।।

निखिलमम्ब गतं मम जीवनं तनयदारपरिग्रहपालने ।
तव च नैव कृतं विधिनार्चनं भव तथापि भवाम्बुधितारिणी ।।२२।।

अन्वयः—हे अम्ब, मम निखिलं जीवनं तनयदारपरिग्रहपालने गतम्, तव च विधिना अर्चनं न कृतम्, तथापि मम भवाम्बुधितारिणी भव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे अम्ब, यद्यपि मेरा सम्पूर्ण जीवन पुत्र-पत्नी आदि परिवार के पालन-पोषण में ही व्यतीत हो गया। इस कारण आपका विधिवत् अर्चन-वन्दन नहीं किया। तब भी आप मुझे इस संसार-सागर के पार पहुँचा दें।।२२।।

त्वमसि शैशवतः प्रतिपालिकाऽभ्युदयदा धनमानसुखप्रदा ।
रिपुदुरामयनाशिनि हे शिवे जरसि मां न कथं समविष्यासि ।।२३।।

अन्वयः—हे रिपुदुरामयनाशिनि शिवे, त्वं शैशवतः मे प्रतिपालिका अभ्युदयदा धनमानसुखप्रदा च असि (तर्हि) जरसि वार्धके मां कथं न समविष्यसि?

अर्थः—शत्रुओं और कठिन रोगों का नाश करने वाली हे शिवे, तुम बचपन से ही मेरा पालन करती रही हो तथा अभ्युदय, धन-मान (प्रतिष्ठा) एवं सुख देती आ रही हो, तो इस वृद्धावस्था में मेरी रक्षा क्यों नहीं करोगी?।।२३।।

न हि कृतं सुकृतं न तपो जपस्त्वमसि केवलमम्ब बलं मम ।
तव च शीलमिदं प्रथितं यतो ह्यभजतो भजतोऽपि करोषि शम् ।।२४।।

अन्वयः—हे अम्ब, (मया) सुकृतं न हि कृतं, जपः (अपि) न कृतः। त्वम् एव केवलं मम बलम् असि, यतो हि तव इदं शीलं प्रथितम् (अस्ति,यत्) अभजतः भजतः अपि शं करोषि।

अर्थः—हे अम्ब, मैंने पुण्य नहीं किया और तप एवं जप भी नहीं किया। केवल मुझे तेरा ही बल है; क्योंकि तेरा यह स्वभाव प्रसिद्ध है कि जो तेरा भजन करता हैं और नहीं भी भजन करता है, उन दोनों प्रकार के लोगों का कल्याण करती हो।।२४।।

वशमितं च हरिं घननिद्रया विगतनिद्रममुं प्रविधाय या ।
विधिनुताऽऽर्तिहरा मधुकैटभौ मृतिमुखं च निनाय नमामि ताम् ।।२५।।

अन्वयः—विधिनुता आर्तिहरा या (दुर्गा) घननिद्रया वशम् इतं हरिं विगतनिद्रं प्रविधाय मधुकैटभौ मृतिमुखं निनाय ताम् अम्बां नमामि।

अर्थः—ब्रह्मा जी के स्तुति करने पर कष्टों को हरने वाली जिस माता दुर्गा जी ने गम्भीर निद्रा के वश में गये हुए भगवान् विष्णु को निद्रामुक्त कर मधु तथा कैटभ नामक राक्षसों को मृत्यु के घाट पहुँचा दिया, उस करुणामयी माँ को मैं नमन करता हूँ।।२५।।

सुरवरं च हरिं वरितुं वरं कृतवती मधुकैटभमोहनम् ।
विसदृशं न हि तेऽस्ति शिवे यतस्त्वमसि बुद्धिमतामपि मोहिनी ।।२६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—हे शिवे, सुरवरं हरिं वरं वरितुं मधुकैटभमोहनं कृतवती, तत् ते विसदृशं न अस्ति यतः त्वं बुद्धिमताम् अपि मोहिनी असि।

अर्थः—हे शिवे, देवताओं में श्रेष्ठ (जो स्वयं सबको वर देते हैं, उस) भगवान् विष्णु से वर मँगवाने हेतु तूने जो मधु और कैटभ नामक राक्षसों की बुद्धि को मोहित कर लिया, यह तेरे लिए कोई विरुद्ध अथवा स्वभाव के प्रतिकूल कार्य नहीं है; क्योंकि तुम तो बड़े-बड़े ज्ञानी जनों को भी मोह लेती हो।।२६।।

विजितदेवपुरं महिषासुरं महदतिक्रमदुर्दमविक्रमम् ।
लघुतया विनिहत्य च लीलया विजयसे नयसे स्म सुरान् दिवम् ।।२७।।

अन्वयः—(हे अम्ब) विजितदेवपुरं महदतिक्रमदुर्दमविक्रमं महिषासुरं लीलया लघुतया विनिहत्य सुरान् दिवं नयसे स्म विजयसे च।

अर्थः—हे अम्ब, जिसने समस्त देवपुरी पर विजय प्राप्त कर ली थी और बड़े-बड़े देवताओं का भी अतिक्रमण करने का जिसमें अदम्य पराक्रम था, उस महिषासुर की खेल में ही हाथ की सफाई के साथ हत्या कर देवताओं को उनके स्थान स्वर्ग को प्राप्त करा दिया। अतः तुम सबसे श्रेष्ठ हो। तुम्हारी सदा जय हो।।२७।।

गुणवती भवतीत्युत निर्गुणा कथयितुं प्रभवन्ति न केचन ।
मतमिदं तव तत्त्वविदीरितं त्वमगुणा सगुणा च विलक्षणा ।।२८।।

अन्वयः—(हे अम्ब) भवती गुणवती उत निर्गुणा इति केचन अपि कथयितुं न प्रभवन्ति, (किन्तु) इदं मतं तव तत्त्वविदीरितम्, यत् त्वम् अगुणा सगुणा विलक्षणा च असि।

अर्थः—हे माँ, आप सगुण हैं अथवा निर्गुण हैं, यह बताने में कोई समर्थ नहीं है; किन्तु तेरे तत्त्ववेताओं ने यह मत व्यक्त किया है कि तुम निर्गुण, सगुण और उनसे विलक्षण भी हो।।२८।।

विपददम्यदवानलचञ्चलज्वलनदग्धजनेषु कृपासुधा ।
सहजशीतलतापरिवर्षिणी वसतु मे हृदये सदयेश्वरी ।।२९।।

अन्वयः—विपददम्यदवानलचञ्चलज्वलनदग्धजनेषु कृपासुधा सहज-शीतलतापरिवर्षिणी सदया ईश्वरी मे हृदये वसतु।

अर्थः—विपत्तिरूपी अदम्य वनाग्नि की चञ्चल ज्वाला से जो लोग जले हुए हैं, उन पर कृपारूपी अमृत की स्वाभाविक शीतलता की जो वर्षा करती हैं, वह दयालु भुवनेश्वरी मेरे हृदय में निवास करें।।२९।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदधिको न हि कोऽपि नराधमस्त्वदधिका न हि काप्यधमाश्रया ।
तव च लक्ष्यमरक्षितरक्षणं भव च मे पततोऽप्यवलम्बनम् ।।३०।।

अन्वयः—(हे अम्ब), मदधिकः कः अपि नराधमः न अस्ति। त्वदधिका च का अपि अधमाश्रया न अस्ति। अरक्षितरक्षणं तव लक्ष्यम् अस्ति। अतः पततः अपि मे अवलम्बनं भव।

अर्थः—हे अम्ब, मुझसे बढ़कर दूसरा कोई नीच पुरुष नहीं है और तुमसे बड़ा नीचों को आश्रय देने वाला कोई नहीं है। अतः मेरा पतन हो रहा है, तुम मुझे अवलम्बन दो।।३०।।

निचितसुन्दरतानवरूपिणीं शिरसि चान्द्रकलास्फुरितच्छटाम् ।
निशितचञ्चलशस्त्रसमुच्छलत्प्रभतनुं जननीं प्रणमामि ताम् ।।३१।।

अन्वयः—निचितसुन्दरतानवरूपिणीं चान्द्रकलास्फुरितच्छटां निशितचञ्चल-शस्त्रसमुच्छलत्प्रभतनुं ताम् जननीं प्रणमामि।

अर्थः—जिसका नवीन रूप पुञ्जीभूत सौन्दर्य सदृश है, जिसके शिर पर चन्द्रकला की छटा स्फुरित हो रही है तथा जिसके शरीर की प्रभा तेज एवं चञ्चल शस्त्रों की प्रभा से और भी दीप्त हो रही है, उस अम्बा को मैं नमस्कार कर रहा हूँ।।३१।।

त्वमसि मानवतां च समग्रणीः सुररिपूद्धतमुण्डविखण्डिनी ।
वद न शुम्भनिशुम्भमुखेषु को निशिचरोऽन्यतमोऽन्धतमो हतः ।।३२।।

अन्वयः—(हे अम्ब) त्वं मानवतां समग्रणीः सुररिपूद्धतमुण्डविखण्डिनी च असि। वद, शुम्भनिशुम्भमुखेषु अन्यतमः कः अन्धतमः निशिचरो न हतः।

अर्थः—हे अम्ब, तुम स्वाभिमानियों में अग्रणी एवं देवताओं के शत्रुओं के उद्दण्डता से ऊपर उठे मस्तकों को खण्ड-खण्ड करने वाली हो। बताओ कि शुम्भ एवं निशुम्भ आदि प्रमुख किस मदान्ध असुर का वध तुमने नहीं किया?।।३२।।

तव च नोत्तमनीचविचारणा निशिचरोत्खननेऽप्यवने सताम् ।
अधिगतास्त्रकृतावधतावरारुणमहो धृतभृङ्गवपुः शिवे।।३३।।

अन्वयः—(हे) शिवे,) निशिचरोत्खनने सताम् अवने अपि तव उत्तमनीचविचारणा न (अस्ति) (यतः) धृतभृङ्गवपुः अधिगतास्त्रकृतावधता-वरारुणम् अहः।

अर्थः—हे अम्ब, निशाचरों का उन्मूलन करने और सज्जनों की रक्षा करने में तुम ऊँच और नीच वेष अथवा शरीर का विचार नहीं करती हो; क्योंकि जिसे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्त्रों से अबध्य होने का वर प्राप्त हो चुका था, उस अरुण नामक राक्षस का वध भ्रमर जैसा तुच्छ रूप धारण कर किया ।।३३।।

कमलकोमलकान्तकलेवरं कुलिशकर्कशराक्षसखण्डनम् ।
रुधिरछर्द्यरिमुण्डचलत्स्रजा विहितमण्डनमस्ति न तेऽसमम् ।।३४।।

अन्वयः—(हे अम्ब), कमलकोमलकान्तकलेवरं कुलिशकर्कशराक्षस-खण्डनं रुधिरछर्द्यरिमुण्डचलत्स्रजा विहितमण्डनं ते असमं न अस्ति।

अर्थः—हे अम्ब! तुम्हारा यह कमल के समान कोमल और सुन्दर शरीर तथा वज्र सदृश कठोर राक्षसों को खण्ड-खण्ड करना तथा जिनसे रक्त की धारा निकल रही है, उन राक्षस मुण्डों की चञ्चल माला से अलङ्कृत होना तुम्हारे लिए विरुद्ध कार्य नहीं है; क्योंकि तुम अशेष विरोधी गुणों की आश्रय हो।।३४।।

भवति सत्त्वमयी कमला हरौ कमलजे रजसा सह शारदा ।
शिवसुसङ्गतिमेत्य शिवा च या भवतु मे मुदिताऽभ्युदिता च सा ।।३५।।

अन्वयः—या हरौ सत्त्वमयीं कमला, कमलजे रजसा सह शारदा शिवसुसङ्गतिम् एत्य शिवा च भवति अभ्युदिता सा मे मुदिता भवतु।

अर्थः—जो भगवान् विष्णु के यहाँ सत्त्वगुणविशिष्ट लक्ष्मी, ब्रह्मा के पास रजोगुणविशिष्ट शारदा और शिव की सुन्दर सङ्गति पाकर शिवा रूप धारण कर लेती है, वह अभ्युदय से युक्त पराम्बा मेरे लिए प्रसन्न हो जाय।।३५।।

शुचि मनो न वचश्चरितामृतं स्वदितुमम्ब रुचिर्नहि कर्णयोः ।
मधुधिया विषपानरुचिभ्रमं झटिति नाशय भासय मानसम् ।।३६।।

अन्वयः—(हे) अम्ब, मे मनः वचः च शुचि न (अस्ति) कर्णयोः चरितामृतं स्वदितुं न रुचिः। मे मधुधिया विषपानरुचिभ्रमं झटिति नाशय मानसं भासय च।

अर्थ—हे अम्ब, मेरा मन एवं वाणी पवित्र नहीं है और कानों में आपके चरितामृत के आस्वादन की रुचि नहीं है। अतः मुझे शहद की बुद्धि से विषपान का जो भ्रम हो गया है, उसका शीघ्र ही नाश करो तथा ज्ञान के प्रकाश से मेरे मन को आलोकित करो।।।३६।।

सुरवरेषु नरेष्वसुरेषु च महिमवन्ति पदानि च ये गताः ।
इह पुराऽप्यथवा विततैश्च तैर्नियतमेव समार्चि पराम्बिका ।।३७।।

अन्वयः—सुरवरेषु नरेषु असुरेषु च ये महिमवन्ति पदानि गताः, विततैः तैः इह अथवा पुरा नियतम् एव पराम्बिका समार्चि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—सुरों, मनुष्यों और असुरों में जो लोग महिमामण्डित पदों पर पहुँचे हुए हैं, उन्होंने इस जन्म या पूर्वजन्म में नम्रतापूर्वक निश्चय ही पराम्बा की अर्चना की है।।३७।।

त्वमिह तत्र परत्र च कुत्रचित् प्रतिगृहं नगरेषु वने गिरौ ।
विविधनामवपुः स्वहितैषिभिर्जयसि पुष्पदलादिभिरर्चिता ।।३८।।

अन्वयः—हे अम्ब, त्वम् (एव) इह तत्र परत्र प्रतिगृहं नगरेषु वने गिरौ कुत्रचित् च स्वहितैषिभिः विविधनामवपुः पुष्पदलादिभिः अर्चिता जयसि।

अर्थः—हे अम्ब, तुम ही यहाँ वहाँ अन्यत्र प्रति घर, नगर, वन, पर्वत तथा कहीं भी अपना हित चाहने वाले व्यक्तियों के द्वारा भिन्न-भिन्न नाम और शरीरों से, पत्र-पुष्पों आदि उपचारों से पूजित होती हुई विजयिनी हो रही हो।।३८।।

समहिता महिता च शिवार्चिता शमदमप्रवणैर्नियमेन यैः ।
सकलमीप्सितमेव सुलभ्यते सुखसमेतमपेतभयैश्च तैः।।३९।।

अन्वयः—शमदमप्रवणैः यैः नियमेन समहिता महिता च शिवा अर्चिता तैः अपेतभयैः सुखसमेतं सकलम् ईप्सितम् एव सुलभ्यते।

अर्थः—अनन्य निष्ठा एवं इन्द्रियदमनपूर्वक जिन लोगों के द्वारा समान हित करने वाली तथा महिमामण्डित शिवा की अर्चना नियम से की गयी, उनके सारे भय नष्ट हो गये तथा उन्हें सुखसहित सभी मनोरथ सरलता से प्राप्त हो जाते हैं।।३९।।

त्वमसि यत्र परम्परयार्चिता कुलमदस्तु सुतीर्थमिहोच्यते ।
वहति तत्र च शान्तिसुधापगा सुतमहीधनधीरमणीरमा ।।४०।।

अन्वयः—हे अम्ब, यत्र त्वं परम्परया अर्चिता असि अदः कुलम् इह सुतीर्थम् उच्यते। तत्र च सुतमहीधनधीरमणीरमा शान्तिसुधापगा वहति।

अर्थः—हे अम्ब, जहाँ परम्परा से तुम्हारा अर्चन पूजन होता आ रहा है, वह कुल तो यहाँ पवित्र तीर्थ कहा जाता है तथा वहाँ पुत्र, भूमि, धन, सद्बुद्धि तथा रमणी आदि से रमणीय शान्ति सुधा की नदी बहती है।।४०।।

न हि यदाम्बुधरागगनानिलानलरवीन्दुपयोधिगिरिद्रुमाः ।
स्थितवती च तदा भवती महोमहिमराजिविराजितविग्रहा ।।४१।।

अन्वयः—हे अम्ब, यदा अम्बुधरागगनानिलानलरवीन्दुपयोधिगिरिद्रुमाः न (आसन्) तदा भवती महोमहिमराजिविराजितविग्रहा स्थितवती।

अर्थः—हे अम्ब, (सृष्टि के पूर्व) जब जल, धरती, गगन, अनिल, अग्नि, सूर्य, चन्द्र, समुद्र, पर्वत, तथा वृक्ष आदि कुछ भी नहीं थे, तब भी आपका यह विग्रह तुम्हारे तेजःपुञ्ज में विराजमान होकर स्थित था; क्योंकि तुम अनादि हो।।४१।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनरपि प्रलये च हि भाविनि सदसती च यदा लयमेष्यतः ।
त्वमखिलं च निधाय निजौजसि चिदवशेषवती च भविष्यसि ।।४२।।

अन्वयः—हे अम्ब, पुनः अपि भाविनि प्रलये यदा सदसती च लयम् एष्यतः, तदा अखिलं निजौजसि निधाय त्वं चिदवशेषवती च भविष्यसि।

अर्थः—हे अम्ब, पुनः भावी प्रलयकाल में जब सत्-असत् (कारण-कार्य) रूप जगत् तुम्हारे अन्दर लीन हो जायेगा, तब सम्पूर्ण विश्व को अपने तेज में विलीन (समेट) कर तुम केवल चिन्मात्र ही अवशिष्ट होकर रहोगी।।४२।।

चलमनःकरणासुगणस्त्यजेत् क्षणसुखां विषयाभिरतिं शिवे।
भवतु शाश्वतसौख्यसुरद्रुमे चरणपङ्कज एव रतश्च ते ।।४३।।

अन्वयः—हे शिवे, चलमनःकरणासुगणः क्षणसुखां विषयाभिरतिं त्यजेत्। शाश्वतसौख्यसुरद्रुमे ते चरणपङ्कज एव रतः च भवतु।

अर्थः—हे शिवे, चञ्चल मन, इन्द्रिय और प्राण क्षणिक सुख देने वाले विषय-प्रेम का त्याग करें तथा शाश्वत सुख के कल्पवृक्ष स्वरूप आपके चरणकमल में रत हो जाँय।।४३।।

सीतापहृत्य च यदाधमरावणेन
नीता तदाधिहतधैर्यविवेकमानः ।
रामोऽपि यामनिशमर्चयदनादिशक्तिं
तां भक्तकल्पलतिकां जननीं नमामि ।।४४।।

अन्वयः—यदा अधमरावणेन अपहृत्य सीता नीता तदाधिहतधैर्य-विवेकमानः रामः अपि याम् आदिशक्तिं समर्चयत् तां भक्तकल्पलतिकां जननीं नमामि।

अर्थः—जब नीच रावण सीता को चुरा ले गया, तब उस मानसिक व्यथा से जिसका धैर्य, विवेक और स्वाभिमान जाता रहा, उस राम ने भी जिस आदि-शक्ति की पूजा की तथा कराई, उस भक्तों की कल्पलता स्वरूप पराम्बा को नमस्कार करता हूँ।।४४।।

ये त्वां वहन्ति शिरसा विपदब्धिमग्ना-
स्तेषां सुखाय दयितात्मतनुं जहासि।
कारागृहं प्रति गता वसुदेवमौलौ
स्थित्वाऽश्मपातनमुरीचकृषे हिताय ।।४५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—विपदब्धिमग्ना ये त्वां शिरसा वहन्ति तेषां सुखाय दयितात्मतनुं जहासि। वसुदेवमौलौ स्थित्वा कारागृहं प्रति गता (तस्य) हिताय अश्मपातनम् उरीचकृषे।

अर्थः—विपत्ति के सागर में डूबने पर जो लोग तुम्हें अपने सिर पर रखते हैं, उनके सुख के लिए तुम अपने प्रिय शरीर का त्याग कर देती हो। जब वसुदेव जी मुझे यशोदा जी के यहाँ से अपने शिर पर उठा कर कारागार में ले गये, तो तुमने उनके हित के लिए कंस के द्वारा पत्थर पर पटका जाना और शरीर त्यागना भी स्वीकार किया।।४५।।

कृष्णं दुर्दान्तरक्षोगणकृतदुरितैर्दीर्यमाणां धरित्रीं
त्रातुं हर्तुं च भारं भुवमवतरितुं देवकीगर्भजातम् ।
मृत्योश्चामोचयद्या यममुखकवलत्रस्तकंसप्रयुक्तात्
सूतां तां नन्दगेहे त्रिदशवरनुतामम्बिकां वै नमामि।।४६।।

अन्वयः—या दुर्दान्तरक्षोगणकृतदुरितैः दीर्यमाणां धरित्रीं त्रातुं भारं च हर्तुं भुवम् अवतरितुं देवकीगर्भजातं कृष्णं यममुखकवलत्रस्तकंसप्रयुक्तात् मृत्योश्च अमोचयत् तां त्रिदशवरनुतां नन्दगेहे सूताम् अम्बिकां नमामि।

अर्थः—जिसने दुर्दान्त राक्षसों के किये गये दुष्कर्मों से विदीर्ण हो रही धरती की रक्षा तथा उसके भार को हलका करने हेतु पृथ्वी पर अवतीर्ण हुए देवकी के गर्भ से उत्पन्न श्रीकृष्ण को यमराज के मुख के ग्रास के भय से त्रस्त कंस के द्वारा की गयी मृत्यु से मुक्त कर दिया, देवताओं द्वारा स्तुति की गयी नन्द के घर में उत्पन्न उस अम्बिका देवी को प्रणाम करता हूँ।।४६।।

प्रसेने सत्राजिन्मणिमहिमरश्मेरधिगतं
गले बद्ध्वाऽरण्यं मृगयितुमिते सिंहनिहते।
ह्यनायाते कृष्णो मणिहरणलोभेन हतवान्
ततेयं दुर्वार्ता प्रतिजनमुखीना दश दिशः ।।४७।।

अन्वयः—अहिमरश्मेः अधिगतं सत्राजिन्मणिं गले बद्ध्वा प्रसेने अरण्यं मृगयितु इते सिंहनिहते अनायाते सति मणिहरणलोभेन कृष्णः हतवान् हि इयं दुर्वार्ता प्रतिजनमुखीना दश दिशः तता।

अर्थः—जब भगवान् सूर्य से प्राप्त सत्राजित् के मणि को अपने कण्ठ में बाँधकर प्रसेनजित् वन में शिकार खेलने गया और सिंह द्वारा मारे जाने के कारण नहीं लौटा, तब जन-जन के मुख से होती हुई यह बात दशों दिशाओं में व्याप्त हो गयी कि कृष्ण ने ही मणि लेने के लोभ से प्रसेनजित् की हत्या करा दी।।४७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इमां कुत्सां कृष्णोऽपगमयितुकामो वनमितः
विलान्नो जाम्बीयान्निरगमदसौ चावधिगते ।
तदा त्वामेवाप्ताः शरणममराम्बां च यदवो
यतस्तेऽङ्घ्र्यापन्ना न हि विफलतां यान्ति जननि ।।४८।।

अन्वयः—कृष्णः इमां कुत्साम् अपगमयितुकामः वनम् इतः, असौ (यदा) जाम्बीयात् विलात् अवधिगते नो निरगमत् तदा यदवः अमराम्बां त्वाम् एव शरणम् आप्ताः। यतः हे जननि, ते अङ्घ्र्यापन्नाः विफलतां न यान्ति।

अर्थः—श्रीकृष्ण जी इस कलङ्क को दूर करने की इच्छा से वन में गये। जब वे अवधि के बीत जाने पर भी जाम्बवान् के विल से बाहर नहीं निकले, तब उनके प्रिय परिजन यदुवंशी लोग तुम्हारे ही शरण में पहुँचे; क्योंकि तुम समस्त देवताओं की माता हो। हे माँ, तुम्हारे शरण में पहुँचे हुए कोई भी विफल नहीं होता है ।। ४८।।

स्तुता कृष्णस्यैवागमनशुभकामैश्च यदुभिः
परन्त्वेकः कृष्णो न हि प्रकटितस्तेऽम्ब कृपया ।
अपि त्वानीतोऽसौ सह च मणिना जाम्बसुतया
वदान्ये त्वद् याञ्चाधिकमपि वरं के नु ददते ।।४९।।

अन्वयः—(यद्यपि) यदुभिः कृष्णस्य एव आगमनशुभकामैः त्वं स्तुता। हे अम्ब, त्वया कृपया एकः कृष्णः न हि प्रकटितः, अपि तु असौ मणिना सह जाम्बसुतया अपि आनीतः। वद त्वद् अन्ये के याञ्चाधिकम् अपि वरं ददते?

अर्थः—हे माँ, यद्यपि यदुवंशियों ने एक कृष्ण की ही प्राप्ति के निमित्त तुम्हारी स्तुति की थी; परन्तु तुमने कृपा कर अकेले कृष्ण को ही नहीं प्राप्त कराया; अपि तु उन्हें तो आपने दिया ही, साथ ही उस मणि सहित ऋक्ष जाम्बवान् की पुत्री जाम्बवती को भी दे दी। बताओ तो तुम्हारे अतिरिक्त कौन तुम्हारे सदृश उदार देवता है, जो माँगे गये वर से अधिक भी दान करता है ।।४९।।

त्वया वृन्दारण्ये तरणितनयातीरसिकता-
मयाराध्यस्वेष्टाकृतिविनतिपूजामुदितया ।
वरं दत्तं प्रापुर्हरिमपि पतिं गोपवनिता
न तत्तत्त्वं सच्चित्सुखमपि वशे तेऽम्ब च कथम् ।।५०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—वृन्दारण्ये तरणितनयातीरसिकतामयाराध्यस्वेष्टाकृतिविनति-पूजामुदितया त्वया वरं दत्तं गोपवनिताः हरिम् अपि पतिं प्रापुः। हे अम्ब, तत् सच्चित्सुखम् अपि तत्त्वं ते वशे कथं न (अस्ति)?

अर्थः—वृन्दावन में गोपवधूटियों ने यमुना के पावन तट पर अपनी आराध्य इष्ट देवी आपकी बालू की मूर्ति बनाकर स्तुति-पूजा की, उनके उस अर्चन, पूजन, नमन से प्रसन्न होकर आपने हरि (श्रीकृष्ण) को पति पाने का वर दिया, जिससे उन्हें कृष्ण पति के रूप में प्राप्त हुए, तो जो वस्तुतः सच्चिदानन्दस्वरूप परम तत्त्व है, वह कृष्णस्वरूप ब्रह्मतत्त्व आपके वश में कैसे नहीं है, अर्थात् वह भी तुम्हारे वश में ही है।।५०।।

सुरबलविजयेच्छू राक्षसो रक्तबीज-
स्तव निशितशराग्रैर्यर्हि गात्रेषु विद्धः ।
क्षतजकणसमुत्थैस्तस्य तादृक्प्रवीरै-
रभवदमितसंख्यैराकुला युद्धभूमिः ।।५१।।

अन्वयः—यर्हि सुरबलविजयेच्छुः राक्षसः रक्तबीजः तव निशितशराग्रैः गात्रेषु विद्धः, तदा तस्य क्षतजकणसमुत्थैः अमितसंख्यैः तादृक्प्रवीरैः युद्धभूमिः आकुला अभवत्।

अर्थः—जब देवसेनाओं पर विजय चाहने वाला रक्तबीज नामक राक्षस तुम्हारे बाणों की तीक्ष्ण नोक से क्षत-विक्षत हो गया, तब उसके शरीर से निकले हुए रक्त के कणों से वैसे ही बलवान् असंख्य रक्तबीज उत्पन्न हो गये, जिनसे रणभूमि व्याप्त हो गयी।।५१।।

इति निशिचरमायाविस्मिता देववर्या
हतमतिबलवेगा रक्षिताश्च त्वयाऽम्ब ।
क्षणमिव रुधिरौघं भूमिपातं विनैव
रणभुवि विचरन्ती पाययित्वा च कालीम् ।।५२।।

अन्वयः—इति निशिचरमायाविस्मिता हतमतिबलवेगा देववर्याः रुधिरौघं भूमिपातं विना एव हे अम्ब, त्वया रणभुवि विचरन्तीं कालीं पाययित्वा क्षणमिव रक्षिताः।

अर्थः—इस प्रकार की राक्षसी माया से जो आश्चर्य में पड़ गये थे तथा जिनकी बुद्धि, बल और वेग नष्ट हो गया था, उन श्रेष्ठ देवों की रक्षा हे अम्ब, तुमने मानो एक क्षण में ही रणभूमि पर विचरण करने वाली काली को भूमि पर गिरने के पूर्व ही रक्तराशि पिलाकर की।।५२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जननि त्वमसि धन्या लोककल्याणकामा
न हि गणयसि हेयं नैव मेयं कदाचित् ।
अविहितमपि पीतं रक्षसां रक्तजातं
निखिलरुधिरजाताश्चर्विता राक्षसाश्च ।।५३।।

अन्वयः—हे जननि, लोककल्याणकामा त्वं धन्या असि। कदाचिद् अपि त्वं हेयं मेयं च न गणयसि। हि अविहितम् अपि रक्षसां रक्तजातं पीतम्। निखिलरुधिरजाताः राक्षसाः चर्विताः च।

अर्थः—हे अम्ब, लोककल्याण चाहने वाली तुम धन्यवाद के योग्य हो; क्योंकि कभी भी यह विचार नहीं करती हो कि क्या ग्राह्य है और क्या त्याज्य है। उसी कारण शास्त्रों में जिसके पीने का विधान नहीं है, उक्त राक्षसों के उस रक्त को तूँ पी गयी और उस रक्त से उत्पन्न सभी राक्षसों को चबा गयी।।५३।।

जननि तव विधानं नैव जानन्ति केचि-
दुपकृतिपरिपाटी योगिभिश्चाप्यगम्या।
समविषमविधौ ते भाति यन्नानुकूलं
तदपि च परिणामे सौख्यदं नूनमेव ।।५४।।

अन्वयः—हे जननि, केचिद् अपि ते विधानं न जानन्ति। ते उपकृति-परिपाटी अपि योगिभिश्च अगम्या। ते समविषमविधौ यद् अनुकूलं न भाति तद् अपि परिणामे नूनम् एव सौख्यदं भवति।

अर्थः—हे माँ, तुम्हारे विधान के रहस्य को कोई नहीं जानता और उपकार करने की तुम्हारी प्रणाली तो योगियों को भी अगम्य है। आपके द्वारा किये गये अनुकूल अथवा प्रतिकूल कार्यों में जो प्रतिकूल प्रतीत होता है, वह भी परिणाम में निश्चय ही सुखद होता है।।५४।।

स्वरूपं ते रम्यं निखिलदुरितौघप्रशमनं
भवत्यक्ष्णां प्रीत्यै जनिमरणमुक्त्यै च भजताम् ।
न तद्दृश्यं किन्तु त्वमसि यदि नैव प्रमुदिता
प्रहृष्यातः सद्यो भव च मम प्रत्यक्षविषया ।।५५।।

अन्वयः—हे अम्ब, निखिलदुरितौघप्रशमनं ते स्वरूपं भजताम् अक्ष्णां प्रीत्यै जनिमरणमुक्त्यै च भवति; किन्तु यदि त्वं प्रमुदिता न असि तदा तद् दृश्यं न भवति। अतः प्रहृष्य सद्यः मम प्रत्यक्षविषया भव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे अम्ब, समस्त पापों का नाश करने वाला तुम्हारा स्वरूप भक्तों के नेत्रों को प्रसन्नता प्रदान करने वाला और जन्म-मृत्यु के बन्धन से मुक्त करने वाला है; किन्तु वह भी यदि तुम प्रसन्न नहीं हो, तो दृष्टिगोचर नहीं होता। अतः प्रसन्न होकर तुम मुझे प्रत्यक्ष दर्शन दो।।५५।।

त्वमोङ्काराराध्या भवसि च सदैङ्कारसुलभा
त्वदन्या नो काचिद्भवति मुदिता ह्रींपदजपैः ।
त्वमेवेशानि क्लींजपरतजनानाञ्च फलदा
प्रसीदाश्वम्ब त्वच्चरणकमले नौमि शिरसा।।५६।।

अन्वयः—हे अम्ब, त्वम् ओङ्काराराध्या, त्वं च सदैङ्कारसुलभा असि। त्वद् अन्या काचित् ह्रींपदजपैः मुदिता न भवति। हे ईशानि! त्वम् एव क्लींजपरतजनानां च फलदा असि। त्वं प्रसीद। त्वच्चरणकमले शिरसा नौमि।

अर्थः—हे अम्ब, तुम ही ओङ्कार से आराध्य हो, ऐङ्कार के जप से भी तुम ही सुलभ हो। ह्रीं के जप से भी तुमसे अन्य कोई नहीं प्रसन्न होता है। हे ईशानि, क्लीं के जप में तत्पर जनों को भी तुम ही फल देती हो। तुम मेरे ऊपर प्रसन्न हो। मैं तुम्हारे चरणकमलों का शिर से नमस्कार करता हूँ।।५६।।

त्वदिन्द्राणी स्वाहा यमसहचरी निर्ऋतिवधू-
रपां पत्युः पत्नी पवनरमणी सोमगृहिणी।
महेशानीत्याद्या दिगधिपतिजायाः प्रकटिता
गमिष्यन्त्येवैता विहितनिजकार्यास्त्वयि लयम् ।।५७।।

अन्वयः—हे अम्ब, त्वद् एव इन्द्राणी, स्वाहा, यमसहचरी, निर्ऋतिवधूः, अपां पत्युः पत्नी, पवनरमणी, सोमगृहिणी, महेशानी इत्याद्याः दिगधिपतिजायाः प्रकटिताः। एताः सर्वाः विहितनिजकार्याः त्वयि लयं गमिष्यन्ति एव।

अर्थः—हे अम्ब, तुमसे ही पूर्व दिशा के स्वामी इन्द्र की पत्नी इन्द्राणी (शची), अग्निकोण के स्वामी अग्नि की शक्ति स्वाहा, दक्षिण दिशा के स्वामी यम की पत्नी (यमी), नैर्ऋत्यकोण के स्वामी की पत्नी, पश्चिम दिक्पति वरुण की वरुणानी, वायव्यकोण के स्वामी वायु की पत्नी तथा ईशानकोण के अधिपति की पत्नी ईशानी आदि समस्त शक्तियाँ आपसे ही प्रकट हुई हैं और अपना-अपना कार्य सम्पन्न कर सभी आपमें ही विलीन हो जायेंगी।।५७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदुद्गीतं शास्त्रे सकलललनास्ते तनुभुव-
स्तदम्ब प्रत्यक्षं कृतमपि रणे शुम्भनिहने।
सहाया आयाता अखिलसुरपत्न्योऽस्त्रसहिता-
स्त्वया नाट्यात् सर्वा निजवपुषि लीनाश्च विहिताः।।५८।।

अन्वयः—हे अम्ब, शास्त्रे यद् उग्दीतं (यत्) सकलललनाः ते तनुभुवः तत् शुम्भनिहने रणे त्वया प्रत्यक्षं कृतम्। सहायाः अस्त्रसहिताः अखिलसुरपत्न्यः आयाताः (पश्चात्) त्वया सर्वाः नाट्यात् निजवपुषि लीनाश्च विहिताः।

अर्थः—हे अम्ब! शास्त्र में (दुर्गासप्तशती में) जो कहा गया है कि समस्त स्त्रियाँ तुम्हारे शरीर से ही प्रकट हुई हैं; उसे तो तुमने शुम्भ का वध जहाँ हुआ, उस रणभूमि पर प्रत्यक्ष कर दिखा दिया। वहाँ आपकी सहायता हेतु अस्त्र-शस्त्रों सहित सभी देवताओं की शक्तियाँ आयीं और उन्हें नाटकीय ढंग से तुमने अपने दिव्य शरीर में ही विलीन कर लिया।।५८।।

सुदुर्दर्शं युद्धं विजयिभटदर्पापहरणं
स्वसैन्यैः शुम्भेन स्फुटकपटमिश्रं च विहितम्।
त्वयैकाकिन्येव प्रतिभटदलानां निहननं
कृतं साश्चर्यं यद्भुवि च गगनेऽभूदनुपमम्।।५९।।

अन्वयः—हे अम्ब, शुम्भेन स्वसैन्यैः सुदुर्दर्शं स्फुटकपटमिश्रं च विजयिभट-दर्पापहरणं यद् युद्धं विहितम्, तत्र एकाकिन्या एव त्वया भुवि गगने च साश्चर्यं प्रतिभटदलानां निहननं कृतं तद् अनुपमम् अभूत्।

अर्थः—हे अम्ब, शुम्भ ने अपनी सेनाओं के साथ स्फुट कपट मिश्रित (प्रत्यक्ष एवं परोक्ष युक्त) जो देखने में भी भयङ्कर विजयशील योद्धाओं के गर्व को नष्ट करने वाला युद्ध किया, उसमें अकेले ही तुमने भूमि पर और आकाश में भी प्रतिद्वन्द्वी शत्रुदल का जिस आश्चर्यजनक ढंग से हनन किया, उसकी उपमा किसी से नहीं दी जा सकती।।५९।।

रामो लोकाभिरामो धृतशररुचिरो न्यक्कृतासंख्यकामो
देवो गृह्णातु पाणिं स्वसरसहृदये न्यास्य भावं तथैनम्।
जानक्याऽऽराधिता या स्मितवरदमुखी सम्बभूव प्रमोदात्
सा देवी कामदाद्या भवतु मम सदा दृष्टिदेशागता हि।।६०।।

अन्वयः—धृतशररुचिरः न्यक्कृतासंख्यकामः लोकाभिरामः रामः, मे पाणिं गृह्णातु, एनं भावं स्वसरसहृदये न्यास्य जानक्या आराधिता या स्मितवरदमुखी सम्बभूव सा कामदा आद्या दुर्गा सदा मम दृष्टिदेशागता भवतु हि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—जो बाणों को धारण करने से और भी मनोहर हो गये हैं, जिन्होंने असंख्य कामदेवों को अपने सौन्दर्य से तिरस्कृत कर दिया है, वे समस्त लोकों का मन हरने वाले राम मेरा पाणिग्रहण करें, इस सात्त्विकभाव को अपने सरस हृदय में धारण कर जनकनन्दिनी जानकी जी ने जिसकी आराधना की और उससे प्रमुदित होकर जो मन्द मुस्कान सहित वर देने हेतु उन्मुख हो गयी, वह अभीष्ट सिद्ध करने वाली आदिशक्ति दुर्गा जी मुझे अपना शुभ दर्शन प्रदान करें।।६०।।

शैवश्चापो गरिष्ठो मिलदमितभटैर्वज्रतुल्यैरचाल्यो
जातः सद्यो लघिष्ठः कुसुमसममृदुः यत्कृपातः क्षणेन।
रामेणोत्क्षिप्त एवाभवदवयवशः खण्डखण्डोऽञ्जसैव
सा मे चाम्बाश्वसाध्याभिमतसुरलता मानसं वै पुनातु ।।६१।।

अन्वयः—वज्रतुल्यैः मिलदमितभटैः मे अचाल्यः गरिष्ठः शैवः चापः यत्कृपातः सद्यः लघिष्ठः कुसुमसममृदुः जातः (तथा च) रामेण अञ्जसा एव उत्क्षिप्त एव क्षणेन अवयवशः खण्डखण्डः अभवत्, सा आशु एव असाध्याभिमतसुरलता देवी मे मानसं पुनातु वै।

अर्थः—जो वज्रतुल्य एक साथ मिलकर असंख्य वीरों के हिलाने पर भी नहीं हिल पाता था तथा जो बहुत ही भारी था, वह शिव जी का धनुष भी जिसकी कृपा से तुरन्त हल्का और पुष्प के समान कोमल हो गया और राम के द्वारा सरलता से ऊपर क्षेपण करने पर ही क्षण में ही अङ्ग-प्रत्यङ्ग टूटकर टुकड़े-टुकड़े हो गया, वह शीघ्र ही असाध्य कामनाओं को भी सिद्ध करने वाली कल्पलतास्वरूप देवी निश्चय ही मेरे मन को पवित्र करें।।६१।।

यस्याः प्रीत्यात्यलभ्याखिलभटविजयावाप्तरामः सकामः
कण्ठे वै वैजयन्त्या दशरथतनयो न्यस्तया सीतयाऽसौ ।
सर्वोत्कृष्टच्छटाभिर्नृपधनुरजिरे सम्बभौ पुष्पलाजै-
राकीर्णैश्चाऽभ्यनन्दि प्रियजयनिनदैर्नौमि सीतानुतां ताम् ।।६२।।

अन्वयः—यस्याः प्रीत्या अत्यलभ्याखिलभटविजयावाप्तरामः सकामः अभूत् तथा च सीतया कण्ठे न्यस्तया वैजयन्त्या असौ दशरथतनयः रामः नृपधनुरजिरे सर्वोत्कृष्टच्छटाभिः सम्बभौ, पुष्पलाजैः आकीर्णैः प्रियजयनिनदैः अभ्यनन्दि च तां सीतानुताम् अम्बां नौमि।

अर्थः—समस्त वीरों पर विजय प्राप्त करना जो अतिकठिन था, उसे भी जिसकी प्रसन्नता से प्राप्त कर श्रीराम सकाम हो गये। साथ ही सीता के द्वारा जिसके कण्ठ में जयमाला डाल दी गयी, वे दशरथतनय श्रीराम राजा जनक के धनुष-यज्ञ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

के प्राङ्गण में सर्वोत्कृष्ट छटा से चमक उठे तथा बिखेरे गये पुष्पपुञ्जों एवं लाजों (लावा) से एवं प्रिय जयजयकार की ध्वनि द्वारा अभिनन्दित हुए, उस सीता जी के द्वारा स्तुति की गयी जगदम्बा को मैं नमस्कार करता हूँ।।६२।।

त्वमम्बार्थो वाच्यो भवसि विदितस्तत्पदगतः
न लक्ष्यार्थो भिन्नोऽप्यणुरपि ततो भाति विदितः।
न च त्वां व्यङ्ग्यार्थो व्यभिचरति किञ्चित्क्षणमपि
सदा वृत्तित्रय्यावगतविषया त्वं विजयसे ।।६३।।

अन्वयः—हे अम्ब, त्वं तत्पदगतः वाच्यः अर्थः विदितः भवसि, ततः लक्ष्यार्थः अपि अणुः अपि भिन्नः विदितः न भाति, व्यङ्ग्यार्थः अपि क्षणम् अपि किञ्चित् त्वां न व्यभिचरति। वृत्तित्रय्या अवगतविषया त्वं सदा विजयसे।

अर्थः—हे अम्ब, उपनिषदों में प्रतिपादित 'तत् त्वमसि' महावाक्य में प्रयुक्त 'तत्' पद का वाच्यार्थ तुम ही ज्ञात होती हो, लक्ष्यार्थ भी उससे किञ्चित्मात्र भी भिन्न नहीं प्रतीत होता तथा व्यङ्ग्यार्थ भी एक क्षण के लिए तुमसे पृथक् नहीं प्रतीत होता। इस प्रकार अभिधा, लक्षणा एवं व्यञ्जना नामक तीनों वृत्तियों से तुम्हारा ही ज्ञान होता है। अतः तुम सर्वश्रेष्ठ हो, विजयिनी हो रही हो।।६३।।

स जीवस्त्वंशब्दावगमविषयो नो कथमपि
त्वमेवाधिष्ठानस्त्वयि भवति सत्यां च सदसत् ।
अतस्त्वामेव त्वम्पदविषयता याति सहसा
महावाक्यार्थस्यापि भवसि हि तात्पर्यमखिलम् ।।६४।।

अन्वयः—स जीवः त्वंशब्दावगमविषयः कथमपि न अस्ति। त्वम् एव अधिष्ठानः असि (यतः) त्वयि सत्यां सत् असत् च भवति। अतः त्वाम् एव त्वम्पदविषयता अपि सहसा याति। महावाक्यार्थस्य अपि अखिलं तात्पर्यं त्वम् एव भवसि।

अर्थः—हे अम्ब, उपनिषत्प्रतिपादित 'तत् त्वमसि' इस महावाक्य में जो 'त्वं' शब्द का अर्थ जीव कहा जाता है, वह किसी प्रकार घटित नहीं होता है; क्योंकि तुम ही अधिष्ठान हो। तुम्हारी सत्ता से भी सत् (कारण) और असत् (कार्य) की सत्ता देखी जाती है। अतः सम्पूर्ण 'तत् त्वमसि' महावाक्य का तात्पर्य तुम ही हो।।६४।।

त्वमेव या माता ह्युपनिषदुदीर्येड्यचरिता
निराकाराखण्डा नयनवचनागोचरतनुः ।
गुणातीता भक्ताखिलकलुषनाशाय सगुणा
हरासौ त्वं शीघ्रं हृदयघनमोहान्धपटलम्।।६५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—हे अम्ब, उपनिषदुदीर्येड्यचरिता या त्वम् एव माता निराकारा अखण्डा वचननयनागोचरतनुः गुणातीता (सती अपि) भक्ताखिलकलुषनाशाय सगुणा भवसि, असौ त्वं मे हृदयघनमोहान्धपटलं शीघ्रं हर।

अर्थः—हे अम्ब, उपनिषदों के द्वारा इस प्रकार स्तुत्य और प्रशंसनीय जिसका चरित है, जो निराकार अखण्ड है और जिसका शरीर नेत्र तथा वाणी का विषय नहीं है एवं सभी गुणों से परे है, इस प्रकार होती हुई भी जो भक्तो के दुष्कृत का नाश करने के निमित्त सगुण रूप धारण कर लेती है, वह तुम माता मेरे हृदय के दृढ अज्ञानान्धकार को दूर कर दो।।६५।।

विष्णुं शिवं द्रुहिणमित्युत ये भजन्ति
मातस्त्वमेव रचयस्यखिलान् स्वशक्त्या ।
सन्दर्शनाय च सुरान् शुभदानमीषां
नो चेदमी गतगुणाः सगुणाः कथं स्युः ।।६६।।

अन्वयः—हे मातः, ये विष्णुं शिवं द्रुहिणं भजन्ति, अमीषां सन्दर्शनाय त्वम् एव स्वशक्त्या अखिलान् शुभदान् सुरान् रचयसि। नो चेद् गतगुणा अमी सगुणाः कथं स्युः?

अर्थः—हे माँ, जो लोग तुम्हें छोड़कर विष्णु, शिव अथवा ब्रह्मा आदि देवताओं की आराधना करते हैं, उन भक्तों के दर्शन के लिए तुम ही अपनी (माया) शक्ति से शुभ देने वाले समस्त आराध्य देवों की भी रचना करती हो, अन्यथा वे गुणहीन होने पर सगुण, साकार कैसे हो सकते हैं।।६६।।

या त्वं सदैव मनसा स्मरतां स्वभासा
चेतोगृहस्थकलुषं विनिहंसि हर्षात्।
सा त्वं समस्तजनिसञ्चितकल्मषघ्ने
मातः प्रसीद मम चित्ततमोऽपहर्तुम् ।।६७।।

अन्वयः—या त्वं सदैव मनसा स्मरतां हर्षात् स्वभासा चेतोगृहस्थ-कलुषं विनिहंसि, सा त्वं समस्तजनिसञ्चितकल्मषघ्ने मातः मम चित्ततमः अपहर्तुं प्रसीद।

अर्थः—जो तुम मन से सदैव स्मरण करने वाले लोगों के हृदय-मन्दिर में स्थित दुष्कृतों का प्रसन्नतापूर्वक नाश कर देती हो, वह समस्त जन्मों के सञ्चित पापों का नाश करने वाली माँ, तुम मेरे चित्त के अन्धकार को दूर करने हेतु प्रसन्न हो।।६७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सकलभुवनरम्यं ते स्वरूपं च भव्यं
स्वयमिह विधृतं यत्स्वेच्छया चिन्मयं तत् ।
कथमिव तुलनीयं प्राकृतैर्वस्तुजातै-
स्त्रिगुणहतविकारैर्यानि सृष्टानि धात्रा।।६८।।

अन्वयः—हे अम्ब, इह स्वेच्छया स्वयं यत् सकलभुवनरम्यं ते भव्यं स्वरूपं विधृतं (त्वया) तत् तु चिन्मयम् (अस्ति) ततः प्राकृतैः वस्तुजातैः कथम् इव तुलनीयं यानि धात्रा त्रिगुणहतविकारैः सृष्टानि।

अर्थः—हे अम्ब, यहाँ स्वेच्छा से समस्त लोकों में रमणीय एवं भव्य स्वरूप तुमने जो धारण किया है, वह तो चिन्मय है, ज्ञानरूप है, उसकी तुलना प्राकृत प्रकृति से उत्पन्न वस्तुओं से कैसे की जा सकती है; क्योंकि उनकी सृष्टि तो सत्त्व, रज, एवं तम के दूषित विकारों से ब्रह्मा जी के द्वारा की गयी है।।६८।।

अरुणपदतलं ते चोपमीयेत केन
क्वचिदपि नहि लभ्यं चोपमानं ह्यदुष्टम्।
मृदुलसुरभिरक्तोत्फुल्लकञ्जेन साम्यं
यदि भवतु विधेयं तन्न रात्रौ चकास्ति।।६९।।

अन्वयः—हे अम्ब, ते अरुणपदतलं केन च उपमीयेत, क्वचिद् अपि अदुष्टम् उपमानं हि न लभ्यम्। यदि मृदुलसुरभिरक्तोत्फुल्लकञ्जेन साम्यं विधेयं भवतु तद् रात्रौ न चकास्ति।

अर्थः—हे अम्ब, आपके लाल चरणों के तलवे की उपमा किस वस्तु से दी जाय? क्योंकि कोई भी वस्तु दोषरहित नहीं प्राप्य है। यदि कोमल, सुगन्धित विकसित रक्त कमल से उसकी तुलना की जाय, तो वह रात में विकसित ही नहीं होता। आपके चरणतल तो क्षण प्रतिक्षण विकसित रहते हैं।।६९।।

तव चरणनखास्ते कानिचिद्दर्पणानि
न हि भवति च दृष्टं केवलं यत्र वक्त्रम् ।
अपि तु तव कृपामृद्वञ्जनावाप्तनेत्रै-
र्विधिकृतमखिलं तत्रेक्ष्यतेऽखण्डविश्वम् ।।७०।।

अन्वयः—हे अम्ब, तव ते चरणनखाः कानिचिद् दर्पणानि सन्ति यत्र केवलं वक्त्रं न हि दृष्टं भवति, अपि तु तव कृपामृद्वञ्जनावाप्तनेत्रैः तत्र विधिकृतम् अखिलम् अखण्डविश्वम् ईक्ष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे अम्ब, तुम्हारे चरणों के वे नख तो कोई विलक्षण ही दर्पण हैं, जिनमें केवल मुख ही नहीं दिखाई देता, वरन् जिन्हें आपके कृपाप्रसादरूप अञ्जन के प्रयोग से दिव्य दृष्टि प्राप्त हो गयी है, उन्हें तो विधाता द्वारा रचित अखिल विश्व का दर्शन उनमें होता है।।७०।।

तवाम्बैतद्वक्त्रं निरतिशयशोभाधवलितं
नवां नव्यां चैव द्युतिमनिशमाधत्त उदिताम्।
अजेशश्रीशानां भवति हृदयं वीक्ष्य चकितं
तदेतत् कि वर्ण्यं शतवदनशेषेण च मुखैः ।।७१।।

अन्वयः—हे अम्ब, निरतिशयशोभाधवलितं तव एतद् यद् वक्त्रम् अनिशम् उदितां नवां नव्यां चैव द्युतिम् आधत्ते, यद् वीक्ष्य अजेशश्रीशानां च हृदयं चकितं भवति, तद् एतत् शतवदनशेषेण च मुखैः किं वर्ण्यं स्यात्?

अन्वयः—हे अम्ब, निरतिशय शोभा से प्रकाशित तुम्हारा यह मुख जो निरन्तर स्फुरित होती हुई नयी नयी छटा धारण कर रहा है और जिसे देखकर ब्रह्मा, शिव एवं विष्णु का भी हृदय चकित हो जाता है, उसका वर्णन क्या सैकडों मुख वाले शेषनाग के समस्त मुखों से भी किया जा सकता है।।७१।।

सौन्दर्यापारसिन्धोः स्मितलसितमुखस्यानवद्यस्य तेऽम्ब
साम्यं कर्तुं न योग्यं कथमपि कविना पूर्णबिम्बेन्दुनाऽपि।
हेतुस्तत्रायमेवान्तरितमपि तमो हन्ति दीप्त्या मुखं ते
पूर्णश्चन्द्रस्तु नित्यं क्षयभयविकलो बाह्यमेवान्धकारम् ।।७२।।

अन्वयः—हे अम्ब, सौन्दर्यापारसिन्धोः स्मितलसितमुखस्य अनवद्यस्य बिम्बेन्दुना अपि कविना कथम् अपि साम्यं कर्तुं न योग्यम्। तत्र अयम् एव हेतुः (अस्ति यत्) ते मुखं दीप्त्या अन्तरितम् अपि तमो हन्ति, पूर्णः चन्द्रस्तु नित्यं क्षयभयविकलः बाह्यम् एव अन्धकारं हन्ति।

अर्थः—हे अम्ब, सौन्दर्य के अपार सागर स्वरूप प्रशंसनीय एवं मन्द मुसकान से सुशोभित तुम्हारे मुख की समस्त कलाओं से परिपूर्ण चन्द्रमा से भी कवि के द्वारा समता करना उचित नहीं है। उसमें कारण यही है कि आपका मुख तो अपनी विलक्षण द्युति से हृदय के अन्दर रहने वाले अन्धकार का भी नाश कर देता है; किन्तु पूर्ण चन्द्रमा तो नित्य अपनी कलाओं के क्षय के भय से व्याकुल रहने के कारण केवल बाहरी अन्धकार का ही नाश करता है, न कि आन्तरिक अन्धकार का भी।।७२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पद्मेनाप्युपमीयतां कथमहो दिव्याननं तेऽम्बिके
वक्त्रं ते क्व च कल्मषघ्नममलं स्वेच्छामयं भास्वरम्।
पुण्यं पुण्यजनाश्रयञ्च कमलं पद्मं क्व पङ्कोद्भवम्
उच्छिष्टं कविभिश्च नश्यति हिमे साम्यं न किञ्चित्तयोः।।७३।।

अन्वयः—हे अम्बिके ते दिव्याननं पद्मेन अपि कथम् उपमीयताम्? ते स्वेच्छामयं पुण्यं पुण्यजनाश्रयं च कल्मषघ्नम् अमलं भास्वरं वक्त्रं क्व? कमलं पङ्कोद्भवं कविभिः उच्छिष्टं हिमे नश्यति च यत् तत् पद्मं क्व? तयोः किञ्चित् अपि साम्यं नास्ति।

अर्थः—हे अम्बिके, इस अलौकिक सौन्दर्यविशिष्ट मुख की उपमा कमल से भी कैसे दी जा सकती है; क्योंकि जो स्वेच्छामय पवित्र है और पुण्यात्मा जनों द्वारा जिसका दर्शन, चिन्तन किया जाता है तथा जो नित्य निर्मल देदीप्यमान और पापों का नाश करता रहता है, वह तुम्हारा मुख कहाँ और यह कमल जो जल का मैल है, कीचड़ से उत्पन्न हुआ है, व्यक्तियों के द्वारा अनेक बार उपमित होकर जूठा हो गया है तथा जो शीतकाल में नष्ट हो जाता है, वह पद्म कहाँ? अर्थात् दोनों के सौन्दर्य में महान् अन्तर होने के कारण दोनों में कुछ भी समता नहीं है।।७३।।

उद्यल्लोहितभास्करोऽपि भजते नैवोपमानास्पदं
दीप्त्या दृष्टिविलोभनोऽपि मुनिभिर्द्रष्टुं निषिद्धः सदा।
हेयो दुग्धमुखो यथा विषघटः किन्त्वाननं तेऽम्बिके
शश्वच्छर्मदमेव भक्तमतिभिर्ध्यातं स्मृतं चेक्षितम् ।।७४।।

अन्वयरः—हे अम्बिके, उद्यल्लोहितभास्करः अपि ते मुखस्य उपमानास्पदं नैव भजते (यतः) दीप्त्या दृष्टिविलोभनः अपि स यथा दुग्धमुखः घटः हेयः, तथैव मुनिभिः द्रष्टुं निषिद्धः, किन्तु ते आननं तु भक्तमतिभिः ध्यातं स्मृतम् ईक्षितं च शश्वत् शर्मदम् एव अस्ति।

अर्थ—हे अम्बिके, उदीयमान अरुणवर्ण सूर्य भी तुम्हारे मुख का उपमान होने की पात्रता को नहीं धारण करता; क्योंकि यद्यपि वह अपनी आभा से दृष्टि को लुभा लेता है, फिर भी मुनियों ने उसके दर्शन का उसी प्रकार निषेध किया है, जैसे अन्दर विष और ऊपर दूध रखा हुए घड़ा त्याज्य होता है; किन्तु आपका मुख तो भक्तिविशिष्ट मति से ध्यान, स्मरण और दर्शन करने पर सदा सुखद ही होता है।।७४।।

तवाक्ष्णां या कान्तिस्तव नयनकान्त्यैव सदृशी
न तादृग्वस्त्वन्यत्प्रकृतिकृतसृष्ट्यां क्वचिदपि ।
तदाकृत्या किञ्चित्सममलिमिलन्नीलकमलं
न नेत्राणां मातः त्वणुरपि गुणैस्तत्र समता।।७५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—हे मातः, तव अक्ष्णां या कान्तिः सा तव नयनकान्त्या एव सदृशी। तादृग् अन्यद् वस्तु प्रकृतिकृतसृष्ट्यां क्वचिद् अपि नास्ति। यद्यपि अलिमिलत् नीलकमलं तदाकृत्या किञ्चित् समम् अस्ति; किन्तु तत्र नेत्राणां गुणैः अणुः अपि समता नास्ति।

अर्थः—हे अम्ब, तुम्हारी आँखों की जो शोभा है, वह तुम्हारे नयनों की कान्ति के ही सदृश है; क्योंकि वैसी सुन्दर वस्तु प्रकृति द्वारा रचित सृष्टि में कही भी नहीं है। यद्यपि भ्रमरयुक्त नीलकमल में उसकी आकृति से कुछ समानता है; किन्तु उसमें भी नेत्रों के गुणों से कुछ भी समानता नहीं है।।७५।।

अहो लीलालास्यं तव च नयनानामनुपमं
क्षणं दुष्टान् दग्धुं स्फुरति च यतः कालदहनः।
विपन्नाँश्चोद्धर्तुं करुणरससिन्धोऽश्रुसलिलैः
सरित्स्रोतोजालं सरति च ततस्तापशमनम् ।।७६।।

अन्वयः—हे करुणरससिन्धो अम्ब, अहो! तव नयनानाम् अनुपमं लीलालास्यम्। यतः दुष्टान् दग्धुं क्षणं कालदहनः स्फुरति, विपन्नान् उद्धर्तुं च ततः तापशमनं सरित्स्रोतोजालं च सरति।

अर्थः—हे करुणारससागर माँ, तुम्हारे नेत्रों का लीलाविलास कितना विलक्षण एवं आश्चर्यजनक है कि क्षण में दुष्टों को जला देने के लिए उसमें कालाग्नि प्रकट हो जाता है तथा आपद्ग्रस्त जनों का उद्धार करने हेतु उसमें ताप शान्त करने वाला नदियों और झरनों का जल बहने लगता है।।७६।।

श्रुतं प्राग्वृत्तं यच्छतसममनावृष्टिसमये
क्वचित्सस्याप्राप्त्या मृतिमुखविशत्त्रस्तजनता।
शताक्ष्यास्तेऽम्बाया निःसृतनिजनेत्राम्बुनिवहैः
परित्रातोत्पाद्यामृतमयफलान्नादिनिकरान् ।।७७।।

अन्वयः—हे अम्ब, प्राग्वृत्तं श्रुतं यत् शतसमम् अनावृष्टिसमये क्वचित् सस्याप्राप्त्या मृतिमुखविशत्त्रस्तजनता ते अम्बायाः शताक्ष्याः निःसृतनिज-नेत्राम्बुनिवहैः अमृतमयफलान्नादिनिकरान् उत्पाद्य परित्राता।

अर्थः—हे अम्ब, यह प्राचीन इतिहास सुना गया है कि पहले कभी सैकड़ों वर्षों तक जब अनावृष्टि हुई थी, उस समय कहीं भी भोजन-सामग्री न मिलने के कारण जब जनता मृत्यु के मुख में प्रविष्ट हो रही थी, तब उसकी रक्षा आपने अपनी सैकड़ों आँखों से निकले हुए अश्रुजल से अमृतमय फल-मूल एवं अन्नराशि उत्पन्न कर की।।७७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सदा स्वभ्रूभङ्गाकुलकुटिलनेत्राग्निशिखया
प्रचण्डाखण्डौजोबलजवमदोत्सिक्तमनसाम् ।
रिपूणां गर्वं या दहति सहसा सामरमयी
पराम्बा मे सर्वं कृतमशुभजातं जरयतु।।७८।।

अन्वयः—या सदा स्वभ्रूभङ्गाकुलकुटिलनेत्राग्निशिखया प्रचण्डाखण्डौजो-बलजवदोत्सिक्तमनसां रिपूणां गर्वं सहसा दहति सा अमरमयी पराम्बा में कृतं सर्वम् अशुभजातं जरयतु।

अर्थः—जो सदा अपने भ्रूभङ्ग से व्याकुल एवं कुटिल नेत्रों की अग्निज्वाला से प्रचण्ड अखण्ड ओज, बल एवं वेग के घमण्ड से युक्त शत्रुओं का गर्व सदा नष्ट कर देती है, वह देवमयी पराम्बा मेरे किये गये समस्त अशुभों को नष्ट कर दे।।७८।।

पुराणे शास्त्रे च त्वमसि गदिताऽम्ब त्रिनयना
शताक्षी देवी च श्रुतिमुपगतं नाम सुभगम्।
ममायं विश्वासो यदसि गणनातीतनयना
यतोऽक्षीण्यप्येते रविशशिसमेता उडुगणाः।।७९।।

अन्वयः—हे अम्ब, पुराणे शास्त्रे च त्वं त्रिनयना गदिता असि। शताक्षी देवी च सुभगं नाम श्रुतिम् उपगतम् (अस्ति); किन्तु मम अयं विश्वासः अस्ति (यत्) त्वं गणनातीतनयना असि। यतः एते रविशशिसमेता उडुगणा अपि ते अक्षीणि एव सन्ति।

अर्थः—हे अम्ब, पुराणों और शास्त्रों में तुम्हारा वर्णन त्रिनयना (त्रिनेत्रधारिणी) नाम से किया गया है तथा सुन्दर शताक्षी देवी नाम भी सुना गया है; किन्तु मेरा तो यह विश्वास है कि तुम गणनातीतनयना (असंख्यनेत्रधारिणी) हो; क्योंकि ये दृश्यमान सूर्य, चन्द्र सहित समस्त तारागण भी तो आपके नेत्र ही हैं।।७९।।

दयोल्लोलः सिन्धुस्तव च हृदयं कीदृगतुलं
यदापन्नांस्त्रातुं कृशकटितटे सौधकलशम् ।
वहन्ती प्रीत्या तान् रसयसि सुधां स्वर्णचषकैः
कृपापीयूषं तत् प्रदिश कणशो मेऽपि सरसम् ।।८०।।

अन्वयः—हे अम्ब, दयोल्लोलः सिन्धुः तव हृदयं कीदृग् अतुलम् अस्ति यद् आपन्नान् त्रातुं कृशकटितटे सौधकलशं वहन्ती प्रीत्या तान् स्वर्णचषकैः सुधां रसयसि। तत् सरसं कृपापीयूषं मे कणशः अपि प्रदिश।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे माँ, दया की उत्ताल तरङ्गों से लहराता हुआ समुद्र तुम्हारा हृदय कितना अतुलनीय है कि तुम शरणापन्न जनों की रक्षा के लिए अत्यन्त कृश अपने कटिप्रदेश पर अमृतपूर्ण कलश रखकर स्वर्णचषकों से प्रेम से उन्हें अमृत का रसास्वादन कराती हो। कृपारूपी अमृत के कुछ बिन्दु मुझे भी प्रदान करो।।८०।।

विशालो बाहूनामसिकुलिशशङ्खाभयवता-
मखण्डः सङ्घातो ग्रसितुमिव रक्षांसि लुलति ।
यथा हन्तॄन् दंष्टुं विषवमनदुर्व्यग्रफणिनां
गणः स्फारं स्फारं निजनिजफणानुत्पतति ते ।।८१।।

अन्वयः—हे अम्ब, असिकुलिशशङ्खाभयवतां ते बाहूनां विशालः अखण्डः सङ्घातः रक्षांसि ग्रसितुम् इव लुलति। यथा विषवमनदुर्व्यग्रफणिनां गणः हन्तॄन् दंष्टुं निजनिजफणान् स्फारं स्फारम् उत्पतति।

अर्थः—हे अम्ब, खड्ग, वज्र, शङ्ख एवं अभय (मुद्रा) आदि अस्त्रों को धारण करने वाली आपकी बाँहों का विशाल एवं अखण्ड समूह राक्षसों को निगल जाने हेतु उसी प्रकार लपकता है, जैसे विषवमन में व्याकुल विषैले सर्पों का समूह हत्या करने वालों को डँसने के लिए अपने फणों को फैला-फैलाकर उन पर उछल कर आक्रमण करता है।।८१।।

राजन्ते च मृणालतन्तुसदृशाः स्निग्धाः सदा बाहवो
हस्ताः पद्मसुमानि चाङ्गुलिदलान्यन्तर्दलानीव ते ।
शस्त्राणि स्फुरितानि भान्ति पवनोद्धूताः परागा यथा
स्वान्तःसारबहिःसुकोमलतराः शश्वज्जयन्त्यम्बिके।।८२।।

अन्वयः—हे अम्बिके, ते बाहवः मृणालसदृशाः स्निग्धाः, हस्ताः पद्मसुमानि इव, अङ्गुलिदलानि अन्तर्दलानीव तथा स्फुरितानि शस्त्राणि पवनोद्धूताः परागाः यथा भान्ति। स्वान्तःसारबहिःसुकोमलतराः ते बाहवः शश्वत् जयन्ति।

अर्थः—हे अम्बिके, तुम्हारी बाँहें मृणालतन्तु के समान कोमल हैं। उनके ऊपर हाथ कमल-पुष्पों के सदृश सुन्दर प्रतीत होते हैं। आपकी कोमल अङ्गुलियाँ कमल-पुष्प की पंखुड़ियों सदृश हैं तथा हाथों में चमकते चञ्चल करवाल आदि अस्त्र पवन से उड़ाये गये कमल के परागों के सदृश शोभा पा रहे हैं। हे माँ, इस प्रकार बाहर से अत्यन्त कोमल किन्तु अन्दर से अतिशय बलिष्ठ आपकी बाँहें सदा विजयिनी हो रही हैं।।८२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रीडा यस्य गजेन्द्रमस्तकघटस्फोटो नखाग्राङ्कुशै-
र्लीला शोणितपानमस्ति च सदा सोऽप्युग्रवीर्योऽपि याम् ।
सिंहो वाहनतामुपेत्य भजतेऽनिद्रोऽभिमानं विना
तामम्बां त्वमकिञ्चनो न भजसे ब्रूह्यन्धचेतः कथम् ।।८३।।

अन्वयः—यस्य क्रीडा नखाग्राङ्कुशैः गजेन्द्रमस्तकघटस्फोटः तथा लीला शोणितपानम् अस्ति। स उग्रवीर्यः सिंहः अपि अभिमानं विना वाहनताम् उपेत्य अनिद्रः भजते, ताम् अम्बां हे अन्धचेतः! ब्रूहि अकिञ्चनः त्वं कथं न भजसे।

अर्थः—जिसकी क्रीडा नखाग्ररूप अङ्कुशों से मदमत्त गजराजों के मस्तक-रूपी घड़ों को फोड़ना है और जिसकी लीला रुधिरपान करना है, वह भयङ्कर पराक्रमी सिंह भी अभिमानरहित होकर वाहन बनकर जिसकी सेवा करता है, रे अन्धा मन! तू अकिञ्चन होते हुए भी उस विश्वजननी अम्बा की भक्ति क्यों नहीं कर रहा है?।।८३।।

सान्द्रानुरागरसरञ्जितनित्यभक्त्या
प्रीता च या परिददौ मृगराजलक्ष्मीम् ।
सिंहाय हिंस्रपशवे सकुलाय चापि
तामम्बिकां न भजसे वद चित्त कस्मात् ।।८४।।

अन्वयः—सान्द्रानुरागरसरञ्जितनित्यभक्त्या प्रीता या सकुलाय हिंस्रपशवे अपि सिंहाय मृगराजलक्ष्मीं परिददौ, हे चित्त, वद ताम् अम्बिकां त्वं कस्मात् न भजसे?

अर्थः—गाढ़ प्रेमरस से रँगी हुई जिसकी नित्य भक्ति से प्रसन्न होकर जिसने हिंसा करने वाले पशु सिंह को ही नहीं, वरन् उसकी वंशपरम्परा को भी मृगराज जैसी श्रेष्ठ पदवी दे दी, उस अम्बा का तू क्यों भजन नहीं कर रहा है। हे चित्त! बताओ तो।।८४।।

दुर्भिक्षे च जना यदान्तकमुखं संयान्ति भोज्यं विना
भूमिः शुष्कमहीरुहा गतरसा धत्ते च खल्वाटताम् ।
या शाकाज्यपयोदधिप्रियरसैः स्वाद्वन्नपानादिभि-
र्विश्वं रक्षति तां व्रजामि शरणं शाकम्भरीं मातरम् ।।८५।।

अन्वयः—यदा दुर्भिक्षे जना भोज्यं विना अन्तकमुखं संयान्ति, गतरसा शुष्कमहीरुहा भूमिः खल्वाटतां धत्ते, तदा या शाकाज्यपयोदधिप्रियरसैः स्वाद्वन्न-पानादिभिः विश्वं रक्षति, तां शाकम्भरीं मातरं शरणं व्रजामि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—दुर्भिक्ष के दिनों में जब भोज्य वस्तु के अभाव के कारण लोग यमराज के मुख में जाने लगते हैं, नदी, नद एवं वृक्ष के सूख जाने से धरती खल्वाट हो जाती है, उस समय जो शाक, घी, दूध और दही आदि के द्वारा प्रिय सरस एवं स्वादिष्ट भोजन, पेय पदार्थों के द्वारा समस्त विश्व की रक्षा करती है, उस शाकम्भरी माता की शरण जा रहा हूँ।।८५।।

मातश्चित्तं नहि मम वचः संशृणोति प्रमादात्
स्वच्छन्दं च भ्रमति मधुलिट् पुष्पपुष्पं यथैव ।
सत्यञ्चैतत्तदपि न हि मया दृश्यते तस्य दोषो
यस्माच्चित्ते विहितवसतिः प्रेरिका च त्वमेव ।।८६।।

अन्वयः—हे मातः, चित्तं मम वचः प्रमादात् न हि संशृणोति, यथा एव मधुलिट् पुष्पपुष्पं स्वच्छन्दं भ्रमति तथैव भ्रमति। यद्यपि एतत् सत्यम् अस्ति तथापि मया तस्य दोषो न हि दृश्यते, यस्मात् चित्ते विहितवसतिः त्वमेव प्रेरिका असि।

अर्थः—हे माँ, मेरा चित्त प्रमाद के कारण मेरी बात नहीं सुन रहा है और जैसे भ्रमर एक पुष्प छोड़कर दूसरे पुष्पों पर मडराता है, उसी प्रकार वह भी इधर-उधर घूमता रहता है। यद्यपि यह बात सत्य है, तब भी मुझे उसका दोष नहीं मालूम होता; क्योंकि सबके हृदय में निवास करने के कारण प्रेरणा देने वाली तो तुम ही हो।।८६।।

मातर्व्याप्ता जगति विमला कीर्तिकान्तिस्त्वदीया
सर्वान्तःस्था वितरसि बलं कर्म कर्तुं सदैव ।
शैलूषीवानुपमकलया नर्तयस्येव सर्वान्
कस्ते तन्त्राद् भवति च पृथग् यो नु दूष्यो मया स्यात् ।।८७।।

अन्वयः—हे मातः, त्वदीया विमला कीर्तिकान्तिः जगति व्याप्ता यत् सर्वान्तःस्था कर्म कर्तुं बलं सदैव वितरसि। तथा शैलूषी इव अनुपमकलाकलया सर्वान् नर्तयसि एव। कः ते तन्त्रात् पृथग् भवति, यो नु मया दूष्यः स्यात्?

अर्थः—हे माँ, तुम्हारी निर्मल कीर्ति की कान्ति सारे जगत् में व्याप्त है कि सबके अन्तःकरण में स्थित रहकर सबको सदा कर्म करने की शक्ति देती रहती हो और नटी के समान अपनी अनुपम नचाने की कला से सबको नचाती ही रहती हो, तो भला बताओ कि तुम्हारे अधिकार से पृथक् कौन है, जिसे दोष दिया जाय।।८७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रूयन्ते ते शुभगुणगणा गीयमानाः समन्तात्
सद्यः प्रीता भवसि कृतयाऽनन्यभक्त्यैव मातः।
सत्यं चेन्नो भवति सुलभाया सा कृपामन्तरा ते
इच्छाभावे दलमपि न चलत्यम्बिके ते यतो हि।।८८।।

अन्वयः—हे मातः, ते शुभगुणगणाः समन्ताद्गीयमानाः श्रूयन्ते यत् कृतया अनन्यभक्त्या एव प्रीता भवसि। चेत् सत्यम्, सा ते कृपाम् अन्तरा सुलभा नो भवति। यतो हि हे अम्बिके, ते इच्छाभावे दलम् अपि न चलति।

अर्थः—हे माँ, तुम्हारे मङ्गलमय गुणगण चतुर्दिक् गाये जाते हुए सुनायी देते हैं कि की गयी केवल अनन्य भक्ति से ही तुम सद्यः प्रसन्न हो जाती हो। यद्यपि यह बात सत्य है, तथापि वह तुम्हारी अनुकम्पा के बिना सुलभ नहीं है; क्योंकि हे अम्बिके, तुम्हारी इच्छा के बिना एक पत्ता भी नहीं हिल सकता।।८८।।

नैतन्मे घटते मनागपि मतौ भक्ता ते के प्रियाः
ये त्वद्भक्तिरताजविष्णुगिरिशाद्याराधनातत्पराः ।
तेऽपि स्युस्त्वदनन्यभक्तगणतः प्रेयांस एवाखिला
दृश्यन्ते हि यतः सतां प्रियतरा दासात्तु दासानुगाः ।।८९।।

अन्वयः—हे अम्ब, मे मतौ एतत् मनाग् अपि न घटते यत् के ते प्रिया भक्ता न सन्ति, ये त्वद्भक्तिरताजविष्णुगिरिशाद्याराधनातत्पराः (सन्ति) ते अपि त्वदनन्यभक्तगणतः प्रेयांस एव स्युः। यतो हि (लोके) सतां दाशात् तु दासानुगाः प्रियतरा दृश्यन्ते।

अर्थः—हे माँ, मेरी बुद्धि में यह बात किञ्चित् मात्र भी नहीं बैठती है कि कौन भक्त आपके प्रिय नहीं हैं; क्योंकि जो आपके अतिरिक्त आपकी भक्ति में तत्पर ब्रह्मा, विष्णु एवं शङ्कर आदि देवताओं की भक्ति करते हैं, उन्हें तो आपको अपने अनन्य भक्तों से भी प्रिय समझना चाहिए; क्योंकि लोक में यही देखा जाता है कि सज्जनों को अपने भक्त से अधिक प्रिय दासों के दास ही होते हैं।।८९।।

त्वमसि जननि वेदा वेदवेद्या च सिद्धा
क्रमपदघनपाठैर्ऋग्यजुःसामगानैः ।
उषसि मधुरकण्ठैर्गीयमाना त्वमेव
स्पृश मम हृदयान्तर्वल्लकीमस्तरागाम् ।।९०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—हे जननि, त्वं वेदा वेदवेद्या च सिद्धा (असि) त्वम् एव मधुरकण्ठैः क्रमपदघनपाठैः ऋग्युजःसामगानैः उषसि गीयमाना असि। अस्तरागां मम हृदयान्तर्वल्लकीं स्पृश।

अर्थः—हे अम्ब, तुम ही वेदस्वरूप हो और वेदों से जानने योग्य भी हो। तुम्हारा ही गान प्रातः मधुर कण्ठों से क्रम, पद एवं घनपाठ सहित ऋग्वेद, यजुर्वेद एवं सामवेद के द्वारा किया जाता है। जिसका राग समाप्त हो गया है, उस मेरे हृदय की आन्तरिक वीणा का स्पर्श करो।।९०।।

गुणाः स्पर्शं तेऽम्बाकृतिरपि न किञ्चिद्विदधते
स्वयञ्ज्योतिः शुद्धा महिमनि निजे चैव रमसे ।
तथापि त्वं लोके प्रणतजनतातापहरणं
विधातुं लीलाः स्वां रचयसि सदा मङ्गलमयीः ।।९१।।

अन्वयः—हे अम्ब, गुणाः आकृतिः अपि ते किञ्चिद् अपि स्पर्शं न विदधते। स्वयञ्ज्योतिः शुद्धा (सती) निजे महिमनि एव रमसे। तथापि त्वं लोके प्रणतजनतातापहरणं विधातुं सदा स्वां मङ्गलमयीः लीलाः रचयसि।

अर्थः—हे अम्ब, यद्यपि गुण और आकृति तुम्हारा तनिक भी स्पर्श नहीं करती, तुम अपनी शुद्ध महिमा में विराजमान होकर रमण करती हो, तथापि अपने से उत्पन्न जनता का ताप हरण करने के लिए नित्य मङ्गलमयी लीला करती रहती हो।।९१।।

यदा देवा दैत्यै रणभुवि समे चैव विजिता-
स्तदा तैर्दैत्यघ्नं जनयितुमलं शूरतनयम् ।
स्तुता त्वं स्नेहार्द्रा शिवशुभकरे न्यास्य च करं
चकर्थादर्शं यच्चरितमशुभं नः शमयतु ।।९२।।

अन्वयः—यदा दैत्यैः रणभुवि समे देवा विजिताः, तदा तैः दैत्यघ्नम्, अलं शूरतनयं जनयितुं तत् स्तुता तदा स्नेहार्द्रा सती शिवशुभकरे करं न्यास्य यद् आदर्शचरितं चकर्थ तत् नः अशुभं शमयतु।

अर्थः—जब दैत्यों के द्वारा युद्धक्षेत्र में सभी देवता पराजित हो गये, तब उन्होंने उन दैत्यों का नाश करने में समर्थ अपार बलशाली वीर पुत्र उत्पन्न करने के लिए आपकी स्तुति की। उसके बाद स्नेह से द्रवित होकर भगवान् शङ्कर के हाथ में अपना हाथ रखकर पाणिग्रहण कराकर आपने जो आदर्श चरित्र किया, वह हमारे अशुभ का शमन करे।।९२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो शीलं लीलाकृतिरथ रतिश्चाप्यनुपमा
मनो वश्यं याभिः कृतमपि सुखेन स्मररिपोः ।
पुनीता नारीणां चरिततयो याश्च विहिता-
स्तदाचारात्सर्वाः प्रियपतिसुखं यान्ति सुभगाः ।।९३।।

अन्वयः—हे अम्ब, अहो! ते शीलं लीला आकृतिः अथ च अनुपमा रतिः अपि अस्ति, याभिः स्मररिपोः अपि मनः वश्यं कृतम्। या च पुनीता नारीणां चरिततयः विहिताः तदाचारात् सर्वाः सुभगाः प्रियपतिसुखं यान्ति।

अर्थः—हे अम्ब, तुम्हारा स्वभाव, लीला, आकृति और अनुपम प्रेम कितना आश्चर्यजनक है कि उनके द्वारा कामदेव के शत्रु भगवान् शङ्कर के मन को भी सरलता से अपने वश में कर लिया। उस समय जो-जो प्रिय पवित्र चरित्र आपके द्वारा किये गये, उनके आचरण करने से सभी सौभाग्यवती स्त्रियाँ अपने पति के सौभाग्य-सुख को प्राप्त करती हैं।।९३।।

येनासावमरावती च विजिता सेन्द्रा सुराश्चौजसा
लोकान् स्वानपहाय दुर्गमवनेष्वन्तर्हितास्त्रासतः ।
सूत्वा त्वं खलतारकासुरममुं हन्तुं सुतं षण्मुखं
रक्षश्चक्रमनीनिशश्च सहसा तां त्वां न को वा भजेत् ।।९४।।

अन्वयः—हे अम्ब, येन ओजसा असौ सेन्द्रा अमरावती सुराः च विजिताः, तथा ते त्रासतः स्वान् लोकान् अपहाय दुर्गमवनेषु अन्तर्हिताः। तदा त्वं अमुं खलतारकासुरं हन्तुं षण्मुखं सुतं सूत्वा सहसा रक्षश्चक्रम् अनीनिशः, तां त्वां को वा न भजेत्?

अर्थः—हे माँ, जिसने अपने बल से इन्द्र सहित उस अमरावती नामक इन्द्र पुरी को तथा सभी देवताओं को जीत लिया और वे उसके भय से अपने-अपने लोकों को छोड़कर दुर्गम जङ्गलों में छिप गये। उस समय उस दुष्ट तारकासुर का वध करने के लिए आपने षडानन (कार्तिकेय) पुत्र उत्पन्न कर तुरन्त समस्त राक्षसों का नाश कर दिया, ऐसी दयालु माँ की कौन भक्ति नहीं करेगा।।९४।।

विघ्नेशो गुणिनां वरोऽपि तनयः सूतस्त्वया चाम्बिके
विघ्नव्यूहविनाशनाय नुतया प्रौढान्तरायाहतैः ।
दृष्ट्वा तेऽनुपमां कृपाञ्च विहितां सर्वैर्नृदेवासुरै-
रादौ त्वं ससुताऽर्चिता विजयसे तां त्वां नुवामीश्वरीम् ।।९५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—हे अम्बिके, प्रौढान्तरायाहतैः नुतया त्वया विघ्नव्यूहविनाशनाय गुणिनाम् अपि वरः तनयः विघ्नेशः सूतः, ते इमाम् अनुपमां विहितां कृपां दृष्ट्वा सर्वैः नृदेवासुरैः आदौ अर्चिता ससुता विजयसे। तां त्वाम् ईश्वरीम् अहम् नुवामि।

अर्थः—हे अम्बिके, प्रबल विघ्नों से आहत जनों के स्तुति करने पर तुमने विघ्नों के जाल को नष्ट करने के लिए गुणियों मे श्रेष्ठ पुत्र श्री विघ्नेश्वर गणेश को जन्म दिया। तुम्हारी इस अनुपम अनुकम्पा को देखकर सभी मनुष्य देवों एवं असुरों के द्वारा कार्य के आरम्भ में ही पुत्र श्री गणेश सहित तुम्हारी सदा पूजा की जाती है। तुम ही सर्वाभीष्टप्रदायिनी हो। मैं तुम्हारी स्तुति कर रहा हूँ।।९५।।

लाभो मानवजन्मनोऽस्ति चरमो मातश्च ते दर्शनं
याचे त्वां तदवाप्नुयां च हि यथा देवाश्च नुत्याप्नुवन् ।
नैवाप्तं ह्यधुनाऽपि हन्त विगताश्चाशीतिसंख्यासमा
नैवाद्यापि दृशोस्तृषामपनयेर्व्यर्थं भवेज्जीवनम् ।।९६।।

अन्वयः—मातः, ते दर्शनं मानवजन्मनः चरमः लाभोऽस्ति। त्वां तद् याचे तद् अवाप्नुयाम्, यथा देवाश्च नुत्या आप्नुवन्। परन्तु अशीतिसंख्यासमाः विगताः, तथापि अधुना अपि न एव आप्ता यदि अद्य अपि दृशोः तृषां न अपनयेः, तदा जीवनं व्यर्थं भवेत्।

अर्थः—हे माँ, तुम्हारा दर्शन ही मानव जन्म का अन्तिम लाभ है। उसकी मैं आपसे याचना करता हूँ कि वैसे ही वह मुझे प्राप्त हो, जैसे देवों ने स्तुति के द्वारा प्राप्त किया। परन्तु मेरे जीवन के छिहत्तर वर्ष बीत गये, तब भी आपके दर्शन नहीं प्राप्त हुए। यदि अब भी आप मेरे नेत्रों की प्यास नहीं शान्त करतीं, तो मेरा जीवन ही व्यर्थ हो जायेगा।।९६।।

धनं दत्से धान्यं भवनमपि सौधं धवलितं
प्रियां भार्यां स्निग्धां मधुरवचनां सुन्दरमुखीम् ।
सुतं वश्यं विद्याविनयलसितं साधुचरितं
किमस्त्यत्राम्ब त्वं प्रभवसि न यद्वै वितरितुम् ।।९७।।

अन्वयः—हे अम्ब, त्वं धनं धान्यं धवलितं सौधं भवनं स्निग्धां मधुरवचनां सुन्दरमुखीं प्रियां भार्यां विद्याविनयलसितं साधुचरितं वश्यं सुतम् अपि दत्से। (हे अम्ब,) अत्र किं वस्तु अस्ति यद् वितरितुं न प्रभवसि?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे माँ तू, धन, धान्य, सुधाश्वेत भवन, प्रेममयी मधुरभाषणी सुन्दर गुण वाली प्रिया भार्या, विद्या-विनय से विभूषित सदाचारी एवं आज्ञाकारी पुत्र भी देती हो। हे माँ, इस जगत् में कौन-सी वस्तु है, जिसे तुम देने में समर्थ नहीं हो।।९७।।

स्तुता विद्यार्थिभ्यो वितरसि च विद्या हि विविधाः
मुमुक्षुभ्यो मुक्तिं विषयसुखकामाय विषयान् ।
सुखेप्सुभ्यः सौख्यं विपुलमतुलं दुर्लभमपि
भविष्णुस्त्वां मातर्नहि भजति को वा स्थिरमतिः ।।९८।।

अनन्वयः—हे मातः, स्तुता त्वं विद्यार्थिभ्यः विविधाः विद्याः, मुमुक्षुभ्यः मुक्तिम्, विषयसुखकामाय विषयान्, सुखेप्सुभ्यः अतुलं दुर्लभम् अपि विपुलं सौख्यं च वितरसि। (हे मातः) भविष्णुः को वा स्थिरमतिः त्वां न भजति?

अर्थः—हे माँ, स्तुति करने पर विद्याथियों को अनेक प्रकार की विद्यायें, मुक्ति चाहने वाले को मुक्ति एवं विषय-सुख चाहने वाले को अनुपम अपार दुर्लभ सुख भी देती हो। माँ, कौन-सा अभ्युदय चाहने वाला स्थिर बुद्धि है, जो आपका भजन नहीं करता है?।।९८।।

स्तुतिर्वाचः शुद्धिं नतिरपि दिशत्याशु विनतिं
श्रुतिस्ते लीलाया हरति हृदयस्थं घनतमः ।
गतिः सद्यो मातस्तव च शरणं राति कुशलं
भवेयं ते लुब्धः पदकमलभृङ्गोऽतिचटुलः ।।९९।।

अन्वयः—हे अम्ब, ते स्तुतिः वाचः शुद्धिः नतिः आशु विनतिम् अपि दिशति। ते लीलायाः श्रुतिः हृदयस्थं घनतमः हरति। तव शरणं गतिः सद्यः कुशलं राति। हे मातः, अहम् अतिचटुलः लुब्धः ते पदकमलभृङ्गः भवेयम्।

अर्थः—हे अम्ब, तेरी स्तुति वाणी की शुद्धि और प्रणति शीघ्र ही विनय प्रदान करती है। तेरी लीला-कथाओं का श्रवण हृदय के गहन अन्धकार का नाश करता है। अतः मैं तेरे चरणकमल पर भ्रमण करने वाला अतिलोभी भ्रमर हो जाऊँ।।९९।।

भव्यं हर्म्यं भवति च सदा बन्धनं व्योमचुम्बि
सुभ्रूभङ्गप्रहितनयनापाङ्गबाणप्रहारः ।
देहे गेहे सुतहितधने चञ्चले चाभिमानः
सर्वं मोघं भवति च कृपावर्मणाच्छादिते ते ।।१००।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्वयः—व्योमचुम्बि भव्यं हर्म्यं च सदा बन्धनं भवति, सुभ्रू भङ्गप्रहितनयनापाङ्गबाणप्रहारः चञ्चले देहे गेहे सुतहितधने अभिमानश्च (एतत्) ते कृपावर्मणा आच्छादिते सर्वं मोघं भवति।

अर्थः—गगनचुम्बी सुन्दर भवन जो सदा बन्धन का हेतु होता है, सुन्दर स्त्रियों के नेत्रकोणों का कुटिल बाणप्रहार जो असह्य होता है तथा चञ्चल देह, भवन, पुत्र, मित्र और धन जो अभिमान के कारण होते हैं, वे सभी उन पर व्यर्थ हो जाते हैं, जिनके ऊपर आपकी कृपा का कवच पड़ा हुआ है।।१००।।

ये चित्ते ते चरणसरसीजातमम्ब स्मरन्ति
येषां वाण्यां वसति च सदा नाम दुर्गेति रम्यम् ।
तेषां चित्तात्सरति च तमो भाति च ज्ञानरश्मिः
तस्मात्तैर्वै भवति विदितं वस्तुतो वस्तुरूपम् ।।१०१।।

अन्वयः—हे अम्ब, ये चित्ते ते चरणसरसीजातं स्मरन्ति, येषां वाण्यां दुर्गा इति रम्यं नाम सदा वसति, तेषां चित्तात् तमः सरति, ज्ञानरश्मिः च भाति। तस्मात् तैः वै वस्तुतः वस्तुरूपं विदितं भवति।

अर्थः—हे अम्ब, जो सदा अपने मन में आपके चरणकमलों का स्मरण करते हैं और जिनकी वाणी में श्रीदुर्गा जी का पवित्र नाम सदा विद्यमान रहता है, उनके मन से अज्ञान अन्धकार दूर हो जाता है और ज्ञान की किरण फूट पड़ती है। इस कारण उन्हें सांसारिक वस्तुओं के वास्तविक स्वरूप ज्ञात होते हैं।।१०१।।

कामिन्यास्ते स्मितमपि मुखं श्लेष्मराशिं विदन्ति
उत्तुङ्गं तद् घनकुचयुगं पूर्णकुम्भं विषस्य ।
हासे मन्देऽधरकिसलये तप्तनिस्त्रिंशधारा-
स्तस्मान्मेऽन्तः पदनखमणी राजतां ते सदैव ।।१०२।।

अन्वयः—ते कामिन्याः स्मितं मुखम् अपि श्लेष्मराशिं विदन्ति। उत्तुङ्गं तद् घनकुचयुगं विषस्य पूर्णकुम्भं (विदन्ति) तथा मन्दे हासे अधरकिसलये च तप्तनिस्त्रिंशधाराः (विदन्ति) तस्मात् मे अन्तः ते पदनखमणिः सदैव राजताम्।

अर्थः—जिन्हें आपके चरणकमलों के दर्शन हुए हैं, वे कामिनियों के मुस्कराते हुए सुन्दर मुख को भी श्लेष्मा की ढ़ेर समझते हैं। उनके उत्तुङ्ग एवं सघन दोनों स्तनों को विषपूर्ण घट समझते हैं एवं उनके मन्द हास-परिहास तथा अधर पल्लव में उष्ण तलवार की धार दिखाई देती है। अतः हे माँ, मेरे अन्तःकरण में आपके चरणकमलों की नखमणि सदा प्रकाशित होती रहे।।१०२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरी श्रेष्ठा काशी तव च वदनं मुक्तिसदनं
त्रिशूले तिष्ठन्ती जयति च सदा खण्डपरशोः ।
तदीशस्त्वां भिक्षामटति च शिवो यत्र सततं
सदा तत्रावासो भवतु तव पादार्चनकृते ।।१०३।।

अन्वयः—पुरी श्रेष्ठा काशी तव च वदनं मुक्तिसदनं सा खण्डपरशोः त्रिशूले तिष्ठन्ती सदा जयति। यत्र तदीशः शिवः त्वां सततं भिक्षाम् अटति, तत्र ते पादार्चनकृते सदा मम वासः भवतु।

अर्थः—सभी नगरियों में श्रेष्ठ काशी, जो आपका मुख और मुक्ति का भवन है, वह श्री शङ्कर जी के त्रिशूल पर सदा से विराजमान है एवं उसके स्वामी शिव जी जहाँ निरन्तर आपसे भिक्षा माँगते रहते हैं, वहाँ आपकी भिक्षा-प्राप्ति के लिए हमारा सदा निवास हो।।१०३।।

सदा यस्याः पादावमरतटिनीलोललहरी-
कराग्रैः स्नाप्येतेऽविरलतरलैः स्निग्धसरलैः ।
वसद्भ्यो भक्तिं ते दिशति च विमुक्तिं मृतवते
वसेयं तत्राहं सह दयितया तेऽम्ब दयया ।।१०४।।

अन्वयः—यस्याः पादौ अविरलतरलैः स्निग्धसरलैः अमरतटिनीलोल-लहरीकराग्रैः सदा स्नाप्येते। या वसद्भ्यः ते भक्तिं मृतवते विमुक्तिं च दिशति, हे अम्ब, तत्र अहं ते दयितया सह वसेयम्।

अर्थः—हे माँ, जिसके चरण निरन्तर चञ्चल, स्निग्ध एवं सरल देवनदी गङ्गा के चञ्चल तरङ्गरूपी कराग्रों से स्नान कराये जाते हैं, जो अपने क्षेत्र में निवास करने वालों को आपकी भक्ति और मरने वाले की मुक्ति प्रदान करती है, वहाँ आपकी कृपा से मैं अपनी पत्नी के साथ निवास करूँ।।१०४।।

विजानीते लोकस्तव च शरणं मामुपगतं
जगद्गर्तावर्तात्पतितमपि नोद्धरसि चेत्
यशो व्याप्तं दिक्षु प्रणतजनसन्तापहरणं
न नश्येच्छङ्केयं मम जननि चेतो व्यथयति ।।१०५।।

अन्वयः—हे जननि लोकः तव च शरणं माम् उपगतं विजानीते। चेद् जगद्गर्तावर्तात् पतितम् अपि मां न उद्धरसि, तर्हि ते दिक्षु व्याप्तं प्रणतजनसन्तापहरणं यशः न नश्येत्, इयं शङ्का मे चेतः व्यथयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे माँ, यह संसार अच्छी प्रकार जानता है कि मैं आपके शरण में पहुँचा हुआ हूँ। ऐसी स्थिति में जब इस संसाररूप गढ़े के भवर में मैं फँसा हुआ हूँ और शरणापन्न भी हूँ, तब भी यदि आप मेरा उद्धार नही करती हैं, तो समस्त दिशाओं में शरणागत जनों के सन्तापों को नष्ट करने का जो आपका यश व्याप्त है, वह नष्ट न हो जाय, यह शङ्का मेरे हृदय को बहुत ही व्यथित कर रही है।।१०५।।

मातर्मे स्वजनाः प्रियाः परिजनाः प्रेम्ण च ये पालिताः
सान्द्रस्नेहिजना वयसि मे तुर्येऽपि गर्वोद्धताः ।
द्रुह्यन्तीति मनस्तथापि च पुनस्तेष्वेव चासज्जते
आसक्तिं सुदुस्त्यजां जननि मे को वा हरेत्त्वां विना ।।१०६।।

अन्वयः—हे मातः, प्रेम्णा पालिता ये स्वजनाः प्रियाः परिजनाः सान्द्र-स्नेहिजनाः च ते गर्वोद्धताः तुर्ये अपि वयसि मे द्रुह्यन्ति, तथापि मे मनः तेषु एव आसज्जते। हे जननि, तां सुदुस्त्यजां मे आसक्तिं त्वां विना कः हरेत्?

अर्थः—हे माँ, मैंने प्रेम से जिन स्वजनों एवं प्रियजनों का पालन-पोषण किया था, वे तथा अन्य घनिष्ठ प्रेमीजन गर्व से उद्धत होकर इस वृद्धावस्था में भी मुझसे द्रोह कर रहे हैं, तथापि मेरा मन उन्हीं में आसक्त हो रहा है, जिसका त्याग करना अत्यन्त कठिन है, मेरी उस आसक्ति को आपके विना दूसरा कौन हर सकता है?।।१०६।।

आयुर्याति यथायथं द्रुततरं वायुर्ह्यदृष्टो यथा
आगच्छन्ति च दण्डबन्धनकरा याम्याश्च चण्डाश्चराः ।
कामा माऽऽकुलयन्त्यसाधनजनं किं वा विधेयं मया
नो जाने क्रियतां यथेच्छसि तथा दासोऽस्म्यहं तावकः ।।१०७।।

अन्वयः—हे अम्ब, अदृष्टः वायुर्हि यथा आयुः यथायथं द्रुततरं याति दण्डबन्धनकरा याम्याः चण्डाः चराः आगच्छन्ति च तथा कामा असाधनजनं मां आकुलयन्ति। मया किं वा विधेयम् इति न जाने। त्वं यथा इच्छसि तथा क्रियताम्। अहं तावकः दासः अस्मि।

अर्थः—हे अम्ब, जैसे वायु चली जाती है और दिखाई नहीं देती, उसी प्रकार अदृष्ट होकर आयु भी जैसे-जैसे द्रुत गति से व्यतीत हो रही है और यमराज के चण्ड भयङ्कर दूत दण्ड और बन्धन हाथ में लेकर समीप आ रहे हैं, वैसे ही भौतिक इच्छाएँ मुझ साधनहीन जन को व्याकुल कर रही हैं। इस दयनीय स्थिति में मुझे अपने कर्तव्य का ज्ञान नहीं हो रहा है। आप जैसा चाहें, वैसा करें, मैं आपका अकिञ्चन दास हूँ।।१०७।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीचग्राम्यकथाप्रवृत्तिविवशा वाणी मदीयाऽम्बिके
दिव्यं ते चरितामृतं रसयितुं किञ्चिन्न चाकाङ्क्षते ।
तद्वृत्तिं च विनाश्य तामशुभदां मे श्रेयसे प्रेयसे
स्वस्या नामगुणाकृतिप्रवचने रक्तां सदा तां कुरु ।।१०८।।

अन्वयः—हे अम्बिके, नीचग्राम्यकथाप्रवृत्तिविवशा मदीया वाणी ते दिव्यं चरितामृतं रसयितुं किञ्चित् च न आकाङ्क्षते। ताम् अशुभदां तद्वृत्तिं विनाश्य मे प्रेयसे श्रेयसे च तां स्वस्या नामगुणाकृतिप्रवचने सदा रक्तां कुरु।

अर्थः—हे माँ, नीचों की ग्राम्य कथा कहने की प्रवृत्ति की वशवर्तिनी मेरी वाणी तेरे दिव्य चरितामृत का तनिक भी रसास्वादन करना नहीं चाहती। उसकी उस अमङ्गलप्रद प्रवृत्ति को नष्ट कर मेरे प्रेय एवं श्रेय के लिए सदा कल्याणकारक अपने दिव्य नाम, रूप एवं गुण का कीर्तन करने में उसे सदा अनुरक्त करो।।१०८।।

नेत्रे मे तव भव्यविग्रहरुचेः सन्दर्शने स्तां रते
घ्राणौ ते चरणारविन्दसुलभं सत्सौरभं जिघ्रताम् ।
श्रोत्रे मे शृणुतां सदैव ललितां लीलाकथां शान्तिदां
हस्तौ स्तां तव पूजने स्तुतिकथालेखे च रक्तौ सदा ।।१०९।।

अन्वयः—हे अम्ब, मे नेत्रे तव भव्यविग्रहरुचेः छटासन्दर्शने रते स्ताम्। घ्राणौ ते चरणारविन्दसुलभं सत्सौरभं जिघ्रताम्। मे श्रोत्रे सदैव शान्तिदां ते लीलाकथां शृणुताम्, तथा च हस्तौ स्तुतिकथालेखे च सदा रक्तौ आस्ताम्।

अर्थः—हे अम्ब, मेरी आँखें तुम्हारे भव्य विग्रह की शोभा के अवलोकन में तत्पर रहें। मेरे नाक आपके चरणारविन्द-सुलभ सुगन्ध का आघ्राण करें। मेरे कान सदा शान्ति देने वाली लीला-कथा का ध्यान करें तथा ये हाथ तुम्हारे पूजन एवं स्तुति, गुण कथन तथा लेखन में अनुरक्त रहें।।१०९।।

यावन्तो हि ममायुषः क्षणलवाः शिष्यन्त एवाधुना
मातस्त्वच्चरणाम्बुजामृतरसास्वादोत्सुकस्तावतः ।
हित्वा चञ्चलतां मनोमधुकरस्त्वां सेवतां सर्वदा
आगच्छत्यपि मृत्युकिङ्करगणे मा ते स्मृतिः क्षीयताम् ।।११०।।

अन्वयः—हे मातः, मे आयुषः यावन्तः क्षणलवाः अधुना शिष्यन्ते, तावतः मे मनोमधुकरः चञ्चलतां हित्वा ते त्वच्चरणाम्बुजामृतरसास्वादोत्सुकः सर्वदा त्वां सेवताम् । मृत्युकिङ्करगणे आगच्छति अपि ते स्मृतिः मा क्षीयताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे माँ, मेरी आयु के क्षणों के जितने भी अंश अभी शेष हैं, उनमें मेरा मनरूपी भ्रमर अपनी चञ्चलता छोड़कर निरन्तर तुम्हारे चरणारविन्द के अमृत-मय रस का आस्वाद न करने में उत्सुक होकर सदा तुम्हारी सेवा करे तथा यमराज के दूतों के आने पर भी आपकी स्मृति क्षीण न हो।।११०।।

अन्ते ते मधुरं च दुर्गतिहरं दुर्गेति नामाक्षरं
भूयः संसृतिनाशनं शिवमयं संव्याहरन्तोऽनिशम् ।
रूपे तेऽतिमनोहरे प्रियमनः संयोजयन्तः प्रियाः
प्राणा यान्तु च सन्निधिं जननि ते सेवारसं भुञ्जताम् ।।१११।।

अन्वयः—हे जननि, अन्ते मधुरं दुर्गतिहरं च भूयः संसृतिनाशनं शिवमयं दुर्गेति नामाक्षरम् अनिशं संव्याहरन्तः ते अतिमनोहरे रूपे प्रियमनः संयोजयन्तः मे प्रियाः प्राणाः ते सन्निधिं यान्तु सेवारसं च भुञ्जताम्।

अर्थः—हे माँ, जीवन के अन्तिम क्षण में अत्यन्त मधुर, दुर्गतिनाशक तथा पुनर्जन्म का नाश करने वाले सर्वदा मङ्गलमय तुम्हारे पवित्र दुर्गा नाम का उच्चारण करते हुए तथा तेरे अतिसुन्दर रूप में प्रिय मन को संयुक्त करते हुए ये मेरे प्राण तुम्हारे सान्निध्य को प्राप्त करें और आपकी सेवा के आनन्द का उपभोग करें।।१११।।

प्रमादादालस्याद्विषयविषमोहाकुलधियः
उताभावात्काव्यप्रणयनकलाया जननि ते।
यशः शुभ्रं गीतं प्रथमवयसीशे नहि मया-
पराधः क्षम्योऽयं तव च शरणं मे गतवतः ।।११२।।

अन्वयः—हे ईशे जननि, प्रमादात् आलस्यात् विषयविषमोहाकुलधियः उत काव्यप्रणयनकलाया अभावात् प्रथमे वयसि मया ते शुभ्रं यशः न गीतम्, तव च शरणं गतवतः मे अयम् अपराधः त्वया क्षम्यः।

अर्थः—हे शासन करने वाली माँ, प्रमाद से, आलस्य से, विषय-विष के मोह से बुद्धि के व्याकुल होने के कारण अथवा काव्य-रचना की कला के अभाव से अपने जीवन के प्रथम अंश में आपके शुभ्र यश का गान मैंने नहीं किया है। माँ! मेरे इस अपराध को क्षमा करने की अनुकम्पा करना; क्योंकि मैं आपकी शरण में पहुँच चुका हूँ।।११२।।

मनसि संस्थितयैव शिवे त्वया रचयिता स्तुतिपद्यसुमालिका।
सविनयं चरणेषु समर्प्यते मुदितया कृपया परिगृह्यताम् ।।११३।।

अन्वयः—हे शिवे, मनसि संस्थितया त्वया एव स्तुतिपद्यसुमालिका रचयिता, सा ते चरणेषु सविनयं समर्प्यते, मुदितया कृपया परिगृह्यताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अर्थः—हे शिवे, मेरे मन में स्थित होकर आपने ही इन स्तुति-श्लोकों की सुन्दर माला की रचना करायी है। यह आपके चरणों में विनयपूर्वक समर्पित की जा रही है। कृपया आप इसे प्रसन्नतापूर्वक ग्रहण करें।।११३।।

प्रीत्यै च ते पठतु यः स्तुतिपद्यमाला-
मेनां समर्पयतु चेच्चरणारविन्दे ।
तस्मै प्रसीद जगदम्ब दयासुधाब्धे
दातुं सदैव च वरान् मनसोऽनुकूलान् ।।११४।।

अन्वयः—हे दयासुधाब्धे जगदम्ब, ते प्रीत्यै यः एनां स्तुतिपद्यमालां पठतु ते चरणारविन्दे चेत् समर्पयतु, तस्मै मनसोऽनुकूलान् वरान् सदैव दातुं प्रसीद।

अर्थः—हे दयासागर जगदम्ब, तुम्हारी प्रसन्नता के लिए जो इस स्तुति-श्लोक-माला का पाठ करे और इसे आपके चरणारविन्द में अर्पित करे, उसे मनोऽनुकूल (वरदान) वर देने के लिए सदा प्रसन्न रहें।।११४।।

।। इति कुशीनगरजनपदस्थ-नदवाविशुनपुरग्रामवास्तव्येन पण्डितश्रीऋषिराज-पाण्डेयतनयेन श्रीविद्याधरदत्तपाण्डेयेन पराम्बानुकम्पाप्रसादाद् विरचितं पराम्बास्तुतिशतकं सम्पूर्णम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघु-ग्रन्थमाला

[६१]

आचार्यश्रीरघुदेवभट्टाचार्यविरचितः

आकाङ्क्षावादः

सम्पादकः

डॉ. हरेरामत्रिपाठी

उपाचार्यः, न्यायविभागे

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य

नवदेहली

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वि.सं. २०५८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमिका

प्रमाणं विना न पदार्थस्य ज्ञानं भवितुमर्हति। पदार्थज्ञानं विना न प्रवृत्तिसामर्थ्यम्। प्रमाणेन खलु अयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति हातुमिच्छति वा। अतः सर्वप्रथमं प्रमाणस्य किं लक्षणमिति जिज्ञासा भवति। उच्यते प्रमीयते अनेन इति प्रमाणम्। यद्वा, प्रमायाः करणं प्रमाणम्। यथार्थानुभवः प्रमा, तस्याः साधकतमं वातिशयितं करणं वा प्रमाणम्।

चार्वाकमते प्रत्यक्षमेकं प्रमाणम्। वैशेषिकमते प्रत्यक्षानुमाने द्वे प्रमाणे विद्येते। शाक्यमतेऽपि प्रत्यक्षपरोक्षभेदेन प्रमाणं द्विविधम्। अत एवोक्तम्—

ते हि प्रमेयद्वैविध्यात् प्रमाणं द्विविधं जगुः।
नान्यः प्रमाणभेदस्य हेतुर्विषयभेदतः[1] ।।

सांख्यमते प्रत्यक्षानुमानशब्दाः प्रमाणानि सन्तीति। तत्रार्थापत्त्या सह प्रत्यक्षादीनि पञ्च प्रमाणानीति **प्राभाकराः**। अभावेन सह षडिति **भाट्टाः**। प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावसम्भवैतिह्या अष्टौ प्रमाणानीति केचिद् वदन्ति। तत्र न्यायनये प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। अर्थापत्तिप्रमाणस्य अनुमानेऽन्तर्भावः सम्भवैतिह्ययोः प्रमाणयोश्च शब्देऽन्तर्भावः। अभावप्रमाणस्य प्रत्यक्षे चान्तर्भावः कर्तुं शक्यत इति **नैयायिका** वदन्ति। तत्र "आप्तोपदेशः[2] शब्दः"। अस्यार्थो वात्स्यायनभाष्यकारेणोच्यते—"आप्तः[3] खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा। साक्षात्करणमर्थस्याप्तिः, तया प्रवर्तत इति आप्तः"। दृष्टार्थादृष्टार्थावित्याप्तो द्विविधः। सूत्रकृतशब्दस्य लक्षणे शब्दः लक्ष्यः आप्तोपदेशः लक्षणम्। वाचस्पतिमिश्रेणोच्यते—सुदृढेन[4] प्रमाणेनावधारिताः साक्षात्कृता धर्माः पदार्था हिताहितप्राप्तिपरिहारार्था येन स आप्त

---

१. न्यायमञ्जरी, प्रमाणप्रकरणम्, पृ. ४३। (सं.सं.वि.वि. वाराणसी, संवत् २०३९)
२. न्यायसूत्रम्, वात्स्यायनभाष्यसहितम्, अ. १आ. १ सू. ८।
(चौखम्बा संस्कृत सीरिज, वाराणसी, १९७०)
३. तदेव, पृ. ४०।
४. न्यायवार्तिकतात्पर्यटीका, पृ. २०२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति। उपदिश्यते अनेनेति उपदेशः = वाक्यज्ञानं तदर्थज्ञानं वाभिधीयते। यद्वा उपदिश्यते अभिधानक्रिया क्रियते। श्रोत्रग्राह्यवस्तुकरणिका तदर्थ-प्रतीतिरभिधानक्रिया। श्रोत्रग्राह्यस्य वर्णराशेरेवार्थप्रतीतिकरणत्वान्न तु श्रोत्रप्रत्ययाविषयविशेषः स्फोटात्मा शब्दः। श्रोत्रेन्द्रियेण शब्दस्य ग्रहणं भवति।

अत्र जिज्ञासा भवति शब्दः गुणो वा द्रव्यमिति? वैशेषिकसूत्रकारेणोच्यते, किमपि द्रव्यमेकसमवायिकारणकं न भवति; परन्तु शब्दस्यैकमाकाशं द्रव्यमेव[1] समवायिकारणमतो न द्रव्यं शब्दः। न च कर्मपदार्थे एकमेव द्रव्यं समवायिकारणं भवति, अत एव शब्दः कर्म विद्यत इति वाच्यम्। शब्दत्वं न कर्मवृत्तिः चाक्षुष[2]प्रत्यक्षा-वृत्तिजातित्वाद् रसत्वादिवत्। इत्यनुमानेन शब्दस्य कर्मपदार्थेऽन्तर्भावो न कर्तुं शक्यते। शब्दः गुणः आकाशमात्रवृत्तित्वाद् इत्यनुमानेन शब्दस्य गुणत्वं निष्पन्नमिति।

सूत्रकारेण शब्दस्य लक्षणमुच्यते—"श्रोत्रग्रहणो योऽर्थः स शब्दः[3]"। अस्यार्थः—श्रोत्रं ग्रहणं ग्रहकरणं यस्य स श्रोत्रग्रहणः, अर्थ इति धर्मी इति वैशेषिकसूत्रोपस्कारः। तथा च श्रोत्रेन्द्रियेण यस्य वस्तुनो ग्रहणं भवति, अथवा श्रोत्रेन्द्रियं करणं यस्मिन् धर्मिणि भवति, स शब्दः। शब्दस्य नित्यपदार्थेन, सह वैधर्म्य[4]मुपलभ्यते, अतः शब्दो न कण्ठताल्वाद्यभिघाताद् व्यङ्ग्यः, भेरीदण्डसंयोगादिभ्यो वा। कण्ठताल्वाद्यभिघाताच्छब्दः प्रादुर्भवति। तथा चोत्पत्तिमत्त्वादनित्योऽयं शब्दः। यद्वा कारणवत्त्वादनित्यः। कारणतो विकारादनुमीयते जन्योऽयं न तु अभिव्यङ्ग्यः। भेरीदण्डसंयोगाद् वा वंशे पाट्यमाने विभागात् शब्दाच्चापि शब्दस्योत्पत्तिर्भवति[5]। यतो हि भेरीदण्डसंयोगाज्जायमानं शब्दं प्रति भेरीदण्डसंयोगोऽसमवायिकारणं भेर्याकाशसमवायिकारणञ्च भवति। एवं वंशे पाट्यमाने वंशदलद्वयविभागो निमित्तकारणं दलाकाशविभागश्चा-समवायिकारणं दलाकाशं समवायिकारणञ्च भवति। यत्र च दूरे वीणादुत्पन्नः शब्दस्तत्र सन्तानक्रमेणोत्पद्यमानः शब्दः कर्णशष्कुल्यवच्छिन्नमाकाशदेशमासादयन् गृह्यते, तेन शब्दादपि शब्दस्योत्पत्तिर्भवति।

अत्र केचिद् वदन्ति—यथा पञ्चकृत्वो रूपं पश्यतीति स्थिरस्य रूपस्याभावो दृष्टः, तथा दशकृत्वोऽधीतोऽनुवाको विंशतिकृत्वोऽधीत इत्यभ्यासः स्थैर्ये[6]

---

१. एकद्रव्यत्वान्न द्रव्यम्। (वैशेषिकसूत्रोपस्कारः, पृ. १८३)
२. नापि कर्माऽचाक्षुषत्वात्। (तदेव, पृ. १८३)।
३. वैशेषिकसूत्रोपस्कारः, पृ. १७९।
४. नित्यवैधर्म्यात्। (अ. २ आ. २ सूत्र २७, पृ. १८५)
५. संयोगाद्विभागाच्च शब्दाच्च शब्दनिष्पत्तिः। (अ. २ आ. २ सू. ३१, पृ. १८८)
६. द्वयोस्तु प्रवृत्त्योरभावात्। (अ. २ आ. २ सू. ३३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दस्य प्रमाणम्। सिद्धे च स्थैर्ये नाशकानुपलब्धेः। तथा च शब्दो नित्यः, नाशकसामग्र्यभावत्वे सति स्थैर्य्यत्वात्। एवं "त्रिप्रथमामन्वाह त्रिरुत्तमाम्" इति प्रथमोत्तमयोः[1] सामिधेन्योः त्रिरुच्चारणं स्थैर्य्यं विनाऽनुपपन्नम्। तथा च शब्दो नित्यः प्रत्यभिज्ञासद्भावात्। इत्याद्यनुमानेन शब्दस्य नित्यत्वं सिद्धमिति चेत्, न, उक्तहेतवः सन्दिग्धानैकान्तिकाः[2] सन्ति। अत एव शब्दे नित्यत्वं साधयितुमसमर्थाः सन्ति। तथा च शब्दः अनित्यः, आशुतरविनाशित्वात्।

न्यायसूत्रकारेण शब्दप्रमाणस्य यल्लक्षणमुक्तं तद्वर्णितम्। वाक्यज[3]-प्रमासाधकतमः शब्द इति लक्षणमालायामुदयनाचार्येणोक्तम्। प्रयोगहेतु[4]भूतार्थतत्त्व-ज्ञानजन्यः शब्दः प्रमाणमिति गङ्गेशोपाध्यायः। अस्यार्थः—प्रयोगहेतुभूतं = प्रयोगकारणीभूतं यदर्थतत्त्वज्ञानं यद् अर्थविषयकतत्त्वज्ञानं तज्जन्यः प्रमाणं शब्द इत्यन्वयः। प्रथमतो येन केनापि प्रमाणेन वक्तुर्वाक्यार्थज्ञानं ततो वाक्यार्थज्ञानज्ञानं तदनन्तरं परस्य वाक्यार्थज्ञानं भवत्विति वाक्यार्थज्ञानेच्छा, ततो वाक्यार्थज्ञानरूपेष्टसाधनताज्ञानाद् वाक्ये इच्छा, तदनन्तरं वाक्यरूपेष्टसाधनता-ज्ञानात् कृतिसाध्यताज्ञानसहकृतात् कण्ठाभिघातादौ चिकीर्षा, ततः कण्ठाभिघातादिसाधिका कण्ठाद्युपादानकप्रवृत्तिः, ततः कण्ठादिचेष्टाविभागादिक्रमेण कण्ठाभिघाताद्युत्पत्तिः, ततो वाक्योत्पत्तिरिति प्रणाल्या प्राचां नये परम्परया वक्तृवाक्यार्थबुबोधयिषापूर्वकवाक्यत्वावच्छिन्नं प्रति वक्तृवाक्यार्थज्ञानस्य हेतुतया च सर्वत्र लक्षणं सङ्गमनीयमिति। यद्वा, प्रयोगो हेतुभूतो यस्येति व्युत्पत्त्या प्रयोगाद्धेतोः भूतमुत्पन्नमिति व्युत्पत्त्या वा प्रयोगहेतुभूतपदं शाब्दत्वरूपजाति-विशेषविशिष्टपरं, तादृशं यदर्थतत्त्वज्ञानं तदेव जन्यं यस्येति रीत्या शाब्दप्रमाकरणत्वं लक्षणमिति, अर्थपदञ्च स्वरूपकथनम्।

यद्वा, प्रयोगहेतुभूतमर्थतत्त्वज्ञानमस्येति प्रयोगहेतुभूतार्थतत्त्वज्ञानमाप्तः, तज्जन्यः शब्दः प्रमाणम्। यद्वा, अर्थविषयकं यत्तत्त्वज्ञानं तज्जन्यः शब्द इति। अर्थतत्त्वज्ञानादाप्तो भवकरणापाटवादन्यादृशो भवतीति तद्वारणाय प्रयोगहेतु-भूतेति। प्रयुज्यते अनेनेति प्रयोगः, समीचीनः प्रयत्नः, तं प्रति अर्थचिख्यापयिषा-द्वारा हेतुभूतं यत्तत्त्वज्ञानं तज्जन्य इति भ्रमप्रमादविप्रलिप्सादिव्युदासः। यद्वा, प्रयोगो वाक्यप्रयोगो हेतुभूतो लिङ्गतया ज्ञापको यस्यार्थतत्त्वज्ञानस्य तज्जन्य इत्यर्थः। यद्वा,

---

१. प्रथमा शब्दात्। (अ. २ आ. २ सू. ३४)
२. सन्दिग्धाः सति बहुत्वे। (अ. २ आ. २ सू. ३६)
३. लक्षणमाला।
४. तत्त्वचिन्तामणिः, शब्दखण्डः, भागः-१, चौखम्बा-संस्करणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोगहेतुभूतो जनको यस्यार्थतत्त्वज्ञानस्य श्रोतृनिष्ठस्य तत्समानविषयको ज्ञानजन्यः शब्द इति। यद्वा, अर्थ इति वाक्यादर्थ्यमानोऽर्थः संसर्गस्तद्विषयकं यत्तत्त्वज्ञानं तज्जन्यः शब्दः प्रमाणम्। न च शब्दप्रमाणस्य प्रत्यक्षे वानुमानेऽन्तर्भावान्न पृथक् प्रमाणान्तरमिति वाच्यम्, आकाङ्क्षादिमत् पदप्रयोज्यतत्तदर्थसंसर्गावगाही यो बोधः, स नियन्त्रितार्थकत्वात्, तादृशपदोपस्थाप्यस्यैवार्थस्यावगाहित्वान्न प्रत्यक्षो नानुमितिरिति। यथोक्तं जगदीशेन—

साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।

सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा[१] ।। इति ।

अस्यार्थः—प्रत्यक्षप्रमायामनुमितिप्रमायाञ्च वा शाब्दप्रमायाः अनन्तर्भावात् प्रत्यक्षानुमानभिन्नं शब्दाख्यं तृतीयं प्रमाणं विद्यते। यतो हि आकाङ्क्षासत्ति-योग्यताविशिष्टपदप्रयोज्यो यस्तत्तदर्थसंसर्गावगाही बोधोऽनुभवो जायते, स चायं बोधस्तादृशपदोपस्थाप्यस्य एवार्थस्यावगाहित्वान्न प्रत्यक्षानुमित्योरन्तर्भवितुमर्हति। शब्दप्रमाणस्य फलं शाब्दबोधप्रमा विद्यते। शब्दप्रमाणेन कथं शाब्दबोधो जायत इति जिज्ञासायां मुक्तावलीकारेणोच्यते—

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।

शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी[२] ।।

शाब्दबोधे पदविषयकं ज्ञानं करणं, पदज्ञानजन्यं यत् पदार्थस्य ज्ञानं व्यापारो भवति। शब्दसमूहात्मकवाक्यजन्यो यो वाक्यार्थबोधः, सः फलं वा प्रमा उच्यते। पदजन्यपदार्थस्मरणात्मकव्यापारे 'एतत्पदजन्यबोधविषयतावानर्थो भवतु' 'अर्थविषयकबोधजनकतावत् पदं भवतु' एतादृशी शक्तिधीः सहकारिकारणं भवति। शाब्दबोधे आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानञ्च कारणं भवति। ययोः पदयोः परस्परमन्वयबोधजनकत्वे तात्पर्यं तयोः पदयोरव्यवधानमासत्तिः। अव्यवधानेनान्वयप्रतियोग्युपस्थितिः। अस्यार्थः—अन्वयप्रतियोगिनोः पदार्थयोर-व्यवधानेनोपस्थितिरासत्तिः। यद्वा, स्वाव्यवहितत्वसम्बन्धेन तत्तत्पदार्थोपस्थितिमती तत्तत्पदार्थोपस्थितिस्तत्पदार्थे तत्पदार्थस्यासत्तिः।

'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता'[३] इति कारिकावलीकारः। अर्थाद् एकपदार्थेऽपरपदार्थसम्बन्धो योग्यता इति। तत्त्वचिन्तामणिकारेण योग्यतायाः

---

१. शब्दशक्तिप्रकाशिका, का. सं. ३।

२. न्यायसिद्धान्तमुक्तावली, पृ. २९१।

३. तदेव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पूर्वपक्षीयलक्षणानां[१] निरूपणमित्थं विहितम्—समभिव्याहृतपदार्थसंसर्गव्याप्यधर्मत्वम्, समभिव्याहृतपदार्थसंसर्गाभावव्याप्यधर्मशून्यत्वम्, प्रकृतसंसर्गबाधकस्याभावः, इतरपदार्थसंसर्गाभावप्रमाविषयत्वाभावोऽपरपदार्थे, बोधनीयसंसर्गाभावप्रमाविरह इति। चिन्तामणिकृतयोग्यतायाः सिद्धान्तलक्षणन्तु बाधकप्रमाविरहो योग्यता, सा चेतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावः, अर्थात् तदीयान्वयितावच्छेदकसम्बन्धेन तन्निष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वसामान्याभावस्तत्र तद्योग्यता इति। यद्वा, इतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं योग्यता इति।

वक्तुरिच्छा तु तात्पर्यमिति[२] न्यायसिद्धान्तमुक्तावलीकारः। अस्यार्थः—एतत्पदादेतदर्थो भवत्विति प्रयोक्तृसमवेता इच्छा तात्पर्यम्। "वस्तुतस्तु[३] इतरपदस्य इतरपदार्थसंसर्गज्ञानपरत्वं तात्पर्यम्। तच्च वेदे न्यायादवधार्यते लोके न्यायात् प्रकरणादेर्वा" इति चिन्तामणिकारः। तात्पर्याधीनं शब्दप्रामाण्यमित्यनेन तात्पर्यस्य महत्त्वं गङ्गेशोपाध्यायेन तत्त्वचिन्तामणौ प्रदर्शितम्।

शाब्दबोधे आकाङ्क्षायाः कारणत्वं नैयायिकाः स्वीकुर्वन्ति। शब्दशक्तिप्रकाशिकायाः मङ्गलाचरणे जगदीशेनोच्यते—

अनुभवहेतुः सकले सद्यः समुपासिता मनुजे ।
साकाङ्क्षाऽऽसन्ना च स्वार्थे योग्या सरस्वती देवी ।।

अन्यच्च—

साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः ।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा ।।
रूढ्यर्थेऽन्यत्र वा यत्र यदाऽऽकाङ्क्षादिनिश्चयः ।
तदैव तत्र योगार्थस्यान्वयो मणिकृन्मतः[४] ।।

अर्थात् समुदायशक्त्युपस्थापिते पदान्तरवृत्त्युपस्थापिते वा यत्र धर्मिणि अवान्तरवृत्तिलभ्यार्थस्य यदाकाङ्क्षादिनिश्चयः, तदैव तत्र तस्यान्वयबोध उत्पद्यते सम्भूतसामग्रीकत्वात्।

---

१. तत्त्वचिन्तामणिः, माथुरीसहितः, प्रथमपरिच्छेदः।
२. न्यायसिद्धान्तमुक्तावली, पृ. ३५१।
३. तत्त्वचिन्तामणौ शब्दाप्रामाण्यवादः, पृ. १७९।
४. शब्दशक्तिप्रकाशिका, का. सं. २८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यच्च—

मिथः साकाङ्क्षशब्दस्य व्यूहो वाक्यं चतुर्विधम् ।
सुप्तिङन्तचयो नैवमतिव्याप्त्यादिदोषतः[१] ।।

अर्थात् परस्पराकाङ्क्षाविशिष्टशब्दसमुदायो वाक्यम्। तच्चतुर्विधम्। प्रत्येकसमुदायाभ्यामतिव्याप्त्यादिदोषात् सुबन्ततिङन्तचयो वाक्यं न भवितुमर्हति। उपरोक्तवाक्यानामालोचनया प्रतिभाति यत् शाब्दबोधे आकाङ्क्षायाः कारणत्वं निर्विवादमिति। न्यायनये आकाङ्क्षाया अनेकानि लक्षणानि सन्ति। "पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाऽननुभावकत्वमाकाङ्क्षा" इत्यन्नम्भट्टः। "आकाङ्क्षा तावत् श्रोतरि तदुत्पाद्य संसर्गावगमप्रागभावः" इत्युदयनाचार्याः। यत्पदं विना यस्य पदस्य नान्वयबोधजनकत्वं तयोः पदयोः पूर्वापरीभाव आकाङ्क्षा। "एते पदार्था मिथः संसर्गवन्तः, आकाङ्क्षादिमद्भिः स्मारितत्वात्, गामभ्याजेति पदार्थसार्थवत्"। "संसर्गावगमप्रागभावमात्रमाकाङ्क्षा। यद्वा, "स्मारिततदाक्षिप्ताविनाभाव-विशिष्टमाकाङ्क्षा" इति **शङ्करमिश्राः।**

योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका ।
प्रत्येकं वा मिलित्वा वा नैते लिङ्गमसिद्धितः[२] ।।

अस्यार्थः—अर्थगता बाधाभावरूपायोग्यता तथा शब्दनिष्ठान्वय-बोधानुकूलानुपूर्वीरूपाकाङ्क्षा च शाब्दबोधजनिका भवति; किन्तु प्रत्येकमेकैकशो मिलित्वा सम्भूय वैते योग्यताकाङ्क्षा स्वयमसिद्धत्वाद्धेतोर्न लिङ्गं भवितुमर्हति। अत्र जगदीशेन[३] "शब्दनिष्ठान्वयबोधानुकूलानुपूर्वीरूपाकाङ्क्षा" इत्याकाङ्क्षायाः स्वरूपं निरूपितम्। "तत्तदानुपूर्वीपर्यवसिताकाङ्क्षा" इति **रामरुद्रभट्टाचार्यः।** एकपदस्मारितधर्मिकापरपदस्मारितसंसर्गबोधेच्छारूपाकाङ्क्षा इति **कृष्णकान्त-भट्टाचार्यः।** यत्पदाभावप्रयुक्तं[४], यत्पदस्यान्वयबोधाजनकत्वं तत्पदसमभि-व्याहृततत्पदत्वमाकाङ्क्षा इति **विश्वनाथः।** अन्ये तु एकपदार्थज्ञाने तदर्थान्वय-योग्याऽपरपदार्थस्य यज्ज्ञानं तद्विषयिणीच्छा आकाङ्क्षा इति वदन्ति। न चाविना-भावः आकाङ्क्षा, अर्थात् तत्पदार्थेन विना यो भावः सत्त्वं तदभावः। यद्वा, तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकाङ्क्षा इति वाच्यम्।

---

१. शब्दशक्तिप्रकाशिका (श्लो. १३, पृ. ६३) का.सं. २८।
२. तदेव (श्लो. ४, पृ. ११) का.सं. २८।
३. तदेव, पृ. ११।
४. न्यायसिद्धान्तमुक्तावली, पृ. ३४८ (यत्पदेन विना यस्याननुभावकता भवेद् आकाङ्क्षा)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीलं सरोजं, नीलो घटः, पीतो घटः, विमलं जलं नद्याः, घटकर्मत्वमित्यादावतिप्रसङ्गः। नापि प्रकृतपदसमभिव्याहृतपदस्मारिते प्रकृतपदस्मारितस्य जिज्ञासा साकाङ्क्षा, शाब्देच्छाशून्यस्यापि वाक्यार्थबोधात्। ज्ञाप्यतदितरान्वयप्रकारकजिज्ञासानुकूलपदार्थोपस्थितिजनकत्वे सत्यजनिततात्पर्यविषयान्वयबोधत्वमाकाङ्क्षा इति।

चिन्तामणिकारेण गङ्गेशेनोक्तम्—अभिधानापर्यवसानमाकाङ्क्षा[1], यस्य येन विना न स्वार्थान्वयानुभावकत्वं तस्य तदपर्यवसानम्। अत्राभिधानपदं करणव्युत्पत्त्या शब्दोच्चारणमभिधत्ते तस्यापर्यवसानं = फलानुत्पादः। तथा च तदुच्चारणजन्यतादृशशाब्दबुद्धौ तदुच्चारणजन्यतादृशशाब्दधीप्रागभाव आकाङ्क्षा। अस्य लक्षणस्य घटः कर्मत्वमित्यादावतिव्याप्तिरित्यतश्चिन्तामणिकारेण पारिभाषिकमभिधानपर्यवसानयत्पदनिष्ठयत्पदव्यतिरेकप्रयुक्तो यादृशान्वयबोधाभावस्तत्पदस्य तत्पदवत्त्वं तादृशान्वयबोधेऽभिधानापर्यवसानम्। पदत्वमत्र शब्दत्वं, प्रयुक्तत्वञ्च कारणाभावात् कार्याभाव इति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः। तत्प्रतियोगिजन्यप्रतियोगिकत्वं वा तत्प्रयुक्तत्वं, भवति चाव्यवहितपूर्ववर्तिता रूपसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानुस्वारपदस्य व्यतिरेकप्रयुक्तो घटवत्कर्मत्वमिति भेदान्वयबुद्ध्यभाव इति तादृशान्वयबोधे घटपदस्यानुस्वारपदत्वमाकाङ्क्षा।

एवं विनिगमनाविरहादव्यवहितोत्तरवर्तितारूपसमभिव्याहारसम्बन्धेनानुस्वारपदनिष्ठस्य घटपदस्य व्यतिरेकप्रयुक्तोऽपि घटवत्कर्मत्वमिति भेदान्वयबुद्ध्यभाव इत्यनुस्वारपदस्य घटपदवत्त्वमपि तादृशान्वयबोधे आकाङ्क्षा। अन्वयबोधसमर्थत्वे सति अजनिततात्पर्यविषयान्वयबोधत्वमाकाङ्क्षा इति केचिद् वदन्ति। प्रकृतिप्रत्ययाभ्यामन्वयबोधे जनितेऽपि वाक्यैकवाक्यं तावत् क्रियाकारकपदयोरजनितान्वयबोधत्वमाकाङ्क्षा। वेदान्तिनः पदोपस्थितयोरन्वयप्रतियोग्यनुयोगिनोः परस्परजिज्ञासाविषयत्वयोग्यतैवाकाङ्क्षा।

रघुदेवतर्कालङ्कारकृताकाङ्क्षावादस्य कानिचिद् आकाङ्क्षाया लक्षणान्युच्यन्ते—

१. तद्रूपावच्छिन्नपदविषयकोपस्थितिव्यतिरेकप्रयुक्तप्रकृतान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगिस्वावच्छिन्नपदविषयकोपस्थितिको यो धर्मस्तद्वत्त्वमेव तद्रूपावच्छिन्नपदनिरूपिताकाङ्क्षा।

२. परस्परसमभिव्याहृततत्तद्रूपावच्छिन्नपदोपस्थितव्यतिरेकप्रयुक्तान्वयबोधाभाव एव तत्पुरुषनिष्ठप्रकृतान्वयबोधे तत्तद्रूपावच्छिन्नपदयोराकाङ्क्षा।

---

१. तत्त्वचिन्तामणिः, शब्दखण्डस्य प्रथमो भागः, पृ. २०८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. स्वाव्यवहितत्वविशिष्टोत्तरत्वसम्बन्धेन तत्पदवत्त्वमेवाकाङ्क्षा।

४. एतत्पदज्ञानानन्तरमेतत्पदज्ञानं भवत्वित्याकारकाभिप्रायविषयत्वरूपानुपूर्व्येवाकाङ्क्षा।

५. तत्तन्नामार्थयोरन्वयबोधे समानविभक्तिकत्वं नामापदयोरानुपूर्वीविशेषाकाङ्क्षा।

६. इतरविभक्तिसहितयोरानुपूर्व्या अप्याकाङ्क्षात्वम्।

७. यादृशयादृशानुपूर्वीज्ञानादेव यादृशयादृशबोधस्तत्र तादृशानुपूर्वीविशेषस्यैवाकाङ्क्षात्वम्।

८. नव्याः प्रकृतिप्रत्ययादीनामानुपूर्वीविशेषावच्छिन्ननिष्ठाकाङ्क्षा, तत्र प्रत्ययनिष्ठ-अम्पदत्वावच्छिन्नादिरूपानुपूर्वीविशेषावच्छिन्ननिष्ठप्रकृतिनिष्ठा घटपदत्वनीलपदत्वादिरूपानुपूर्वीविशेषावच्छिन्नाव्यवहितोत्तरत्वरूपानुपूर्वीनामार्थधात्वर्थाभेदोपयोग्याऽऽकाङ्क्षा।

९. यादृशं नाम पदान्तरं यादृशपदं कदाचिदपि केनचिन्नोच्चरितम्, अथ च तादृशं नाम केनचिन्मौनिना तादृशपदमव्यवधानेन लिखितं तादृशलिप्यनुमिततथाविधपदयोराकाङ्क्षाविरहादिति चेत्, न, तत्र व्यवहितोच्चरितयोस्तथाविधपदयोरव्यवधानघटिताकाङ्क्षा।

१०. आनयनाद्यंशे घटकर्मत्वाद्यन्वयबोधे चानयेत्यादिपदस्य घटमित्यादिपदोत्तरत्वं तादृशपदपूर्वत्वं वाकाङ्क्षा।

११. आख्यातान्तोपस्थाप्यपाकानुकूलकृत्यादिप्रकारकबोधे प्रथमान्तनामपदनिष्ठानुपूर्वीविशेषावच्छिन्नव्यवधानघटितपौर्वापर्यमाकाङ्क्षा। इत्यलं विस्तरेण।

कृतज्ञताज्ञापनम्—

कस्यापि ग्रन्थस्य सम्पादने काठिन्यमनुभवन्त्येव विद्वांसः। अतस्तत्तद् विद्यासु पारङ्गतानां गुरुवर्याणामेवादौ कार्तज्ञ्यं शिरसा वहामि। अस्मद्गुरुवराणामाचार्य**श्रीवशिष्ठत्रिपाठिमहोदयानां** साहाय्येनेदं कार्यं सम्पादितमत एतेषां गुरूणां चरणाभ्यां सनतिं कुसुमाञ्जलिं वितरामि।

पूज्यमातृपितृचरणाभ्यां सनतिं कुसुमाञ्जलिं वितरामि। परमश्रद्धेयानामाचार्यप्रवराणां **श्रीविद्यानिवासमिश्रमहोदयानां** पादपद्मयोर्भूयोभूयः सश्रद्धं प्रणतिं समर्पयामो येऽस्मासु नितरां स्निह्यन्ति। तत्कृपयैव सत्प्रेरणया चेदं कार्यं सम्पादितं मया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य हस्तलेखस्य मूलछायाप्रतिः **सरस्वतीभवनपुस्तकालयतः** प्राप्ता। एतदर्थं तद्विश्वविद्यालयस्य कुलपतयः **प्रो. राममूर्तिशर्माणः**, अधिकारिणः पुस्तकालयाध्यक्षाश्च धन्यवादार्हाः। जम्बूस्थरघुनाथमन्दिरपुस्तकालयस्य धर्मार्थट्रस्टाधिकारिणो विशेषतस्तत्पुस्तकालयाध्यक्षाः **डॉ. धनीरामशास्त्रिणो** धन्यवादार्हाः। **डॉ. ललितकुमारत्रिपाठि**नोऽपि धन्यवादार्हाः, येषां सत्प्रेरणया इदं कार्यं मया सम्पादितम्।

अतः परं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्याङ्गीभूतस्य अनुसन्धान-संस्थानस्य निदेशकानां **डॉ. राजारामशुक्लमहोदयानाम्**, प्रकाशनसंस्थानस्य निदेशकानां **डॉ. हरिश्चन्द्रमणित्रिपाठिमहोदयानाञ्च** सत्प्रेरणया कार्यमेतत् पूर्णतामगात्। अतस्तान् प्रति कार्तज्ञ्यं शिरसा वहामि। **डॉ. ददन-उपाध्यायैः**, अन्यैः संस्थाने कार्यरतैः कर्मचारिभिश्चापि सततपरामर्शपूर्वकं मुद्रणसौविध्यं सम्पादितमतस्तान् प्रति हृदयेन कृतज्ञतां वितरामि। श्रीजीकम्प्यूटरसञ्चालकाः **श्रीअनूपकुमारनागर**महोदया धन्यवादार्हाः, यैः अस्य ग्रन्थस्य मुद्रणं शीघ्रमेव कृतम्।

अस्य ग्रन्थस्य सम्पादनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीय**सरस्वती-भवनपुस्तकालयतः** प्राप्तां पाण्डुलिपिमाश्रित्य कृतम्। पाठनिर्धारणार्थं वा पाठान्तरार्थं **रघुनाथपुस्तकालय-जम्बूतः** एका पाण्डुलिपिर्लब्धा। यथामति पाठनिर्धारणार्थं कश्चन प्रयत्नो व्यधायि, तथापि अत्र यदि काश्चन त्रुटयः स्युः, तर्हि क्षमां याचे।

अन्ते च विश्वनाथस्वरूपं हनुमन्तं प्रणम्य विरमामि।

सुधीविधेयः

हरेरामत्रिपाठी

उपाचार्यः, न्यायविभागस्य

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे

नवदेहली

शारदीयं नवरात्रम्

वि.सं. २०५८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमणी

क्र.सं.	विषयः	पृष्ठ-संख्या
१.	शब्दज्ञानस्य शाब्दं प्रति हेतुत्वम्	१
२.	पदज्ञानत्वेनैव शाब्दत्वावच्छिन्नं प्रति हेतुत्वम्	२
३.	आकाङ्क्षाज्ञानस्य शाब्दत्वं प्रति हेतुत्वस्वीकारे युक्तिः	२
४.	आकाङ्क्षायाः पूर्वपक्षीयलक्षणम्	३
५.	वस्तुतस्तुपक्षे आकाङ्क्षाया लक्षणम्	३
६.	अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यत्र बोधानुपपत्तिः	३
७.	यत्तुमते कार्यकारणभावः	४
८.	कर्मत्वादिविशेष्यक आधेयत्वादिसंसर्गकघटादिप्रकारकबोधो द्विविधकारणकार्यभावस्य कल्पनम्	४
९.	अस्मन्मतम्	५
१०.	आकाङ्क्षाज्ञानस्य हेतुत्वम्	६
११.	यत्तुमतम्	६
१२.	तात्पर्यज्ञानहेतुत्वम्	७
१३.	मन्मतम्	८
१४.	'घटो नीलः' इत्यत्र शाब्दबोधानुपपत्तिः	९
१५.	आकाङ्क्षाया लक्षणम्	१०
१६.	यत्तुमतम्	१०
१७.	आकाङ्क्षायाः स्वमते लक्षणम्	११
१८.	मीमांसकमतम्	१२
१९.	आनुपूर्वीविशेषात् शाब्दबोधः	१२
२०.	आलङ्कारिकमते विधेयाविमर्शदोषः	१३
२१.	आकाङ्क्षाया लक्षणम्	१३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२. कुम्भः कर्मत्वमित्यत्र शाब्दबोधापत्तिः १५
२३. वस्तुतस्तुमतम् १५
२४. आकाङ्क्षाज्ञानस्य शब्दबोधहेतुत्वम् १७
२५. यत्तुमते आकाङ्क्षाज्ञानस्य शब्दबोधहेतुत्वम् १७
२६. भवन्मतम् १९
२७. अत्रेदं समाधीयते २०
२८. एतन्मतम् २०
२९. यत्तुमतम् २१
३०. भवन्मतम् २१
३१. अस्मन्मतम् २२
३२. आकाङ्क्षाज्ञानस्य शाब्दबोधहेतुत्वम् २३
३३. भवन्मतम् २३
३४. नियमविशेषकार्यकारणभावसूची २५
३५. प्रकीर्णानि २७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यश्रीरघुदेवभट्टाचार्यविरचितः

आकाङ्क्षावादः

ओं श्रीगणेशाय नमः। सिद्धायां शाब्दाख्यविलक्षणप्रमायां तत्करणतया शब्दज्ञानस्य स्वतन्त्रप्रमाणता। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रे शब्दपदं शब्दज्ञानपरम्। अतीतानागतशब्दानुसन्धानादपि शाब्दबोधाच्छब्दस्य तद्धेतुत्वासम्भवात् शब्दज्ञानस्य[२] शाब्दत्वावच्छिन्नं प्रति शब्दज्ञानत्वेन वर्णज्ञानत्वेन वा हेतुता। वर्णत्वञ्च ध्वनिव्यावृत्तश्शब्दनिष्ठो जातिविशेषः। सामान्यसामग्र्या[३] विशेषसामग्रीसमवहिताया एव कार्योत्पादकत्वान्निराकाङ्क्षादिशाब्दज्ञानान्न शाब्द[४]रूपसामान्यधर्मावच्छिन्नापत्तिः। तत्तद्धर्म[५]विषयकशाब्दत्वावच्छिन्नहेतुभूतपदज्ञानजन्य[६]तत्तदर्थोपस्थितिरूपायास्तत्तदर्थविशेष्यकतत्तत्संसर्गकतत्तदर्थप्रकारकशाब्दत्वावच्छिन्नहेतुभूततत्तदर्थोपस्थापकपदनिरूपिततत्तदाकाङ्क्षादिज्ञानरूपायाश्च[७] विशेष्यसामग्र्या विरहात्।

अथैवं विशेषसामग्रीत एव निर्वाहे कृतं सामान्यकारणतया, विशेषसामग्रीजन्यतावच्छेदककोटौ शाब्दत्वनिवेशस्यावश्यकतयैव कार्यमात्रवृत्तिधर्मस्य कार्यतावच्छेदकत्वोपपत्तेः[८]। अस्तु वा[९] लाघवाज्ज्ञानत्वेनात्मत्वेनैव वा शाब्दत्वावच्छिन्नं प्रति[१०] हेतुतेति चेत्, न, शब्दज्ञानशून्यकालीनशाब्द[११]ज्ञानसामान्यानुत्पादेऽनन्तविशेषसामग्रीविरहकूटस्य प्रयोजकत्वापेक्षया शब्दज्ञानत्वावच्छिन्नाभावस्य वर्णज्ञानत्वावच्छिन्नाभावस्य वैकस्य प्रयोजकत्वे लाघवेन सामान्यकारणताया अपि सप्रमाणकत्वात्। ईदृशलाघवानुरोधेन कारणत्व[१२]सिद्धौ स्मृतिस्वर्गादौ संस्कारादृष्टादीनां[१३] हेतुताविलयप्रसङ्गात्। तादृशकारणसमवधानवतोऽपि पुंसः कदाचिदेव स्मृतिस्वर्गादिरूपकार्य[१४]मुत्पद्यत इत्येतादृश-

१. ख ग पुस्तके शाब्दबोधो सत्या इति पाठः; २. ख ग पुस्तके शब्दज्ञानस्य चेति पाठः।
३. ख ग पुस्तके शाब्दसामग्र्याश्च इति पाठः; ४. ख ग पुस्तके शाब्दत्व इति पाठः।
५. ख ग पुस्तके तत्तदर्थविषयक इति पाठः; ६. ख ग पुस्तके जन्य इति पाठः।
७. ख ग पुस्तके परस्पराकाङ्क्षाज्ञानादिरूपायाश्च विशेषसामग्र्या विरहादिति पाठः।
८. ख ग पुस्तके नियमोपपत्तेरिति पाठः; ९. ख ग पुस्तके 'वा' इत्यस्य पाठो नास्ति।
१०. ख ग पुस्तके 'प्रति' पाठो नास्ति; ११. ख ग पुस्तके 'ज्ञान'पदस्य पाठो नास्ति।
१२. ख ग पुस्तके कारणत्वासिद्धाविति पाठः; १३. ख ग पुस्तके संस्कारादृष्टविशेषादीनामिति पाठः।
१४. ख ग पुस्तके 'रूप' इत्यस्य पाठो नास्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियमनिर्वाहायाननुगतानामुद्बोधकानां कालविशेषाणाञ्च विशेषसामग्रीत्वकल्पनाया आवश्यकत्वात्तत एवोपपत्तेः। अत एव[१] यद्विशेषयोः कार्यकारणभावो बाधकं विना तत्सामान्ययोरपीति प्राचां प्रवादोऽपि सयुक्तिकः।

अथैवं पदज्ञानत्वेनैव शाब्दत्वावच्छिन्नहेतुत्वकल्पनमुचितम्[२], न तु वर्णज्ञानत्वेन[३] निरर्थकवर्णज्ञानदशायां वर्णज्ञानत्वाद्यवच्छिन्नाभावासत्त्वेन[४] तत्कालीनशाब्दसामग्र्यनुत्पादे विशेषसामग्र्यभावानां प्रयोजकत्वकल्पने गौरवात्। न च वर्णानां निरर्थकत्वमेव[५] न सम्भवति, एकाक्षरकोशे प्रत्येकं सकलवर्णानामेव शक्तिप्रतिपादनात्। तथा च पदज्ञानाभावो वर्णज्ञानाभावनियत एवेति नोक्तगौरवावकाश इति वाच्यम्। वास्तवशक्तिमच्छब्दज्ञानत्वादिरूपशब्दज्ञानत्वावच्छिन्नाभावस्य[६] वर्णज्ञानत्वावच्छिन्नाभावनियतत्वेऽपि[७] शब्दशक्तिविषयकज्ञानत्वावच्छिन्नाभावस्यातथात्वम्[८]। तेन रूपेण हेतुत्वे[९] लाघवज्ञानानपायात्[१०]। लक्षणाज्ञानाधीनशाब्दबोधप्रक्कालेऽपि शक्तिज्ञानमावश्यकमेव सर्वलाक्षणिकस्थलेऽन्वयबोधस्य प्राचीनैरनभ्युपगमात्, विशिष्टवाक्यार्थघटकयत्किञ्चित्पदार्थे शक्तिज्ञानस्यावश्यापेक्षणीयत्वात्। शक्यसम्बन्धात्मिकाया लक्षणायाः शक्तिघटिततया लक्षणाज्ञानस्यैव[११] शक्तिज्ञानात्मकत्वाच्चेति न व्यभिचार इति चेदिष्यत एव। निरुक्तपदज्ञानत्वेनैव शाब्दबोधहेतुता निराकाङ्क्षत्वाद्घटकर्मत्वमानयनं कृतिरिति[१२] वाक्याद् घटमानयेत्यादाविव कर्मत्वानयनकृत्यादिषु घटकर्मत्वानयनादीनामाधेयत्वनिरूपकत्वविषयिकत्वादिसम्बन्धेनान्वयबोधानुत्पादाद्[१३] आकाङ्क्षाज्ञानस्य हेतुता स्वीक्रियते तद्रूपावच्छिन्नपदविषयिकोपस्थितिव्यतिरेकप्रयुक्तप्रकृतान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगिस्वावच्छिन्नपदविषयिकोपस्थितिको[१४] यो धर्मस्तद्वत्त्वमेव[१५] तद्रूपावच्छिन्नपदनिरूपित[१६] (तद्रूपावच्छिन्नपदसमभिव्याहृत)आकाङ्क्षा। कर्मत्वविशेष्यकाधेयत्वादिसंसर्गकघटादिप्रकारकान्वयबोधे[१७] चामादिपदेष्वेव[१८] घटपदादिनिरूपिता एतादृशाकाङ्क्षा[१९], तादृशान्वयबोधे घटपदत्वाद्य-

---

१. ख ग पुस्तके अत एव चेति पाठः;
२. ख ग पुस्तके 'हेतुता' इति पाठः।
३. ख ग पुस्तके 'ज्ञानत्वादिना' इति पाठः;
४. ख ग पुस्तके 'घ' इत्यस्य पाठो नास्ति।
५. ख ग पुस्तके निरर्थकत्वे एव इति पाठः;
६. ख ग पुस्तके 'पद' इति पाठः।
७. ख ग पुस्तके 'पद' इति पाठः;
८. ख ग पुस्तके 'तथात्वात्' इति पाठः।
९. ख ग पुस्तके 'हेतुत्वम्' इति पाठः;
१०. ख ग पुस्तके 'लाघवस्यानपायात्' इति पाठः।
११. ख ग पुस्तके 'ज्ञानत्वस्येव' इति पाठः;
१२. ख ग पुस्तके 'रित्यादि' इति पाठः।
१३. ख ग पुस्तके 'विषयित्वादि' इति पाठः;
१४. ख ग पुस्तके 'विषयकोपस्थिति' इति पाठः।
१५. ख ग पुस्तके 'विषयकोपस्थितिको' इति पाठः।
१६. क पुस्तके 'तत्कालीनतत्पुरुषीय' अधःपाठो विद्यते।
१७. ख ग पुस्तके विशेष्यकाधेयतादि इति पाठः;
१८. ख ग पुस्तके अमादि इति पाठः।
१९. ख ग पुस्तके 'एतादृश्याकाङ्क्षा' इत्येवं पाठो विद्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वच्छिन्नविषयकोपस्थितेरम्पदत्वाद्यवच्छिन्नविषयकोपस्थितेश्च[1] हेतुतया तदवच्छिन्नाभावयोः[2] प्रकृतान्वये[3] बोधाभावेऽपि कारणाभावमुद्रया प्रयोजकत्वात्। प्रयोज्यप्रयोजकभावश्च कार्याभावकारणाभावयोः स्वरूपसम्बन्धविशेषः पदार्थान्तरमेव वा।

न च तत्र मानाभावः, दण्डाभावाद्घटाभाव इत्यादेः[4] प्रतीतेरेव मानत्वात्[5]। कर्मत्वादिपदार्थोपस्थितेश्च[6] तादृशान्वयबोधहेतुताया अप्रमाणकत्वात्[7], तत्तद्व्यतिरेकः[8] तादृशान्वयबोधाभावप्रयोजक इति न कर्मत्वादिपदे घटादिपदस्य तादृशान्वयबोधोपयोगिनी आकाङ्क्षा। अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ पुरुषविशेष्यकराजसम्बन्धप्रकारकबोधतात्पर्यस्थले तथाविधबोधोदयेन[9] राज्ञः पुरुष इत्यादिपदोपस्थितीनां हेतुताया आवश्यकत्वात्, तथाविधपदोपस्थितिव्यतिरेकाणां तादृशान्वयबोधाभावप्रयोजकत्वात्। यत्र पुत्रपदार्थान्वितस्वार्थप्रतीतीच्छयैव[10] राज्ञ इत्यादिकमुच्चरितम्, न तु[11] पुरुषपदार्थान्वितस्वार्थप्रतीतीच्छया[12] तत्र तादृशपदयोः परस्परसाकाङ्क्षावारणाय[13] द्वितीयपदे तद्रूपावच्छिन्नपदसमभिव्याहृतत्वमपि निवेशनीयम्। तत्पदसमभिव्याहारश्च तत्पदोपस्थापितार्थान्वितस्वार्थविषयक-प्रतीतिजनकत्वप्रकारकेच्छाविषयत्वं प्रकृतान्वयबोधाभावेऽपि[14] तत्कालीनत्व-तत्पुरुषीयत्वे[15][16] निवेशनीये, अतो न जनितान्वयबोधदशायामतिप्रसङ्गः[17]।

वस्तुतस्तु परस्परसमभिव्याहृततत्तद्रूपावच्छिन्नपदोपस्थितिव्यतिरेक-प्रयुक्तान्वयबोधाभाव[18] एव[19] तत्पुरुषनिष्ठप्रकृतान्वयबोधे[20] तत्तद्रूपावच्छिन्न-पदयोराकाङ्क्षा। इत्थञ्च तत्कालीनत्वाप्रवेशेऽपि न क्षतिः। अत्रेदं चिन्त्यम्— इयमाकाङ्क्षा न स्वरूपसती हेतुः, अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ

---

१. ख ग पुस्तके पदत्वावच्छिन्न इति पाठः;
२. ख ग पुस्तके तदभावयोः इति पाठः।
३. ख ग पुस्तके प्रकृतान्वयबोधाभावे इति पाठः।
४. ख ग पुस्तके इत्यादिप्रतीतेरेव इति पाठः।
५. ख ग पुस्तके 'तत्र पञ्चम्यर्थस्यान्यस्य दुर्वचत्वात्' इत्यधिकः पाठो विद्यते।
६. ख ग पुस्तके कर्मत्वादिपदोपस्थितेश्च इति पाठः।
७. खादिपुस्तके 'अप्रामाणिकत्वात्' इति पाठः।
८. खादिपुस्तके ' न तद्व्यतिरेक' इति पाठः;
९. ख ग पुस्तके 'तत्र' इत्यधिकः पाठः।
१०. ख ग पुस्तके 'पुत्रादि' इति पाठः;
११. खादिपुस्तके 'ननु' इति पाठः।
१२. खादिपुस्तके पुरुषादीति पाठः;
१३. खादिपुस्तके साकाङ्क्षता, इति पाठः।
१४. 'अपि' पाठो नास्ति;
१५. कालीनत्वमिति पाठः।
१६. तत्कालीनत्वं तत्पुरुषीयत्वं निवेशनीयमिति पाठः।
१७. बोधता, इति पाठः;
१८. पदोपस्थिते, इति पाठः।
१९. प्रयुक्तप्रकृतान्वय इति पाठः;
२०. खादिपुस्तके 'तदीय' इत्यधिकः पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समभिव्याहारभ्रमेण पुरुषे [१]राजसम्बन्धबोधानुपपत्तेः। समभिव्याहारघटितनिरुक्ताकाङ्क्षायास्तत्रासत्त्वात्। एवं घटः कर्मत्वमित्यादावपि कर्मत्वादिपदेऽम्पदत्वभ्रमदशायां घटमानयेत्यादाविवान्वयबोधस्य सर्वानुभवसिद्धत्वात्तदनुपपत्तेश्च। नापि तादृशाकाङ्क्षाज्ञानं हेतुः, तथा सति कर्मत्वादिपदज्ञानं घटपदज्ञानव्यतिरेकप्रयुक्तकर्मत्वादिविशेष्यकाधेयत्वादिसंसर्गकघटप्रकारकान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगि [२]इत्येतादृशभ्रमाद् घटपदज्ञानाभावात्। [३]कर्मत्वज्ञानाभावाच्च तथाविधबोधाभाव[४] [५]इत्येतादृशभ्रमाद्घटीयं कर्मत्वं तथाविधान्वयबोधापत्तेः।

अथ यत्तु[६] तत्त्वयोरैक्याभावाद्विशिष्याऽम्पदत्वावच्छिन्नविशेष्यक[७] एव घटपदज्ञानव्यतिरेकप्रयुक्ततथाविधान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगित्वप्रकारकज्ञानत्वादिना तथाविधान्वयबोधाभावविशेष्यकघटपदज्ञानव्यतिरेकाऽम्पदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकज्ञानत्वादिना वा तथाविधान्वयबोधहेतुता वाच्या। तथा च कर्मत्वपदत्वप्रकारकज्ञानात्कदाचिदपि तादृशान्वयबोधानुदयेन[१०] कर्मत्वपदत्वाद्यवच्छिन्नविशेष्यकनिरुक्तव्यतिरेकप्रतियोगित्वप्रकारकज्ञानस्य[११] प्रकृतान्वयबोधाभावविशेष्यककर्मत्वपदत्वाद्यवच्छिन्नविषयकज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकज्ञानस्य[१२] वा हेतुताया अकल्पनान्नोक्तभ्रमात्तथाविधान्वयबोधापत्तिरिति[१३] चेत्, तर्हि तादृशान्वयबोधे लाघवाद्घटपदत्वप्रकारकज्ञानत्वापेक्षया[१४] अम्पदत्वप्रकारकज्ञानत्वेनैव[१५] हेतुतास्तु तत एव घटः कर्मत्वमित्यादौ दर्शितान्वयबोधवारणसम्भवात्किं निरुक्तगुरुशराकाङ्क्षाज्ञानहेतुतया, न च कर्मत्वादिविशेष्यकाधेयत्वादिसंसर्गकबोधे घटपदज्ञानत्वाम्पदत्वादिना[१७] द्विविधकारणताकल्पनापेक्षया[१९] निरुक्ताकाङ्क्षाज्ञानहेतुत्वेनैकहेतुताकल्पने[२०] लाघवमिति वाच्यम्। तथाप्यम्पदविशेष्यकस्य घटपदआकाङ्क्षादिप्रकारकज्ञानस्य घटपदविशेष्यकस्याम्पदाकाङ्क्षाप्रकारकज्ञानस्य[२१] वा

---

१. खादिपुस्तके राजसम्बन्धान्वयबोधानुपपत्तेः।
२. खादिपुस्तके 'वा' इत्यधिकः पाठः;
३. खादिपुस्तके कर्मपदज्ञानाभावाच्च।
४. तथाविधान्वयः;
५. भ्रमाद्वा घटीयकर्मत्वमित्यादौ।
६. यत्त्वतत्त्वयोरैक्याभावात्;
७. विशिष्य अम्पदज्ञानत्वावच्छिन्न।
८. व्यतिरेकात्;
९. पदत्वादि।
१०. बोधानुदये न;
११. व्यतिरेकप्रयुक्तप्रतियोगित्व।
१२. पदत्वावच्छिन्न;
१३. तथाविधान्वयाबोधापत्तिः।
१४. पदत्वादि;
१५. ज्ञानत्वाम्पदत्व।
१६. ज्ञानत्वादिनैव;
१७. संसर्गकघटादिप्रकारकबोधे।
१८. घटादिप्रकारकबोधे घटपदज्ञानत्वाम्;
१९. विशिष्यकारणता।
२०. ज्ञानत्वेन एकहेतुताकल्पने;
२१. विशेष्यस्याम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतुत्वे विनिगमनाविरहेण कारणताद्वयस्यावश्यकत्वात्। द्वितीयकल्पेऽपि घटपदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकत्वाम्पदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारयोः कारणतावच्छेदकयोर्मिथो[1] विशेषणविशेष्यभावे विनिगमकाभावेन[2] कारणतावृद्धेरावश्यकत्वात्।

अथ कर्मत्वादिविशेष्यकाधेयतासंसर्गकघटादिप्रकारकबोधाम्पदत्वप्रकारकज्ञानत्वेन[3] च हेतुत्वं कल्पयित्वा घटः कर्मत्वमित्यादौ तादृशान्वयबोधवारणसम्भवेऽपि घटमानयेत्यादौ अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ च तत्तत्पदयोस्समभिव्याहारस्य संशये व्यतिरेकनिश्चये च तत्तत्पदयोरन्वयबोधानुदयात्समभिव्याहारघटितनिरुक्ताकाङ्क्षाज्ञानहेतुत्वमावश्यकमिति चेत्[5], न, तर्हि लाघवात्तत्तत्पदार्थान्वयबोधे तत्पदसमभिव्याहारज्ञानत्वेनैव[6] हेतुत्वकल्पनमुचितम्। न चैवमन्वयानुभवे जाते[7] पुनरन्वयबोधापत्तिः। अनुमितौ सिद्धेरिव शाब्दबोधेऽन्वयानुभवस्य[8] प्रतिबन्धकत्वोपगमात्। न चान्वयानुभवाभावस्य समभिव्याहारस्य च कारणताद्वयकल्पनापेक्षया निरुक्ताकाङ्क्षाज्ञानस्यैव हेतुताकल्पनमुचितमिति वाच्यम्। निरुक्ताकाङ्क्षाज्ञानस्य हेतुत्वेऽपि स्वरूपसतोऽन्वयानुभवाभावस्य[9] हेतुताया आवश्यकत्वात्, अन्यथान्वयानुभवे जातेऽपि शब्दादिना तदभावघटिताकाङ्क्षाज्ञानसम्भवेन शाब्दबोधापत्तितादवस्थ्यात्।

न च स्वविशेष्यकसमभिव्याहृततत्पदज्ञानव्यतिरेकप्रयुक्तान्वयानुभवाभाववत्ताज्ञानस्यैव[10] हेतुत्वं वाच्यम्। तादृशं च ज्ञानमन्वयानुभवकाले शब्दादितोऽपि न सम्भवति। आत्मविशेषगुणस्थले स्वरूपसत एव प्रतियोगिनो विपरीतज्ञानविरोधित्वादिति वाच्यम्। स्वत्वाननुगमेन तत्तत्पुरुषीयान्वयबोधं प्रति[11] तत्तत्पुरुषविशेष्यकनिरुक्तान्वयानुभववत्ताज्ञानत्वेनैव[12] हेतुताया वक्तव्यतया तत्तत्पुरुषभेदेनाऽनन्तकारणताप्रसङ्गात्।[13] अस्मन्मतेऽन्वयानुभवाभावस्यात्मनिष्ठप्रत्यासत्त्या[14] कारणत्वेनैवातिप्रसङ्गभङ्गात् पुरुषभेदेन तद्धेतुताभेदाभावात्।

न च मयापि तत्तत्पुरुषीयत्वमप्यनन्तर्भाव्य समवायसम्बन्धेनान्वयबोधं प्रति समवायविशिष्टविशेष्यताप्रत्यासत्त्यैव निरुक्तान्वयानुभवाभावरूपाकाङ्क्षाज्ञानस्यैव हेतुत्वं कल्पनीयमिति नातिप्रसङ्गो न वा पुरुषभेदेन कारणताभेद इति वाच्यम्।

---

१. कारणतावच्छेदकघटकयोर्मिथो विशेष्यविशेषणभावे।
२. विनिगमकविरहेण;
३. आधेयतादि।
४. पदार्थयोरन्वय;
५. चेत्तर्हि।
६. तत्तत्समभिव्याहार;
७. जातेऽपि।
८. समभिव्याहारज्ञानस्य;
९. खादिपुस्तके अन्वयाभावाभावस्य इति पाठः।
१०. तत्तत्पद;
११. 'प्रति' इति न पाठः।
१२. निरुक्तान्वयानुभवाभाववत्ता;
१३. अनन्तपुरुषकारणताप्रसङ्गात्।
१४. अस्मन्नये।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेष्यताविशिष्टसमवायस्यापि प्रत्यासत्तितामादाय [१]विनिगमनाविरहात्। एवमन्वयानुभवाभावज्ञानस्य हेतुत्वे विनश्यदवस्थान्वयानुभवाभावस्य ज्ञानादन्वयबोधात्[२] प्राक्क्षणोत्पन्नद्वितीयक्षणेऽन्वयबोधान्तरोत्पत्तिर्वज्रलेपायितैव।

न च विषयिताविशिष्टसामानाधिकरण्यसम्बन्धेन निरुक्तान्वयानुभावाभवविशिष्टज्ञानत्वेनैव वाकाङ्क्षाज्ञानस्य हेतुता कल्प्यते[४]। अन्वयानुभवदशायां च न तादृशसम्बन्धेनाऽन्वयानुभवाभावविशिष्टतज्ज्ञानमस्तीति नातिप्रसङ्ग इति वाच्यम्। सामानाधिकरण्यविशिष्टविषयितासम्बन्धेनान्वयानुभवाभावविशिष्टनिवेशमादाय[५] विनिगमनाविरहप्रसङ्गात्। एवं यत्र घटमानयेत्याद्यानुपूर्वीविशेषावच्छिन्नपदज्ञानं पदार्थोपस्थित्यादिकमन्यथानुभवाभावश्च स्वरूपसद् विद्यते। न तु पदज्ञानान्वयानुभवाभावयोर्ज्ञानम्, न तु पदज्ञानविरहान्वयानुभवाभावयोः प्रयोज्यप्रयोजकभावज्ञानम्, तत्रापि शाब्दबोधस्यानुभविकतया नोक्ताकाङ्क्षाज्ञानस्य शाब्दधीहेतुत्वसम्भवात्[६]। यत्त्वाकाङ्क्षाज्ञानं[७] साकाङ्क्षत्वव्यवहार एवोपयुज्यते, शाब्दबोधे तु तद्घटकसमभिव्याहारांशमात्रस्य ज्ञानं स्वरूपसदन्वयानुभवाभावश्च हेतुः।

न च समभिव्याहारज्ञानस्य हेतुतायां मानाभावः। अयमेति पुत्रो राज्ञः पुरुषोपसार्यतां विमलं जलं नद्याः कच्छे महिषश्चलतीत्यादौ[८] राजसम्बन्धिपुरुषयोर्नदीसम्बन्धिकच्छयोश्चान्वये वक्तुस्तात्पर्याभावात् तात्पर्यज्ञानरूपकारणविरहेणैव तदन्वयबोधानुत्पादोपपत्तेस्तात्पर्यभ्रमसत्त्वे तथाविधान्वयबोधस्येष्टत्वादिति वाच्यम्। तात्पर्यज्ञानं हि राजपदमितरान्वितराजपरमित्याकारकं सामान्यत एकैकपदार्थविशेष्यकापरपदार्थमवगाहमानं शाब्दबोधहेतुः[९], न तु राजपदं पुरुषान्वितराजपरमित्याकारकं विशेषतः पदार्थद्वयविषयकम्, तथा सति राजादिरूपैकैकार्थमन्तर्भाव्यैव पुरुषादिरूपसहस्रार्थभेदेन राजपदधर्मिकतात्पर्यज्ञानस्य सहस्रकारणताप्रसङ्गात्[१०]। मन्मते एकैकपदधर्मिकतात्पर्यज्ञानस्यैकैकस्यार्थमन्तर्भाव्यैकैककारणताकल्पनेनैवोपपत्तेः।[११]

एवञ्च यत्र राज्ञः पुत्रेणैव पुरुषस्यापसारणेनैवान्वयबोधः, तत्राप्यावश्यकाभ्यां राजपदमितरान्वितराजपरं पुरुषपदमितरान्वितपुरुषपरमित्याकारकतात्पर्यज्ञानाभ्यां राजपुरुषयोरन्वयबोधप्रसङ्गो दुर्वार एवेति, राजपदपुरुषपदार्थयोरन्वयबोधे[१२] राजपदं पुरुषपदोपस्थापितार्थान्वितस्वार्थप्रतीतिजनकत्वाभिप्रायकमित्याकारकसमभिव्या-[१३]

---

१. विनिगमनाविरहप्रसङ्गात्।
२. अन्वयबोध इति पाठः;
३. प्राक्क्षणोत्पन्नात्।
४. हेतुता कल्पते;
५. विशिष्टत्व।
६. हेतुतासम्भवः;
७. यत्तु निरुक्ताकाङ्क्षाज्ञानम्।
८. चरतीत्यादौ;
९. शाब्दबोधे।
१०. कारणताकल्पनप्रसङ्गात्;
११. एकैकस्वार्थमन्तर्भाव्यैकैक।
१२. खादिपुस्तके 'पद' इत्यस्य पाठो नास्ति;
१३. जनकत्वाभिप्रायविषय इत्याद्याकारक।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हारज्ञानस्य हेतुत्वमावश्यकमेव। न चैवं राजाद्येकैकपदधर्मिकसमभिव्याहारज्ञानस्य पुरुषाद्यपरसहस्रपदार्थमन्तर्भाव्य सहस्रकारणताया अर्थतात्पर्यज्ञानकारणत्वान्तरस्य च कल्पनापेक्षयाऽर्थतत्त्वज्ञानस्यैव[1] विशिष्टपदार्थविषयकत्वमन्तर्भाव्य[2] कारणता-कल्पनमुचितमिति वाच्यम्। यतो विशिष्य पदार्थद्वयविषयकत्व-मन्तर्भाव्याऽर्थतत्त्वज्ञानस्य[3] हेतुत्वोपगमे शक्त्या लक्षणया च राजपदोप-स्थापितनृपहेमकाराद्यर्थसहस्रस्यैकैकमन्तर्भाव्यपुरुषादिरूपसहस्रार्थभेदेन कारणाता-सहस्रस्य कल्पनीयतया राजपदधर्मिकस्यैव तात्पर्यज्ञानस्य सहस्रगुणितसहस्र-कारणताकल्पनम्। अस्माकन्तु राजपदस्य सार्धसहस्रभेदेन[4] तद्धर्मिकार्थतात्पर्यज्ञानस्य कारणतासहस्रं समभिव्याहारज्ञानहेतुतायां विशिष्य पदार्थान्तर्भावेन राजपदधर्मिकस्य सहस्रापरभेदेन[5] कारणतासहस्रं कल्पनीयमिति स्फुटतरं लाघवमिति।

अथैवमप्यनुभवाभावरूपस्याकाङ्क्षाघटकभावस्य[6] शाब्दबोधहेतुत्वं[7] विचारासहं शाब्दत्वावच्छिन्नं प्रति शाब्दत्वेन तद्विषयिकशाब्दत्वावच्छिन्नं[8] प्रति तद्विषयकशाब्दत्वेन प्रतिबन्धकत्वे सैन्धवमानयेत्यादौ लवणादिरूपैकार्थ-विषयकशाब्दबोधसत्त्वे आवृत्त्यापि घोटकादिरूपार्थान्तरविषयकान्वयबोधानुपपत्ते-र्घटकर्मत्वादिरूपार्थान्तरवाक्यार्थबोधानन्तरं[9] घटकर्मकानयनरूपमहावाक्यार्थ-ज्ञानानुदयप्रसङ्गाच्च। न च पदानुसन्धानव्यक्तिस्तत्तद्व्यक्तित्वेनोपादाय तत्तत्पदानुसन्धानजन्यशाब्दत्वेन प्रतिबन्धकत्वान्न दोषः, अवान्तरवाक्यार्थबोधानन्तरं पुनस्तत्पदानुसन्धानान्तरमभ्युपगम्यैव महावाक्यार्थबोधोपगमादिति वाच्यम्। एवं सति जनितान्वयबोधकपदानुसन्धानादनुसन्धानान्तरं विनैव शाब्दसामान्यापत्तेः।

न च विशेषसामग्रीसमवहिताया एव सामान्यसामग्र्याः फलजनकत्वात्तदनुसन्धानजन्यशाब्दबोधाभावरूपविशेषसामग्रीविरहान्नोक्तापत्तिः। अथवा तत्तदर्थविषयकशाब्दबोधत्वावच्छिन्नं[10] प्रति सामान्यतस्तत्तदर्थ-विषयकशाब्दबोधत्वेनैव प्रतिबन्धकताऽनुसन्धानान्तरव्यक्तीनामुत्तेजकत्वोपगमान्न महावाक्यार्थबोधादेव अखण्डवाक्यार्थबोधानन्तरमनुपपत्तिः[11][12]। उदीचानु-सन्धानव्यक्तीनां[13] च स्वजन्यबोधप्रागभावविशिष्टत्वेनैवोत्तेजकता वाच्या। अतो न

---

१. अर्थतात्पर्यज्ञानस्यैव।
२. विशेष्यपदार्थविषयकत्वमन्तर्भाव्य;
३. तात्पर्य।
४. स्वार्थ;
५. सहस्रापरपदभेदेन।
६. रूपाकाङ्क्षा;
७. भागस्य।
८. तद्विषयक;
९. रूपावान्तर।
१०. शाब्दबुद्धित्वावच्छिन्नं;
११. खण्डवाक्यार्थ।
१२. बोधानन्तरमनुपपत्तेः;
१३. उदीच्यानुसन्धान।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तादृशानुसन्धानजन्यबोधानन्तरं तादृशानुसन्धानव्यक्तित्वाननुसन्धानान्तरं[१] विनैवान्वयबोधप्रसङ्ग इति वाच्यम्, गौरवात्। अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राजपुत्रान्वयबोधोत्पत्तिक्षणे च राजपुरुषान्वयबोधोत्पादप्रयोजकतात्पर्यज्ञानाभावात्तथाविधसमभिव्याहारज्ञानाभावादेव वा तदुत्तरमपि तादृशान्वयबोधानुत्पादसम्भवाद् अन्वयबोधं प्रत्यन्वयबोधस्य प्रतिबन्धकत्वे मानाभावात्।

न च समानाकारावगाहिशाब्दबोधापत्तिवारणायान्वयानुभवाभावस्य[२] हेतुत्वमावश्यकमिति वाच्यम्। प्रथमशाब्दबोधक्षणे[३] च तज्जनकपदज्ञानजन्यपदार्थोपस्थित्यादीनां विनाशात्तादृशकारणविरहेणैवाऽविरलक्रियोत्पन्नशाब्दबोधधाराया[४] आयत्यसम्भवात्। अन्तरापदज्ञानतज्जन्यपदार्थोपस्थित्युत्पादस्थले पूर्वान्वयबोधस्य तादृशपदार्थोपस्थितिकाले विनाशात्तदुत्तरमन्वयबोधानन्तरस्य[५] भवतोऽप्यावश्यकत्वात्। यत्र प्रथमशाब्दबोधजनकपदार्थोपस्थितेरेवाकाङ्क्षायोग्यताऽऽसत्तितात्पर्यविषयिणी तत्र विनश्यदवस्थतादृशसमूहालम्बनपदार्थोपस्थितितस्तादृशबोधद्वितीयक्षणे पुनस्तादृशबोध[६] इष्यत इति चेत्, न, अन्वयानुभवस्य[७] प्रतिबन्धकत्वे उक्तस्थले उत्पन्नाया एव शाब्दबोधव्यक्तेरनन्तरक्षणे पुनरुत्पादवारणाय तत्तद्व्यक्तिप्राग्भावस्य हेतुतानामनन्तानां कल्पनप्रसङ्गात्[८]। मन्मते सामान्यसामग्रीविरहादेव तादृशापत्तिवारणासम्भवाद् अन्वयानुभवस्य प्रतिबन्धकताकल्पनमावश्यकम्[९]।

न च तच्छाब्दबोधव्यक्तौ तज्जनकपदार्थोपस्थितिपदज्ञानव्यक्तेः सत्त्वेन हेतुत्वं तत्समानविषयकशाब्दबोधोत्पत्त्यधिकरणकालान्तरे तद्व्यक्तेरुत्पादवारणायोभयमत एव कल्पनीयम्, तथा च तादृशपदज्ञानव्यक्तेः प्रथमशाब्दबोधोत्पत्ति[१०]विनाशात्तद्द्वितीयक्षणे तत्तद्व्यक्त्यापादनासम्भवादिति[११] वाच्यम्। पदज्ञानस्य पदजन्यपदार्थोपस्थितिद्वारैव हेतुतया तन्नाशेऽपि तज्जन्यपदार्थोपस्थितिसत्त्वेनापत्तिसम्भवात् कर्मत्वत्वाद्यवच्छिन्नविशेष्यकघटत्वाद्यवच्छिन्नप्रकारकशाब्दबोधस्य कर्मत्वत्वाद्यवच्छिन्नमुख्यविशेष्यकघटत्वाद्यवच्छिन्नप्रकारकशाब्दबोधत्वमेव[१२] प्रतिबध्यतावच्छेदकं वाच्यम्। अतो घटकर्मत्वादिरूपखण्डवाक्यार्थबोधानन्तरं घटकर्मकानयनादिरूपमहावाक्यार्थबोधस्य नानुपपत्तिः। एवं

---

१. व्यक्तितः अनुसन्धानान्तरं विनैवान्वयबोधप्रसङ्ग इति वाच्यम्।
२. न च समानाकारधारावाहिक।
३. तद् द्वितीयक्षणे वा;
४. क्रमोत्पन्न।
५. बोधान्तरस्य;
६. बोधस्त्विष्यत एवेति चेन्न।
७. अन्वयानुभवस्या;
८. कल्पनाप्रसङ्गात्।
९. प्रतिबन्धकत्वमावश्यकं;
१०. काल एव विनाशात्तद्द्वितीयक्षणे।
११. तत्तद्व्यक्त्यान्यापादनसम्भव इति वाच्यम्;
१२. शाब्दत्वमेव प्रतिबध्यतावच्छेदकं वाच्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घटत्वावच्छिन्नविशेष्यकनीलादिप्रकारकशाब्दबोधस्य घटत्वाद्यवच्छिन्नमुख्य-विशेष्यतानिरूपितधर्मितावच्छेदकतान्यनीलादिप्रकारताशालिशब्दत्वम्। अतो घटो नील इत्याद्यवान्तरवाक्यार्थज्ञानपूर्वक-नीलो घटः सुन्दरो नीलघटमानयेत्यादिवाक्य-जन्यमहावाक्यार्थबोधस्य नानुपपत्तिः। एवमन्यत्राप्यूह्यम्।

अत्र च बोधद्वयतात्पर्यज्ञानसत्त्वे क्रमिकान्वयबोधद्वयोत्पादात्तादृश-ज्ञानस्योत्तेजकत्वं स्वीकरणीयम्। तत्र प्राथमिकव्यक्तिद्वितीयक्षणे उत्पादवारणायाऽ-गत्या प्रकारान्तरमास्थेयमिति, तदप्यसत्, तथा हि राजपदं पुरुषपदार्थान्वित-राजपरमित्याकारकस्य हेतुत्वे[२] यत्र विशेषतः पदार्थविषयकस्यैव[३] तात्पर्यज्ञानस्य शाब्दबोधहेतुत्वमावश्यकं सामान्यत इतरपदार्थविषयकस्यैव तस्य हेतुत्वे यत्र लक्षणया पुरुषपदोपस्थापितेनार्थान्तरेण राज्ञोऽन्वयबोधे राजपदोपस्थापितार्थान्तरे पुरुषस्यान्वयबोधे[४] च वक्तुस्तात्पर्यं न तु राजपुरुषयोरन्वयबोधे, तत्र राजपदं पुरुषपदोपस्थापितार्थान्तरान्वितस्वार्थप्रतीतिजनकत्वाभिप्रायविषय इत्येतादृश-समभिव्याहारज्ञानस्य राजपदमितरान्वितराजपरं पुरुषपदमितरान्वितपुरुषपरमित्या-कारकार्थतात्पर्यज्ञानयोः 'राज्ञः पुरुषः' इति पदोपस्थापितार्थान्तरस्य च राजपदमितरान्वितराजपरं पुरुषपदमितरान्वितपुरुषपरमित्याकारकार्थतात्पर्यज्ञानयोः राज्ञः[६] पुरुषपदोपस्थापितार्थान्तरस्य[७] च पुरुषेण राजपदोपस्थाप्यार्थान्तरस्यान्वय-बोधानुरोधेनावश्यकतया तद्बलाद् राजपुरुषयोरन्वयबोधप्रसङ्गात्। तथा चैकवाक्यताभिप्रायेण विषयित्वरूपसमभिव्याहारज्ञानस्य हेतुत्वे मानाभावः। उक्तस्थले तथाविधतात्पर्यज्ञानविरहेऽपि[८] वाऽतिप्रसङ्गविरहात्।

न च यत्र राजपदं पुरुषान्वितराजपरमित्येतादृशतात्पर्यग्रहो वर्तते, अपि च राजपदं पुरुषपदसहकारेण यत्पदार्थान्वितस्वार्थबोधकत्वं तदभिप्रायविषयो न वेत्याकारकसमभिव्याहारसंशयस्तद्व्यतिरेकनिश्चयो वा वर्तते, तत्र राजपुरुषपदाभ्यां राजपुरुषपदार्थबोधापत्तिवारणाय[९] तादृशपदद्वयजन्यशाब्दबोधे तादृशाभिप्रायविषयित्व-ज्ञानहेतुत्वमावश्यकमिति वाच्यम्। उक्ततात्पर्यज्ञानसत्त्वे तथाविधसंशयादिसत्त्वेऽपि तादृशशाब्दबोधस्येष्टत्वात्। अस्तु वा राजपदं पुरुषपदसहकारेण यत्पुरुषान्वितराज-बोधकत्वं तदभिप्रायविषय इत्याकारकमेवार्थतात्पर्यज्ञानं हेतुः, तावतैवोक्तातिप्रसङ्ग-वारणसम्भवात्, एवमन्वयानुभवाभावस्य हेतुत्वेऽपि मानाभावाद् उक्तस्थले शाब्दबोधोत्पत्तिद्वितीयक्षणे तद्व्यक्तिपुनरुत्पादकस्यापादकविरहाद् यतस्सामग्र्यव्यव-[१०]

---

१. पुरुषान्वितराजपरम्;
२. 'हेतुत्वे यत्र' इत्यस्य पाठो नास्ति।
३. 'पदार्थद्वयविषयकस्यैव' इति पाठः;
४. ख ग पुस्तके चेत्यस्य स्थाने वेति पाठः।
५. पदोपस्थाप्यार्थान्वितस्वार्थप्रतीति;
६. राज्ञा।
७. पुरुषपदोपस्थाप्यार्थान्तरस्य;
८. विरहादेवातिप्रसङ्गविरहात्।
९. राजपुरुषार्थ;
१०. सामग्र्यव्यवहितोत्तरक्षणस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हितोत्तरत्वस्य कार्याधिकरणत्वव्याप्यतयैवावगम्यते[1], न तु कार्योत्पादव्याप्यतापीति स्वोत्पत्तिद्वितीयक्षणस्य स्वाधिकरणत्वं पुनरिष्टमेव तृतीयक्षणे च न तदधिकरणत्वस्याप्यापत्तिसम्भवात्[2]।

द्वितीयक्षणे[3] तद्व्यक्तिं प्रति तद्व्यक्तित्वेनावश्यकल्पनीयहेतुताकतत्पदार्थोपस्थितिव्यक्तीनामभावादिति। अत्र नव्याः प्रकृतिप्रत्यायादीनामानुपूर्वीविशेषावच्छिन्ननिष्ठाकाङ्क्षा[4] तत्र प्रत्ययनिष्ठाम्पदत्वावच्छिन्नादिरूपानुपूर्वीविशेषावच्छिन्ननिष्ठप्रकृतिनिष्ठा घटपदत्वनीलपदत्वादिरूपानुपूर्वीविशेषावच्छिन्नाव्यवहितोत्तरत्वरूपानुपूर्वीनामार्थधात्वर्थाभेदोपयोग्याऽऽकाङ्क्षा[6], अतो घटः कर्मत्वमानयनं कृतिरित्यादौ कर्मत्वादिपदस्य भेदान्वयबोधेनैव घटादिपदसाकाङ्क्षताऽव्यवधानप्रवेशात् घटरूपं[7] पश्येत्यादौ रूपादिपदोत्तराऽम्पदादिना[8] घटादिपदसाकाङ्क्षताप्रसङ्गः।

न चैवं[9] घटरूपे पश्येत्यादिद्वन्द्वसमासस्थलेऽमादिपदस्य रूपादिपदाव्यवहित्तोत्तरत्वस्याप्याकाङ्क्षत्वात् तादृशनानाविधाकाङ्क्षाज्ञानानामेकैकविधान्वयबोधं प्रति हेतुत्वव्यभिचारस्याग्रे वारणीयत्वात्, यत्तु[11] घटप्रत्ययानुत्तरत्वरूपमव्यवधानमेवाकाङ्क्षाघटकं वाच्यम्, घटरूपे पश्येत्यादावपि तादृशविशिष्टाभावात्मकमव्यवधानमक्षतमेवेति। तदसत्। तथा सति प्रत्ययाद्यनुपस्थितिदशायां तादृशाव्यवधानस्य दुर्ज्ञेयतया शाब्दबोधानुपपत्तेः। यावत्प्रत्ययसाधारणस्य प्रत्ययत्वस्य दुर्वचत्वाच्च। अथ द्वन्द्वस्थलानुरोधेन घटपदाव्यवहितोत्तररूपादिपदाव्यवहितोत्तरत्वस्यामादिपदनिष्ठस्य कर्मत्वादौ घटान्वयबोधौपयिकाकाङ्क्षातो[12] घटरूपमित्यादितत्पुरुषस्थलेऽपि कर्मत्वादौ घटाद्यन्वयबोधप्रसङ्ग इति चेत्, न, तत्पुरुषस्थलीय[13]पूर्वपदस्य विभिन्नपदार्थविशिष्टपरतयोक्तस्थले[14] घटपदत्वाभावेन[15] कर्मत्वे घटान्वयापत्तिविरहात्।

न च घटपदार्थस्य घटसम्बन्धित्वावच्छिन्नस्यैव कर्मत्वान्वयबोधप्रसङ्गः, अभेदेन घटसम्बन्धित्वावच्छिन्नान्वितरूपत्वावच्छिन्नस्यैव तत्र कर्मत्वावच्छिन्नतयेष्टापत्तिसम्भवादिति वाच्यम्। तत्पुरुषस्थले तादृशान्वयबोधतात्पर्यविरहेणैव तदापत्त्यभावात्[16], यत्र रूपांशे कर्मत्वांशे च घटपदार्थस्य विशेषणतयान्वयबोधे

---

१. व्याप्यतैवोपगम्यते; २. आपत्तिसम्भवः।
३. द्वितीयक्षण; ४. विशेष एवाकाङ्क्षा।
५. पदत्वरूपानुपूर्वी; ६. धात्वर्थयोः प्रत्यर्थे भेदान्वयबोधोपयोग्याकाङ्क्षा।
७. घटस्य रूपं; ८. पदादेर्न; ९. 'सति' इत्यधिकः पाठः।
१०. रूपादिपदव्यवहिततया घटादिपदसाकाङ्क्षतानुपपत्त्या कर्मत्वादौ घटाद्यन्वयानुपपत्तिरिति वाच्यम्, अम्पदत्वावच्छिन्ननिष्ठस्य घटादिपदाव्यवहितोत्तर।
११. घटादिपदोत्तरप्रत्ययानुत्तरत्व; १२. बोधौपयिकाकाङ्क्षात्वोपगमे; १३. स्थले।
१४. विभक्त्यन्तार्थ; १५. घटपदस्य; १६. तदापत्त्यसम्भवात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तात्पर्येणैव घटरूपं पश्येत्याद्युच्चरितं तत्र तात्पर्यज्ञानवतां द्विविधबोध एवेष्यते। अन्यथा पुनरगत्या घटरूपमित्याद्यानुपूर्वीज्ञानजन्यकर्मत्वादिविशेष्यकघटादि-सम्बन्धिप्रकारकान्वयबोधे घटादिपदधर्मिकस्य कर्मत्वेतरविशेषणतया स्वार्थान्वयबोधपरत्वग्रहस्य प्रतिबन्धकत्वं वाच्यम्। अथवा घटपदं[1] कर्मत्वान्वित-स्वार्थपरमित्येतादृशतात्पर्यग्रहहेतुतायां धर्मिणि[2] कर्मत्वेतरान्वितस्वार्थपरतया गृह्यमाणत्वं विशेषणं देयम्। किं वा विशेषतासम्बन्धावच्छिन्नतादृशस्वार्थपरत्व-ग्रहाभावस्य स्वाश्रयविशेष्यकत्वसम्बन्धेन वैशिष्ट्यं तादृशतात्पर्यग्रह एव निवेश-नीयम्।[4] अत एव द्वन्द्वार्थतत्पुरुषार्थपरतादृशवाक्यद्वयवतः[5] पुंस उभयतात्पर्य-ज्ञानयुगपदुभयबोधोपपत्तिः।[6]

अथ[7] तात्पर्यज्ञाने तदा[8] निरुक्तविशेषणेन विशेषिते घट[8] इत्येतादृशानुपूर्वी घटपदं यत्र विशेषणतया कर्मत्वतदितरान्वितस्वार्थपरत्वग्रहः। तत्र कर्मत्वविशेष्यकघटान्वयबोधानुपपत्तिरिति वाच्यम्। तत्र तादृशबोधस्यानुभविकत्वे तदा[10] विशेषणमनन्तर्भाव्य तात्पर्यज्ञानहेतुत्वान्तरस्य कल्पनीयत्वात्तादृशकारणता-वच्छेदकावच्छिन्नस्य[11] घटमित्यानुपूर्वीज्ञानरूपसहकारिसमवहितस्यैव फलोपधाय-कत्वोपगमात्तद्बलाद्, घटरूपं पश्येत्यादावतिप्रसङ्गः, उत्तरत्वनिवेशाद् रूपं घटस्य पश्येत्यादावमादिपदस्य कर्मत्वादिविशेष्यकघटादिबोधेन[12] साकाङ्क्षता एकघटपदाव्यवधानस्यान्यघटपदोत्तरस्य[13] च ज्ञानात्तथाविधशाब्दबोधापत्तिवारणाय विशिष्य तत्तत्पदाव्यवहितत्वे सति तत्तत्पदोपात्तस्यैव[14] ज्ञानं शाब्दबोधजनकं वाच्यम्।

वस्तुतः स्वाव्यवहितत्वविशिष्टोत्तरत्वसम्बन्धेन घटादिपदवत्त्वमेवाकाङ्क्षा-विघटकं[15] रूपं घटस्येत्यादावमादिपदस्य तादृशसम्बन्धेन घटपदवत्त्वम्, अन्य-दीयाव्यवधानस्यान्यदीयोत्तरत्वस्यान्यदीयसम्बन्धत्वाभावात्[16] तादृशविशिष्टसम्बन्धेन कस्यचिदपि घटादिपदस्य तत्रासत्त्वात्। अतः पदव्यक्तिभेदेन कार्यकारण-भावविरहेऽपि[17] नातिप्रसङ्गः। अथ यादृशनामपदान्तरं[18] यादृशपदं[19] कदाचिदपि

---

१. घटपदं विशेषणतया; २. धर्मिणि विशेषणतया; ३. विशेष्यता।
४. 'पूर्वोक्तप्रकारद्वयेऽस्य रसं प्रकाशयति' इति ख ग पुस्तके अधिकः पाठः।
५. वाक्यद्वयज्ञानवतः; ६. ज्ञानाद्युगपदुभयबोधोपपत्तिः।
७. 'अथ' इत्यस्य स्थाने 'न च' इति पाठः।
८. तद्विशेष्यपदे वा; ९. घटमित्येतादृशानुपूर्वीघटकघटपदे।
१०. ख ग पुस्तके तदा इत्यस्य स्थाने तथा इति पाठः।
११. 'च' इत्यधिकः पाठः; १२. घटाद्यन्वयबोधेन।
१३. पदोत्तरत्वस्य; १४. तत्तत्पदोत्तरत्वस्यैव।
१५. घटकं रूपं; १६. चान्यदीय।
१७. भेदे विरहेऽपि; १८. पदाद्यन्तरं; १९. यादृशप्रत्ययपदम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केनचिन्नोच्चरितम्, अथ च तादृशं नाम[१] केनचिन्मौनिना तादृशप्रत्ययपदव्यवधाने[२] न लिखितं तादृशलिप्यनुमितततथाविधपदयोराकाङ्क्षाविरहात्तदनुसन्धानान्वयबोधा-[३] नुपपत्तिरिति चेत्, न, तत्र व्यवहितोच्चरितयोस्तथाविधपदयोरव्यवधानमपि[४] तादृशाकाङ्क्षाभ्रमादेव शाब्दबोधोपगमात् यच्च लेखकाभिप्रायविषयतथाविध-पदयोर्व्यवधानमेव प्रतिसन्धत्ते। तावदयं[५] लेखक एतत्पदार्थान्वितैतत्पदार्थज्ञानवान् एतत्पदव्यञ्जकलिपिकर्तृत्वादित्यादिक्रमेण वाक्यार्थमनुमिनोत्येव न तु शाब्द[७] इति।

अस्तु वा, एतत्पदज्ञानानन्तरमेतत्पदज्ञानं भवत्वित्याकारकाभिप्रायविषयत्व-रूपानुपूर्व्येवाकाङ्क्षा। इत्थञ्च शब्दस्य[८] ज्ञानतो मीमांसकस्य शब्दे व्यवहित[९]-घटपदप्रयुक्ताम्पदव्यवहितसर्वत्वमपि विनिगमनाविरहेणाकाङ्क्षा तज्ज्ञानयोश्च वैकल्पिकहेतुत्वं प्रत्येकं ज्ञानादपि शाब्दबोधस्यानुभविकत्वात् समुच्चितस्यैवोभय-विधाकाङ्क्षाज्ञानस्य फलोपधायकत्वे सामग्रीप्रतिबन्धकतायामुभयज्ञानस्यैव निवेशनीयतापत्त्या विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबन्धकताबाहुल्या-पत्तेः। परस्परजन्यबोधे परस्परव्यभिचारवारणं चाग्रे दर्शयिष्यते। आनयनाद्यंशे घटकर्मत्वाद्यन्वयबोधे चानयेत्यादिपदस्य घटमित्यादिपदोत्तरत्वं तादृशपदपूर्वत्वं[१०] वाऽऽकाङ्क्षा, घटमानयनघटमित्येतादृशद्विविधानुपूर्वीज्ञानादेव घटकर्मकानयन-बोधात्।

न चाऽवान्तरबोधजनकाभ्यां घटमित्येतादृशानयेत्येतादृशानुपूर्वीज्ञानाभ्यां घटकर्मकानयनरूपविशिष्टवाक्यार्थतात्पर्यज्ञानसहकृताभ्यामेव विशिष्ट-वाक्यार्थोपपत्तये[११] तत्र घटमानयेत्याद्यानुपूर्वीज्ञानस्य हेतुत्वमप्रामाणिकमिति वाच्यम्। आनय घटमित्याद्यानुपूर्वीज्ञानाद् घटमानयेत्यत्रेव घटकर्मतोद्देश्यकानयनविधेयक-बोधस्य वारणाय तादृशबोधं प्रति आनयपदे घटमिति पदोत्तरत्वज्ञानस्य घटमिति पदे वाऽऽनयपदपूर्वत्वज्ञानस्य[१२] घटमानयेत्येतादृशज्ञानादानयनघटमित्यत्रा-नयनोद्देश्यकघटकर्मताविधेयकबोधवारणाय तादृशान्वयबोधे[१३] घटमिति पदे आनयपदोत्तरत्वज्ञानस्यानयपदे वा घटमिति पदपूर्वत्वज्ञानस्य हेतुताया

---

१. नामपदं लिखित्वा; २. पदमव्यवधानेन।
३. पदयोरव्यवधानघटकाकाङ्क्षाविरहात् तदनुसन्धानादन्वय इति पाठः।
४. घटिताकाङ्क्षा; ५. सत्तावदयं।
६. एतत्पदव्यञ्जकाव्यवहितैतत्पदव्यञ्जक।
७. शाब्दयति; ८. शब्दस्य नित्यत्वं।
९. अव्यवहितोत्तरत्वज्ञानासम्भवेऽपि न तस्य शाब्दबोधानुपपत्तिः, प्रत्ययनिष्ठप्रकृत्यव्यवहितोत्तरत्वमिव प्रकृतिनिष्ठं प्रत्ययाव्यवहितपूर्वत्वमपि।
१०. चाकाङ्क्षा; ११. वाक्यार्थोपपत्तेः।
१२. एवं घटमानयेत्येतादृशानुपूर्वी; १३. बोधं प्रति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आवश्यकत्वात् शाब्दबोधे प्राङ्निर्दिष्टस्यैवोद्देश्यतया [1]चरमनिर्दिष्टस्यैव पदार्थस्य च विधेयतया तत्र[2] तथाविधबोधोत्पत्ताविष्टापत्त्यसम्भवात्[3], अत एव न्यक्कारो ह्ययमेवेत्यादौ विधेयपरस्य न्यक्कारादिपदस्यायमित्यादिपदोत्तरत्वाभावादभिमतोद्देश्यविधेयभावेन शाब्दबोधस्यानुपपत्तेः। आलङ्कारिका विधेयाविमर्शदोषमुदाहरन्ति। एवमाख्यातान्तोपस्थाप्यपाकानुकूलकृत्यादिप्रकारकबोधे प्रथमान्तनामपदनिष्ठानुपूर्वीविशेषावच्छिन्नाव्यवधानघटितपौर्वापर्यमाकाङ्क्षा[4], अत एव सत्यपि तात्पर्यविशेषादिज्ञाने काष्ठेन तण्डुलं पचतीत्यादौ काष्ठतण्डुलाद्यंशेन पाकभावनान्वयः। अपि च प्रथमान्तपदोपस्थाप्ये[5] सङ्ख्याप्रकारकबोधेऽपि तादृशाकाङ्क्षैव नियामिका, अत एव भावनान्वयस्थले न सङ्ख्यान्वयः। एवं तत्तन्नामार्थयोरन्वयबोधे समानविभक्तिकत्वं नामपदयोरानुपूर्वीविशेषाकाङ्क्षा। नीलस्य[6] घटमित्यादाविव एतस्य घट इत्यादाविदंपदघटादिपदयोरभेदान्वयबोधानुदयाद्[7] धान्येन धनवानित्यादौ चाभेदसम्बन्धेन[8] धनादौ धान्यस्यान्वयः; अपि तु[9] तृतीयार्थाभेदे धान्यादेस्तादृशाभेदस्य धनादावन्वयः कर्मधारयानुरोधेनेतरविभक्तिसहितयोरानुपूर्व्या[10] अप्याकाङ्क्षात्वं स्वीकरणीयम्। एवं सर्वत्र यादृशानुपूर्वीज्ञानादेव यादृशयादृशबोधः[11], तत्र तादृशानुपूर्वीविशेषस्यैवाकाङ्क्षात्वमूहनीयम्।

अथ कर्मत्वादिविशेष्यकघटादिप्रकारकशाब्दबोधेऽम्पदत्वावच्छिन्नविशेष्यकघटपदाव्यवहितोत्तरत्वज्ञानत्वेन हेतुता न सम्भवति, घटावानय घटस्यानयनं कुम्भमानयेत्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे[12] व्यभिचारात्। न च कर्मत्वोपस्थापकविभक्तिविशेष्यकघटोपस्थापकपदाव्यवहितोत्तरत्वज्ञानत्वेन दर्शितसकलानुपूर्वीज्ञानसाधारणेन हेतुत्वान्न व्यभिचार इति वाच्यम्। घटीयकर्मत्व-

---

१. चरमनिर्दिष्टपदार्थस्यैव।
२. तत्र तत्र।
३. तथाविधोत्पादे इष्टापत्त्यसम्भवात्।
४. ख्यातान्तधातुनिष्ठानुपूर्वीविशेषावच्छिन्नयोरव्यवधानघटितपौर्वापर्यमाकाङ्क्षा।
५. प्रथमान्तपदोपस्थाप्यांश एव एवमाख्यातोपस्थाप्य....।
६. अयं घट इत्यादाविवास्य घट....।
७. पदघटादिपदार्थयोरभेदान्वय।
८. सम्बन्धेन धान्यस्य धनादौ न साक्षादन्वयः।
९. अपि तु तत्र।
१०. कर्मधारयानुरोधेनान्तरा विभक्तिरहितयोर्नाम्नोरव्यवधानघटितानुपूर्व्याकाङ्क्षात्वं स्वीकरणीयम्।
११. वाक्यार्थबोधः।
१२. कुम्भस्यानयनं कुम्भमानयेत्याद्या....।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परतदादिपदघटितत्तदस्तीत्यादिवाक्यजन्यकर्मत्वविशेष्यकघटप्रकारके ज्ञाने व्यभिचारस्यैव तावताप्यनुद्धाराद् घटोद्देश्यककर्मताविधेयकशाब्दत्वं निरुक्ताकाङ्क्षा-ज्ञानजन्यतावच्छेदकं वाच्यम्। तदादिपदोपस्थापितघटविशेषितकर्मत्वबोधस्तु घटांशेन [१]कर्मत्वबोधः पूर्वानुपस्थितपदार्थस्यैव विधेयतया एकपदोपस्थाप्य-योरुद्देश्यविधेयभावविरहादिति नायं व्यभिचार इति चेत्, अस्त्वेवम्, तथाप्युक्तानुगतरूपेण हेतुत्वं न सम्भवति। तथा सति [२]घटस्थकर्मत्वमित्यादौ कर्मत्वादिपदस्यैव घटादिपदाव्यवहितोत्तराम्पदत्वेन ज्ञानं तत्र कर्मत्वादावाधेयता-सम्बन्धेन घटादिप्रकारकबोधोऽनु[३]पपन्नः। यत्र वा घटमित्यादावमादिपदे कर्मत्वादिपदत्वादिपदत्वभ्रमः, तदा [४]तु तेन रूपेण घटादिपदाव्यवहितोत्तरत्व-ज्ञानादपि तादृशान्वयबोधापत्तेः।

न च वास्तवविभक्तिविशेष्यकज्ञानत्वेन हेतुत्वोपगम एव दर्शितदोषप्रसक्तिः[५]। न तु विभक्तित्वावच्छिन्नविशेष्यताकज्ञानत्वेन हेतुत्वोपगमे कर्मत्वपदस्याम्पदत्व-भ्रमदशायां विभक्तित्वेन तत्र घटपदाद्यव्यवहितोत्तरत्वज्ञानसम्भवात्तादृशबोधोपपत्तेः, अम्पदे [६]कर्मपदत्वभ्रमदशायां विभक्तित्वेन तज्ज्ञा[७]नासम्भवे तादृशान्वयबोधा-सम्भवाच्चेति वाच्यम्। विभक्तित्वाद्यनुपस्थितदशायामप्यम्पदत्वादिप्रकारक-ज्ञानाच्छाब्दबोधोदयाद् अमादिपदस्य विभक्तित्व[८]ग्रहदशायामप्यम्पदत्वादि-रूपानुपूर्वीविशेषपुरस्कारेण ज्ञानं विना तथाविधशाब्दबोधानुदयाच्च नानाविधानुपूर्वीज्ञानजन्यतावच्छेदकजातीनां समूहालम्बनानुपूर्वीविषयकज्ञानजन्य-शाब्दबोधे सङ्करप्रसङ्गे न व्यभिचारवारणायानुपूर्वीजन्यतावच्छेदकतया जातिक[९]ल्पनमावश्यकमिति। मैवम्। तत्तल्लिङ्गपरामर्शजन्यतावच्छेदककोटौ स्वसामानाधिकरण्यावच्छिन्नस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन तद्वैशिष्ट्यं निवेश्य व्यभिचारवारणवदत्रापि तादृशसम्बन्धेन तत्तदानुपूर्वीज्ञानवैशिष्ट्यं तज्जन्यतावच्छेदककोटौ निवेश्य व्यभिचारस्य वारणीयत्वात्।

अथ कर्मत्वादिविशेष्यकाधेयतासंसर्गकघटादिप्रकारकशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानस्येव घटः कर्मत्वमित्याद्यानुपूर्वीज्ञानस्याहेतुत्वं वक्तव्यम्। घटः कर्मत्वमानयनं कृतिरित्यादिप्रयोजकवाक्यं श्रुत्वा घटमानयेति वाक्यं स्मरतः प्रयोज्यवृद्धस्य घटकर्मकानयनप्रवृत्तिमुपलभ्य घटः कर्मत्वमित्यादिवाक्य एव व्युत्पन्नस्य पुनस्तादृशवाक्यज्ञानादपि घटकर्मकानयनादिबोधात्। तथा च तादृशवाक्यादपि तथाविधस्यापि पुंसस्तथाविधशाब्दबोधापत्तिर्दुर्वारैवेति चेत्, न,

---

१. कर्मत्वविधेयकः; २. यत्र घटः कर्मत्व...; ३. बोधानुपपत्तेः।
४. तत्र इति पाठः; ५. दोषद्वयप्रसक्तिः; ६. कर्मत्वभ्रमदशायां।
७. तज्ज्ञानासम्भवेन तादृशशाब्दबोधापत्त्यसम्भवाच्चेति वाच्यम्।
८. विभक्तित्वाग्रहदशायां; ९. जातिकल्पनमप्यशक्यमिति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विपरीतव्युत्पन्नस्य पुंसस्तादृशवाक्यार्थपदार्थोपस्थित्यादिमूलकमानसवाक्यार्थ-[1] बोधस्यैवोपगमात्। यदि च तादृशवाक्याधीनविपरीतव्युत्पन्नस्य व्युत्पन्नपुरुषीय-वाक्यार्थबोधे शाब्दत्वमनुभवसिद्धम्। अन्यथा घटमानयेत्यादिवाक्याधीनघट-कर्मकानयनबोधेऽपि मानसत्वोपगमसम्भवेन शाब्दप्रामाण्यविलयापत्तिरिति[2] विभाव्यते, तदास्तु तादृशानुपूर्वीज्ञानस्यापि तथाविधशाब्दधीहेतुता। तथाविधानु-पूर्व्यवच्छिन्नधर्मिकतादृशवाक्यार्थबोधस्वरूपयोग्यत्वग्रहव्युत्पत्तेरपि तत्सहकारित्व-मुपगम्य दर्शितातिप्रसङ्गो वारणीयः।

एवं तादृशवाक्य एव व्युत्पन्नस्य पुंसो घटमानयेत्यादिवाक्यात्तादृशबोधस्य तुल्यफलानुत्पादेन[3] घटमित्याद्यानुपूर्वीज्ञानेऽपि व्युत्पत्तिविशेषस्य सहकारित्वमुप-गन्तव्यम्। अथ कर्मत्वादावगृहीतघटामादिपदशक्तिकस्यापि पुंसो घटमित्याद्यानुपूर्वी-ज्ञानदशायां कुम्भः कर्मत्वमित्यादिनिराकाङ्क्षाकाङ्क्षघटकपदज्ञानाधीनपदार्थोप-स्थितिसत्त्वे[4] घटकर्मत्वाद्यभेदान्वयबोधवारणाय[5] तादृशान्वयबोधे घटपदज्ञान-जन्यघटोपस्थितित्वाम्पदज्ञानजन्यकर्मत्वोपस्थितित्वादिना हेतुत्वमवश्यमेव स्वीकरणीयम्। तथा च तादृशानुपूर्वीज्ञानस्य तादृशानुपूर्वीघटकतत्तत्पदज्ञानजन्य-तत्तत्पदार्थोपस्थितेश्च पृथक्कारणत्वकल्पनापेक्षया लाघवात्तादृशानुपूर्वीप्रकारकज्ञान-जन्यतत्तत्पदार्थोपस्थित्यादिनैकैकहेतुताकल्पनमुचितमिति शाब्दबोधेनाकाङ्क्षाज्ञानं हेतुः; अपि तु हेतुतावच्छेदकम्।

न च विनिगमनाविरहात्[6] तत्तत्पदार्थोपस्थापकानुपूर्वीज्ञानत्वेन हेतुत्वं निष्प्रत्यूहैवेति वाच्यम्। तत्तत्पदार्थोपस्थापकानुपूर्वीज्ञानत्वेन हेतुत्वोपगम आनुपूर्वीज्ञानजन्यपदार्थोपस्थित्युत्पादक्षण एव शाब्दबोधापत्तेः[7], आनुपूर्वीज्ञान-रूपकारणस्य प्राक्सत्त्वात्। न च कारणतावच्छेदकविशिष्टस्य प्राक्तत्तायाः कार्योत्पादप्रयोजकतया पदार्थोपस्थितेः प्राक्क्षणे आनुपूर्वीज्ञानसत्त्वेऽपि तदुपधायकतासम्बन्धेन पदार्थोपस्थितिविशिष्टस्य तस्याऽसत्त्वान्नातिप्रसङ्ग इति वाच्यम्। विशिष्टसत्तायाः कार्योत्पादप्रयोजकत्वोपगमे विशेष्यसत्ताया इव विशेषणसत्तायाः कल्पनेन[8] गौरवात्।

वस्तुस्तु पदार्थोपस्थापकानुपूर्वीज्ञानत्वेन शाब्दबोधहेतुत्वस्य पदार्थोपस्थिति-पूर्ववृत्तित्वमगृहीत्वा ग्रहीतुमशक्यत्वेन तादृशधर्मस्यान्यथासिद्धिनिरूपकत्वमन्यकार्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यद्धर्मावच्छिन्नस्य प्रकृतकार्यपूर्ववर्तिताग्रहस्तद्धर्मा-वच्छिन्नस्यान्यथासिद्धत्वात्, अत एव परामर्शजन्यत्वे[9] व्याप्तिज्ञानस्यानुमिति-

---

१. तादृशवाक्याधीन; २. शब्दप्रामाण्यविलयापत्तेरिति।
३. युक्त्यानुत्पादेन; ४. निराकाङ्क्षाकाङ्क्षवाक्य।
५. घटकर्मत्वाद्योः; ६. विरहादानुपूर्वीविशेषज्ञानजन्यतत्तत्पादार्थोपस्थितित्वेन।
७. शाब्दबोधापत्तिः; ८. कल्पनाधिक्येन।
९. परामर्शजनकत्वेन व्याप्तिज्ञानस्य भ्रम्यादिजनकतया न च दण्डस्य घटहेतुत्वं प्रत्याख्यातं दीधितिकारेण।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हेतुत्वं भ्रमिजनकत्वेन दण्डस्य घटजनकत्वं प्रत्याख्यातं दीधितिकारेण, तथा च नोपदर्शितविनिगमनाविरहावकाशः। एतेन विशिष्टस्य प्राक्तत्वं यदि पूर्वकाले विशेष्यविशेषणोभयसत्तारूपं तथैवोक्तक्रमेण[1] विशिष्टस्य प्राक्तत्तायाः कार्योत्पत्ति-प्रयोजकत्वे[2] गौरवं तदेव न; अपि तु विशेषणवैशिष्ट्यावच्छिन्ननिरूपित-विलक्षणाधिकरणत्वमेव विशिष्टसत्त्वं तच्च विशेष्यविशेषणोभयाधिकरणत्वं नियतं[3] तस्य तत्कार्यप्रयोजकत्वेन[4] किञ्चिद्गौरवमिति दुर्वार एवोक्तविनिगमनाविरह इति परास्तम्।

न च यत्रानुपूर्वीज्ञानविशेषावच्छिन्नपदज्ञानजन्यपदार्थोपस्थितिर्वर्त्तते। तत्र[5] तादृशपदज्ञानं च नष्टं[6] शाब्दबोधापत्तिवारणायानुपूर्वीविशेषप्रकारकज्ञानस्यापि शाब्दधीहेतुत्वमावश्यकमिति वाच्यम्। तत्र शाब्दबुद्धेरिष्टत्वात्, अस्तु वा कारणतावच्छेदकविशिष्टप्राक्तत्वमेव कार्योपधाने तन्त्रम्। यच्चानुपूर्वीविशेषा-वच्छिन्नपदज्ञानजन्यपदार्थोपस्थितित्वापेक्षया[7] लाघवात्पदार्थोपस्थितिमत्पदज्ञानत्वेनैव[8] हेतुत्वमुचितम्। आनुपूर्वीविशेषघटकपदेऽप्यव्युत्पन्नस्य पुंसो निराकाङ्क्षापद-ज्ञानजन्यपदार्थोपस्थितिसत्त्वेऽपि न शाब्दबोधापत्तिः। आकाङ्क्षापदज्ञानस्य[9] व्यापार-विरहाद् व्यापारसत्त्वे आकाङ्क्षाज्ञाननाशेऽपि कार्योत्पत्तिरिष्टैव।

न च[10] तत्पदोपस्थितेर्व्यापारतानिर्वाहाय तस्यापि स्वातन्त्र्येण हेतुताया अवश्यकल्पनीयतया[11] तदपेक्षया तथाविधगुरुधर्मपुरस्कारेण साकाङ्क्षपदजन्य-पदार्थोपस्थितेर्हेतुताकल्पनमेव[12] न्याय्यमिति वाच्यम्। घटकर्मत्वान्वयबोधे घटं कुम्भमित्याद्यानुपूर्वीप्रकारकज्ञानजन्यघटोपस्थितित्वादिना हेतुत्वे पदभेदेनानन्तकारण-तायामवच्छेदकगौरवात् तदपेक्षया तत्तत्स्थले तत्तदानुपूर्वीज्ञानत्वेनैव हेतुतानां पदार्थोपस्थितेश्च सामान्यतो घटोपस्थितित्वकर्मत्वोपस्थितित्वाभ्यां हेतुताद्वयस्य न्याय्यत्वात् पदार्थोपस्थितिनिष्ठजनकतायामानुपूर्वीज्ञानजन्यतातत्तदानुपूर्वीज्ञान-[13]जन्यतावच्छेदकत्वे पदार्थोपस्थितित्वे न सम्मतस्य विशेषणविशेष्यभावे विनिगमना-विरहापाताच्चेति। तदसत्, पदार्थोपस्थितेः सामान्यतो घटोपस्थितित्वादिना हेतुत्वे उक्तातिप्रसङ्गस्यैव वारणसम्भवात्[14], तथा ह्यव्यवहितप्राक्क्षणावच्छिन्न-सामग्र्यादिकारणतायाः[15] कार्योत्पत्तिव्याप्यत्वे किञ्चिद्द्वारककारणतावच्छेदका-

---

१. स्यात्तदैवोक्तक्रमेण; २. प्रयोजकत्वोपगमे।
३. नियतमात्रं; ४. तस्य कार्योत्पादप्रयोजकत्वे च न किञ्चिदपि।
५. 'तत्र' इत्यस्य पाठ एव नास्ति; ६. विनष्टं तत्र; ७. यत्तु।
८. पदार्थोपस्थितिद्वारा तादृशपदज्ञानत्वेनैव हेतुत्वकल्पनमुचितम्।
९. साकाङ्क्षपदज्ञानस्य; १०. तत्पदार्थोपस्थितेः; ११. कल्पनीयत्वात्।
१२. पदार्थोपस्थितेरेक; १३. जन्यत्वस्यावच्छेदकत्वे पदार्थोपस्थितित्वेन सम्मतस्य।
१४. वारणासम्भवात्; १५. सामग्र्यधिकरणतायाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वच्छिन्नस्तोम एव सामग्रीशब्देन विवक्षणीयः। अन्यथा स्मृतिस्वर्गाव्यवहितपूर्वक्षणे[1] निश्चयत्वे भागत्वावच्छिन्नसत्त्वेन[2] तद्घटितसामग्र्यसत्त्वात्तदुत्पादसामग्र्य-नियम्यत्वापत्तेः।

एवञ्चोक्तस्थले साकाङ्क्षपदज्ञानस्य स्वव्यापारकस्यासत्त्वेऽपि साक्षाज्जनकतावच्छेदकीभूततत्पदार्थोपस्थितित्वावच्छिन्नघटितसामग्र्यक्षतैवेति[3]। न च सामग्रीव्याप्तौ साक्षात्कारणतावच्छेदकावच्छिन्नानामिव व्यापारघटितकारणता-वच्छेदकावच्छिन्नीयव्यापारस्य सामग्रीशरीरेऽन्तर्भावनीयतया प्रकृतस्थले निराकाङ्क्षपदाधीनोपस्थितेराकाङ्क्षाज्ञानजन्यत्वाभावात्, आकाङ्क्षाज्ञानजन्य-व्यापारस्यासत्त्वान्न सामग्रीसमवहित इति वाच्यम्। उक्तस्थल एव साकाङ्क्ष-पदयोः[4] समूहालम्बनमेकं ज्ञानं तत्रार्थोपस्थितेर्वस्तुगत्याऽऽकाङ्क्षाविशिष्टपद-विषयकं यज्ज्ञानं तज्जन्यत्वेन तद्व्यापारसम्भवात्।

न च द्वारककारणतावच्छेदको यो धर्मस्तदवच्छिन्नजनकतारूपव्यापार-सत्त्वमेव कार्योत्पादप्रयोजकं वक्तव्यम्। प्रकृते च समूहालम्बनोपस्थितेर्वास्तवा-काङ्क्षाविशिष्टपदज्ञानजन्यत्वेऽपि तं प्रत्याकाङ्क्षाविशिष्टपदज्ञानत्वेनाहेतुत्वात्[6], प्रकृतस्थले[7] तादृशव्यापारस्यैव दुर्लभत्वात्। न च तत्तदानुपूर्वीविशेषज्ञानजन्य-पदार्थोपस्थितित्वेन हेतुत्वमतेऽप्युक्तसमूहालम्बनानुपूर्वीज्ञानजन्यपदार्थोपस्थितिबलाद् घटकर्मत्वयोर्भेदान्वयबोधो दुर्वार इति वाच्यम्। घटमित्याद्यानुपूर्वीज्ञाननष्ट-घटपदज्ञानत्वावच्छिन्नजनकताकोपस्थितित्वेन हेतुत्वाभ्युपगमात् तादृशसमूहा-लम्बनस्य च गृहीतवृत्तिककुम्भादिपदज्ञानत्वेनैव तादृशोपस्थितिजनकत्वात्, यत्तु स्वजन्यपदार्थोपस्थितिसम्बन्धेनाकाङ्क्षाज्ञानस्य साक्षादेव शाब्दबोधहेतुत्वं स्वीकरणीयम्। जन्यता च तत्तदानुपूर्वीविशेषज्ञानविषयाकाङ्क्षाघटक-तत्तत्पदत्वावच्छिन्ननिरूपिता[10] ग्राह्या, आकाङ्क्षाविशिष्टपदज्ञानजन्योपस्थितित्वेन हेतुत्वेऽप्युक्तस्थलीयसमूहालम्बनजन्योपस्थिति(त)वारणाय तादृशजन्यतानिवेश-स्यावश्यकत्वात्।

एवञ्च दर्शितस्थले आकाङ्क्षाजनकतावच्छेदकसम्बन्धात्मक-तादृशोपस्थितिविरहान्न शाब्दबोधापत्तिरिति, तदपि न सम्यक्। स्वजन्यपदार्थो-

---

१. प्राक्क्षणे;
२. यागृत्वावच्छिन्न।
३. अक्षतत्वमेवेति;
४. यत्र साकाङ्क्षनिराकाङ्क्षपदयोः।
५. समूहालम्बनजन्योपस्थितेः;
६. जनकत्वात्।
७. तत्समवधानमकिञ्चित्करमेवेति वाच्यम्, तत्तत्पदार्थोपस्थितिं प्रति तत्तत्पदज्ञानत्वेनैव हेतुत्वात् क्वचिदप्युपस्थितौ आकाङ्क्षाविशिष्टपदज्ञानत्वेनाहेतुत्वात्।
८. समूहालम्बनज्ञानस्य;
९. विशेषात्मकाकाङ्क्षाघटक।
१०. तत्तत्पदज्ञानत्वावच्छिन्न;
११. आकाङ्क्षाज्ञान।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पस्थितिसम्बन्धेन शाब्दबोधवृत्तित्वस्य[१] स्वस्मिन् पदार्थोपस्थितिमगृहीत्वा[२]-ग्रहीतुमशक्यत्वेन तेन सम्बन्धेनाकाङ्क्षाज्ञानस्यान्यथासिद्धत्वात् तादृशोपस्थितित्वेन हेतुतायां[३] मानाभावाच्चेति[४]।

अत्रोच्यते—घटमित्याद्यानुपूर्वीज्ञानजन्यघटाद्युपस्थितित्वेन शाब्दबोधहेतुत्वे शक्यलाक्षणिकघटपटादिरूपानन्तार्थभेदभिन्नासु घटपदजन्यपदार्थोपस्थितिहेतुतास्व-वच्छेदककोटौ घटपदाव्यवहितोत्तरत्वावच्छिन्नावगाहित्वस्य[५] निवेशाधिक्येनानन्तस्थले कारणतावच्छेदकगौरवात्[६], तत्तद्घटपदप्रकारकजन्यतत्तदर्थोपस्थितित्वेन[८] हेतुतायां[९] घटमित्येतादृशानुपूर्वीज्ञानस्य चार्थविशेषमनिवेश्य तादृशानुपूर्वीज्ञानविशिष्टशाब्दत्वा-वच्छिन्नं प्रति तादृशानुपूर्वीज्ञानत्वेन हेतुतायाश्च कल्पने लाघवादाकाङ्क्षाज्ञान-हेतुतासिद्धिः। न चानुपूर्वीज्ञानविशिष्टशाब्दत्वावच्छिन्नं प्रति तादृशानुपूर्वीज्ञान-विशेषज्ञानजन्यतावच्छेदककोटौ विषयितानिवेशघटपदादिपदज्ञानजन्यघटाद्युपस्थिति-त्वावच्छिन्नजन्यतावच्छेदकघटकघटकारणत्वादिशाब्दबोधसाधारणतादृशो-पस्थितिविशिष्टशाब्दत्वेन समं लक्षणया घटपदार्थघटककर्मत्वबोधसाधारणस्य घटमित्येतादृशानुपूर्वीज्ञानजन्यतावच्छेदकस्य व्याप्यव्यापकभावासम्भवे न तयोः परस्परसहकारित्वं न सम्भवतीति वाच्यम्। कार्यतावच्छेदकसामानाधिकरण्यमात्रस्य परस्परसहकारितायां नियामकत्वात्।

न चाम्पदस्य सुब्विभक्तित्वेन लाक्षणिकत्वविरहात् कर्मत्वमेवार्थः। तथा चाम्पदज्ञानजन्योपस्थितेर्नार्थभेदेन कारणताभेद इत्यमत्वावच्छिन्नविषयिक-ज्ञानजन्योपस्थितित्वेनावश्यकल्पनीयतया हेतुतायामवच्छेदककोटौ अम्पदज्ञानांशे घटपदाव्यवहितोत्तरत्वावगाहित्वेन निवेशनमुचितम्, अम्पदत्वावच्छिन्नविशेष्य-घटपदाव्यवहितोत्तरत्वज्ञानत्वेन हेतुत्वान्तरकल्पनापेक्षया क्लृप्तायामेकहेतु-तायामेवावच्छेदकगौरवताया[१२] न्याय्यत्वादिति वाच्यम्। अमादिपदस्यापि शक्तिभ्रमेण कारणत्वादिबोधकत्वात् तज्ज्ञानस्याप्यर्थभेदेन कारणताबाहुल्यात्। एवं सुब्विभक्ते-र्लक्ष्यार्थेऽनादितात्पर्यमात्रं न कल्प्यते, न तु तस्यार्थान्तरे लक्षणाया[१३]

---

१. पूर्ववर्तित्वस्य; २. पूर्ववर्तित्वमगृहीत्वा।
३. सम्बन्धतायाम्।
४. अन्यथा स्वाश्रयज्ञानजन्यपदार्थोपस्थितिसम्बन्धेनाकाङ्क्षाविषयकत्वादेरपि हेतुतापाताच्चेति।
५. घटपदाव्यवहितोत्तरत्वाम्पदत्वावच्छिन्नावगाहित्वस्य।
६. कारणतावच्छेदककोटौ; ७. तत्र तत्र।
८. पदत्वप्रकारकज्ञानजन्य; ९. हेतुतानाम्।
१०. विषयानिवेशे; ११. अम्पदत्वावच्छिन्न।
१२. हेतुतायामवच्छेदकगौरवसहिष्णुताया न्याय्यत्वादिति वाच्यम्।
१३. लक्षणया।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आधुनिकतात्पर्यस्य च ज्ञानसत्त्वेऽर्थान्तरशाब्दबोध एव[१] ज्ञायते। तथा च लक्षणयाप्यमाद्यर्थान्तरबोधकत्वमेवेत्यवधेयम्[२]। इदमत्राभिधेयम्[३]—आकाङ्क्षाज्ञानस्य शाब्दबोधहेतुतामते यत्र क्षणे घटमित्येतादृशानुपूर्वीज्ञानजन्यपदार्थोपस्थितिर्विद्यते तादृशज्ञानं विनष्टं तदुत्तरक्षणे शाब्दबोधानुदयात्। तदानीं समानानुमित्याद्युपपत्तये तत्र शाब्दसामग्रीप्रतिबन्धकतायां घटपदज्ञानजन्यघटोपस्थित्यम्पदज्ञानजन्य-कर्मत्वोपस्थितिस्तादृशी, तादृशानुपूर्वीज्ञानमपि निवेशनीयम्। तथा च तेषां त्रयाणामन्योन्ये न योग्यताज्ञानादिरूपकारणेन समं विशेषणविशेष्यभावे विनिगमनाविरहेण सामग्रीप्रतिबन्धकताबाहुल्यप्रसङ्गात्। आकाङ्क्षाज्ञान-जन्याकाङ्क्षाज्ञाननाशेऽपि[४] तज्जन्यपदार्थोपस्थितिसत्त्वेन शाब्दबोधस्यैवोत्पत्त्या समानविषयिकानुमित्युत्पादाभावेन तथाविधानुपूर्वीज्ञानजन्ये घटकर्मत्वोपस्थितिरेव निवेशनीये। तथा च तयोर्द्वयोरेव परस्परविशेषणविशेष्यभावे[५] विनिगमनाविरहेण प्रतिबन्धकताबाहुल्यादेतन्मतापेक्षया तन्मते प्रतिबन्धकताधिक्यं स्फुटम्।

न चानुपूर्वी विशेषज्ञानशाब्दबोधहेतुतामतेऽम्पदं घटपदाव्यवहितोत्तरत्वा-भाववदिति हि मानसं प्रति तादृशेच्छाविरहविशिष्टाया घटपदज्ञानजन्यघटोप-स्थित्यम्पदज्ञानजन्यकर्मत्वोपस्थितिघटितशाब्दबोधसामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवं तादृशसामग्रीक्षणेऽम्पदधर्मिकघटपदाव्यवहितोत्तरत्वनिर्णयस्यावश्यकतया तथाविधविपरीतनिश्चयवशादेव तादृशमानसानुत्पादानिर्वाह[६] इति वाच्यम्। यादृशज्ञाने विपरीतनिश्चयविधया तथाविधानुपूर्वीज्ञानविरोधि तथाविधकतिपयज्ञानेषु तादृशसामग्र्याः प्रतिबन्धकत्वं[७] कतिपयप्रतिबन्धकत्वाद् घटादावपि समानविषयिकानुमितौ घटपदादिविषयिकानन्तविधमानसादौ च तथाविधसामग्री-प्रतिबन्धकताया उपदर्शितविनिगमनाविरहेण प्रतिबन्धकताधिक्यप्रयुक्तगौरव-स्याशक्यसमाधानत्वात्। न चाकाङ्क्षाज्ञानस्य शाब्दबोधहेतुतामतेऽपि[८] सामग्रीप्रतिबन्धकतायां निवेशनीयम्; किन्तु जन्यतासम्बन्धेन घटमित्येतादृशानुपूर्वीज्ञानविशिष्टे घटकर्मत्वोपस्थितिरेव[९], तथा च नोक्तगौरवावकाशः। न[१०] च तादृशानुपूर्वीज्ञाननाशे[११] तज्जन्यपदार्थोपस्थितिसत्त्वे

---

१. एव न जायते;
२. बोधकत्वमस्येवेत्यवधेयम्।
३. इदमत्र चिन्तनीयम्।
४. पदार्थोपस्थितित्वेन हेतुत्वमते उक्तस्थले आकाङ्क्षाज्ञाननाशेऽपि।
५. परस्परमपरेण च कारणेन समं विशेष्यविशेषणभावे।
६. निर्वाहादिति;
७. कतिपयप्रतिबन्धकतात्रुटावपि।
८. नोक्तत्रयं स्वातन्त्र्येण;
९. घटकर्मत्वोपस्थिती।
१०. न वा इति पाठः;
११. तादृशानुपूर्वीनाशे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समानविषयिकानुमित्यनुपपत्तेर्विशेषणाभावेन[1] विशिष्टघटितसामग्र्यभावस्याक्षतत्वादिति वाच्यम्। तथा सति यत्र घटपदत्वाम्पदत्वप्रकारकज्ञानादर्थोपस्थितिस्तदानीमेवानुपूर्वीज्ञानं[2] तत्रापि भवन्मते शाब्दबोधोदयेन तत्र समानविषयिकानुमित्याद्यापत्तेः। जन्यतासम्बन्धेनानुपूर्वीज्ञानविशिष्टपदार्थोपस्थितेरभावाद्[3] जनकतासम्बन्धेन पदार्थोपस्थितिविशिष्टानुपूर्वीज्ञानस्य[4] निवेशमादाय विनिगमनाविरहस्य दुर्वारत्वाच्च। उपस्थितौ तद्विशेषणीभूततादृशज्ञाने वा कारणान्तरवैशिष्ट्यं निवेश्यत इत्यत्र विनिगमकदानस्यावश्यकत्वाच्च।[5]

अत्रेदं समाधीयते—आकाङ्क्षाज्ञानस्य स्वातन्त्र्येण हेतुतामतेऽपि[6] तन्नाशानन्तरं तज्जन्यपदार्थोपस्थितिबलाच्छाब्दबोधस्स्वीक्रियते। पदार्थोपस्थितेस्तद्व्यापारत्वोपगमाच्छाब्दबोधाव्यवहितपूर्वक्षणे[7] तदसत्त्वेऽपि न तस्य कारणत्वानुपपत्तिः। एवञ्च भवन्मत इवैतन्मतेऽप्यानुपूर्वीविशेषज्ञानजन्यपदार्थोपस्थितिरेव सामग्रीप्रतिबन्धकतायां निवेशनीये, न तु स्वातन्त्र्येणानुपूर्वीविशेषज्ञानस्य[8] निवेशमादाय विनिगमनाविरहस्य दुर्वारत्वाच्च। उपस्थितौ तद्विशेषणीभूततादृशज्ञाने वा वैशिष्ट्यं निवेश्यत इत्यत्र विनिगमकदानस्यावश्यकत्वाच्च नोक्तगौरवावकाशः। घटादिपदेऽप्यव्युत्पन्नस्य[9] कुम्भादिपदेषु व्युत्पन्नस्य घटं कुम्भं कर्मत्वमित्येतादृशनानाविषयकसमूहालम्बनस्य घटकर्मत्वाद्युपस्थित्यनन्तरं शाब्दबोधापत्तेश्च घटपदज्ञानत्वावच्छिन्नकारणतावदर्थोपस्थितिरूपकारणविरहेणैव न सम्भवति यत्राम्पद इत्येतादृशविपरीतानुपूर्वीज्ञानजन्यघटकर्मत्वोपस्थितिर्वर्तते।[10] तत्र घटमित्येतादृशज्ञानजन्यव्यापारविरहादेव न शाब्दबोधापत्तिः। अव्यवहितपूर्वक्षणे[11] करणव्यापारसमवधानस्यापि कार्योत्पत्तावपेक्षित इति यत्र तादृशस्थल एव घटमित्याद्यानुपूर्वीज्ञानध्वंससंस्कारादिकं[12] वर्तते तत्रापि नाति(व्याप्ति)प्रसङ्गः, ध्वंससंस्कारादेवानुपूर्वीज्ञानजन्यत्वेऽपि घटकर्मत्वान्वयबोधजनकताविरहेण व्यापारताविरहात्, तज्जन्यत्वे सति प्रकृतकार्यासाधारणकारणस्यैव[13] तद्व्यापारत्वात्। न च तादृशस्थल एव घटमित्याद्यानुपूर्वीज्ञान-

---

१. विषयकानुमित्यनुपपत्तिः; २. विशेषज्ञानम्।
३. विशेषज्ञान; ४. विशेषज्ञानस्य।
५. विनिगमकदानस्याशक्यत्वाच्च; ६. शाब्दबोधहेतुतामतेऽपि।
७. प्राक् क्षणे; ८. विशेषज्ञानमपीति नोक्तगौरवावकाशः।
९. घटादिपदेष्वव्युत्पन्नस्य कुम्भादिपदे च व्युत्पन्नस्य पुंसो घटं कुम्भः कर्मत्वमित्येतादृशनानापदविषयकसमूहालम्बनजन्यघटकर्मत्वाद्युपस्थित्यनन्तरं शाब्दबोधापत्तिश्च घटपदज्ञानत्वावच्छिन्नजनकताकपदार्थोपस्थितिरूपकारणविरहेणैव न सम्भवतीति पाठः।
१०. घटमित्येतादृशानुपूर्वीज्ञानव्यापारविरहादेव शाब्दबोधापत्तिः।
११. प्राक्क्षणे; १२. ज्ञानजन्यध्वंस; १३. जनकस्यैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्यतादृशानुपूर्वीघटकयत्किञ्चिद्विषयिणी प्रकृतशाब्दबोधौपयिकयोग्यतादि-विषयिणी स्मृतिर्दैववशेनोत्पन्ना तत्र तादृशस्मृतेस्तथाविधानुपूर्वीज्ञानजन्यत्वेन प्रकृत-शाब्दबोधजनकत्वेन च व्यापारत्वसम्भवाच्छाब्दबोधापत्तिर्दुर्वारैवेति वाच्यम्। करण-जन्यतावच्छेदकीभूतो यः प्रकृतकार्यजन्यतावच्छेदकीभूतो यो धर्मस्तदवच्छिन्नस्यैव प्रकृतव्यापारपदेन विवक्षणात् प्रकृतशाब्दबोधजनकतावच्छेदकयोग्यताज्ञान-घटमित्येतादृशानुपूर्वीज्ञानजन्यतावच्छेदकत्वविरहेण तादृशस्मृतेरतथात्वात्।

न चैवं घटाद्युपस्थितेरपि व्यापारत्वासम्भवः घटपदज्ञानत्वाव-च्छिन्नजनकताकघटोपस्थित्यादेर्घटपदज्ञानादिजन्यतावच्छेदकत्वादिति वाच्यम्। तादृशधर्मस्याश्रयभिया पदज्ञानजन्यतावच्छेदकत्वेऽपि[1] यादृशानतिप्रसक्तरूपो धर्मस्तज्जन्यतावच्छेदकस्तेनैव[2] शाब्दबोधहेतुतायास्स्वीकरणीयतयाऽनुपपत्ति-विरहात्। यत्र करणजन्यतावच्छेदके फलजनकतावच्छेदकत्वं सम्भवति, तत्रैवेयं रीतिः। अन्यत्र साक्षात्कारजनकतावच्छेदकावच्छिन्नसमवधानमेव कार्योत्पत्ति-प्रयोजकमुपेयं कलशमित्याद्यानुपूर्वीज्ञानजन्यशाब्दबोधे घटमित्याद्यानुपूर्वी-ज्ञानजन्यशाब्दबोधे घटमित्याद्यानुपूर्वीज्ञानस्य व्यभिचारवारणाय च स्वाव्यहितोत्तरोप-स्थित्यव्यवहितोत्तरत्वसम्बन्धेन तत्तदानुपूर्वीज्ञानविशिष्टत्वं तत्तदानुपूर्वीज्ञान-जन्यतावच्छेदकमुपेयमत आनुपूर्वीज्ञाननाशानन्तरोत्पन्नतज्जन्योपस्थितिजन्य-शाब्दबोधस्य नासङ्ग्रह इति दिक्।

यत्त्वाकाङ्क्षासंशयाच्छाब्दबोधानुत्पत्त्याकाङ्क्षानिश्चयत्वेनैव शाब्दबोधहेतुता वाच्या[3], तदपेक्षया लाघवान्निराकाङ्क्षज्ञानत्वेन प्रतिबन्धकत्वमेवोचितम्[4]।

न च कर्मत्वपदं घटपदनिराकाङ्क्षमित्येतादृशज्ञानदशायां घटमित्याद्यानु-पूर्वीज्ञानादपि शाब्दबोधानुपपत्तिः। तत्पदद्वयज्ञानजन्यशाब्दबोधे तद्धर्मिकापर-पदार्थाकाङ्क्षाविरहज्ञानत्वेन प्रतिबन्धकत्वं न सम्भवति। घटपदकर्मत्वपदज्ञानजन्य-घटकर्मत्वभेदान्वयबोधरूपप्रतिबध्यस्याप्रसिद्धेः[5] घटपदाम्पदज्ञानजन्ये घटकर्मत्वयो-र्भेदान्वयबोधेऽम्पदधर्मिकघटपदाकाङ्क्षाविरहज्ञानस्य प्रतिबन्धकतया च घटः कर्मत्वमित्यादिवाक्याच्छाब्दबोधापत्तिर्दुर्वारैवेति वाच्यम्। यतो घटः कर्मत्वमित्यादि-पदज्ञानाद्घटकर्मत्वयोर्भेदान्वयबोधवारणाय निराकाङ्क्षत्वज्ञानस्य प्रतिबन्धकता न कल्प्यते। तत्र घटपदत्वाम्पदयोः[6] प्रकारकज्ञानजन्यघटकर्मत्वोपस्थितिरूपकारण-

---

१. जन्यतानवच्छेदकत्वेऽपि।
२. तेन रूपेणैव। साक्षात्कारणतावच्छेदकावच्छिन्न।
३. वाच्या, तथा च।
४. तदेकतरधर्मिकापरपदाकाङ्क्षाविरहज्ञानत्वेन प्रतिबन्धकत्वञ्च न सम्भवति।
५. स्वघटकर्मत्वयोर्भेदान्वयबोधरूपप्रतिबध्यस्याप्रसिद्धेः।
६. अम्पदत्वादि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विरहेणैव तादृशान्वयबोधवारणासम्भवात्। भवन्मते पदार्थोपस्थितीनां तादृशरूपेण कारणताया आवश्यकत्वेन[1] प्रागेव दर्शितत्वाद् अपि तु अम्पद इत्येतादृशविपरीतानुपूर्वीकपदज्ञानात्तादृशान्वयबोधापत्तिवारणैव[2] तथा चाम्पदत्व-प्रकारकज्ञानेऽपि न ज्ञानजन्यशाब्दबोधेऽम्पदत्वावच्छिन्नधर्मिकघटपदा-व्यवहितोत्तरत्वाभावप्रकारकज्ञानत्वेनैव प्रतिबन्धकत्वं कल्प्यते, तत्र च नानुपपत्तिलेशोऽपि।

न च यत्राम्पदे घटपदाव्यवहितोत्तरत्वाभावज्ञानं वर्त्तते, कलशमित्या-कारकानुपूर्वीज्ञानं च तत्र शाब्दबोधे व्यभिचारः, तथाविधनिराकाङ्क्षज्ञानपदत्वस्यैव[3] तदभावजन्यतावच्छेदकत्वोपगमात् तत्तत्पदत्वप्रकारेण निराकाङ्क्षत्वाभावज्ञानस्य तत्तत्पदत्वप्रकारकज्ञानजन्यपदार्थोपस्थितीनां भाने चान्यसहकारेणैव[4] फलोपधाय-कत्वोपगमान्नातिप्रसङ्गः। तत्र चाम्पदं धर्मितावच्छेदकीकृत्य न घटपदाव्यव-हितोत्तरत्वज्ञानं न वा तदभावज्ञानं तत्राप्यम्पदत्वादिप्रकारकज्ञानादिनैवान्वयबोध इति, तदसत्। संशयसाधारणस्याकाङ्क्षाविरहज्ञानस्य प्रतिबन्धकत्वेऽप्रामाण्य-निश्चयत्वावच्छिन्नाभावस्यैव निवेशनीयतया गौरवाद् आकाङ्क्षानिश्चयत्वाव-च्छिन्नहेतुतायामप्रामाण्यज्ञानत्वावच्छिन्नाभावस्यैव निवेशनीयत्वात्।

एवं निराकाङ्क्षज्ञानस्य प्रतिबन्धकत्वे घटपदत्वाम्पदत्वप्रकारक-ज्ञानजन्यपदार्थोपस्थितिघटितानुमितिसामग्रीप्रतिबन्धकतायामेकत्रैवाम्पदत्वावच्छिन्न-धर्मिकघटपदाकाङ्क्षाभावघटपदत्वावच्छिन्नधर्मिकाम्पदत्वाकाङ्क्षाभावग्रहाभावौ निवेशनीयौ, तथाविधैकतरज्ञानसत्त्व एव शाब्दबोधानुदयेन समानविषयिकानुमिते-रुत्पत्तिरिति तयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण गौरवम्। अस्मिन्[5] मते चाम्पदत्वावच्छिन्नधर्मिकघटपदसाकाङ्क्षत्वग्रहयोरेकतरसत्त्व[6] एव कार्योत्पत्त्या तादृशज्ञानयोरेकतरत्वं[7] निवेश्य पृथक्कारणत्वस्य[8] कल्पनात् तयोर्विशेषणविशेष्यभावे न विनिगमनाविरहस्याप्रसक्तिः। एवं निराकाङ्क्षताज्ञानस्य प्रतिबन्धकतामतेऽम्पद-त्वादिसामानाधिकरण्येन घटपदोत्तराम्पदे घटपदाव्यवहितोत्तराभावग्रहस्यैव[9]

---

१. आवश्यकत्वस्याप्रागेव दर्शित्वात्।
२. वारणायैव।
३. निराकाङ्क्षत्वज्ञानाभावस्य।
४. चान्योन्यसहकारेणैव।
५. अस्मन्मते।
६. ग्रहघटपदत्वावच्छिन्नधर्मिकाम्पदसाकाङ्क्षत्वग्रहयोरेकतरसत्त्व इति पाठः।
७. ज्ञानयोरेकैकमिति पाठः।
८. पृथक्-पृथक्कारणत्वयोः कल्पना तयोर्विशेष्यविशेषणभावे विनिगमनाविरहस्याप्रसक्तेः।
९. व्यवहितोत्तरत्वाभावग्रहे घटमित्याद्यानुपूर्वीज्ञानाच्छाब्दबोधानुदयप्रसङ्गः। न च तत्तदम्पदत्वावच्छेदेन घटपदाव्यवहितोत्तरत्वभावग्रहस्यैव प्रतिबन्धकताया उपगन्तव्यतया नायं दोष इति वाच्यम्। तथा सति पदव्यक्तिभेदेनानन्तप्रतिबन्धकतापातात्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिबन्धकतया उपगन्तव्यतया नायं दोष इति वाच्यम्, तथा सति पदव्यक्तिभेदे-नानन्तप्रतिबन्धकतापातात्।

न चाकाङ्क्षाज्ञानस्यापि पदव्यक्तिभेद[1] आवश्यकः। एकपद[2]धर्मिका-काङ्क्षाज्ञानदशायां समानानुपूर्वीकपदव्यक्त्यन्तरमात्रधर्मिकतत्तदर्थपरत्वग्रहसत्त्वे शाब्दबोधापत्तिवारणाय तत्तत्पदधर्मिकाकाङ्क्षाज्ञानत्वतथाविधतात्पर्यज्ञानत्वाभ्यां शाब्दबोधहेतुतामभ्युपेत्य तादृशाकाङ्क्षाज्ञानतात्पर्यज्ञानयोः परस्परसहकारस्या-वश्यकत्वा[3]दिति वाच्यम्। घटपदाव्यवहितोत्तराम्पदं घटकर्मत्वपदमित्या-कारकस्यानुपूर्वीविशेषधर्मितावच्छेदकतात्पर्यज्ञानस्यैव शाब्दबोधहेतुत्वोपगमे-नोक्तातिप्रसङ्ग[4]निरासात्। न चैवमाकाङ्क्षाज्ञानस्य शाब्दबोधहेतुत्वमकिञ्चित्करं घटः कर्मत्वमित्यादौ तादृशतात्पर्यज्ञानविरहेणैव शाब्दबोधानुत्पादसम्भवादिति वाच्यम्, तादृशतात्पर्यज्ञानस्यैवाकाङ्क्षाज्ञानतया तद्धेतुतयैवाकाङ्क्षाज्ञानहेतुतासिद्धेः। आनुपूर्वीविशेषधर्मितावच्छेदकतात्पर्यज्ञा[5]नस्य तात्पर्यधर्मितावच्छेदकानुपूर्वी-विशेषज्ञानस्य[6] हेतुत्वमित्यत्र विनिगमनाविरहेण कारणताद्वयस्य प्रसक्तावपि पदव्यक्तिभेदेन कारणताकल्पनापेक्षया लाघवस्याक्षतत्वात्। न च भव[7]न्मते विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताकनिराकाङ्क्षत्वज्ञानाभावविशिष्टविशेष्यकतात्पर्य-ज्ञानत्वेन हेतुत्वोपगमान्नोक्तदोष इति वाच्यम्। निराकाङ्क्षत्वज्ञाने तत्पुरुषीयत्व-निवेशेन गौरवात्।

..... मिते विक्रमादित्यवसरे चैत्रशुक्लाष्टमीचन्दवारेऽलेखि मया।

मुदा बालगोपालविदुषाऽऽकाङ्क्षावादो मतिप्रदः ।
स्वार्थपरार्थं चैतेन तुष्यतां श्रीगुरुः सदा ।।

।। इति श्रीरघुदेवभट्टाचार्यविरचित आकाङ्क्षावादः ।।

---

१. भेदेन कारणताभेद आवश्यकः।
२. पद इति पाठो नास्ति।
३. आवश्यकत्वात्तदिति वाच्यम्।
४. प्रसङ्गविरहेणैव शाब्दबोधानुत्पादसम्भवादिति वाच्यम्।
५. ग्रहस्य।
६. वा इत्यधिकः पाठः।
७. मन्मते इति पाठः।
८. तत्तत्पुरुषीयत्वनिवेशेन गौरवादिति। इति श्रीरघुदेवभट्टाचार्यकृत आकाङ्क्षाविचारः समाप्तः। इति पाठः उपलभ्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशिष्टम्-क

ग्रन्थे समुद्धृतानां केषाञ्चन नियमविशेषाणां कार्यकारणभावानाञ्च सूची

१. शब्दज्ञानस्य शाब्दत्वावच्छिन्नं प्रति शब्दज्ञानत्वेन वर्णज्ञानत्वेन वा हेतुता। (पृ.१)

२. ज्ञानत्वेन आत्मत्वेनैव वा शाब्दत्वावच्छिन्नं प्रति हेतुता। (पृ.१)

३. पदज्ञानत्वेनैव शब्दत्वावच्छिन्नहेतुत्वकल्पनम्। (पृ.२)

४. लक्षणाज्ञानाधीनशाब्दबोधप्राक्कालेऽपि शक्तिज्ञानमावश्यकम्। (पृ.२)

५. तद्रूपावच्छिन्नपदविषयकोपस्थितिव्यतिरेकप्रयुक्तप्रकृतान्वयबोधाभावप्रयोजकाभावप्रतियोगिस्वावच्छिन्नविषयकोपस्थितिको यो धर्मस्तद्वत्त्वमेवैतद्रूपावच्छिन्नपदनिरूपिताकाङ्क्षा, कर्मत्वविशेष्यकाधेयत्वादिसंसर्गकघटादिप्रकारकान्वयबोधे चामादिपदेष्वेव घटपदादिनिरूपिता एतादृशाकाङ्क्षा, तादृशान्वयबोधे घटपदत्वावच्छिन्नविषयकोपस्थितेरम्पदत्वावच्छिन्नविषयकोपस्थितेश्च हेतुता। (पृ.२-३)

६. घटपदज्ञानव्यतिरेकप्रयुक्ततथाविधान्वयबोधाभावप्रयोजकव्यतिरेकप्रतियोगित्वप्रकारकज्ञानत्वादिना तथाविधान्वयबोधाभावविशेष्यकघटपदज्ञानव्यतिरेकाम्पदज्ञानव्यतिरेकप्रयुक्तत्वप्रकारकज्ञानत्वादिना वा तथाविधान्वयबोधहेतुता वाच्या। (पृ.४)

७. घटपदत्वप्रकारकज्ञानत्वाम्पदत्वप्रकारकज्ञानत्वेनैव हेतुता। (पृ.४)

८. तत्तत्पदार्थान्वयबोधे तत्तत्पदसमभिव्याहारज्ञानत्वेनैव हेतुत्वम्। (पृ.५)

९. स्वविशेष्यकसमभिव्याहृततत्पदज्ञानव्यतिरेकप्रयुक्तान्वयानुभवाभाववत्ताज्ञानस्यैव हेतुत्वम्। (पृ.५)

१०. तत्तत्पुरुषीयान्वयबोधे तत्तत्पुरुषविशेष्यकप्रयुक्तान्वयानुभवाभाववत्ताज्ञानत्वेनैव हेतुता। (पृ.५)

११. समवायसम्बन्धेनान्वयबोधं प्रति समवायविशिष्टविशेष्यताप्रत्यासत्यैव निरुक्तान्वयानुभवाभावरूपाकाङ्क्षाज्ञानस्यैव हेतुत्वम्। (पृ. ५)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. विषयिताविशिष्टसामानाधिकरण्यसम्बन्धेन निरुक्तान्वयानुभवाभावविशिष्ट-ज्ञानत्वेनैव वाकाङ्क्षाज्ञानस्य हेतुता। (पृ.६)

१३. राजपदपुरुषपदार्थयोरन्वयबोधे राजपदं पुरुषपदोपस्थापितार्थान्वितस्वार्थ-प्रतीतिजनकत्वाभिप्रायकमित्याकारकसमभिव्याहारज्ञानस्य हेतुत्वमावश्यकम्। (पृ.६)

१४. पदज्ञानस्य पदजन्यपदार्थोपस्थितिद्वारैव हेतुता। (पृ.८)

१५. तादृशपदद्वयजन्यशाब्दबोधे तादृशाभिप्रायविषयत्वज्ञानहेतुत्वम्। (पृ.९)

१६. विशिष्य तत्तत्पदाव्यवहितत्वे सति तत्तत्पदोपात्तस्यैव ज्ञानं शाब्दबोधजनकम्। (पृ.११)

१७. प्रथमान्तपदोपस्थाप्ये संख्याप्रकारकबोधेऽपि तादृशाकाङ्क्षैव नियामिका। (पृ.१३)

१८. तादृशान्वयबोधे घटपदज्ञानजन्यघटोपस्थितित्वाम्पदज्ञानजन्यकर्मत्वोपस्थिति-त्वादिना हेतुत्वम्। (पृ.१५)

१९. विशेषणवैशिष्ट्यावच्छिन्ननिरूपितविलक्षणाधिकरणत्वमेव विशिष्टसत्त्वं तच्च विशेष्यविशेषणोभयाधिकरणत्वं नियतम्। (पृ.१६)

२०. यत्तु स्वजन्यपदार्थोपस्थितिसम्बन्धेनाकाङ्क्षाज्ञानस्य साक्षादेव शाब्दबोध-हेतुत्वम्। (पृ.१९)

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिशिष्टम्-ख

प्रकीर्णानि

(क) ग्रन्थे समुद्धृतानां दोषाणां सूची

दोषाः	पृष्ठ-संख्या
१. व्यभिचारः	२,१३,१४,१४,२०
२. अतिप्रसङ्गः	१५,२२
३. सङ्करप्रसङ्गः	१४
४. विधेयाविमर्शः	१३

(ख) ग्रन्थे चर्चिता केचन ग्रन्थकाराः, विचारकाः वा, तेषां वाक्यानि

१. आलङ्कारिकाः पृ.सं. १३

न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः ।
धिक्धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ।।

साहित्यदर्पणः (सविमर्श-हिन्दी-व्याख्यासहितः)
पृ. सं. ६, चौखम्बा विद्याभवन, वाराणसी १९८८।

२. दीधितिकारः	पृ. सं. १६
३. एकाक्षरकोशः	पृ. सं. १६
४. यत्तु	पृ. सं. ३
५. लेखकः	पृ. सं. १२
६. मीमांसकः	पृ. सं. १२
७. प्राचां	पृ. सं. १
८. नव्याः	पृ. सं. १०
९. मौनिः	पृ. सं. १२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

५४ वर्षे	मार्गशीर्ष-फाल्गुन-पूर्णिमे, वि.सं. २०५६	३-४ अङ्कौ

'र' प्रत्याहारः

प्रो. आद्याप्रसादमिश्रः

पूर्व-कुलपतिः

महर्षिमहेशयोगीवैदिकविश्वविद्यालयस्य

जबलपुरम्

❀ ❀ ❀

भगवता भाष्यकारेण 'अइउण्'इत्यादिचतुर्दशसूत्राणां प्रयोजनोपन्यास-प्रसङ्गेन पस्पशाह्निके उक्तम्—'अथ किमर्थो वर्णानामुपदेशः'? तत्रोत्तरितम्—

वृत्तिसमवायार्थः, अनुबन्धकरणार्थः, इष्टबुद्ध्यर्थश्च वर्णानामुपदेश इति त्रीणि प्रयोजनान्युक्तानि। तेषु प्रयोजनेषु वृत्तिसमवायार्थो वर्णानामुपदेश इति वाक्यं व्याकुर्वता भाष्यकृताऽभिहितम्—का पुनर्वृत्तिः? शास्त्रप्रवृत्तिः। कः समवायः? वर्णानामानुपूर्व्येण सन्निवेशः। अर्थात् पाणिनिशास्त्रप्रवृत्तौ वर्णगतो यो हि क्रमविशेषः, स एवात्र बोध्यत्वेनाभिप्रेत इति। सत्युपदेशे वर्णानामजादि-संज्ञाभिर्लाघवेन शास्त्रप्रवृत्तिः सम्भवति। तदेव प्रतिपादयता भगवता पतञ्जलिना उक्तम्—स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च। वृत्ति-समवायश्चानुबन्धकरणञ्च प्रत्याहारार्थम्। प्रत्याहारश्च वृत्त्यर्थः, अर्थात् शास्त्र-प्रवृत्त्यर्थः। एनमेवाशयं प्रकाशयता भगवता भट्टोजिदीक्षितेन सिद्धान्तकौमुद्या आदौ चतुर्दशसूत्रान्ते लिखितम्—इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। एषामन्त्या इतः। लण्सूत्रेऽकारश्च। तत्र अणादिप्रत्याहारसिद्ध्यर्थम् 'अइउण्' इत्यादिचतुर्दशसूत्रेष्वन्ते स्थिताः वर्णा हलन्त्यमिति सूत्रेणेत्संज्ञका भवन्ति। सत्यामित्संज्ञायाम् 'आदिरन्त्येन सहेता' इति सूत्रेण अणादिप्रत्याहाराः सिद्ध्यन्तीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्येन प्रक्रिया प्रवर्तते; किन्तु लण्सूत्रमध्यस्थितोऽकारोऽपीत्संज्ञक इत्यर्थकं यद्वाक्यं लिखितं तत्किमप्यपूर्वं वैशिष्ट्यं रहस्यञ्च विभर्ति, तदेवोद्घाटयितुमत्र यत्नो विधीयते।

अत्रैतदवधेयम्—'तुल्यास्यप्रयत्नं सवर्णम्' इति सूत्रे ऋलृवर्णयोः सवर्णसंज्ञाविधानार्थमुक्तं वार्तिकम्—ऋलृवर्णयोः सावर्ण्यविधिः। अभ्यूहितञ्च तत्र—ऋलृवर्णयोः सवर्णसंज्ञायां लृकारस्थानेऽपि 'उरण्रपरः' इत्यनेन रपरत्वं भविष्यति। तथा सति 'तवल्कारः' इत्यादयः प्रयोगा न सेत्स्यन्तीति तेषामाशयः। तत्रोत्तरितम्—लृकारस्य लपरत्वं वक्ष्यामि। वक्ष्यामीत्यस्य व्याख्यास्यामीत्यर्थः कैयटेन कृतः। अपि चोक्तम्—'रपरः' इत्यत्र 'र' इति लकाराकारेण प्रत्याहार आश्रीयते। तत्रान्तरतम्याद् ऋकारस्याण् रपरो भवति। लृकारस्याण् लपर इति। असत्यां सवर्णसंज्ञायां 'उरण्रपरः' इत्यत्र लृकारग्रहणं कर्त्तव्यं भवति। नागेशस्तु लपरत्वं वक्ष्यामीत्यस्य उरण्रपरो लपरश्चेति अपूर्वपाठे तात्पर्यमभिव्यनक्ति। तन्मते लण्सूत्रस्थाकारो नानुनासिको न चेत्संज्ञकः, न च रप्रत्याहारः सिद्ध्यति। अत एव उरण्रपर इत्यस्य स्थाने उरण्रपरो लपरश्चेति सूत्रकरणेन तवल्कारस्य सिद्धिं विधाय कैयटेनाश्रितो रप्रत्याहारः खण्डितः। अत एव 'लण्सूत्रेऽकारश्च' इति सिद्धान्तकौमुदीप्रतीकमाक्षिपन् लघुशब्देन्दुशेखरे आह नागेशः—इदन्तु तुल्यास्यसूत्रस्थकैयटानुरोधेन। अपि च नागेशेन स्वपक्षपोषणाय अतो ल्रान्तस्येति पाणिनिसूत्रे लकारग्रहणमेवोद्धृतम्। तथा हि—यदि लण्सूत्रेऽकारस्येत्वं सूत्रकृदभिमतं भवेत्तदा अतो ल्रान्तस्येति सूत्रे लकारोच्चारणमनर्थकं स्यात्, रप्रत्याहारेणैव निर्वाहादतो लण्सूत्रेऽकारस्येत्वं न भवतीति प्रतीयते।

न च अतो ल्रान्तस्येति सूत्रे लकारोच्चारणेन रप्रत्याहारोऽनित्यस्तेन रदाभ्यां निष्ठातो नः, रषाभ्यां नो णः समानपदे, वनो र च, रात्सस्य इत्यादौ न रप्रत्याहारग्रहणमिति चेत्, न, वैयाकरणानां मते शब्दस्य नित्यतया रपदाऽनित्यत्वस्य वक्तुमशक्यत्वात्।

न च 'र'पदस्य नित्यत्वेऽपि 'र'पदनिष्ठा रेफलकारोभयनिरूपिता शक्तिरनित्येति वाच्यम्, शक्तावच्छेदकीभूतायाः 'र' इत्यानुपूर्व्याः सत्त्वे शक्तिर्नास्तीति वक्तुमशक्यत्वात्, 'सिद्धे शब्दार्थसम्बन्धे' इति भाष्यप्रामाण्येन शक्त्याख्यस्य शब्दार्थयोः सम्बन्धस्य नित्यताया एव स्वीकाराच्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न च शक्तेर्नित्यत्वेऽपि अतो लेत्यत्र लकारोच्चारणेन रप्रत्याहारजन्यो रेफलकारोभयविषयको बोध एवाऽनित्य इति वाच्यम्, तादृशबोधसामग्रीसत्त्वे बोधस्य वचनसहस्रेणापि निरोद्धुमशक्यत्वात्। न च 'र'पदं सर्वत्र 'र-ल' तात्पर्येण पाणिनिना नोच्चारितमिति पाणिनितात्पर्यस्यैवानित्यत्वं तेन कल्प्यत इति वाच्यम्, क्वोभयतात्पर्येणोच्चारितं क्व च न इत्यस्य व्याख्यानत एव निर्णेयत्वेन 'उरण्रपरः' 'अतो ल्रे'त्यत्र च 'रपदं रेफलकारोभयतात्पर्येणोच्चारितमन्यत्र नेति व्याख्यानादिनैव निर्णयसम्भवेन पुनरपि लकारोच्चारणवैयर्थ्यापत्तेः।

ननु रषाभ्यामित्यादौ तथा षसाहचर्येण रेफस्य ग्रहणं न प्रत्याहारस्य तथा अतो ल्रान्तस्येत्यत्र अत्साहचर्येण रेफस्यैव ग्रहणं भविष्यति न 'र'प्रत्याहारस्येति शङ्कानिवृत्तये लग्रहणमावश्यकमित्यरुचेराह—**किञ्चेति**।

तस्यायमाशयः—लण्सूत्राकारस्यानुनासिकत्वे तमादाय यप्रत्याहारः णकारमादाय यण्प्रत्यहारश्चेति यत्र यप्रत्याहाराश्रयणे लाघवं तत्र य एवाश्रयणीयः, यत्र यण आश्रयणे लाघवं तत्र स एवाश्रयणीयः। यथा—इको यणचीति सूत्रे यणचीत्यत्र सार्धचतस्रो मात्राः, योऽचीति चतस्रो मात्रा इति तत्र यप्रत्याहारेणैव व्यवहरेत्। 'यणो मयो द्वे वाच्ये' इत्यत्र तन्त्रेण षष्ठ्यन्तपञ्चम्यन्तयोरुभयोर्निर्देशाद् याद्यस्य इति करणे गौरवमिति तत्र यण्प्रत्याहारेणैव व्यवहरेद्, न तु सर्वत्र यप्रत्याहारेणैव व्यवहरेत्। तदेतद्ध्वनयता उक्तम्—बहुषु यण्पदघटितसूत्रेष्विति।

एतेन लोके नानार्थहर्यादिस्थले चैत्रोच्चारितहरिपदधर्मिकात् तादृश-तद्व्यक्तित्वधर्मितावच्छेदकात् चैत्रोच्चारितं हरिपदं विष्णुविषयकं बोधं जनयतु—इत्याकारकबोधतात्पर्यज्ञानाद्विष्णुविषयको बोधः। एवं मैत्रोच्चारितं हरिपदम् इन्द्रविषयकं बोधं जनयतु—इत्याकारकात्तात्पर्यज्ञानादिन्द्रविषयको बोधः, न तु हरित्वरूपसामान्यधर्मितावच्छेदकं तात्पर्यज्ञानं तत्र शाब्दबोधप्रयोजकम्, तथा सति इन्द्रतात्पर्येणोच्चारितहरिपदादपि मर्कटादिबोधोत्पत्तेः, न तथा शास्त्रे; किन्तु तत्र अष्टाध्यायीस्थ'वृद्धिरादैच्'इत्यादिसूत्रं वृद्धिपदत्वावच्छेदेन आदैज्विषयकबोधजन-कत्वप्रकारकतात्पर्यं ग्राहयति। एवमष्टाध्यायीस्थ'र'पदत्वावच्छेदे प्राप्तो य आदिरन्त्येन इत्यनेन तात्पर्यग्रहस्तत्र अतो ल्रेति लकारोच्चारणेन 'उरण्रपरः' इत्येतद्घटकरपदधर्मिकतद्व्यक्तित्वावच्छेदेनेव तात्पर्यं बोध्यते—तावतैवानित्यत्व-कथनपरिरक्षणमिति चेत्, न, अनित्यत्वज्ञापनस्य फलाभावात्। अत एव अणादिपदशक्तेरनित्यत्वाभावेऽपि अणादिशब्देन क्वचित् प्रत्याहारस्य, क्वचित्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्वचिदणादिप्रत्ययस्य बोधः। तस्मादतो ल्रान्तस्येति सूत्रे लकारोच्चारणेनाकारेऽनुनासिकत्वाभाव एवोचितः।

किञ्च, यदि लण्सूत्रस्थाकारोऽनुनासिकः स्यात्, तर्हि बहुषु यण्पदघटितसूत्रेषु अर्धमात्रालाघवानुरोधेन यप्रत्याहारेणैव व्यवहरेत्। न च 'पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते' इति न्यायादर्धमात्रालाघवानुरोधेनेति शेखरग्रन्थोऽयुक्त एवेति वाच्यम्, पर्यायशब्दानामिति न्यायस्य गृहीतशक्तिकपदविषयत्वेन प्रकृतेऽणादिपदशक्तिग्राहकादादिरन्त्येनेति शास्त्रेण यण्त्वादक्षयलाघवाद् यत्वमेव शक्यतावच्छेदकं पाणिनिना कुतो नाङ्गीकृतमिति शङ्कायाः सम्भवात्। अपि च लण्सूत्रे णकारोच्चारणं मास्तु। लण्सूत्राकारस्यानुनासिकत्वे तेनैव 'य'प्रत्याहारं कृत्वा यण्पदस्थाने 'य'पदम्, इण्स्थाने 'इ-अ' पदम्, अण्स्थाने 'अ-अ' पदं पठित्वा तत्तत्स्थले णकाराकारकरणेन लण्सूत्रे णकारोच्चारणवैयर्थ्यापत्तिः। यद्यप्यण्-इण्स्थाने 'अ-अ' 'इ-अ' इति करणे एकमात्रागौवम्, तथापि यण्स्थाने यकरणे यत्वस्यैव शक्यतावच्छेदकत्वेन यण्त्वापेक्षया णकाराकरणलाघवाच्च तावन्मात्रगौरवस्याकिञ्चित्करत्वात्। एवं सत्यपि न सर्वत्र प्रत्याहारग्रहणम्, तेन 'डेर्यः', 'योऽचि' इत्यादौ न प्रत्याहारग्रहणमिति। किञ्च 'य-र-ल-व' इति वर्णचतुष्टयबोधनाय क्वचिण्णकारेण क्वचिदकारेण प्रत्याहाराश्रयणेऽर्धजरतीयत्वम्। किञ्च यप्रत्याहाराश्रयणे 'यस्य हलः', 'योऽचि' इत्यादौ प्रत्याहाराश्रयणवारणाय कृत्रिमाकृत्रिमन्यायबाधनाय व्याख्यानाश्रयणे गौरवमित्यरुचेराह—**किञ्चेति।**

किञ्च लण्सूत्रस्थाकारस्यानुनासिकत्वेऽनुबन्धानामच्प्रत्याहारे ग्रहणाभावे 'आचारादप्रधानत्वाल्लोपश्च बलवत्तरः' इति भाष्योक्तस्य तृतीयहेतोरव्यापकत्वापत्तिः। तव मते लोपस्य बलवत्वेऽपि हल्प्रत्याहारसिद्धेः प्रागच्पदार्थनिष्पत्त्यभावेनोपदेशेऽजित्यस्य वाक्यार्थाभावेन लणित्यकारस्येत्संज्ञालोपयोरभावेन प्रत्याहारेषु जातिग्रहणपक्षस्यैव भाष्यकृता सिद्धान्तितत्वेन लणित्यकारप्रवेशे मा माँस्त्रायस्वेत्यत्रानुनासिकपक्षेऽनुस्वारापत्तिर्दुर्वारा। सोऽस्तीत्यादौ सुलोपाद्यापत्तिश्चेति।

यद्यपि प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु नेति ग्रन्थेऽच्प्रत्याहारस्यैवोल्लेखनेन भाष्ये 'अइउण्' इत्यादि-सूत्रचतुष्टयानन्तरमेवैतद्ग्रन्थप्रवर्तनेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अइउण्' इत्यादिसूत्रचतुष्टयघटकाननुबन्धानेव पक्षीकृत्याच्प्रत्याहारजन्यबोधविषयत्वाभाव एव साध्यत इति प्रतीयते, तथापि प्रत्याहारमात्रोपलक्षकमेतदित्यवधेयम्। हल्प्रत्याहारेऽपि अनुबन्धानामग्रहणस्य विवक्षितत्वात्। अत एव अनुनासिकादौ ककारादौ परतो यणादिकं न भवति।

किञ्चानुबन्धानां प्रत्याहारजन्यबोधविषयत्वाभावे भाष्याभिप्रेतस्य लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वरूपहेतोः पक्षतावच्छेदकं प्रत्यव्यापकत्वं स्यात्।

ननु उभयविधप्रत्याहाराश्रयणे यवरलनिरूपितशक्ति-यण्पदनिष्ठशक्तिस्वीकारे गौरवम्, यण्प्रत्याहारे णकारोच्चारणमकारेण सह 'र'प्रत्याहार एव भवति, न यादिरिति ज्ञापनाय चरितार्थम्।

तथा हि—अनुबन्धाः प्रत्याहारजन्यबोधविषयत्वाभाववन्तः, लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वादित्यनुमानप्रयोगः। आदिरन्त्येनेत्येतद्वाक्यार्थबोधात्प्रागेव 'तस्य लोपः' इत्यनेनानुबन्धस्य लोपादादिरन्त्येन शक्तिग्रहकाले मध्यगतत्वेन तस्य ग्रहणं न भवतीति भाष्याशयः। न च हेतोरव्यापकत्वं गुणः, व्यापकत्वे हि हेतुर्व्यभिचारी स्यादिति वाच्यम्, हेतोरव्यापकत्वापत्तिरित्यस्य पक्षतावच्छेदकाव्यापकत्वापत्तिरित्यर्थः। तथा च हेतोः पक्षतावच्छेदकाव्यापकत्वे भागासिद्ध्या भाष्यासङ्गतिरित्याशयात्।

वस्तुतस्तु इदमनुमानमनुबन्धत्वरूपपक्षतावच्छेकावच्छेदेन चिकीर्षितम्, न तु पक्षतावच्छेदकसामानाधिकरण्येन सकलानुबन्धग्रहणस्य विवक्षितत्वात्। अनुबन्धत्वावच्छेदेन चानुमितौ अनुबन्धत्वव्यापकत्वं हेतावपेक्षितम्, तद् इदानीं न स्यात्, हल्प्रत्याहारसिद्धिकाले अच्पदार्थानिष्पत्त्या उपदेशेऽजित्यनेन लण्सूत्रघटकाकारस्येत्वाभावेन तस्य लोप इति लोपशास्त्रीयावच्छेदकत्वाभावेन भाष्योक्ततृतीयहेतोरभावादित्संज्ञायोग्यत्वरूपानुबन्धत्वस्य च सत्त्वात्। नागेशमते तु अनुनासिकत्वाभावादेवेत्संज्ञायोग्यत्वपक्षतावच्छेदकस्यापि तत्राभावेन नाव्यापकत्वम्।

न च नागेशमते हश्प्रत्याहारे हयवरट्सूत्रस्थानुबन्धकरणे दोषसद्भावेन प्रत्याहारादिविशेषोपादानादेरसङ्गतिरेवेति वाच्यम्, हकारादिषु पुनः पुनरकारोच्चारणेनोच्चारणार्थवर्णरहितहलामग्रहणबोधनेनादोषात्। हश्प्रत्याहारे 'ट'-ग्रहणे तद्विषयप्रयोगाणामुक्तभाष्यादनभिधानकल्पनाच्च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु को यष्टीकते इति प्रयोगस्य सुप्रसिद्धत्वेन कथमनभिधानमिति चेत्, न, टकारसन्निहितस्थानिकस्य हश्निमित्तककार्येण घटितस्य लक्ष्यस्योक्तभाष्यादनभिधानं कल्प्यत इत्यदोषात्। इत्थञ्च लण्सूत्रस्थाकारस्योच्चारणार्थमेव न त्वनुनासिकत्वेन प्रत्याहारार्थम्। उरण्रपरः, लपरश्चेति वक्तव्यमेवेति नागेशानुयायिनः।

वस्तुतस्तु उरण्रपरसूत्रे लकारानुच्चारणरूपलाघवेन रप्रत्याहारश्रयणमेव श्रेयः, इत्संज्ञकत्वरूपानुबन्धत्वस्यैव पक्षतावच्छेदकत्वाङ्गीकारेण पक्षतावच्छेदकत्वाव्यापकत्वापत्तिरपि न, हल्प्रत्याहारसिद्धेः प्राक् लणोऽकारे इत्संज्ञकत्वरूपानुबन्धत्वस्यैवाभावात्। किञ्च नागेशमते उच्चारणार्थानामपीत्संज्ञालोपाभ्यामपहारस्य 'दिव औत्' इति सूत्रे वक्ष्यमाणतया हयवरटित्यादौ हकारोत्तराकारमादाय पक्षतावच्छेदकाव्यापकत्वतादवस्थ्यात्। हल्पदेनाकारग्रहणे मा माँस्त्रायस्वेत्यादावनुस्वारापत्तेः। तस्माद् 'र'प्रत्याहाराश्रयणमेव ज्याय इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दशास्त्रीयकतिपयसिद्धान्तविमर्शः

डॉ. रमाकान्तपाण्डेयः
व्याकरणविभागाध्यक्षः
संन्यासिसंस्कृतमहाविद्यालये
वाराणसी

❀ ❀ ❀

शब्दशास्त्रमेकं गभीरं शास्त्रम्। गभीरा चास्य विचारसरणिः। न केवलं शब्दमात्रं व्युत्पादयति, अपि त्वन्येषामर्थविचारपरकाणां शास्त्राणामिदमुपकारकमिति। अत एव **'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमिति'** सिद्धान्तोक्तिः सङ्गच्छते। तस्यापरन्नाम व्याकरणशास्त्रमिति। महाभाष्यकारेणास्यान्वाख्यानं शब्दशास्त्रत्वेन कृतम्। तद्यथा—'अथ शब्दानुशासनम्'। अथेत्ययं शब्दोऽधिकारार्थे प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्, अनेन महाकाव्यकृतव्यवहारेणास्य शब्दशास्त्रत्वं सुतरां सिद्ध्यति। एवंभूते शब्दशास्त्रे बहवः सिद्धान्ताः पारिभाषिकाः शब्दाश्च वर्तन्ते। तेषामन्वाख्यानं यद्यपि तच्छास्त्रे कृतं विद्यते, तथापि सङ्कलनपूर्वको विचारो नोपलभ्यते। अतस्सौकर्याय शब्दशास्त्रीयकतिपयसिद्धान्ता विचार्यन्ते। तद्यथा—

लण्सूत्रेऽकारश्च

वाक्यमिदं भट्टोजिदीक्षितेन सिद्धान्तकौमुद्यामुक्तम्। वाक्यस्यास्यायमाशयो यद् हकारादिषु वर्णेषु यथा अकार उच्चारणार्थकः, तथा लण्सूत्रघटकाकारो नास्ति। स तु इत्संज्ञकः। तत्र किं मानमिति जिज्ञासायामुच्यते—

तुल्यास्यसूत्रव्याख्यावसरे 'लपरत्वं वक्ष्यामि' इति भाष्यकृता उक्तम्; किन्तु भाष्यकारेण कुत्रापि लपरत्वं नोक्तम्। अतस्तस्य भाष्यस्य सङ्गतये प्रदीपकृता महावैयाकरणेन कैयटेन 'लपरत्वं वक्ष्यामि' इति वाक्यं

१. लघुशब्देन्दुशेखरस्य भूमिका, पृ. २।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'लपरत्वं व्याख्यास्यामि' इति रूपेण व्याख्यातम्। व्याख्यानञ्च रप्रत्याहाराश्रयणरूपमित्युक्तम्, तेन तदनुरोधेन, सिद्धान्तकौमुदीकारेण वाक्यमिदं प्रयुक्तम्।

शेखरकृता च 'लपरत्वं वक्ष्यामि' इत्यत्र वच्पदस्वारस्याद् उरण्रपरो लपरश्चेति न्यासे भाष्यतात्पर्यमवधार्य कैयटाश्रितरप्रत्याहारः खण्डितः।

खण्डनप्रकारः

लण्सूत्रस्थाकारो यद्यनुनासिकत्वेन सूत्रकृदभिमतो भवेत्, तदा 'अतो ल्रान्तस्य' इति सूत्रे लकारं पाणिनिर्नोच्चारयेद् रेफेणैव व्यवहरेत्, तत्सामर्थ्यात् कल्प्यते, यद् रप्रत्याहारो नास्ति।

किञ्च लण्सूत्रघटकाकारोऽनुनासिकः स्यात्, तदा तमादाय 'इको यणचि' इत्यादि सर्वत्र च प्रत्याहारेणैव व्यवहारः कुर्यात्। यण्प्रत्याहारो न स्यात्, तदा महल्लाघवं स्यादिति भावः।

अपि च, अजादिप्रत्याहारेऽनुबन्धानां ग्रहणं न भवेत्, तदर्थं भाष्यकारेण हेतुत्रयमुपन्यस्तम्—

प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः[1] ।।

प्रथमो हेतुः—आचारादिति। तस्यायमर्थः—तृषिमृषिकृषेरित्यादौ ककारादौ परतो यणाद्यकरणाद् अस्य च कालिकसम्बन्धेन हेतुता।

अनुमानस्वरूपन्तु 'अनुबन्धाः प्रत्याहारजन्यबोधीयविषयत्वाभाववन्तः, पाणिनेस्तादृशतात्पर्यविषयत्वात्'। यदि हेतुर्व्यभिचारी स्यात्, तदा पाणिनिः तृषिमृषिकृषिरित्यादौ इकारघटितं प्रयोगं न कुर्यात्। यतो न व्यभिचारी, अतोऽस्तु साध्यसाधकः।

द्वितीयहेतुः—'अप्रधानत्वात्'। प्रधानत्वन्नाम बोधकत्वेन शङ्करतात्पर्यविषयत्वरूपम्। एवञ्चानुबन्धाः प्रत्याहारजन्यबोधीयविषयत्वाभाववन्तः, बोधकत्वेन माहेश्वरतात्पर्यविषयत्वाभावात्। व्यतिरेकानुमितिरप्रधानहेतुका बोध्या। यद्ययं हेतुर्व्यभिचारी स्यात्, तदा अचाम् अक्षु हलां हल्सु इति भाष्योक्तिः असङ्गता स्यात्। अतो न व्यभिचारी।

---

१. महाभाष्ये, पृ. २०५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयहेतुः—'लोपश्चेति'। चो हेतौ, बलवत्तरलोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्।

अनुमानाकारस्तु अनुबन्धाः प्रत्याहारजन्यबोधीयविषयत्वाभाववन्तः, लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वात्। एवञ्च प्राक्सम्मतरप्रत्याहाराङ्गीकारे, तृतीयहेतोरव्यापकत्वापत्तिः, यतो हि लण्सूत्राकारस्यानुनासिकत्वे इत्संज्ञायोग्यत्वरूपपक्षतावच्छेदकाक्रान्तत्वेऽपि तस्य लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वरूपहेतोरभावेन पक्षतावच्छेदकावच्छिन्ने हेतोरभावाद् भागासिद्धिः स्पष्टैवातो रप्रत्याहारोऽङ्गीकरणीय इति। यद्यपि साध्यापेक्षया हेतोरव्यापकत्वमिष्टमेव कथं भागासिद्धिः। अत एव 'धूमवान् वह्नेः' इत्यादौ नानुमितिः, तथापि पक्षतावच्छेदकावच्छेदेनानुमितित्वावच्छिन्नं प्रति पक्षतावच्छेदकव्यापकत्वं हेतोरपेक्षितमिति नियमस्तथा चात्र अनुबन्धत्वावच्छेदेन साध्यतया हेतोरव्यापकत्वापत्तिर्दोषः। इयमेवापत्तिस्तार्किकैर्भागासिद्धिरुच्यते।

किञ्च हल्प्रत्याहारो यावन्न सिध्यति, तावद् अच्प्रत्याहारसिद्धये अपेक्षितायाश्चकास्येत्संज्ञायाः 'हलन्त्यम्'[1] इति सूत्रेण हल्पदार्थाज्ञानाद् हल्प्रत्याहारसिद्धिं कर्तुमशक्यतया हल्प्रत्याहारसिद्धिः अच्प्रत्याहारसिद्धेः पूर्वं कर्तव्या। तस्मिन्नेव काले लण्सूत्रघटकाकारस्य इत्संज्ञाभावेन हल्प्रत्याहारे तस्य ग्रहणात्। प्रत्याहारे जातिपक्षाश्रयणेन अनुनासिकाकारस्यापि बोधेन 'मा माँस्त्रायस्व' इत्यत्रानुनासिकपक्षेऽनुस्वारापत्तिर्दुर्वारा। 'सोऽस्ति' इत्यादौ सुलोपाद्यापत्तिश्चातो रप्रत्याहारो नाङ्गीकरणीयः।

किञ्च—अनुबन्धानां प्रत्याहारे वर्णसमाम्नाये अच्प्रत्याहारे प्रत्याहारार्थानुबन्धानां ग्रहणं कस्मान्न भवतीत्यत्राच्प्रत्याहार एव भाष्यकारेण शङ्का कृता, न तु हल्प्रत्याहारे, यतो हि अच्प्रत्याहारे विजातीया अनुबन्धा आसन्। हल्प्रत्याहारेऽनुबन्धास्सजातीयाः। यदि लण्सूत्रस्थाकारोऽनुबन्धः स्यात्, तदा हल्प्रत्याहारेऽपि विजातीयानुबन्धस्य सत्त्वात् तत्रापि भाष्यकारः शङ्कां कुर्यात्। अतः कल्प्यते यद् रप्रत्याहारो नास्ति। तस्मादस्यानुनासिकत्वमप्रामाणिकम्। 'उरण्रपरः' इत्यत्रैव लग्रहणं कर्तव्यमिति भावः। 'लपरत्वं वक्ष्यामि' इति भाष्यस्येदमेव तात्पर्यमिति।

---

१. पा.सू. १।३।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रप्रत्याहारमण्डनम्

रप्रत्याहाराङ्गीकारे न कापि क्षतिः। यतो हि, अतो ल्रान्तस्येति सूत्रे लकारोच्चारणसामर्थ्याद् रपदं 'रेफलकारोभयविषयकबोधं जनयतु' इत्याकारक-पाणिनितात्पर्यानित्यत्वं कल्प्यते। तेन रदाभ्यां रषाभ्यामित्यादौ रपदेन लकारस्य ग्रहणं न भवति। तस्माच्छेखरोक्तदोषो न युक्तियुक्तः। शेखरकृतोक्तद्वितीय-दोषोद्धारस्तु—

'इणो यण्' इत्यादि सर्वत्र, व्याख्यानात् सन्देहाभावेऽपि सर्वत्र व्याख्याना-श्रयणे गौरवम्। णकारेण प्रत्याहारस्वीकारे व्याख्यानानाश्रयणान्महल्लाघवम्। किञ्च व्याख्यानाश्रयणेन इणो यणित्यादि, अभीष्टसिद्धिवत् सर्वत्र व्याख्यानेनैव सिद्धौ, इत्संज्ञाप्रत्याहारादयो न सन्तु, इत्यस्यापि कल्पनापत्तेः। 'नासूया कर्तव्या[1] यत्रानुगमः क्रियते' इत्यादिभाष्यवचनात् णकारेणैव यणादिप्रत्याहारे दोषाभावाच्च। लण्सूत्रस्थाकारोपलक्षणविधया लोपशास्त्रीयोद्देश्यतावच्छेदकाक्रान्तत्वस्य सत्त्वात् तृतीयहेतोरव्यापकत्वापत्तिर्नास्ति। 'सोऽस्ति' इत्यादौ सुलोपापत्तिश्च 'सोऽस्ति' इत्यादि छान्दस इत्यादिनिर्देशाद् वारणीयेति। अतो रप्रत्याहार-खण्डनपरकशेखरग्रन्थो न समीचीन इति मे प्रतिभाति। एतावता रप्रत्याहार आवश्यक इति भावः।

उपदेश आद्योच्चारणम्[2]

शब्दशास्त्रे उपदेशपदार्थः पारिभाषिकः, न तु 'लोकप्रयुक्तधर्मं कुरु' इत्यादिविधिघटितवाक्यपरः। तत्र कस्तावत् पारिभाषिकोऽर्थ इति जिज्ञासायां प्रथमं सिद्धान्तकौमुदीकारो महावैयाकरणो भट्टोजीदीक्षितः परिभाषते—'उपदेश आद्योच्चारणम्'। उपोपसर्गकदिशिधातोर्भावे घञि प्रत्यये कृते सत्यर्थोऽयं निष्पद्यते। तत्र आद्यञ्च तदुच्चारणमाद्योच्चारणमिति कर्मधारयसमासः, न तु आद्यानामुच्चारणमाद्योच्चारणमिति षष्ठीतत्पुरुषः। यद्यत्र षष्ठीतत्पुरुषसमासः स्यात्, तदा उच्चारणे आद्यत्वं न सिध्येत्; अपि तु षष्ठीतत्पुरुषसमासे उच्चारणे प्रथमत्वं स्यादतो द्वितीयोच्चारणेऽतिव्याप्तिः स्यात्।

यद्यपि कर्मधारयसमासेऽप्यतिव्याप्तिस्तदवस्था, यतो हि द्वितीय-वर्णापेक्षया प्रथमस्याद्यत्वं तृतीयवर्णापेक्षया द्वितीयस्याद्यत्वमतः सर्वत्राद्यत्वस्य

१. महाभाष्ये, पृ. ३५५।
२. सिद्धान्तकौमुदी, पृ. १०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यमानत्वादुपदेशपदमव्यावर्तकं स्यात्। अत आद्यत्वमपि पारिभाषिकम्, तच्चेदम्—

'अज्ञातस्वस्वरूपज्ञापकत्वमाद्यत्वम्'[१]।

एवम्भूतार्थप्रतीतौ किं बीजमित्यत्र शेखरकृता प्रतिपादितम्—'उपशब्दस्याद्यर्थत्वादिशेरुच्चारणक्रियत्वात्'[२]। अनेनोपायेनाद्योच्चारणरूपार्थस्य प्रतीतिर्भवति। कैयटेनापि अस्यार्थस्य समर्थनं कुर्वतावोचि—'इत्संज्ञाविधावुच्चारणवचन[३] उपदिशिर्गृह्यते, इति। तत्रैव भाष्येऽपि, 'येषां स्वरूपज्ञापनायापूर्वोच्चारणं[४] तेषामेवोपदेशव्यवहारः'। नैकविधभाष्यकैयटप्रामाण्याद् उपदेश आद्योच्चारणमिति सिद्धान्तः कृतो भट्टोजीदीक्षितेन।

किन्त्वत्र पक्षे भाष्यविरोधः। तथा हि—महाभाष्यकृता उपदेशग्रहणप्रयोजनं निरूपयता प्रतिपादितं यदुपदेशग्रहणाभावे 'अभ्र आँ अपः' इत्यादौ गुणैः प्रापितस्योद्देश्यस्य 'आँ' इत्यस्य इत्वापत्तिः। तद्वारणाय वार्तिककृता 'उपदेशेऽजनुनासिक' इति सूत्रस्थाने 'उपदेशनेऽजनुनासिक' इति न्यासः कृतः। तन्न्यासस्यायमाशयो यदुपदेशशब्दो नासौ भावघञन्तः, अपि तु उपदिश्यते अनेन उपदेशः शास्त्रम्। 'अभ्र आँ अपः' इत्युपदेशस्य कर्म, न तु करणमिति न दोष इति वार्तिकाभिप्रायः। तत्रैव भाष्ये वार्तिककृद्दर्शितन्यासस्य खण्डनाय, एवञ्च न्यासीयार्थस्य सूत्रत एव लाभाय आचार्येण पतञ्जलिनोपदेशशब्दस्य करणसाधनत्वमङ्गीकृतम्, न तु भावसाधनत्वमित्येव भाष्यविरोधो भावसाधनवादिमते; किन्त्वयं भाष्यविरोधोऽकिञ्चित्करः। यतो हि भावघञन्तपक्षं समर्थयता सिद्धान्तकौमुदीकारेण भाष्यस्यास्य प्रौढिवादित्वं साधितम्। प्रौढिवादित्वे बीजं करणे घञि कस्यापि सूत्रस्योद्देश्यतावच्छेदकानाक्रान्तत्वमिति। प्रौढ्या महत्त्वेन हठादविचार्य बोधयितुं वादः प्रौढिवादः। एतावता नायं भाष्यविरोधो दोषावहः।

'अकर्तरि च कारके संज्ञायाम्'[५] इत्यत्र संज्ञायाः प्रायिकत्वं स्वीकृत्य, कथञ्चित् करणार्थकघञ्प्रत्ययः कर्तुं शक्यः; किन्तु ल्युटा तस्य बाधात् तस्य दुर्लभत्वं तदवस्थैव। 'पुंसि संज्ञायां घः प्रायेण' इत्यनेनापि उपदेशशब्दस्यासंज्ञात्वात् कर्तुमशक्यम्। यदि तत्र सूत्रे प्रायेण पदस्यान्वयः संज्ञायामित्यनेन सह

---

१. लघुशब्देन्दुशेखरे, पृ. ६८; २. तत्रैव, पृ. ६८।
३. महाभाष्ये कैयटः, पृ. २०३; ४. तत्रैव, पृ. २०३।
५. पा.सू. १।१।१९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियते, तदा क्वचिदसंज्ञायामित्यर्थेण प्राप्तिर्वक्तुं शक्या; किन्तु विशेषणं विशेषणेन सहान्वयसामर्थ्यं न लभते, परस्परनिराकाङ्क्षत्वात्।

गुणप्रधानसन्निधौ प्रधानस्य विशेषणे साकाङ्क्षत्वे इतरान्वयो नोचितः बाहुलकन्तु अगतिकगतिः। तस्मात् करणे घञो दुर्लभाद् भावप्रत्यय एव न्याय्य इति प्राङ्मतम्।

नव्यमतम्—महावैयाकरणेन नागेशभट्टेनोपदेशशब्दस्य शास्त्रपरत्व-मेवाङ्गीकृतम्। तैः उपदिश्यते अनेन उपदेशः शास्त्रमिति व्युत्पत्तिं स्वीकृत्य बाहुलकात् करणे घञ्प्रत्यय उररीकृतः। उपदेशग्रहणप्रयोजनप्रतिपादक-भाष्यस्याप्रौढिवादित्वमपि साधितम्। न केवलं तैः कश्चन विशिष्टः पक्षः स्वीकृतः, अपि तु आद्योच्चारणवादिमते अनेके आक्षेपाः कृताः।

किञ्च 'अभ्र आँ अपः' इत्यत्रोपदेशग्रहणस्य प्रयोजनं प्रतिपादयता भाष्यकारेणोपदेशपदस्य शास्त्रमेवार्थः कृतः। अनेन भाष्येण प्रत्यक्षकथनमुपदेश इत्येव समायाति। तथा स्वीकृते 'लटः सद्वा' इत्यनेन विहितशतृशानचोः निष्ठाशब्देन विहितक्तक्तवतोः साक्षात् शतृशानचत्वादिधर्मेणाख्यानाभावाद् इत्वानापत्तिः।

न च 'तौ सत्' इत्यत्र तच्छब्देन इत्संज्ञकविशिष्ट—'आन् तृ' इत्यस्य परामर्शेन 'लटः सद्वा' इत्यनेन तादृशस्यैव विधानान्न दोष इति वाच्यम्।

किञ्च 'क्तक्तवत् निष्ठा' इति परिभाषासूत्रं न तु संज्ञासूत्रमिति 'यत्र, तत्र, उपतिष्ठत, विधीयत' इति चत्वारि पदान्यध्याहृत्य, 'यत्र निष्ठापदं श्रूयते, तत्र क्तक्तवतू उपतिष्ठेते' इत्यर्थद्वारा निष्ठासूत्रे साक्षाद् बोधितस्यैव क्तादि-प्रत्ययस्योपस्थितिः। अतस्तत्रापि नास्ति दोष इति।

'चित्यग्निचित्ये'[१] इति सूत्रेण निपातानुमितक्यबादीनां पादेः इत्वानापत्तिः। यतो हि क्यप्प्रत्ययस्योपस्थितिर्न हि साक्षात्, अपि तु निपातत्वरूपगुणैर्भवति।

यद्यपि 'वदः सुपि क्यप्' इति सूत्रे क्यप्प्रत्ययः साक्षादुच्चरितः, तथापि, 'अन्यत्रोच्चरितः शब्दः अन्यस्य सम्बन्धी न भवति' इति भाष्यतात्पर्यादुभयोः क्यप्प्रत्यययोः परस्परभेदः। अत उक्तदोषस्तादवस्थेव। 'अन्यत्रोच्चरितः अन्यसम्बन्धी न भवति' इत्यत्र किं मानमिति जिज्ञासायां प्रमाणत्वेन भाष्यमुपस्थाप्यते।

---

१. तदेव-३।१।१३२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भगवता भाष्यकारेण 'तस्यापत्यम्[1], अत इञ्' इति सूत्रद्वयस्थाने 'तस्यापत्यमत इञ्' इत्येकैव न्यासः कृतः। तस्येदं तात्पर्यम्, यदन्तप्रातिपदिक-प्रकृतिकषष्ठ्यन्तसुबन्तादपत्यार्थे इञ्प्रत्ययः स्यात्। यथा दक्षस्यापत्यं दाक्षिः। अत्र न्यासे अदन्तप्रातिपदिकषष्ठ्यन्तसुबन्तादपत्यार्थे प्रत्ययः प्राप्तः; किन्तु उदन्तप्रातिपदिकप्रकृतिकभानुशब्दात् प्रत्ययो न प्राप्तः। अतः 'औपगवः, भानवः इत्यादीनां सिद्धिः कथं भविष्यतीति जिज्ञासायां भाष्यकृतानुक्तरूपशेषत्वाद् भविष्यतीत्युक्तम्। यतो हि अदन्तप्रातिपदिकसम्बन्ध्यपत्यमुक्तमुक्तम्, न तु उदन्तप्रातिपदिकसम्बन्धि, तस्मादनुक्तरूपशेषत्वं समायाति। यदि 'अन्यत्रोच्चरितः अन्यसम्बन्धी स्यात्, तदा अदन्तसम्बन्ध्यपत्यस्योक्तत्वात् शेषे सूत्रे तदेवापत्यम्, न त्वन्यत्। एवञ्च कथं तस्यानुक्तत्वं प्रतिपादितं भाष्ये। तत्प्रति-पादनपरकभाष्यप्रामाण्यात् कल्प्यते यद् अन्यत्रोच्चरितः शब्दः अन्यस्य सम्बन्धी न भवति।

अतः क्यप्घटकपकारस्येत्वानापत्तिः। एवञ्चोपदेशपदार्थस्तथा स्वीकरणीयो यथा क्तक्तवतु-शतृशानचादीनां सङ्ग्रहो भवेत्, 'अभ्र आँ अपः' इत्यस्य व्यावृत्तिश्च भवेत्। एवञ्च तद्व्यावृत्तये तत्सङ्ग्रहाय च उपदेशशब्दस्य शास्त्र-रूपमर्थः स्वीकरणीय इति। तच्च प्रयोगशासनकरणभूताः धात्वागमनिपातप्राति-पदिकप्रत्यादेशा इति। 'अभ्र आँ अपः' इत्यत्र प्रयोगशासनकरणत्वं नास्ति। यतो हि 'आँ' इत्ययमादेश' स्वयमेव साधुत्वं प्राप्नोति, न तु कञ्चित् प्रयोगं शास्ति। अतो नेत्संज्ञकः। कैयटेन तु शास्त्रे उच्चरितोऽनुनासिक एव इत्संज्ञकः। अस्योच्चरितत्वाभावान्न दोषः।

किञ्च—उपदेशशब्देनाद्योच्चारणविषयत्वमङ्गीक्रियते, तदा 'भवतष्ठ-क्छसौ' इत्यत्र समुदाये आद्योच्चारणविषयत्वस्य सत्यपि, अवयवस्य ककारस्याद्योच्चारणविषयत्वाभावाद् इत्वानापत्तिः। समुदायोपदेश एव ऋषीणां तात्पर्यं न त्ववयवोपदेशे, यदि प्रत्ययत्वविशिष्टान्त्यस्येत्संज्ञा क्रियते, तदा उपदेशपदं व्यर्थं स्यात्। अन्त्येनैव व्यावृत्तिः सिध्येत्।

केचित्तु—अभिनवचन्द्रिकायामुपदेशशब्दस्य परिष्कृतोऽर्थो विद्यते। तद्यथा—'स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजकतात्पर्यप्रयोज्योच्चारण-विषयत्वमुपदेशत्वम्'[2]।

---

१. पा.सू. ३।१।१३२।

२. अभिनवचन्द्रिका'टीका' लघुशब्देन्दुशेखरः, पृ.४०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लक्षणसमन्वयस्तु—स्वं गुप्तिज्सूत्रेण विधीयमानः सन् तद् वृत्तिश्रावण-प्रत्यक्षविषयतावच्छेदको धर्मः सन् शब्दत्वरूपो धर्मस्तद्धर्मावच्छिन्नविषयता-प्रयोजकं तात्पर्यं सन्शब्दः कुत्साद्यर्थं बोधयत्वित्याकारकं तत्प्रयोज्योच्चारणं सन्-शब्दस्य तद्विषयत्वं सन्शब्दे इति समन्वयः; किन्तु एतादृशलक्षणस्वीकारे गुप्तिज्सूत्रस्थभाष्यविरोधापत्तिः। तत्र हि भाष्यकारेण षष्ठीप्रकल्पकत्वरूपः कश्चन विशिष्टः पक्ष उपस्थापितः। ङमो ह्रस्वादचि इत्यादिस्थले यत्र पञ्चमी, सप्तमी इत्युभयनिर्देशो विद्यते, तत्रार्थसम्पादनाय तस्मिन् तस्मादिति सूत्रद्वये षष्ठीपदमनुवर्त्य तस्मिन्न षष्ठी, तस्मात् षष्ठी इति वाक्यं प्रकल्प्य सप्तम्यन्तान्वयिवाचकात्पदात् षष्ठी, पञ्चम्यान्तान्वयिवाचकात् पदात् षष्ठी इत्यर्थः प्रकल्पितः। अस्मिन्नर्थे गुप्तिज् इत्यत्रापि षष्ठीप्रकल्पकत्वापत्तिः। सनः कः स्यादिति जिज्ञासायां प्रत्यासत्या सनः सन् भवतु इति प्रकल्पपक्षे, आदेशभूते सनि उपदेशे इत्युच्यमाना इत्संज्ञा न स्यात्। यदि भवत्सम्मतस्ववृत्तिश्रावणेत्यादि-लक्षणस्वीकारे आदेशे सनि उपदेशस्य सत्त्वाद् इत्संज्ञा न स्यादिति भाष्यविरोधः स्पष्ट एव। अस्य भाष्यस्यैकदेशित्वेन तद्विरोधोऽकिञ्चित्करः। यतो हि भाष्यकृता ङमो ह्रस्वादचि इति सूत्रे 'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' इति समाधानान्तरमुक्तम्, अनेन पूर्वभाष्यस्यैकदेशित्वं स्पष्टमेव।

यद्यपि स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नविषयताप्रयोजक-तात्पर्यप्रयोज्योच्चारणविषयत्वरूपोपदेशपदार्थस्वीकारे भवतष्ठक्छसौ इत्यत्र कस्येत्वानापत्तिः, तथापि तत्रावयवे आचार्यस्य तात्पर्यमवधार्य पूर्वोक्तदोषः परिहरणीय इति एवञ्चोपदेशपदार्थविमर्शे आचार्यैः पक्षद्वयमुपस्थापितम्। एकस्तावत् करणघञन्तः, अपरस्तावद् भावघञन्तः। यस्य पक्षस्य यत्रापेक्षा स पक्षस्तत्र स्वीकरणीय इति।

अन्ये तु—कैश्चिदाचार्यैरुपदेशपदस्य परिगणितार्थ एव स्वीक्रियते। स च क इति जिज्ञासायामुच्यते—

धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः[१] ।।

एतेषां मते 'चित्रङ्' इत्यत्र ङकारस्येत्वानापत्तिः। एवञ्च तेऽत्र प्रष्टव्या यद् एतेषामुपदेशसंज्ञा उद् योगमात्रम्। उपदेशसंज्ञा इति वक्तुमशक्यम्, शास्त्रकारैः

१. प्रक्रियाकौमुदी, पृ. १६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुत्रापि संज्ञात्वेन व्यवहारो न कृतः। अस्मदादिकृतसंज्ञास्वीकारे शास्त्राव्यवस्थापत्तेः। किञ्च रघुनाथादिशब्दे णत्वापत्तेश्च, 'असंज्ञात्वाद् घप्रत्ययो न'[1] इति भाष्यविरोधापत्तेश्च। आमोऽपि त्वमदन्तत्वादित्यादि स्वपरग्रन्थविरोधः। यतो हि स्वयमेव एकत्र आमः अमित्वमुक्तम्। यदि उपदेशपदेन धातुसूत्रादि गृह्यते चेत्, तदोत्सृष्टानुबन्धस्य प्रत्ययत्वात् तस्येत्संज्ञायां मित्वं स्यात्। अतोऽत्र पक्षे स्वपरग्रन्थविरोधः स्पष्ट एव। तस्माद् उपदेशशब्दस्य पूर्वोक्तार्थ एव स्वीकरणीय इति।

प्रयोजनम्

उपदेशग्रहणस्य प्रयोजनं निरूपयता भाष्यकारेण प्रत्यपादि यदत्र सूत्रे उपदेशपदं न स्यात्, तदा 'अभ्र आँ अपः' इत्यादौ 'आँ' इत्यस्य इत्संज्ञा स्यात्। अत उपदेशग्रहणं कर्तव्यम्। 'अभ्र आँ' इतिवद् अनुनासिकविधानसामर्थ्यात् तद्वारणं कर्तुं शक्यम्। तथा पूर्वसूत्रे उपदेशग्रहणस्य फलाभावाद् उत्तरार्थमित्युक्तम्। उत्तरसूत्रेऽपि तस्य किमपि प्रयोजनं नास्ति। यतो हि तत्रान्त्यग्रहणसामर्थ्याद् यत्किञ्चित् समुदायान्त्यस्येत्संज्ञा वारयितुं शक्या। अत उपदेशग्रहणस्य किं प्रयोजनमिति प्रश्नो जागर्ति। यद्यपि भाष्यकृताऽस्य किमपि प्रयोजनं न निगदितम्; अपि तु उत्तरार्थमित्युक्तम्, किन्तु तत्र फलं न दत्तम्।

गुरुपरम्परातो विशेषतः प्रो.राममनोहरमिश्रमहाभागानां चिन्तनेन भाष्यानुत्तरितमुपदेशपदस्य प्रयोजनमस्माभिः प्राप्तम्। तच्च किम्— अन्योन्याश्रयदोषपरिहाराय 'हलन्त्यम्' सूत्रावृत्तिरिति सर्वजनीनसिद्धान्तः। तस्यार्थः क्रियते 'हलि इति सूत्रे'।

यो हल्पदार्थोऽप्रसिद्धः, यस्य ज्ञानाय आवृत्तिः क्रियते। किमावृत्तिमात्रेण अप्रसिद्धस्य पदार्थस्य ज्ञानं भवति। यथा कश्चन घटो न जानाति, सः पृच्छति घटपदार्थः क इति, पृष्टे सति ज्ञापयिता चेद् घटमावर्तयति, घट इति घट इति, एवं करणे घटं स न जानाति, तथैव हल्पदेन सूत्रमेव ग्राह्यम्। कथं बोधः? अतस्तल्लाभाय आवृत्तिभूते हलन्त्यमिति सूत्रे उपदेशपदं सम्बध्यते। एवञ्चाद्योच्चारणविषयीभूतो हल् ग्रहीतव्यः। हल्धातोरेकदेशो यद्यपि हल् अस्ति, तथापि तत्राद्योच्चारणविषयीभूतत्वं नास्ति। अत आद्योच्चारणविषयीभूतत्वेन सूत्रस्यैव ग्रहणं भवति, न त्वन्यस्य। अत एव महावैयाकरणेन शेखरकृता नागेशभट्टेन उक्तम्—

१. प्रौढमनोरमा, पृ. ३०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'तत्रापि [१]उपदेशपदं सम्बध्यते तद्बललभ्यमर्थमाह—सूत्रेति'। इदमेवोपदेशग्रहणस्य प्रयोजनमिति।

निष्कर्षस्तु—भावघञन्तोपदेशपदार्थस्वीकारे 'लृटः सद्वा', 'निष्ठा' इत्यादिविहितशतृशानच्क्तक्तवतूनामित्वानापत्तिः। किञ्चोद्देशस्य प्रातिपदिकानां नोपदेश इति भाष्यप्रामाण्यात् चित्रङ इत्यत्रेत्वानापत्तिः। करणे घञि स्वीकृते सति कुत्रापि नातिप्रसङ्गः। तत्तद्दोषवारणाय बहुविधक्लिष्टकल्पनापेक्षया, करणघञन्तः पक्ष एव श्रेयान् इति तत्त्वम्।

अन्योन्याश्रयादिदोषविचारः

प्रायः शब्दशास्त्रे त्रयो दोषाः प्राप्नुवन्ति। तत्र प्रथमोऽन्योन्याश्रयः, द्वितीय आत्माश्रयः, तृतीयः चक्रकश्चेति। तत्रादौ अन्योन्याश्रमदोषपरिहारपूर्वकं विचारः क्रियते। अन्योन्याश्रयः स्थलत्रये भवति—ज्ञप्तौ उत्पत्तौ स्थितौ चेति। ज्ञप्तौ अन्योन्याश्रयो व्याकरणशास्त्रे बहुत्र मिलति, परिहारोऽपि तत्र तत्र कृतो विद्यते। तद्यथा—'हलन्त्यम्' आदिरन्त्येन सहेता' इति सूत्रयोः।

उपपादनम्—वाक्यार्थबोधे पदार्थबोधस्य कारणत्वं सर्वसम्मतत्वेन हलन्त्यमित्यादौ पदद्वयं विद्यते, हल् इति प्रथमान्तम्, अन्त्यमिति प्रथमान्तम्, तत्रान्त्यपदार्थस्तु यस्मात् परो नास्ति सोऽन्त्य इति प्रसिद्ध एव, कस्तावद् हल्-पदार्थ इति जिज्ञासायां हल्पदेन त्रयोऽर्था उपस्थिता भवन्ति—प्रथमो हल्प्रत्याहारः, द्वितीयन्तु हल्सूत्रमिति, तृतीयस्तु हल्धातुः। धातोः अदन्तत्वात् तस्य हल्पदार्थतया ग्रहणमशक्यम्, अन्यथा हलान्त्यमिति सूत्रं स्यात्। यदि हल्पदेन हल्सूत्रं गृह्यते, तदा हल्सूत्रस्यान्त्यमिद् भवति इत्येवार्थः स्यात्। एवमर्थे सति विभक्तिघटकानां तवर्गसकारमकाराणां केनापि सूत्रेण इत्संज्ञा प्राप्नुयात्। प्राप्तस्यैव निषेध इति सिद्धान्तानुरोधेन प्राप्त्यभावात् 'न विभक्तौ' इति सूत्रवैयर्थ्यापत्तिः। एवञ्च तत्सूत्रसार्थक्याय, उपदेशेऽन्त्यस्य हलः इत्संज्ञा, इत्यर्थस्यावश्यकतया हल्प्रत्याहारवाच्यानां ग्रहणमादिरन्त्येन सहेता-सूत्राधीनम्। हकारादिलान्त-समुदायघटकानां हल्पदेन बोधः प्रत्याहारसिद्धिं विना दुर्घटः। प्रत्याहारसिद्धौ चादिरन्त्येन सहेता इत्यस्य वाक्यार्थबोधोऽपेक्ष्यते। इत्पदार्थज्ञानाधीनं हल्पदार्थज्ञानं हल्पदार्थज्ञानाधीनमित्पदार्थज्ञानमतः परस्परापेक्षत्वेनान्योन्याश्रयदोषः, अन्योन्याश्रयाणि कार्याणि च न भवन्ति।

---

१. लघुशब्देन्दुशेखरे, पृ. २०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिहारस्तु—अन्योन्याश्रयदोषपरिहाराय शब्दशास्त्रे भट्टोजीदीक्षितेन महावैयाकरणेन नागेशेन वा बहवः पक्षा उपस्थापिताः, तत्र केचन पक्षा उपस्थाप्यन्ते।

प्रथमः पक्षः—'हयवरट्' इत्यारभ्य 'हल्' इति सूत्रपर्यन्तं दशसूत्राणि आवर्त्य 'शषसर्' इत्यन्तं नवसूत्राणि उद्दिश्य दशमेन हल्संज्ञा विधीयते। एकैकस्यावर्तनस्य क्रमवतां वर्णानां ज्ञाने उपयोगः, अन्यस्य च संज्ञासंज्ञिभावे उपयोग इति तात्पर्यम्। एवञ्चेत्संज्ञाज्ञानं विनैव हल्पदार्थज्ञानाद् नान्योन्याश्रयशङ्केति प्रथमः पक्षः।

द्वितीयः पक्षः—उपदेशेऽजनुनासिक इत्, हलन्त्यमिति सूत्रद्वयस्थाने, उपदेशे इदन्त्यम्, अच्, अनुनासिक इति सूत्रत्रयी कर्तव्या। हल्ग्रहणं न कार्यम्। उपदेशावस्थायामन्त्यमिद् भवति। अच्हलित्युभयसाधारणस्येत्संज्ञा क्रियते।

पूर्वयोगेन हलिव अचोऽपि इत्संज्ञायां सिद्धायां किमनेन सूत्रेण अन्त्यस्येत्-संज्ञाविधानार्थमावश्यकमिति भावः। किञ्च सर्वविधस्याच इत्संज्ञा पूर्वेणैव सिद्धा, अनुनासिक इति सूत्रमपि नियमार्थमिति, अच इत् चेत् तदानुनासिकस्यैव। एतेन निरनुनासिकस्येत्संज्ञा व्यावृत्ता भवति। एवं क्रमेण हल्ग्रहणाभावे अन्त्यस्य लकारेत्संज्ञायां हल्प्रत्याहारसिद्ध्या ततोऽन्येषां प्रत्याहाराणां सिद्ध्या, अन्योन्याश्रयदोषो नास्ति इति द्वितीयः पक्षः।

यद्यपि अनन्तरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायेन अनन्तरस्य विद्यमानस्याच एव नियन्त्रिते, तदा निरनुनासिकस्येत्संज्ञा दुर्वारा, तथापि योगविभागकरणसामर्थ्याद् अनन्तरस्येति न्यायापत्तिः। 'मिदचोऽन्त्यात् परः' इति सूत्रसामर्थ्याद् विपरीतनियमोऽपि न भवति।

अत्र पक्षे केचन आक्षिपन्ति यदत्र योगविभागेन हल्ग्रहणं प्रत्याख्याय अन्योन्याश्रयपरिहारो नोचितः। तथा सति सूत्रभेदेन पारायणेऽदृष्टहानिः; किन्त्वयमाक्षेपो न युक्तियुक्तः, यतो हि 'सूत्रभेदं तमुपाचरन्ति'[1] इति भाष्योक्तेर्नेदृशः सूत्रभेदो दोषाय भवति। यतोऽस्य न्यासस्य लघुत्वेनापाणि-नीयत्वमकिञ्चित्करमिति भावः। सति सम्भवे दृष्टप्रयोजनपूर्वकमदृष्टप्रयोजनं कल्पनीयम्। अत एव तत्र तत्र भाष्यकृता क्रियमाणं ज्ञापकं नोच्छिद्यत इति द्वितीयः पन्था।

---

१. लघुशब्देन्दुशेखरः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयः कल्पः—अत्र पक्षे 'आदिरन्त्येन सहेता' इति सूत्रे व्युत्पत्त्या सहेता-शब्दो मध्यगवर्णरूपमर्थं बोधयति। कथमिति चेत्, इण्धातोः तृच्प्रत्यये आङ् उपसर्गेण सम्बन्धे पररूपे, प्रथमैकवचने सहेता इति सिद्धम्।

सह आ समन्ताद् एति गच्छति, बुद्धिविषयं करोतीति मध्यगो वर्णः। इत्यर्थस्वीकारे नास्ति अन्योन्याश्रयदोष इति तृतीयः कल्प इति शास्त्र-विवेचकानाम्।

सिद्धान्तकल्पः—यद्यपि एते सर्वेऽपि कल्पाः शास्त्रे शब्दतत्त्वविज्ञै-रुपस्थापिताः; किन्तु इतः पूर्वतो यावन्तो कल्पा विचारपथि आगतास्ते सर्वेऽपि आपातरमणीयाः। प्रथमकल्पे दशसूत्रावृत्तौ महद्गौरवमिति। योगविभागद्वारा यो हि पक्ष उपस्थापितो विद्यते, तत्रापि ज्ञानगौरवमिति। कण्ठाभिघातगौरवमेवा-दरणीयमिति राजाज्ञा नास्ति। अतो न श्रेयान् द्वितीयः कल्पः। तृतीयकल्पोऽपि अन्योन्याश्रयदोषपरिहारप्रतिपादकभाष्यप्रामाण्यात् कल्प्यते। इण्धातोस्तृचि प्रत्यये वृद्धिप्रसङ्गः। एतावता सा व्युत्पत्तिर्दुःशकेति। अतस्तद्दोषवारणायावृत्तिरेव गरीयसीति दिक्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदाङ्गेषु निरुक्ताङ्गवैशिष्ट्यम्

डॉ. देवेन्द्रनाथत्रिपाठी
उपाचार्यः, संस्कृतविभागस्य
स्वामी देवानन्द-स्नातकोत्तरमहाविद्यालये
मठ-लार, देवरिया

❀ ❀ ❀

जगतो धारकस्य साक्षात्परमेश्वरस्यापि निःश्वासभूतस्य[१] वेदपुरुषस्य स्वरूपार्थयोः संरक्षणार्थं वेदाङ्गानां समुदयो जातः। 'अङ्ग्यन्ते ज्ञायन्ते अमीभिरित्यङ्गानि' इत्यनया व्युत्पत्त्याऽङ्गशब्दस्योपकारकोऽर्थोऽस्ति। वेदस्तु भाषाभावयोरुभयोरपि दृष्ट्या गभीरतम एव। अतो वेदाङ्गसाहित्यमपहाय वेदानां सम्यगर्थपरिज्ञानं भवितुं न शक्नोति। इदमेवोरीकृत्य श्रीमता सायणाचार्येण वेदाङ्गप्रयोजनप्रसङ्गे स्ववेदभाष्यभूमिकायामुक्तम्—

'अतिगभीरस्य वेदस्यार्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि'[२] इति।

अस्य वेदाङ्गसाहित्यस्य प्रादुर्भावस्तु उपनिषत्काल एव जातः। मुण्डकोपनिषदि परापरे चेति द्वे विद्ये वर्णिते स्तः। तत्रापराविद्यारूपेण वेदाङ्गानां सर्वप्रथमं वर्णनं तत्रैव मिलति। यथोक्तम्—'द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते'[३] इति।

शिक्षादिषु वेदाङ्गेषु निरुक्तस्यातीवमहत्त्वपूर्णं स्थानमस्ति। निरुक्तं तु निघण्टुपदानां निर्वचनशास्त्रम्। क्लिष्टानां वैदिकशब्दानां सङ्ग्रहग्रन्थो निघण्टुः। एतेषां क्लिष्टतमानां वैदिकशब्दानां व्याख्यानपुरःसरं निर्वचनं निरुक्तग्रन्थेषूपलभ्यते।

---

१. यस्य निःश्वसितं वेदाः, सायणाचार्यः, ऋ.भा.भू. पृ. २।
२. ऋ.भा.भू. पृ. ११६।
३. मु.उपनि. १।१।४५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो निरुक्तग्रन्थाः स्वतन्त्ररूपेण वेदार्थावबोधने सहायकाः। अत एवोक्तं सायणाचार्येण ऋग्वेदभाष्यभूमिकायाम्—

'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'[१] इति।

अद्यत्वे ह्युपलब्धस्य निघण्टुसमाम्नायस्य कर्त्ता निरुक्तकारो यास्काचार्य एवेति मधुसूदनदयानन्दप्रभृतयो विद्वांसः स्वीकुर्वन्ति[२]; परन्त्वियं विचारणा न समीचीना। यतो हि महाभारते निघण्टुसमाम्नायस्य कर्तृरूपेण प्रजापतेः कश्यपस्य नामोल्लेखो दरीदृश्यते। यथोक्तम्—

वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत ।
निघण्टुकपदाख्याने विद्धि मां वृषमुत्तमम् ।।
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते ।
तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः[३] ।। इति।

निरुक्तवृत्तिकारो दुर्गाचार्योऽपि यास्काचार्यस्य निघण्टुकपदकर्तृत्वं नानुमोदयति। दावनेऽकूपारयोः पदयोर्व्याख्यानप्रसङ्गे वृत्तिकारेण दुर्गाचार्येणानुमोदितं यदन्यैरेव ऋषिभिः समाम्नायः समाम्नातः, अन्य एव विद्वान् तेषां निघण्टुपदानां व्याख्यानकर्त्ता। यतो हि यदि निघण्टुपदसङ्ग्रहकर्त्ता भाष्यकर्त्ता चैक एव विद्वान् भवेत्, तर्हि निघण्टुपदपाठक्रमेणैव पदव्याख्यानमपि स्यात्, परन्तु निघण्टुपदक्रमानुसारं पदव्याख्यानं नोपलभ्यते। अतोऽन्यो निघण्टुपदसङ्ग्रहकर्त्ता, अन्यश्च पदव्याख्याता। इदमेवानुमोदयन्नुक्तं वृत्तिकारेण दुर्गाचार्येण—

'एतस्मिन् मन्त्रे अकूपारस्य दावने इत्येवमनयोः पदयोरनुक्रमः, तेन ज्ञायते अन्यैरेवायमृषिभिः समाम्नायः समाम्नातः, अन्य एव चायं भाष्यकार इति। एको हि समाम्नायं भाष्यं च कुर्वन् प्रयोजनस्याभावाद् एकमन्त्रगतयोः पाठानुक्रमं नामङ्क्ष्यत'[४] इति। पुनः महाभारतेऽपि यास्काचार्यस्य नामोल्लेखो निरुक्तकाररूपेणोपलभ्यते, न तु निघण्टुपदसङ्ग्रहकर्तृरूपेणोपलभ्यते। यथोक्तम्—

---

१. ऋ.भा.भू., पृ. १३०।
२. वैदिक वाङ्मय का इतिहास, भाग-१, खण्ड-२, पृ. १६२।
३. महाभारते, मोक्षपर्व अ. ३४२, श्लो. ८६-८७।
४. निरुक्तम्, दुर्गवृत्तिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्तुत्वा मां शिपिविष्टेति यास्कर्षिरुदारधीः ।
मत्प्रसादादधो नष्टं निरुक्तमधिजग्मिवान्[१] ।।

निघण्टुकालस्यानन्तरं निरुक्तानां कालः समुदेति 'निरुक्तं चतुर्दशप्रकारकमि'त्युक्त्वा[२] श्रीमता दुर्गाचार्येण निरुक्तानां चतुर्दशसंख्या परिगणिता। यास्काचार्येण स्वनिरुक्ते आग्रायणौपमन्यवौदुम्बरायणौर्णवाभकाथक्यक्रौष्टुकिगार्ग्यगालवतैटीकिवार्षायणिशाकपूणिस्थौलाष्ठीविनामधेया द्वादशसंख्यका निरुक्तकाराः परिगणिताः। त्रयोदशस्थानीयस्तु निरुक्तकारः स्वयं यास्काचार्य एव; परन्तु चतुर्दशो निरुक्तकारो नहि विज्ञायते, यस्य विचारणा नामोल्लेखो वा स्यात्। अन्येषामाग्रायणादीनां निरुक्तकाराणां मतस्यापि परिज्ञानं यास्काचार्यस्य निरुक्तशास्त्रस्यावलोकनेन कर्तुं शक्यते।

शिक्षादिषु वेदाङ्गेषु निरुक्तस्य महत्त्वपूर्णं स्थानमस्ति। यतो हि वेदाङ्गेषु शिक्षायान्तु केवलं स्वरवर्णाद्युच्चारणप्रकार[३] एवोपदिश्यते व्याकरणशास्त्रं तु प्रकृतिप्रत्ययाद्युपदेशेन शब्दस्वरूपमेव प्रसाधयति, तस्मिन् वेदार्थविचारणा न प्रधानभूता। आश्वलायनादिकल्पशास्त्रेष्वपि यागप्रयोग एव समग्ररूपेणोपवर्णितः। छन्दःशास्त्रमपि मुख्यतया छन्दसामेव वर्णनं करोति, वेदार्थं तु न स्पृशति। तथैव वेदाङ्गेषु ज्यौतिषशास्त्रमपि वैदिकशब्दानामर्थचिन्तामपहाय यज्ञसमयसिद्धिं कृत्वैवात्मतोषमुपयाति; परन्त्वतस्तु विपरीतं निरुक्तशास्त्रस्य क्लिष्टतमानां निघण्टुसमाम्नायगतानां वैदिकानां पदानामर्थप्रत्यायनमेव मौलिभूतं प्रयोजनम्। निघण्टुसमाम्नायस्यार्थावबोधे निरुक्तशास्त्रमतिरिच्य केवलं व्याकरणशास्त्रमेव नोपकरोति। यतो हि तत्र स्थलविशेषेषु एतावन्ति हिरण्यनामानि, एतावन्ति पृथिवीनामानीति स्पष्टमभिहितम्। अतो निरुक्तशास्त्रमेव शक्नोति सम्यक्तया वेदार्थमवगमयितुम्। यथोक्तं सायणाचार्येण—

'गौ ग्मा ज्मा क्ष्मा क्षा क्षमा' इत्यारभ्य 'वसवः वाजिनो देवपत्न्यो देवपत्न्यः' इत्यन्तो यः पदानां समाम्नायः समाम्नातः, तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते। एतावन्ति हिरण्यनामानि इत्येवं तत्र तत्र विस्पष्टमभिहितत्वात्'[४] इति।

---

१. महाभारते, मोक्षपर्व, अ. ३४२, श्लो. ७१।
२. निरुक्ते, दुर्गवृत्तिः, १/१३।
३. ऋ.भा.भू., पृ. ११७।
४. तदेव, पृ. १३१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदे त्वर्थस्यैव प्राधान्यमिति ऋगेव समर्थयति—

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा[१]।। इति।

निरुक्तशास्त्रे तु सर्वत्रार्थस्यैव प्राधान्यम्, न तु प्रकृतिप्रत्ययात्मकस्य शब्दसंस्कारस्य। यतो हि वैदिकानां शब्दानां सम्यगर्थज्ञानं विना प्रकृतिप्रत्ययस्वरूपो व्याकरणशब्दसंस्कारोऽपि न ज्ञायते। अतो नूनमेव निरुक्तशास्त्रं व्याकरणस्यापि पूरकं निर्वचनपुरःसरं वेदार्थप्रतिपादकञ्चास्ति। इदमेव समर्थयन् यास्काचार्येणोक्तम्—

'अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः। तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च'[२] इति।

निरुक्तप्रक्रियायां शब्दनिर्वचनविधौ व्याकरणप्रक्रिया न सर्वथाऽऽदरणीया। यतो हि शब्दानामर्थेषु वृत्तयः सन्दिग्धप्राया एव भवन्ति। अतोऽर्थानुसारेण व्याकरणप्रक्रियामपहाय विभक्तिसमायोजनमपि निरुक्तशास्त्रेषु दरीदृश्यते, यथोक्तम् 'न संस्कारमाद्रियेत। विषयवत्यो हि वृत्तयो भवन्ति। यथार्थं विभक्तीः सन्नमयेत्'[३] इति।

अतो निरुक्तशास्त्रं वृत्तिचिन्तामपहाय केवलमर्थमेव पुष्णाति। वैदिकानां शब्दानां निर्वचनपुरःसरमर्थानुसन्धानमतिरिच्य न किमपि निरुक्त-शास्त्रस्यान्यत्प्रयोजनम्। अत एवास्य शास्त्रस्य वेदाङ्गेषु प्रमुखं स्थानमस्ति। यतो हि निरुक्तं विना मन्त्रार्थप्रत्ययो न भवितुं शक्नोति। यथोक्तं यास्काचार्येण— 'अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते'[४] इति।

निरुक्तशास्त्रे यथार्थं प्रकृतिप्रत्यययोः कल्पनं कृत्वा क्वचिद् वर्णागमः, क्वचिद् वर्णविपर्ययः, क्वचिद् वर्णविकारः, क्वचिद् वर्णनाशः, क्वचिच्चार्थानु-सन्धानबलात् क्रियाया नूतनार्थकल्पनं क्रियते, यथोक्तम्—

---

१. उद्धृतम्, निरुक्ते-१/६।
२. तत्रैव-१।५।
३. तत्रैव-२।१।
४. तत्रैव-१।५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णागमौ वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्[१] ।। इति।

अनेनैव प्रकारेण व्याकरणशास्त्रेऽपि प्रकृतिप्रत्यययोः कल्पनं कृत्वा लोपागमवर्णविकारमाध्यमेन शब्दसंस्कारः क्रियते; परन्तु व्याकरणनिरुक्तयोर्मध्ये त्वयं विभेदो यद्व्याकरणशास्त्रे तस्यैव शब्दस्य संस्कारः क्रियते यस्मिन् शब्दे स्पष्टरूपेण क्रिया दरीदृश्यते। अतस्तु विपरीतं यत्र क्रिया स्पष्टरूपेण नावलोक्यते, तत्र व्याकरणस्य प्रकृतिप्रत्ययात्मिका शब्दसंस्काररूपा गतिः प्रतिहता भवति। ते शब्दा व्याकरणशास्त्रे त्वव्युत्पन्नप्रातिपदिकनाम्ना प्रथिताः। एतेषामेव शब्दानां कृते महर्षिणा पाणिनिना 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'[२] इति सूत्रं सूत्रितम्। व्याकरणं तु अनेन धातुनास्मिन् प्रत्यये कृते सति अयं शब्दो निष्पद्यत इति विनिश्चयीकरणं करोति; परन्त्वतो विपरीतं निरुक्तशास्त्रे सिद्धमेव शब्दमवलोक्य तस्मिन् सिद्धे शब्दे यथार्थं प्रकृतिप्रत्यययोः प्रकल्पनं कृत्वा निर्वचनं क्रियते। निरुक्तशास्त्रस्यायं सर्वमान्यः सिद्धान्तो यत् सर्वे शब्दा धातुजा एव। अत एव नैरुक्ता वैदिकानां शब्दानां निर्वचनप्रसङ्गे स्वेच्छया क्रियया सह प्रत्ययस्य कल्पनं कृत्वा शब्दसिद्धिं कुर्वन्ति। एकस्मिन्नेव शब्दे विभिन्नक्रियासम्बन्धमपि निरुक्तप्रक्रियायां समवलोक्यते। शब्दानां सर्वेषां ह्याख्यातजत्वं समर्थयन् यास्काचार्येणोक्तम्—'तत्र नामानि आख्यातजानि इति शाकटायनो निरुक्तसमयश्च'[३] इति।

सर्वाणि नामान्याख्यातजानीत्यस्य सिद्धान्तस्यानुमोदनं तु वैयाकरणेषु केवलं शाकटायन एव करोति, न त्वन्ये वैयाकरणाः। यथोक्तं भाष्यकारेण—'नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्'[४] इति। निरुक्तं विना पदविभागोऽपि मन्त्रेषु कर्तुं न शक्यते। यथा 'दूतो निऋत्या इदमाजगाम'[५] इत्यस्मिन् मन्त्रे समागतं 'निऋत्या' इति पदम् अःकारान्तं पञ्चम्यर्थे षष्ठ्यर्थे वा विद्यते; परन्त्वतो विपरीतं 'परो निऋत्या आचक्ष्व' इत्यस्मिन् मन्त्रे समागतं 'निऋत्या' इति पदं 'निऋत्यै' इत्यस्य स्थानीयमस्ति। 'निऋत्यै आचक्ष्व' इत्यत्र 'एचोऽयवायावः'[६] इत्यनेन सूत्रेण

१. उद्धृतम्, निरुक्ते।
२. पा.सू. १/२/४५।
३. निरुक्तम्-१/४।
४. महाभाष्यम्।
५. ऋ.सं. १०/१६५/१।
६. पा.सू. ६/७/७८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवादेशे 'लोपः शाकल्यस्य'[१] इत्यनेन सूत्रेण वकारस्य लोपे च कृते सति निऋत्या आचक्ष्व इति रूपः प्रसिद्ध्यति। अत एवात्र ऐकारान्तः पदविभागो भवति। एवमुभयत्र निऋत्या इति पदं समानरूपमेवावलोक्यते; परन्तु विभक्तिवैविध्यमस्त्येव। एवंविधेषु विभक्तिवैविध्येषु स्थलविशेषेषु कस्यार्थस्य ग्रहणं भविष्यति, कस्यार्थस्य वा ग्रहणं नहि भविष्यति? इत्यस्य विनिश्चयीकरणं निरुक्तशास्त्रमेव करोति। एवंविधेषु सन्देहास्पदेषु स्थलविशेषेषु व्याकरणस्य गतिः प्रतिहता भवति। अत एवोक्तं यास्काचार्येण निरुक्ते—

'अथापीदमन्तरेण पदविभागो न विद्यते'[२] इति।

अनेन प्रकारेण मन्त्रार्थपरिज्ञानं, पदविभागः; मन्त्रेषु देवताविनिश्चयीकरणमित्यादयो निरुक्तस्य स्वतन्त्रविषया वेदाङ्गेष्वस्य शास्त्रस्य सर्वोत्कृष्टं स्थानं प्रददति। इदमेवोरीकृत्य वृत्तिकारेण श्रीमता दुर्गाचार्येण वेदाङ्गेषु निरुक्तशास्त्रस्य प्राधान्यमुद्घोषितम्—

'प्रधानं चेदमितरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्च, अर्थपरिज्ञानाभिनिवेशात्'[३] इति।

●

१. पा.सू. ८/३/१९।
२. निरुक्ते-१/६।
३. दुर्गवृत्तिः, पृ. ३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्त्वमसिमहावाक्यस्याखण्डार्थत्वविचारः

प्रो. रामकिशोरत्रिपाठी
दर्शनसंकायाध्यक्षः
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी

❀ ❀ ❀

सर्वविकल्पशून्यत्वात्परं पदेन बोध्यते ।
प्रपञ्चव्यापनादात्मा ब्रह्मपदाभिभाग् भवेत् ।।
मायोपहितरूपत्वात्तच्छब्देनाभिधीयते ।
अविद्योपाधिना युक्तस्त्वं जीवो व्यपदिश्यते ।।
यद्वाऽल्पज्ञधर्मत्वाज्जीवस्त्वंपदभाक् सदा ।
सर्वज्ञत्वस्वरूपं हि ब्रह्मणस्तत्पदाभिधम् ।।
परोक्षत्वाद्धि तच्छब्दो ब्रह्मरूपाभिधायकः ।
अपरोक्षत्वरूपोऽयं जीवः कर्मानुगः सदा ।।
ब्रह्मणः प्रतिबिम्बोऽयमविद्ययान्वितोऽपि वा ।
त्वंपदेनाभिधेयत्वाद्भेदबुद्धिनियामकः ।।
यदा सर्वे प्रबाध्यन्ते धर्मा जीवेशयोर्भिदा ।
तदाऽद्वैतविहीनत्वादभेदो धीयते बुधैः ।।
शक्यसम्बन्धरूपेयं शक्तिर्वै लक्षणाभिधा ।
उपाध्यर्थं परित्यज्य चेतनांशस्य बोधिका ।।

धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु मोक्ष एव श्रेयान् पुरुषार्थः, तदन्ये साधनमात्रम्। अतः सर्वदर्शनानां मोक्षप्रयोजनभूतत्वात् सर्वैरपि दार्शनिकैः स्वस्वसिद्धान्तदिशा मोक्षस्वरूपमेव प्रतिपाद्यते। तत्रास्तिकेषु नैयायिका एकविंशतिदुःखध्वंसमेव मोक्षत्वेनामनन्ति। सांख्याः प्रकृतिपुरुषवियोगमेवापवर्ग-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वेनावगच्छन्ति। पातञ्जलास्तु क्लेशकर्मक्षयो मोक्ष इति मन्यन्ते। वैष्णवेषु रामानुजीया ज्ञानकर्मसमुच्चयेन प्रभुसायुज्यप्राप्तिर्मोक्ष इति वदन्ति। स चानन्यशरणागतिरूपः। माध्वनये तु इतरविषयान् परित्यज्य भगवद्विषयाखण्डस्मृतिर्मोक्षः। 'ध्यानं च इतरतिरस्कारपूर्वकभगवद्विषयाखण्डस्मृतिः'[१]।

अनन्यशरणागतिर्मोक्ष इति निम्बार्काचार्यः। आविर्भूतानन्तरूपभगवताऽनन्यथाभावेन जीवस्यानन्दरूपतावाप्तिर्मोक्ष इति वाल्लभाः। अत्र प्रतिपादितमतेषु सर्वत्र ज्ञानस्यैव प्राधान्यम्। ज्ञानमेव मोक्षतत्त्वबीजम्। ज्ञानं मोक्षत्वेनामन्यमाना अपि मोक्षसाधकत्वेन ज्ञानमेवोपगच्छन्ति। प्रमेयसिद्धिः प्रमाणाद्धि इति प्रमाणवादिनां नैयायिकानां नये मानमेयादिसंसिद्ध्यर्थं ज्ञानमावश्यकमेव। प्रकृतिपुरुषविवेकेन मोक्षसिद्धिवादिनां सांख्यानां नये ज्ञानं विना विवेकस्यानुपपत्त्या तदावश्यकम्। क्लेशकर्मक्षयं मोक्षत्वेन स्वीकुर्वतां पातञ्जलानां मतेऽपि प्रपञ्चनिवृत्तये भवति ज्ञानं हेतुः। रामानुजीयानां प्रभुसायुज्यप्राप्तौ ज्ञानकर्मसमुच्चयस्य हेतुता स्वीकृतैव। माध्वानाञ्चेतरविषयतिरस्कृतौ च ज्ञानमावश्यकम्। वल्लभमतीयजीवस्यानन्दरूपतावाप्तिर्न ज्ञानादृते सम्भवति। अतो ज्ञानमेव मोक्षे मुख्यहेतुः।

अत्रेदं विचार्यते यत् तज्ज्ञानं निर्विषयकं सविषयकं वा निमित्तम्। नाद्यं ज्ञानस्य निर्विषयकत्वासम्भवात्। द्वितीये किं प्रपञ्चविषयकं ब्रह्मविषयकं वा। नाद्यम्, प्रपञ्चस्य बन्धहेतुत्वात् सर्वदुःखमूलत्वान्मोक्षस्यापि बन्धत्वं सर्वदुःखहेतुत्वञ्च सम्पद्येताम्। प्राणिमात्रस्य प्रपञ्चविषयकज्ञानवत्त्वेन मोक्षप्रसक्तिः स्यात्। अत आह—ब्रह्मविषयकं ज्ञानं मोक्षः। तत्रापि सोपाधिकब्रह्मविषयकं निरूपाधिकब्रह्मविषयकं वा न प्रथमं सोपाधिकब्रह्मणोऽविद्यावृतत्वादधिष्ठानत्वेन तद् जगतो विवर्तोपादानम्। तद्विषयकज्ञानस्य मोक्षत्वे हि तदध्यस्ताज्ञानवशात् प्रत्ययीभूतस्य प्रपञ्चस्यापि मोक्षविषयत्वमापद्येत। अतः सर्वोपाधिशून्यं निर्विकल्पं सर्वव्यवहारातीतं यच्छुद्धं ब्रह्म तद्विषयकं ज्ञानं मोक्षः।

ननु सर्वविकल्पशून्यस्येन्द्रियावेद्यत्वात्कथं तद्विषयकं ज्ञानमपवर्गे हेतुः। तथा च श्रुतयः—'अशब्दमस्पर्शमरूपम्'[२], 'यद्वाचानभ्युदितम्'[३], 'यन्मनसा न मनुते', 'यच्चक्षुषा न पश्यति', 'यच्छ्रोत्रेण न शृणोति', 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'[४], 'अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्'[५]। अत्रोच्यते—जीवात्मपरमात्मनोरभेदात्मकज्ञानमेव हेतुः। यद्वा निर्विषयकं ज्ञानमेव मोक्षनिमित्तम्,

१. म.सि.सा., पृ. १६९; २. कठो. १।३।१५।
३. केनो. १।४-७; ४. तै. २।९; ५. गीता-८।२१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्विषयकज्ञानस्य ब्रह्मस्वरूपत्वाभिगमात्। तच्च ज्ञानमखण्डं चिद्रूपं सम्भवति, तत्त्वमस्यादिमहावाक्यस्याखण्डार्थबोधेन।

अखण्डार्थलक्षणविचारः

वेदान्तमहावाक्यानामखण्डे ब्रह्मणि तात्पर्यात् तावदखण्डार्थत्वं परिचिन्त्यते। किन्नामाखण्डार्थत्वं निर्विशेषवस्तुपरत्वम्? उत निर्भेदार्थनिष्ठत्वम्? आहोस्विद-पर्यायशब्दानां प्रातिपदिकार्थमात्रपर्यवसायित्वम्? अथवा तेषामेवैकप्रातिपदिकार्थ-मात्रपर्यवसायित्वम्? संसर्गागोचरप्रमाजनकत्वं वा? तत्राद्यपक्षं दूषयति—न निर्विशेषवस्तुपरत्वमखण्डार्थत्वं तस्य विकल्पासहत्वात्। तत्रोच्यते—निर्विशेष-वस्तुपरत्वेन किमभिमतं निर्विशेषवस्तुवाचकत्वम्, निर्विशेषवस्तुलक्षकत्वं वा? नाद्यः, निर्विशेषवस्तुनो लोकेऽप्रसिद्ध्या सम्बन्धाग्रहणेन वाचकत्वासम्भवात्।

लक्षकत्वमिति चेत्, न, 'अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते', अभिधेया-प्रसिद्ध्या लक्षणावृत्तेरसम्भवात्। अभिधेयाविनाभूतं वै तीरं गङ्गापदेन लक्ष्यते, न पुनरनविनाभूतम्। स चाविनाभावो भूयः सम्बन्धदर्शनमात्रम्, मञ्चाः क्रोशन्तीत्यत्र मञ्चपुरुषयोर्मुख्याविनाभावाभावेऽपि लक्षणादर्शनात्। यथा कश्चित् स्वमित्रमपृच्छत्—किमस्य गृहे भोक्तव्यम्? तन्निवारयन्नाह मित्रं विषं भुङ्क्ष्वेति। न चात्र लक्ष्यमाणैतद्ग्रहनिष्ठभोजननिवृत्तेर्विषभोजनस्य च कश्चन सम्बन्धोऽस्ति। अथ च लक्ष्यते भोजननिषेधस्तत्कस्य हेतोः? अत्रोच्यते—नाभिधेयाविनाभूतत्वमेव लक्षणाबीजम्, अपि च वाक्यप्रामाण्यानुपपत्तेरपि लक्षणाया बीजत्वस्वीकारात्। वेदान्तवाक्यानां प्रामाण्यानुपपत्त्या निर्विशेषे ब्रह्मणि लक्षणाऽस्त्विति वाच्यम्, न वाक्यानुपपत्तेरत्यन्ताप्रसिद्धार्थे लक्षणाप्रयोजकत्वासम्भवात्। अनुपपत्तिर्हि योग्ये लक्षणां प्रवर्तयति न त्वयोग्ये, अन्यथा खपुष्पादेरपि लक्षणाप्रसङ्गः स्यात्। तस्मात् प्रामाण्यानुपपत्तिः संसृष्टार्थपरतायामेव बीजम्, न त्वखण्डार्थतायाम्।

नापि द्वितीयः, निर्भेदत्वस्यानिरुक्तेर्निर्भेदवस्तुपरत्वासम्भवात्। अत्रोच्यते—निर्भेदत्वं नाम किं भेदाविशिष्टत्वम्, उत भेदाभावोपलक्षितत्वम्? नाद्यम्, भेदाभाव-विशिष्टत्वस्याखण्डार्थत्वे निर्घटं भूतलमित्यत्र यथा घटाभावविशिष्टभूतलार्थबोधके वाक्ये संसर्गप्रत्ययः, तथैवात्रापि प्रतीयेत, संसर्गावच्छिन्नप्रतियोगित्वेनैवा-भावप्रत्ययात्। संसर्गाधिक्यभाने नाखण्डार्थता। न द्वितीयः, तत्रापि संसृष्टार्थत्व-स्यानिवृत्तेः। तथा चोक्तम्—'भेदस्य योऽभावस्तेनोपलक्षणेनोपलक्षितवस्तुपरत्वे कथं न संसृष्टार्थता'[१]। अत्रोपलक्षणोपलक्षितवस्तुमात्रं प्रतिपाद्यं भेदाभावश्च द्वारमेव

१. तत्त्वप्रदीपिकायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथापि नाखण्डार्थता उपलक्ष्यमाणस्य स्वेतरेभ्यो व्यावृत्तत्वेन प्रतीतावखण्डार्थत्वासम्भवात्। तथा हि भेदाभावेन यद्ब्रह्म उपलक्ष्यते तत्किमितरेभ्यो व्यावृत्तं प्रतीयते, न वा? प्रथमे दोषयुक्तं व्यावृत्तिविशिष्टस्याखण्डत्वाभावात्। अप्रतीतौ चानुपलक्षकत्वादेवोपलक्षणस्य वैयर्थ्यप्रसङ्गात्।

नापि तृतीयः, शीतोष्णस्पर्शवन्तौ पयःपावकावित्यत्रापर्यायशब्दानां प्रातिपदिकार्थमात्रपर्यवसायित्वेऽप्यखण्डार्थत्वादर्शनात्। यस्य हि लक्षणवाक्यं लक्ष्यप्रातिपदिकार्थमात्रपर्यवसितमिति मतं तस्येमे लक्षणवाक्ये लक्ष्यजलानलस्वरूपपर्यवसिते, तथापि नाखण्डार्थता लक्ष्ययोर्भिन्नत्वात्। अथवा पयःपावकशब्दयोरपि शीतोष्णस्पर्शवन्तावेवार्थौ जातिमात्रपरत्वायोगात्। तथा च शीतोष्णस्पर्शवच्छब्दयोः पयःपावकशब्दयोश्च प्रातिपदिकार्थमात्रपरत्वमस्ति नाखण्डार्थता।

नापि चतुर्थः, पर्यायशब्दानां प्रातिपदिकार्थमात्रपर्यवसायित्वमखण्डार्थत्वमिति सत्यं ज्ञानम् अनन्तमित्यादिपदानां प्रातिपदिकार्थबोधकतयैकेनैव तदर्थप्रत्यये शब्दोच्चारणस्य वैयर्थ्यापत्तेः। 'यदि ह्येकमेव वस्तु बुबोधयिषितं तदैकेनैव बुद्धमिति पदान्तरप्रयोगो वृथैव स्यात्'। ननु सत्यादिपदैर्जडत्वादिव्यावृत्तिपुरःसरमखण्डार्थत्वं प्रतिपाद्यते। तथा चोक्तमानन्दबोधाचार्येण—

'लक्ष्यार्थभेदाभावेऽपि व्यवच्छेद्यविभेदतः ।
विज्ञानानन्दपदयोः पर्यायव्यर्थता कुतः[१] ।।

इति चेत्, न, तन्निर्वचनासम्भवात्। तथा हि किं सत्यादिपदैर्व्यवच्छेद्यानामसत्यत्वादिव्यावृत्तयः प्रतिपाद्यन्ते? व्यावृत्तिविशिष्टं वस्तु वा प्रतिपाद्यते? व्यावृत्त्युपलक्षितं वस्तु वा? प्रथमपक्षे द्वितीयपक्षे च इतरप्रतियोगिकत्वविशिष्टव्यावृत्तेः, व्यावृत्तिविशिष्टवस्तुनश्च प्रतिपादने संसर्गभानानामखण्डार्थता। तृतीयपक्षेऽपीतरव्यावृत्त्युपलक्षितत्वविशिष्टवस्तुप्रतिपादने संसर्गविधया व्यवच्छेद्यवस्तुप्रत्ययात्। लक्ष्यस्वरूपमात्रप्रतिपादने तु पदान्तरप्रयोगवैयर्थ्यप्रसङ्गात्।

नापि पञ्चमः, संसर्गाविषयकप्रमाया लोकेऽप्रसिद्धत्वात्। न च प्रकृष्टप्रकाशश्चन्द्र इत्यादिलक्षणवाक्येषु संसर्गागोचरप्रमाजनकत्वमिति वाच्यम्, लक्षणवाक्यैरपि लक्ष्यस्य सजातीयविजातीयेभ्यो व्यावृत्तत्वेन प्रतिपादनात् संसृष्टार्थत्वस्यैव प्रसक्तेः। सोऽयं देवदत्त इत्यादिस्थलेष्वपि परोक्षदेशकालोपलक्षितस्यैतद्देशकालविशिष्टत्वप्रतिपादकतया संसर्गस्यैव प्रत्ययात्।

१. नयनप्रसादिनीटीकायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रोच्यते—अपर्यायशब्दानां संसर्गाविषयत्वे सति सम्यग्ज्ञानहेतुत्वरूपे लक्षणे अपर्यायशब्दानामेकप्रातिपदिकार्थत्वरूपे वा लक्षणे न कश्चिद् दोषः। तथा चोक्तम्—

'संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम् ।
उक्ताखण्डार्थता यद्वा तत्प्रातिपदिकार्थता'[1] ।।

तच्चाखण्डार्थं द्विविधम्। एकं पदार्थनिष्ठम्, अपरं वाक्यार्थनिष्ठम्। महावाक्यार्थबोधोपयोग्यखण्डवाक्यार्थबोधजनकं पदार्थनिष्ठम्। अनन्यशेषाखण्ड-वाक्यार्थबोधजनकं वाक्यार्थनिष्ठम्। संसर्गपदेन संयोगादिपदवृत्तिस्मारितातिरिक्तं विवक्षितम्। अतः पदवृत्तिस्मारितातिरिक्तागोचरप्रमाजनकत्वमिति प्रथमलक्षणं सम्पन्नम्। संसर्गो हि न पदार्थरूपः, अपि च पदार्थयोः परस्परसम्बन्धरूपो ग्राह्यः। अतः अप्राप्तयोः प्राप्तिः संयोगः, नित्यः सम्बन्धः समवाय इत्यादिवाक्येषु न दोषः, तत्र संसर्गस्य संयोगादिपदवृत्तिस्मरणेनैव प्रत्ययात्। नापि 'विषं भुङ्क्ष्व' इति द्विषदन्नभोजननिषेधके वाक्येऽतिव्याप्तिः। तत्रानिष्टसाधनत्वसंसर्गस्य पदवृत्त्य-स्मारितस्य प्रतिपाद्यत्वात्। शीतोष्णस्पर्शवन्तौ पयःपावकावित्यत्र त्वखण्डार्थत्वमिष्टमेव।

तथा च लोके प्रकृष्टप्रकाशश्चन्द्र इत्यत्र प्रकृष्टपदेनाप्रकृष्टखद्योतादेः प्रकाशपदेनाप्रकाशात्मप्रकृष्टसंतमसादेश्च व्यवच्छेदेन बुभुत्सितश्चन्द्रप्राति-पदिकमात्रार्थः प्रतिपाद्यते। वेदे हि 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादौ सत्यज्ञाना-नन्तात्मशब्दा अन्नृतजडदुःखान्तवत्त्वानात्मत्वभ्रान्तिनिवृत्तिद्वारा लक्ष्ये ब्रह्मणि पर्यवस्यति। यथा हि आखुभूषितां भूमिमालोक्य मार्जाराभावोऽवगम्यते, तथा प्रथमं धर्मधर्मिणोः सत्यत्वादेर्ब्रह्मणश्च सङ्गतिः शब्दात्प्रतीयते, असत्यत्वादिविरोधि-धर्मनिवृत्तिस्तु मानान्तरवेद्या। तत्र सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्ये अनन्त-शब्दार्थोऽन्तवद्वस्तुव्यावृत्त्यैव साक्षादेव ब्रह्मणो विशेषणम्। सत्यज्ञानशब्दौ हि स्वार्थसमर्पणद्वारा व्यवधानेन विशेषणम्।

सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्ये सत्यज्ञानादिपदानि संसर्गाविषयत्वे सत्यपि पूर्वं धर्मिस्वरूपं ब्रह्म बोधयन्ति। पश्चाच्चार्थापत्तिप्रमाणद्वारा सत्यत्वादि-विरुद्धासत्यत्वादिधर्मनिवृत्तिः। 'सत्यादिशब्दा न परस्परं सम्बध्यन्ते परार्थत्वा-द्विशेष्यार्था हि ते'[2], 'गुणानां च परार्थत्वादसम्बन्धः समत्वात्'[3]। सत्यं ब्रह्मेत्युक्ते जाड्यव्यावृत्तिः परिच्छेदव्यावृत्तिश्च यद्यपि लभ्यते, जडस्य परिच्छिन्नस्य

१. तत्त्वप्रदीपिकायाम्; २. शा.भा.,तै.उप.बृ.अनु. १; ३. जै.सू. ३।१।२२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वस्यानृतत्वात्। ज्ञानं ब्रह्मेत्युक्ते चानृतपरिच्छेदव्यावृत्तिर्लभ्यते, स्वप्रकाशस्य बाधाविषयत्वात्परिच्छेदग्राहकप्रमाणाविषयत्वाच्च लक्षणमपि चैकैकं वैकल्पिकमदुष्टम्, तथापि मन्दमतिव्युत्पादनाय स्यात् सत्यादिपदार्थव्याख्यानपूर्वकं प्रत्येकं व्यावर्त्यम्। तथा चोक्तम्—'एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन सम्बद्ध्यते'[१], सत्यं ब्रह्म ज्ञानं ब्रह्म अनन्तं ब्रह्मेति। सत्यमिति यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत्सत्यं यद्रूपेण निश्चितं यत्तद्रूपं व्यभिचरदनृतमित्युच्यते। उक्तञ्च सुरेश्वराचार्येण—

'प्रतिपद्य पदार्थं हि विरोधात्तद्विरोधिनः।
पश्चादभावं जानाति बध्यघातकवत्पदात् ।।
शब्दात्प्रतीयते तावत्सङ्गतिर्धर्मधर्मिणोः ।
मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः'[१] ।।

तत्त्वंपदयोः शक्यार्थनिरूपणम्

शक्यसम्बन्धो लक्षणेत्युक्त्या शक्यसम्बन्धेनैव लक्षणावृत्तेः स्वरूपनिर्धारणात् पूर्वं तत्-त्वम्-पदयोः शक्यार्थौ विचार्येते। तत्त्वमसीति महावाक्योपक्रमे यदुक्तमेकविकारज्ञानेन सर्वं विकारजातमवगम्यते, तदुपादानमेव सत्यम्। तत उक्तमेकमेवाद्वितीयं तत्। सत्स्वरूपमेकमेवाद्वितीयं तद् बुद्ध्या परिकल्पितं प्रपञ्चजातम्। 'यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति'[३]। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः'[४] इति श्रुतिभ्यां प्रपञ्चोपादानमेव बोध्यते तत्पदम्। तच्चोपादानम्—'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते'[५] इति श्रुत्याऽऽनन्दस्वरूपमवगम्यते। तदेव हि सर्वशक्तिकं सर्वज्ञमित्युच्यते। तथा चोक्तं 'जन्माद्यस्य यतः'[६] इति सूत्रभाष्ये—'मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद् भवति तद् ब्रह्मेति'[७]।

तच्च मायोपहितमेव कारणं तस्यैव विवर्तत्वसम्भवात्। तत्रैवाध्यस्तविद्या वियदादिरूपेण परिणमते। तदेव ब्रह्म तत्पदवाच्यम्।

'जगतो यदुपादानं मायामादाय तामसीम् ।
निमित्तं शुद्धसत्त्वां तामुच्यते ब्रह्म तद्गिरा'[८] ।।

---

१. शा.भा., तै.बृ.अनु. १; २. भा.वा., तै.उप. ६९।७०।
३. तै.उप. २।१; ४. तत्रैव-३।६।
५. ब्र.सू. १।११२; ६. शा.भा., ब्र.सू. १।१।२।
७. पञ्चदशी-१।४४; ८. सिद्धान्तलेशसङ्ग्रहे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद् ब्रह्म सच्चिदानन्दस्वरूपं श्रुतिषूक्तं तदेव तमोगुणप्रधानमायोपहितं सकलप्रपञ्चजातस्य विवर्तोपादानतया निमित्तं तत्पदवाच्यं भवति। यद्वा मायाप्रतिबिम्बितचैतन्यं शुद्धसत्त्वप्रधानाविद्योपाधिनोपहितं सत् सर्वज्ञत्वसर्वनियन्तृत्वादिधर्मवत् तत्पदवाच्यम्। गुणत्रयप्रधाना मूलप्रकृतिः सत्त्वस्य शुद्धतया सत्त्वमालिन्याच्च भेदमाभजते। सा च सत्त्वशुद्धितया विक्षेपशक्तिप्रधानेशोपाधिरित्यभिधीयते। 'विक्षेपशक्तिप्राधान्यात् मायेशोपाधिरुच्यते'[१]। सदैव मूलप्रकृतिर्विक्षेपप्राधान्येन मायाशब्दितेश्वरोपाधिः, आवरणप्राधान्येनाविद्याऽज्ञानशब्दिता जीवोपाधिः।

सङ्क्षेपशारीरककारमते कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः। कार्यञ्चात्राविद्याजन्यमन्तःकरणमेव। तत्कारणं चाविद्या, अतोऽविद्यायां चित्प्रतिबिम्ब ईश्वरः, अन्तःकरणे चित्प्रतिबिम्बो जीव इति प्रतिफलति। यद्वा 'जीवेशाभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुत्या उभयत्र प्रतिबिम्बत्वप्रतिपादनविरोधाद् ईश्वरस्य बिम्बत्वमिति केचन। तत्रापि जीवस्य प्रतिबिम्बत्वमेव। निर्गुणनिरवयवस्य शुद्धस्य बिम्बत्वासम्भवाद् मायोपहितेशचैतन्यस्यैव बिम्बत्वं स्वीकुर्वन्ति। लौकिकबिम्बप्रतिबिम्बवत् स्वातन्त्र्यमीश्वरस्य तत्पारतन्त्र्यञ्च जीवस्य। यथा लोके कश्चित् पुरुषः स्वप्रतिबिम्बगता ऋजुवक्रादिविक्रिया बिम्बभूतस्वप्रयुक्ताः पश्यन् क्रीडति, तथा ब्रह्मापि जीवस्था विक्रियाः प्राणिकर्मानुसारेण स्वप्रयुक्ताः पश्यन् क्रीडति।

'प्रतिबिम्बगताः पश्यन्नृजुवक्रादिविक्रियाः।
पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्थविक्रियाः'[२]॥

सृष्टिरियं बिम्बभूतपरमेश्वरस्य नीलामात्रम्। 'यद्यप्यस्माकमियं जगद्बिम्बविरचना गुरुतरसंरम्भेवाभाति, तथापि परमेश्वरलीलैव केवलेयम्'[३]। स च परमेश्वरस्तत्पदवाच्य इति।

त्वंपदवाच्यश्चाविद्यावच्छिन्नश्चिदात्मा जीवः। यद्वाऽविद्याप्रतिबिम्बचैतन्यम्, कार्योपाधिरयं जीव इति पक्षेऽविद्याकार्यान्तःकरणप्रतिबिम्बितचैतन्यं त्वंपदवाच्यम्। तत्र देवदत्तो जातः देवदत्तो मृत इति लौकिकव्यवहारावेक्षणात् 'स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन् म्रियमाणः'[४] इति श्रुतिप्रामाण्याच्च शरीरावच्छेदेन जीवो विकारमापन्नोऽवगम्यते। तस्यैव जीवात्मन आत्मत्वं

१. सिद्धान्तलेशसङ्ग्रहे; २. तत्रैव।
३. शा.भा., ब्र.सू. २।१।३३; ४. बृ.उप. ४।३।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादयन्त्याः 'न जीवो म्रियते'[१], 'स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म'[२], न जायते म्रियते वा विपश्चित्'[३], 'अजो नित्यः शाश्वतोऽयं पुराणः'[४] इति श्रुतयः स्मृतयश्चामृतस्वरूपत्वं बोधयन्ति। 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते,[५] श्रुतिस्तु जीवव्यतिरिक्तस्य शरीरस्यैव जनिमृत्युविकारतां प्रतिबोधयति। कार्यशेषे सुप्तोत्थितस्य ममेदं कार्यशेषमपरिसमाप्तमिति स्मृत्वा समापनदर्शनात्। जातमात्राणां च जन्तूनां स्तन्याभिलाषभयादिदर्शनाच्चातीतजन्मान्तरानुभूतस्तनपानदुःखानुभवादिना जीवात्मनः शाश्वतत्वमनुगम्यते।

जन्मादिविकारशून्योऽन्तःकरणावच्छिन्नश्चिदात्मा जीवः। एकस्यैव परमात्मन उपाधिगतभेदमादाय जीवेशरूपः काल्पनिको व्यवहारः। जीवानुस्यूतेनैव परमात्मना नामरूपात्मकप्रपञ्चो व्याक्रियते। कर्मभोगोपशक्तो जीवः सांसारिकसर्वसुखदुःखादिकमनुभवति। ईश्वरस्य सर्वविकल्पातीत्वान्न, तत्र कर्म संश्लिष्यते। जीवो ह्यविद्यासंसर्गाद्देहात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःख्यहमित्यविद्यया दुःखोपभोगमभिमन्यते। नैवं परमेश्वरस्य देहाद्यात्मभावो दुःखाभिमानो वा परिलक्ष्येते। तथा च श्रुतिः—

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति'[६] ।।

अविद्यावशीभूतः कर्तव्याकर्तव्यविवेकशून्यः परमात्मनो भिन्न इव तदनुज्ञया कर्तृत्वभोक्तृत्वादिलक्षणमतिमवधारयति जीवः। 'मयैवांशो जीवलोके जीवभूतः सनातनः'[७]। कर्मोपभोगक्षपणाय परमेश्वरो हि जीवानुषङ्गः सन् स्वमायया प्रपञ्चमुपसृजति। 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि'[८]। स च जीवः कर्मोपभोगसक्तः परमेश्वरस्वरूपमेव नान्यः कश्चित्। 'तत्सृष्ट्वा तदेवानुप्राविशत्'[९]। यद् ब्रह्म तमोगुणप्रधानाविद्योपहितं तत्पदवाच्यमीश्वरत्वेनाभिहितम्, तदेव कामकर्मादिदोषवशाद् मलिनसत्त्वप्रधानाविद्योपहितं त्वंपदवाच्यं भवति।

'यदा मलिनसत्त्वां तां कामकर्मादिदूषिताम्।
आदत्ते तत्परं ब्रह्म त्वंपदेन तदोच्यते'[१०] ।।

---

१. छान्दो. ६।११।३; २. बृ.उप. ४।४।२५।
३. कठो. २।१८; ४. तत्रेव.-२।१८।
५. छान्दो. ६।११।३; ६. श्वेता. उप. ४।६।
७. गीता-१५।७; ८. छान्दो. ६।३।२।
९. तै. २।६; १०. तत्त्वविवेके, ४५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनिर्वचनीयानाद्यविद्यावशाद् ब्रह्मस्वभावोऽपराधीनप्रकाशोऽपि प्रतिभासमानोऽपि न प्रतिभाति, पराधीनप्रकाश इव देहेन्द्रियादिभ्यो भिन्नोऽप्यभिन्न इव भासते। 'अथातो ब्रह्मजिज्ञासा'[1] इति सूत्रेऽधिकारित्वेन त्वंपदस्य वृत्तिं पूर्वमुक्त्वा पश्चाच्च 'जन्माद्यस्य यतः'[2] इति सूत्रे प्रपञ्चनिमित्ततया तत्पदस्य वृत्तिराख्याता। तथा चोक्तम्—'अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद्ब्रह्म'[3]। औपाधिकभेदापन्नं हि चैतन्यं तत्पदवाच्यं त्वंपदवाच्यञ्च भवति। यथा गन्धारदेशेभ्य आनीय चौरैरारण्ये कश्चिद्बद्धचक्षुर्निहित आप्तोपदेशतस्तदुपदिष्टस्य साकल्येन गृहीतत्वात् पण्डितः स्वयमूहापोहक्षमतया च मेधावी गन्धारान् प्राप्नोति, एवं परब्रह्मण आच्छिद्य विवेकदृष्टिं निरुध्याविद्यादिभिः संसारारण्ये निहितो जन्तुः परमकारुणिकगुरूपदेशतः स्वस्वभावं प्रतिपद्यते।

लक्ष्यार्थनिरूपणम्

तत्त्वमसीति महावाक्ये तत्त्वम्पदयोः समानविभक्तिकत्वेन सामानाधिकरण्यतयाऽभेदान्वयः प्रतिपाद्यः सन् सम्भवति, सर्वज्ञत्वाल्पज्ञत्वविशिष्टार्थप्रतिपादकतत्त्वम्पदयोर्वैयधिकरण्यात्। चैतन्यमात्रतात्पर्येणोच्चरितयोस्तत्त्वम्पदयोस्तदर्थानुपपत्त्या तात्पर्यानुपपत्तिप्रतिसन्धानरूपलक्षणाबीजस्योद्भूततया तत्त्वम्पदयोर्जहदजहल्लक्षणावृत्त्या चैतन्यमात्रार्थबोधादभेदान्वयः सुलभः। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'[4], 'तदैक्षत बहु स्यां प्रजायेयेति'[5] श्रुतिभ्यां तत्पदस्य सर्वज्ञत्वादिविशिष्टार्थबोधकतया 'जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि'[6] इति श्रुत्याऽन्तःकरणावच्छिन्नचिद्रूपत्वाल्पज्ञत्वादिरूपार्थबोधकतया 'तत्वमसि'[7] इत्यत्र चैतन्यमात्रतात्पर्येणोच्चरितयोस्तत्त्वंपदयोस्तात्पर्यानुपपत्तिप्रतिसन्धानविधिना लक्षणाबीजसमवधाने विशेषणांशपरित्यागेन तत्त्वंपदयोश्चैतन्यमात्रमर्थोऽवगम्यते। ततश्च विशेष्यद्वयाभेदगोचरशाब्दबोधः।

सन्ति केचन सम्बन्धविशेषा यैरखण्डार्थलक्ष्योऽवगम्यते। तत्र पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यत्व-लक्ष्यलक्षणभावश्च। उक्तञ्च—

पदयोस्तु समानाधिकरणत्वं पदार्थयोः ।
विशेषणविशेष्यत्वं लक्ष्यलक्षणताऽपि च ।।
सम्बन्धः सोऽयमित्यादाविव तस्माद्विरुद्धकम् ।।

---

१. ब्र.सू. १।१।१; २. तदेव-१।१।२।
३. शा.भा., ब्र.सू. १।१।२; ४. छान्दो. ६।२।१।
५. तत्रैव, ६।२।३; ६. तत्रैव-६।३।२; ७. तत्रैव-६।८।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यक्त्वा विरुद्धं तत्रैव विशिष्टपरमात्मनोः ।
स्वरूपं लक्षयत्येकं तत्त्वमस्यादिका श्रुतिः'[१] ।।

पदयोर्भिन्नप्रवृत्तिनिमित्तयोरेकस्मिन्नर्थे प्रवृत्तिरूपं सामानाधिकरण्यम्, पदार्थयोः परस्परोद्देश्यविधेयभावेन परस्परभेदव्यावर्तकत्वाद् व्यावर्त्यव्यावर्तकभावरूपो विशेषणविशेष्यभावः, पदयोः पदार्थयोश्च विरुद्धविशिष्टत्वांशपरित्यागेनाविरुद्धनिष्कृष्टधर्ममात्रेण सह लक्ष्यलक्षणभावः, पदप्रत्यगात्मनोः प्रतिपाद्यप्रतिपादकभावरूपः, पदार्थप्रत्यगात्मनोश्च उपपाद्योपपादकभावरूपश्चेति सम्बन्धत्रयस्य सोऽयं देवदत्त इत्यादिवाक्येष्विव तत्त्वमस्यादिवाक्येष्वपि सद्भावात्। तेन श्रुतिरपि निष्कृष्टयोरैक्यरूपं शुद्धं स्वरूपं बोधयति।

तथा हि यथा सोऽयं देवदत्त इति वाक्ये स इति तत्पदस्य तद्देशतत्कालवैशिष्ट्यं प्रवृत्तिनिमित्तम्, अयं शब्दस्यैतत्कालैतद्देशवैशिष्ट्यं भिन्नप्रवृत्तिनिमित्तयोः सोऽयं द्वयोरेकस्मिन् देवदत्तपदोपस्थापितपिण्डे तात्पर्यम्। सोऽयम् अयं स इति च विशेषणविशेष्यभावः, विशिष्टशक्तयोः सोऽयंशब्दयोर्विरुद्धविशिष्टांशत्यागेन देवदत्तेन सह लक्ष्यलक्षणभावश्च। तथा तत्त्वमस्यादिवाक्येष्वपि जगत्कर्तृत्वादिवैशिष्ट्यं तत्पदस्य प्रवृत्तिनिमित्तम्, त्वंपदस्यावस्थात्रयवत्त्वम्। भिन्नप्रवृत्तिनिमित्तयोस्तत्त्वंपदयोरेकस्मिन् शुद्धे ब्रह्मणि तात्पर्यम्, तत् त्वं त्वं तदिति विशेषणविशेष्यभावो विरुद्धार्थधर्मत्यागेन शुद्धेन सह लक्ष्यलक्षणभावश्चेति। विशिष्टयोस्तत्त्वंपदाभ्यां शक्त्योपस्थापितयोर्भिन्नयोरभेदायोगेन लक्षणया बोधितयोः शुद्धपदार्थयोरैक्यं सामानाधिकरण्यमर्यादया प्राप्तमप्युपासीतेति पदकल्पनाभ्रमनिरासद्वाराऽसीत्यादिपदेन दृढीक्रियते।

द्विविधं हि लक्षकं पदार्थनिष्ठं वाक्यनिष्ठञ्च। यन्महावाक्यीयपदार्थयोर्भेदबुद्धिविरोधि सत् तन्महावाक्यीयपदार्थरूपाखण्डार्थकं यत् तत् तन्महावाक्यीयपदार्थनिष्ठं लक्षकम्। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति'[२] इति श्रुत्या तत्पदस्य वाच्यार्थः सृष्ट्यादिकर्तृरूपो निर्णीतः। महावाक्यीयतत्पदस्य ब्रह्ममात्रबोधकत्वे भेदात्मकज्ञाननिवृत्तिपुरःसरं 'सत्यं ज्ञानमनन्तं ब्रह्म' इति[३] लक्षकं वाक्यं लक्ष्यसमर्पकतया चैतन्यमात्रबोधेन महावाक्यीयपदार्थरूपाखण्डार्थं बोधयति।

'तद्यथा महामत्स्य उभे कुलेऽनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुषः एतावुभावन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं च',[४] 'तद्यथा श्वेनो वा सुपर्णो वा विपरिपत्य श्रान्तः पक्षौ संहत्य सल्लयायैव ध्रियते, एवमेवायं पुरुष एतस्मा

१. नारायणी-टीका, सिद्धान्तबिन्दोः; २. तै.उप. ३।६।
३. तत्रैव-२।१।१; ४. बृ.उप. ४।३।१८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्ताय धावति'[1] इत्यादिश्रुतयो जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयसन्नद्धं त्वंपदवाच्यं बोधयन्ति। तत्त्वमसिमहावाक्यीयत्वं पदस्य चैतन्यमात्रबोधकत्वे भेदबुद्धि-विरोधितया 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः'[2] इति लक्ष्यसमर्पकवाक्यं चैतन्यमात्रार्थबोधेनाखण्डार्थमभिदधाति।

यन्महावाक्यार्थबोधोपयोगिपदार्थबोधपर्यवसायि यत् तत् तन्महावाक्यपदार्थनिष्ठम्। यन्महावाक्यीयपदार्थयोर्भेदबुद्धिविरोधि सत् तन्महावाक्यार्थरूपाखण्डार्थकं यत् तत् तन्महावाक्यार्थनिष्ठम्। यन्महावाक्यार्थबोधे अनन्यशेषे पर्यवसायि यत् तत् तन्महावाक्यार्थनिष्ठमिति निष्कर्षः। वाक्यजन्यज्ञानस्य स्वविषयचैतन्येन सह यः स्वरूपसम्बन्धविशेषः सामग्रीविशेषाधीनत्वप्रयुक्तस्तेन सम्बन्धेन चैतन्यगोचरत्वं घटज्ञानादिव्यावृत्तम्। तदेव तस्याभेदज्ञानत्वम्, तद्बलादेव तस्य मूलाज्ञानमिथ्या-ज्ञानादिविरोधित्वम्। तदुक्तम्—'तत्त्वंपदवाच्यार्थधर्मिद्वयपरामर्शादिरूपकारणविशेषाधीनत्वेन स्वरूपसम्बन्धविशेषेण चैतन्यविषयत्वमेव तदभेदज्ञानत्वम्'[3]।

न च विशेषणविभक्त्यर्थे तत्प्रकृत्यर्थस्य विशेषणतयाऽन्वयसम्भवेऽपि विशेष्यपदार्थस्य तत्र विशेषणत्वेनान्वयोऽव्युत्पन्न इति वाच्यम्, प्रकृतवाक्यस्थले विशेषणविशेष्यपदार्थयोर्भेदबुद्धिविरोधिशाब्दबोधस्य सर्वसिद्धत्वात्। तयोश्च सर्वज्ञत्वाल्पज्ञत्वाभ्यां विशिष्टे वाक्येऽखण्डार्थबोधाप्रसक्तेः गभीरायां नद्यां घोष इतिवद् वाक्य एव जहदजहल्लक्षणावृत्त्या सर्वज्ञत्वाल्पज्ञत्वरूपार्थपरित्यागेन चैतन्यमात्रप्रत्यायाद् भवति भेदहीनोऽखण्डार्थशाब्दबोधः। तथा चोक्तम्—

'सोऽयं पुमानयमसाविति पौरुषेये वाक्ये तथा व्यतिहृतेऽत्र विशेषहेतुः।
पूर्वापरत्वमिति शक्यमिदं न वक्तुं मुख्यत्वलाक्षणिकते प्रतिशब्दवृत्त्योः'[4] ।।

सोऽयं पुमानिति वाक्ये तच्छब्दः पूर्वोऽयंशब्दः पश्चात्प्रयुक्तः। अत्र वाक्यप्रयोक्तृणामुच्चारणे पूर्वापरत्वनियमादर्शनान्न पदद्वयलक्षणा। एवमखण्डे ब्रह्मणि तात्पर्यानुपपत्त्या विनिगमनाभावेन च पदद्वयलक्षणेत्युक्तम्। अत्र केचन अंशविशेषपरित्यागेन अंशविशेषप्रत्यायकत्वं जहदजहल्लक्षणात्वमिति स्वीकुर्वन्ति, तन्न सम्भवति, काकेभ्यो दधि रक्ष्यतामित्यत्राव्याप्तेः। अतः शक्याशक्ययोः साधारण्येन प्रत्यायकत्वं तत्त्वम्। तथा च काकशब्दः काकत्वेन रूपेण शक्यमर्थं त्यक्त्वा दध्युपघातकत्वेनाशक्यमर्थं प्रतिपादयन् श्वादिसाधारण्येन काकरूपमर्थमपि प्रतिपादयति। प्रकृते हि तत्पदं त्वंपदञ्च सर्वज्ञत्वाल्पज्ञत्वविशिष्टचेतनत्वेन रूपेण शक्यमर्थं परित्यज्य चेतनमात्रमशक्यमर्थं प्रतिपादयतः।

---

१. बृ.उप. ४।३।१९; २. तत्रैव-४।३।७।
३. सिद्धान्तलेशसङ्ग्रहे; ४. सङ्क्षेपशारीरके-१।१६५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोऽयं देवदत्त इति प्रत्यभिज्ञावाक्ये यथा तत्पदवाच्यपरोक्षत्वविशिष्ट-देवदत्तरूपार्थेन सह इदंपदवाच्यस्यापरोक्षत्वविशिष्टदेवदत्तरूपार्थस्याभेदात्मक-बोधानुपपत्त्या जहदजहल्लक्षणावृत्त्या पदद्वयस्य विशेषणांशपरित्यागेन देवदत्तमात्रस्य बोधः। तत्पदम् इदंपदञ्च देवदत्तमात्रतात्पर्येणोच्चारिते तदर्थानुपपत्तिप्रतिसन्धानेन लक्षणाबीजोद्भवः। तथा तत्त्वमसीति महावाक्ये तत्पदवाच्येन मायोपहितसकल-प्रपञ्चोपादानभूतेन सर्वज्ञत्वविशिष्टचैतन्येन सह त्वम्पदवाच्यस्य कामकर्मवासना-दूषितमलिनसत्त्वप्रधानाविद्याजन्यान्तःकरणावच्छिन्नचैतन्यस्याभेदात्मकतात्पर्यानुपपत्तेः प्रतिसन्धानभूतबीजोदयाज्जहदजहल्लक्षणावृत्त्या विशेषणांशपरित्यागेन चैतन्यांश-मात्रस्य बोधादभेदान्वयः सुलभः। तत्र चैतन्यमात्रतात्पर्येणोच्चरितयोः तत्त्वंपदयोरर्थानुपपत्तिप्रतिसन्धानं लक्षणाबीजम्। शक्यार्थस्य कस्यचिदंशस्य परित्यागात् कस्यचिदंशस्य च परिग्रहणादियं भागत्यागलक्षणेत्यभिधीयते।

अखण्डार्थबोधस्य फलनिरूपणम्

शोकमोहरूपकारणबीजनाशक्षमो हि मोक्षो यन्निमित्तेन जायमानस्तद्विनाशेन नश्यति। भेदबुद्धिश्च सकलप्रपञ्चोद्भवे हेतुः। 'यत्र हि द्वैतमिव भवति तदितरेतरं पश्यति, अस्य सर्वमात्मैवाभूत्तत् केन कं विजानीयात्'[१], 'वाचारम्भरणं विकारो नाम-धेयम्'[२], 'एकमेवाद्वितीयम्'[३], 'आत्मैवेदं सर्वम्'[४] इत्यादिश्रुतिभिर्यदेकत्वं प्रतिपादितं ब्रह्मणस्तन्न सम्भवति तत्त्वंपदयोर्लक्षणां विना, अत आश्रयति जहदजहल्लक्षणाम्।

जीवात्मपरमात्मनोर्भेदात्मकज्ञानेन भ्रान्तानां कर्तव्याकर्तव्यशून्यानां सुहृद् भूत्वा श्रुतिराह—'आत्मनो वा अरे दर्शनेन श्रवणेन विज्ञानेनेदं सर्वं विदितम्'[५]। आत्मव्यतिरेकेण नान्यत्किञ्चिदस्ति यद्यस्ति न तज्ज्ञेयम्। तदर्थं प्रतिपत्तिर्वेदान्तशास्त्रस्येति। अत एव प्रथम एव सूत्रे बादरायण 'अथातो ब्रह्मजिज्ञासा'[६] इति समवोचत्। तच्च ब्रह्म विशिष्टं शुद्धं वेति जिज्ञासायां 'ब्रह्मविदाप्नोति परम्'[७], 'तरति शोकमात्मवित्'[८], 'तमेव विदित्वा मृत्युमेति नान्यः पन्था विद्यतेऽयनाय'[९] इति श्रुतिभिर्बोधितनिर्विकल्पकज्ञानस्यैव मोक्षहेतुत्वात् शुद्धब्रह्म जिज्ञास्यमिति निश्चीयते। विकल्पस्यैव सर्वदुःखहेतुभूततया तस्य च जीवात्मपरमात्मनोर्भेदात्मकज्ञानेन जायमानत्वात्तन्निवृत्त्यैव निवर्तते।

अविद्यानिवृत्तिवशादेव दुःखात्मकस्य तत्कार्यसंसारस्यात्यन्तिकी निवृत्तिः। अविद्यानिवृत्तिश्चात्मज्ञानेन भवतीति कृत्वा परमप्रयोजनतया ब्रह्मज्ञानमेवाख्यातम्।

---

१. बृ.उप. २।४।१४; २. छान्दो. ६।१।४; ३. तत्रैव-६।२।१।
४. तत्रैव-६।२५।२; ५. बृ.उप. २।४।५; ६. ब्र.सू. १।१।१।
७. तै.उप. २।१; ८. श्वेता. ६।१५; ९. छान्दो. ७।१।५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'[१]। ज्ञानविषयो ह्यात्मा स च श्रोतव्यो गुरुमुखात्, मननं चात्र श्रुतस्यार्थस्याप्रतिपत्तिनिरासेन ग्रहणमथ च गृहीतस्यार्थस्य धारणं मननम्। धृतस्यार्थस्य युक्तिभिरनुचिन्तनमभ्यासः। शोको मनस्तापरूपं स चानात्मविदोऽविद्यासंसर्गादेव जायते। आत्मरूपोऽपि सन् भेदात्मकज्ञानेन जीवोऽहमिति बुद्धिः। सा च निवर्तते जीवात्मपरमात्मनोरभेदात्मधिया। 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा'[२]।

अतस्तत्त्वंपदार्थमात्रानुभवात् तत्त्वंपदलक्ष्यार्थज्ञानाद्वा न कृतकृत्यता, न च समूलाविद्यानिवृत्तिः, अपि च तयोरभेदात्मकज्ञानादेव भवति। अविद्यायाः सकलप्रपञ्चजननेनानर्थमूलतया तन्निवृत्तिरेव फलं तत्त्वंपदयोरखण्डार्थबोधस्य। सा चाविद्या नैकजीववादे प्रतिजीवं भिन्नेति कल्प्यते। अवच्छेदवादे हि तत्तदन्तःकरणावच्छेदेन जीवानामानन्त्यात् कस्यचिद्विद्योदये तदविद्याजन्याल्पज्ञत्वाव्यपगतेऽपि बद्धपुरुषान्तरेष्वविद्याकृतो जीवेश्वरविभागादिप्रपञ्चोऽनुवर्तते। चैतन्याध्यस्ताविद्याविकारत्वेनापञ्चीकृतसूक्ष्मवियदादिपञ्चमहाभूतानामुत्पत्तिः, ततश्च ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियाणि पञ्च प्राणादिपञ्चकञ्चोपपद्यन्ते। तैः संयुक्तमन्तःकरणमिति कथ्यते। तदुक्तम्—

'पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं योगसाधनम्'[३] ।।

तदन्तःकरणावच्छिन्नचैतन्यं जीव इति व्यपदिश्यते। तेषाञ्चामोक्षं विद्यमानत्वात् तावद्धि जीवेशविभागः। स च मोक्षो जीवात्मपरमात्मनोरभेदज्ञानरूपः। 'ब्रह्म वेद ब्रह्मैव भवति'[४], 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'[५], 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'[६], 'अभयं वै जनक प्राप्तोऽसि'[७], 'तदात्मानमेवावेदहं ब्रह्मास्मि तस्मात्तत्सर्वमभवत्'[८], 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः'[९] इत्येवमाद्याः श्रुतयः, 'ज्ञानाग्निना सर्वकर्माणि भस्मसात्कुरुते तथा'[१०], 'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते'[११], 'ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः'[१२] इत्यादयः स्मृतयश्च ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति।

एकजीववादेऽविद्यावच्छिन्नश्चिदात्माऽविद्याप्रतिबिम्बितश्चिदात्मा वा जीवः। तत्रैकमेव शरीरं सजीवं चेष्टाश्रयं वा। स्वप्नदशायां स्वप्नद्रष्टुरेकमेव सजीवशरीरम्।

---

१. बृ.उप. २।४।५; २. छान्दो. ७।२५।१; ३. वेदान्तपरिभाषा।
४. मुण्ड. ३।२।९; ५. तत्रैव-२।२।८; ६. तै.उप. २।९।
७. बृ.उप. ४।२।४; ८. तत्रैव-१।४।१०; ९. ईशा.।
१०. गीता-४।३७; ११. तत्रैव-१३।१२; १२. शा.भा., ब्र.सू. ३।३।३२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वप्नद्रष्ट्रा द्रष्टान्यन्यानि शरीराणि तु चेष्टाविशेषवत्तया दृश्यमानान्यपि न सजीवानि। यथा स्वाप्नस्य जगतः काल्पनिकत्वं तथा जाग्रत्प्रपञ्चस्यापि। यावन्निद्राक्षयं स्वप्नव्यवहारानुवृत्तिवद् विद्यया यावदविद्यानिवृत्तिपर्यन्तं सर्वव्यवहारानुवृत्तिरुपयुज्यते। ननु जीवैकत्वमते एको जीवो बद्धः, अन्यो जीवो मुक्त इति व्यवस्था न स्यादिति चेत्, न, स्वाप्नपुरुषान्तरमुक्त्यादिकमिव कल्पनात्। यथा स्वाप्नादुत्थितः स्वप्नभ्रान्तिसिद्धां पुरुषान्तरमुक्तिं परं प्रति बोधयति, तथा जीवभ्रान्तिसिद्धां शुकादिमुक्तिं तं प्रत्येव बोधयति।

यद्वा ब्रह्मप्रतिबिम्बभूतहिरण्यगर्भस्य भौतिकजगत्स्रष्टृतया कारणोपाधितया च मुख्यजीवस्य प्रतिबिम्बभूता अन्ये जीवा जीवाभासाः, हिरण्यगर्भवत्सृष्ट्यादि-सामर्थ्याभावात्। यथा हिरण्यगर्भशरीरं मुख्यजीवेन सजीवं तथा इतराण्यपि शरीराणि जीवाभासैस्सजीवानि। जीवाभासानां मुक्तिस्तु स्वबिम्बभूतहिरण्यगर्भ-प्राप्तिः, क्रमेण च शुद्धब्रह्मयाप्तिरिति मन्तव्यम्। अविद्यायां ब्रह्मप्रतिबिम्बरूपो जीवस्तावदेकः, अविद्याया एकत्वात्। स एव च सर्वं शरीरं स्वभोगाद्यर्थमधितिष्ठति। न त्वविद्यायां ब्रह्मप्रतिबिम्बो हिरण्यगर्भशरीरमधितिष्ठति। अन्यानि शरीराणि तत्प्रतिबिम्बा जीवाभासाः, तेषां ब्रह्मप्रतिबिम्बत्वे मानाभावात्।

एकजीववादे हि कृत्स्नस्य जीवेश्वरादिविभागस्यैकेनाज्ञानेन जन्यतया तद्विद्योदये विलयान्निर्विशेषचैतन्यरूपेणैवावस्थानम्, तत्र प्रथमपक्षेऽपि प्रतिबिम्बवादमाश्रित्य सर्वसम्भवात्। जीववदीश्वरोऽपि प्रतिबिम्बविशेष इति पक्षे मुक्तस्य बिम्बभूतशुद्धचैतन्यरूपेणैवावस्थानम्। 'सर्वं खल्विदं ब्रह्म'[1], 'नेह नानास्ति किञ्चन'[2] इति श्रुतेः जीवात्मपरमात्मनोरभेदात्मकज्ञानमेव सर्वोपनिषदां फलम्। तेनैव निवर्त्यतेऽविद्याजन्यसकलबन्धहेतुभूतं जगत्।

तत्त्वमस्यादिमहावाक्यबोधेन छिन्ने हि द्वैतेऽद्वयज्ञानं विनिश्चीयते। तन्नि-श्चय एवात्मबोधः। तद्बोधे च पूर्वं तदाकारवृत्तिरुदेति, तच्च सविकल्पकं ज्ञान-मुच्यते, तदनन्तरं लीनायां वृत्तावखण्डात्मबोधनिश्चयः। तदर्थं हि शास्त्राणामुपयोगः, निखिलोपनिषदां केवलाद्वैत एव तात्पर्यम्। एवं वैष्णवमान्ये श्रेष्ठे निगमकल्पतरु-गलितफलोपमे श्रीमद्भागवते प्रथमे 'वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्'[3] इत्यनेन केवलमद्वयब्रह्मज्ञानमेव समस्तशास्त्रप्रतिपाद्यं सारभूतं सत्यतत्त्वं तदितरद् द्वैतज्ञानमसारं तुच्छञ्चेति। तथा चोक्तं चतुर्थे—'अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः'[4] इत्यनेन व्यतिहारोपदेशेन पारमार्थिकं जीवब्रह्मणोरैक्यम्।

---

१. छान्दो. ३।१४।१; २. बृ.उप. ४।४।१९।
३. श्रीमद्भा. १।२।११; ४. तत्रैव-४।२९।६३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमद्भागवते दशमे पूर्वार्धे 'तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभम्'[१] इत्यनेन ब्रह्मभिन्नस्य सर्वस्य द्वैतप्रपञ्चस्य मिथ्यात्वं स्पष्टं प्रतिपादितम्। एकादशे स्कन्धे—'सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः। भूतानि भगवत्यात्मन्येष भागवतोत्तमः'[२]।। उपसंहारात्मके द्वादशेऽपि—'सर्ववेदान्तसारं यद् ब्रह्मात्मैकत्व-लक्षणम्। यस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम्'[३] 'तच्च ज्ञानरूपमेव' 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय'[४], 'ज्ञात्वा देवं सर्वपाशापहानिः'[५], 'तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति'[६] इति श्रुतयः। 'सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यति'[७], 'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते'[८], 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा'[९] इति स्मृतयश्च ज्ञानमेव मोक्षत्वेनानुमोदयन्ति। ज्ञानादेव हि कैवल्यम्। ऋते ज्ञानान्न मुक्तिः। तच्च न सम्भवति मिथ्याऽज्ञाननिवृत्तिमन्तरेण। अतः पूर्वं द्वैतमिथ्यात्वमेवोक्तं ततश्चाद्वैतनिश्चयः।

विशिष्टाद्वैतिनस्तु तत्त्वमसिमहावाक्येन जीवात्मपरमात्मनोरखण्डार्थप्रत्ययं न स्वीकुर्वन्ति। संसारिणो जीवस्य परमात्मरूपत्वासम्भवात् परमात्मनश्च निर्विशेषत्वाभावाच्च। सर्वत्र ब्रह्मणः सविशिष्टरूपप्रत्ययः। प्रलयेऽपि सूक्ष्मचिदचिद्विशिष्टमेव ब्रह्म समवतिष्ठते। सोऽयं देवदत्त इति प्रत्यभिज्ञावाक्येऽपि तत्कालविशिष्टैतत्कालविशिष्टस्यैव भानम्। यद्यपि पूर्वोदाहृतश्रुतिभिर्मोक्षदशायामपि भेदः परमार्थः, तथापि जीवेश्वरयोः शरीरशरीरिभावनिबन्धनोऽविनाभावोऽप्यपृथक्-सिद्धिरूपोऽङ्गीकरणीयः। एवमपि भेदस्य पारमार्थिकतोपयुज्यते। दृष्टश्च द्रव्यगुणयोरप्यपृथक्सिद्धिसम्बन्धवतोः पारमार्थिको भेदः।

शरीरवाचकानां पदानां शरीरिपर्यन्तस्य देवदत्तो जानातीत्यादिस्थलेषु क्लृप्ततया त्वंपदस्यापि परमात्मपरत्वेन सामानाधिकरण्यमुपपद्यते। युष्मदर्थस्य पुरोवर्तिनोऽत्राविवक्षणेऽपि युष्मदुपपदत्वाविधानान् मध्यमपुरुषप्रयोगोपपत्तिः। जीव-शरीरकः परमात्माऽस्तीति प्रयोक्तव्ये तत्त्वमसि इति निर्देशस्तूपस्थितत्वेन श्वेतकेतुमेव दृष्टान्तयितुमिति न किञ्चिदनुपपन्नं प्रतीमः। एवञ्च 'सदेव सोम्येदमि'त्युपक्रमोऽपि सूक्ष्मचिदचिद्विशिष्टस्य स्थूलचिदचित्प्रहाणद्वारा स्थूल-चिदचिद्विशिष्टाभेदगोचर उपपद्यते। स्थूलचितं प्रति सूक्ष्मचितः स्थूलाचितं प्रति सूक्ष्माचितश्चैव कारणत्वेऽपि सूक्ष्मचिदचितोर्भगवच्छरीरत्वात्, तयोश्चास्मच्छरीर-वत्पारतन्त्र्यात्, स्वतन्त्रस्य भगवत एव कारणत्वव्यपदेशः।

---

१. श्रीमद्भा. १०।१४।२२; २. तत्रैव-११।३।४५; ३. तत्रैव-१२।३।१२।
४. श्वेता. ६।१५; ५. तत्रैव-१।११; ६. तत्रैव-६।२०।
७. गीता. ४।३; ८. तत्रैव-४।३८; ९. तत्रैव-४।३७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैष्णवानां मतं दूषयन्तोऽद्वैतिनः प्रत्याक्षिपन्ति 'निरञ्जनः परमं साम्यमुपैति'[१] इत्यत्र पारम्यविशेषणेन 'ब्रह्मैव भवति'[२] इत्यवधारणात् 'उदरमन्तरं कुरुते अथ तस्य भयं भवति'[३], 'द्वितीयाद्वै भयं भवति'[४], 'अतोऽन्यदार्तम्'[५], 'विद्वान् नामरूपाद्विमुक्तः' इत्यादिभेदनिन्दाश्रवणेन च भेदरहितस्यैव मोक्षपदार्थस्यावगमाद् न पारमार्थिकं गोचरयितुमीशते। एवञ्च भेदज्ञानस्य मोक्षानुपयोगितया प्रत्युतानर्थप्रयोजकत्वाज्जुष्टं यदा पश्यतीत्यादीनां भेदपारमार्थिकताया मन्त्रत्वात्, नेह नानास्तीत्यादिश्रुत्यनुसारेण तदपारमार्थिकतया शास्त्रार्थः। तत्त्वमसि-श्रुतिस्तु सम्यगेव विमृश्यमाना जीवपरमात्मनोरभेदमेवात्यन्तिकं बोधयतीति भेदाविरोधेन तद्व्याख्यानप्रकाराः समेऽपि निरालम्बना एवेति।

द्वैतमिथ्यात्वबोधेन चीयते तत्त्ववेदनम् ।
अविद्यया जायते द्वैतं ततो बुद्धिर्विनश्यति ।।

समूलाज्ञाननाशाय दर्शनानां विनिर्मितिः ।
नष्टे ज्ञाने गतं द्वैतं न विद्यतेऽद्वये भयम् ।।

वेदप्रमाणेन समस्तशास्त्रं चिनोति तत्त्वं जगतो विचित्रम्।
व्यावर्तयल्लोकविधानमूलमज्ञानजन्यं भवबन्धहेतुः।।

यावदज्ञानसम्भ्रान्त्या कामास्तिष्ठन्ति मानसे ।
न तावज्ज्ञानसंज्योतिः प्रकाशायोपयुज्यते ।।

नासद्रूपं न सद्रूपं मिथ्याप्रपञ्च उच्यते ।
यद्रूपं स्यादुपादानं तद्रूपा कार्यसंसृतिः ।।

आत्मबोधप्रदीपेन ध्वस्ताज्ञानविनिर्मितिः ।
नष्टे मोहे स्मृतिर्जाता तदेतच्छास्त्रवैभवम् ।।

तदज्ञानविनाशाय शास्त्राणामुपयोगिता ।
न तिमिरे ध्वस्ते कश्चित् सन्देहमुपगच्छति ।। इति।

●

१. मुण्ड.उप. ३।३।१; २. तै.उप. २।२।९।
३. तत्रैव-२।७; ४. बृ.उप. १।४।१।
५. तत्रैव-३।४।२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषत्वलक्षणविचारः

डॉ. कमलाकान्तत्रिपाठी
अध्यक्षः, मीमांसाविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

अथातो धर्मजिज्ञासेति सूत्रेण भगवता जैमिनिना द्वादशस्वध्यायेषु धर्मस्यैव विचारविषयता[1] विचारशास्त्रस्य च वैधत्वमुपपादितम्। तत्र प्रथमेऽध्याये 'चोदनालक्षणोऽर्थो धर्मः'[2] इति सूत्रेण धर्मे प्रामाण्यं तत्स्वरूपञ्च प्रतिपादितम्। सूत्रे धर्मपदमधर्मस्याप्युपलक्षणम्। धर्माधर्मयोरिष्टानिष्टसाधनरूपयोः प्रमाजनकत्वेन विधिप्रतिषेधवाक्यानां प्रामाण्यं प्राधान्येन प्रतिपादितम्। तत्तु साध्यसाधनेतिकर्तव्यताविशिष्टभावनाविषयकप्रवर्तनानिवर्तनापरपर्यायविधिप्रतिषेधप्रतिपादनाद् अर्थाच्च तद्विषयकयागादेरिष्टानिष्टसाधनत्वाक्षेपपुरःसरं युक्तमेव। अवशिष्टेषु त्रिषु पादेषु तदायत्तत्वेनैव अर्थवादमन्त्रस्मृतिनामधेयाचारसामर्थ्यानामपि प्रामाण्यं भावनोपयोगित्वलक्षणं प्रतिपादितम्। द्वितीये चाध्याये शब्दान्तराभ्यासगुणसंख्यासंज्ञाप्रकरणान्तरैः षड्भिर्भेदप्रमाणैर्भेद एव कर्मणां प्रतिपादितः। अत्र कर्मपदेन भावना गृह्यते। तृतीयाध्यायः शेषाध्याय इत्युच्यते। यथाह सूत्रकारः—'अथातः शेषलक्षणम्'[3] इति। अथशब्द आनन्तर्य-पूर्वप्रकृतापेक्षाधिकारार्थः सन् एकार्थविवक्षयैव प्रयुज्यते। एकार्थविवक्षयैव प्रयोगे अन्यार्थस्यार्थादेव सिद्धेः।

अयं भावः—अथशब्दस्य पूर्वोक्तार्थत्रयवाचित्वेऽपि जिज्ञासासूत्रेऽर्थद्वयासम्भवाद् आनन्तर्यार्थत्वमेवाङ्गीकृतम्। पूर्वप्रकृतनियमो हि निर्दिष्टस्यैव सम्भवति। वेदाध्ययनस्य पूर्वं जिज्ञासायाः शब्देन निर्दिष्टत्वाभावात् पूर्वप्रकृतापेक्षार्थत्वस्यानुपपत्तिः प्रमाणपरतन्त्रत्वाज्जिज्ञासायाः कृतिसाध्यत्वाभावाद् अधिकारार्थत्वस्याप्यनुपपत्तिः। अत्र तु शेषत्वनिरूपणपरः शब्दव्यापारः सम्भवति, तेन चाधिकारार्थत्वस्योपपत्तिः। भेदलक्षणानन्तरं क्रियमाणत्वा-

१. मीमांसादर्शने-१।१।१; २. तत्रैव-१।१।२।
३. तत्रैव-३।१।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्तस्योपजीव्यत्वेन पूर्वप्रकृतापेक्षस्यार्थादेव सिद्धत्वात् तदर्थस्यापि स्वीकारः। वार्तिककारा यथाहुः—

एवमर्थद्वये तावदथशब्दस्य वर्णिते ।
सम्बन्धोऽध्याययोरुक्तो यद्वाऽर्थात् सिद्ध एव सः ।।
ततश्चापुनरुक्तत्वाद् वक्ष्यमाणार्थगोचरा ।
अधिकारार्थता वक्तुमथशब्दस्य वक्ष्यते[१] ।। इति।

शेषलक्षणमिति शेषञ्च तल्लक्षणम्, शेषस्य लक्षणमिति द्विधा समासः।

एतेन शेषाध्यायो लक्ष्यभूतस्य शेषस्य लक्षणमित्युभयार्थलाभः सिद्ध्यति। अतःशब्दो हेत्वर्थकः। यस्मात् शेषस्य भेदाधीननिरूपणाद् द्वितीयेऽध्याये भेदे सिद्धे परं शेषनिरूपणं क्रियत इत्यर्थः। उक्तञ्च वार्तिककारेण सर्वमेतत्—

एवमत्र प्रपञ्चेन पूर्वाध्यायार्थवर्णनम् ।
उत्तराध्यायसिद्ध्यर्थमनुक्रान्तमशेषतः ।।
शेषत्वे कर्मभेदात्तु नाधिकार्थोपयोगिता ।
तस्मात् स एव वृत्तोऽत्र सङ्क्षेपेणोपसंहृतः[२] ।। इति।

यद्यपि शेषलक्षणशब्दस्य शेषाधीननिरूपणीयत्वात् प्रयुक्तिक्रमाधिकारातिदेशोद्बाधतन्त्रप्रसङ्गात्मकसर्वशास्त्रविषयता सिद्ध्यति, तथापि तृतीयमेव शेषलक्षणं गृह्यते। अन्यानि लक्षणानि पृथगारम्भैर्भविष्यन्त्येव।

अत्र न केवलं शेषनिरूपणमेव क्रियते, अपि तु उद्देश्यशालित्वरूपः शेष्यपि निरूप्यते, उभयोः परस्परसम्बन्धात्, तथापि शेषः अस्त्यस्य स शेषीति शेषनिरूपणेनैव शेषिणो ज्ञायमानत्वात् श्रुत्यादिषट्प्रमाणैः शेषस्यैव बोधनात् स एव निरूप्यते।

ज्ञातव्या उभये सत्यं सूत्रणीया न तूभये ।
अर्थापत्त्या हि सिद्ध्यन्ति द्वितीया एकलक्षणात् ।।
तत्र सूत्राणि शेषाणां किं कार्याण्युत शेषिणाम् ।
फलप्रयासतुल्यत्वात् प्रसज्येत यथारुचि ।।
प्राधान्यात् शेषिणां साक्षाद्युक्तं वा शेषिलक्षणम् ।
न तु तत् क्रियते तत्र कर्तव्यं हि द्वयं भवेत् ।।

१. मीमांसादर्शने, तन्त्रवार्तिके; २. तत्रैव।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषोऽस्यास्तीति मत्वर्थाद् एवं शेषी निरूप्यते ।
न स शेषमविज्ञाय ज्ञातुं शक्येत केनचित् ।।
तेनोपसर्जनस्यापि शेषस्यैवेह लक्षणम् ।
क्रियते शेषिणस्त्वर्थात् तज्ज्ञानेनैव सेत्स्यति[1] ।।

इति वार्तिकग्रन्थेन सूच्यते। शेषशब्दस्त्वत्राङ्गगुणधर्मादिपर्यायवाची। किं तावत् शेषस्य लक्षणमिति? केचित् 'अविनाभावत्वमेव शेषलक्षणमि'ति प्रतिपादयन्ति। यो येन विना न भवति स तस्य शेषः। एवमङ्कुरस्य तोयादिर्घटस्य कपालदण्ड-चक्रादिर्दर्शपूर्णमासादीनामवघातप्रोक्षणप्रयाजादयः शेषा भवन्ति। न हि तोयादि-मन्तरेणाङ्कुरोत्पत्तिः कपालादिमन्तरेण च घटः सम्भवति। अवघातप्रोक्षणप्रयाजाद्य-नुष्ठानमन्तरेण न दर्शपूर्णमासयागस्य निष्पत्तिरिति अवघातादीनां शेषत्वम-विनाभावलक्षणं सिद्ध्यति। तदेतदविनाभावलक्षणं शेषत्वं न युक्तम्, व्यभिचारात्। पृथिव्यां रूपस्पर्शादयोऽविनाभूता दृश्यन्ते, न च तेषां परस्परशेषत्वमस्ति। प्रधानयागानामप्येवं रीत्याऽविनाभूतत्वात् परस्परशेषत्वापत्तिः स्यात्।

तथा हि दर्शपूर्णमासयोः षट् प्रधानानि। आग्नेयः ऐन्द्रादधि, ऐन्द्रपय इति दर्शे। आग्नेयः उपांशुयाजः अग्नीषोमीयपुरोडाशयागः पूर्णमासे। एतेषां क्रमो मन्त्रपाठानुसारेण पाञ्चमिकन्यायसिद्धः। अतो यावत् पूर्वो नानुष्ठीयते, तावत् परोऽपि नानुष्ठातुं शक्यत इति अविनाभूतत्वात् परस्परशेषत्वं प्रधानानामपि स्यात्। एवमङ्गानामपि नियतक्रमेणानुष्ठीयमानानामन्योन्यशेषत्वप्रसक्तिः। अपि चाध्ययनाधानकृषिद्रव्यार्जनादिभिर्विना क्रत्वनुष्ठानासम्भवात् शेषत्वं तेषां क्रतुं प्रति स्यात्। न हि अध्ययनं क्रतुशेषः, अपि तु अर्थज्ञानशेष इति जिज्ञासाधिकरणे व्यवस्थापितम्। आधानमपि अग्निशेषः। अतोऽविनाभावलक्षणं शेषत्वं निराकृत्य केचित् प्रयोज्यत्वलक्षणं शेषत्वमाचक्षते। येन यः प्रयोज्यः स तस्य शेष इति।

अत्र प्रयोज्यत्वं यत्किञ्चिन्निष्ठानुष्ठापकतानिरूपितानुष्ठाप्यत्वमुच्यते। यथा 'व्रीहीन् प्रोक्षति' इत्यत्र व्रीहिपदोत्तरद्वितीया व्रीहिनिष्ठशेषित्वं बोधयन्ती प्रोक्षणस्य तान् प्रति शेषत्वं बोधयति। व्रीहिस्वरूपे प्रोक्षणस्यानर्थक्यात् प्रधानजन्या-पूर्वसाधनत्वे लक्षणामङ्गीकृत्य तदुद्देशेनैव प्रोक्षणस्य विधानात् प्रधान-दर्शपूर्णमासजन्यापूर्वसाधनत्वनिष्ठानुष्ठापकतानिरूपितानुष्ठाप्यतायाः प्रोक्षणे विद्यमानत्वात् लक्षणसमन्वयः। एवमेव प्रयाजादिष्वारादुपकारकेषु प्रयोज्यत्व-लक्षणसमन्वयः। दासेन स्वामी तथा रूपस्पर्शादयः प्रधानानि चान्योन्यं न प्रयुज्यन्त इति नातिप्रसङ्गः।

१. तन्त्रवार्तिके-३।१।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यभिचारात् प्रयोज्यत्वरूपं शेषत्वलक्षणं न सम्भवति। 'पुरोडाशकपालेन तुषानुपवपती'त्यत्र तुषोपवापे पुरोडाशकपालस्य शेषत्वं तावत् तृतीयाश्रुत्या स्वीक्रियते, न तु पुरोडाशकपालं तुषोपवापप्रयोज्यमस्ति, तस्य पुरोडाशयाग-प्रयोज्यत्वात्। अतः प्रयोज्यत्वलक्षणसमन्वयाभावादव्याप्तिः। अपि च 'भिन्ने जुहोति, स्कन्ने जुहोति' इति भेदनस्कन्दनादिभिर्निमित्तैर्होमाः प्रयुज्यन्ते। होमानामेतेषां शेषत्वं तेषु न स्वीक्रियत इति अशेषभूतेषु होमेषु प्रयोज्यत्वलक्षण-स्यातिव्याप्तिः।

अतः 'यद्विहिताधिकान्यविहितत्वमेव शेषत्वमिति केचिद् निगदन्ति 'दर्शपूर्णमासाभ्यां यजेत् स्वर्गकामः' इति प्रधानस्य फलवतो विधेरङ्गविधयोऽङ्गानि भवन्ति प्रधानेभ्यश्चातिरिच्यन्त इति पूर्वोक्तातिरेकलक्षणमेव शेषत्वमिति तेषामभिप्रायः।

एतदपि लक्षणं व्यभिचारित्वान्न युक्तम्। यतो हि प्रधानेभ्योऽङ्गानि यथा अतिरिच्यन्ते, तथैव शेषेभ्योऽपि प्रधानान्यतिरिच्यन्त इति प्रधानेष्वतिव्याप्तिः।

अन्ये तु विध्यादिविहितप्रधानार्थभावनाकथम्भावाकाङ्क्षापूरणक्षमविध्यन्त-विहितत्वं शेषत्वमिति ब्रुवते, सूत्रकारजैमिन्यभिप्रेतत्वमपि एतल्लक्षणस्येति कथयन्ति। एवंलक्षणनिष्पादने प्राय आदौ प्रधानविधिनिर्देशस्ततः परान् विधीन् विलोक्य अङ्गान्येवेति निश्चयस्तथा विकृतौ प्रधानभावनेतिकर्तव्यताकाङ्क्षायामुप-कारपृष्ठभावेन विध्यन्तस्यैवातिदेशेन प्रवृत्तिदर्शनं हेतुः।

एतदपि न समीचीनम्। यदि शेषविधयः प्रधानविधिभ्यः परा एव व्यवस्थिताः समाम्नाता भवेयुस्तदा व्यभिचाराभावादेतल्लक्षणमङ्गीकृतं स्यात्। न त्वेवं समाम्नाता अङ्गविधयः सन्ति। कुतः? क्वचिदादौ क्वचिन्मध्ये क्वचिच्चान्ते वैचित्र्येण तेषां समाम्नानात्। अपि चोत्पत्तिवाक्येषु यत्र कर्मभिः सहैव द्रव्याणि देवताश्च समाम्नाता दृश्यन्ते, यथा 'यदाग्नेयोऽष्टाकपालः पौर्णमास्याममावा-स्यायाञ्चाच्युतो भवति' इत्यत्राष्टाकपालद्रव्यमग्निश्च तद्धितसमर्पितो देवता, तदुभयमाग्नेययागशेषभूतम्, तत्र विध्यन्तसमाम्नानविरहात् शेषा न भवेयुरित्य-व्याप्तिर्लक्षणस्य। दर्शे प्रधानविधेरादौ शाखाच्छेदनादयो धर्मा विहिताः सन्ति, ते न कथञ्चिद् विध्यन्तविहितत्वाभावाद् दर्शस्य शेषा भवेयुरिति न विध्यन्तविहितत्वं शेषत्वलक्षणं युक्तम्। यथोक्तं वार्तिककारैः—'अङ्गविध्युपक्रमेषु तावद् वाक्यप्रकरणेषु तद्गतकिंभावाकाङ्क्षितप्रयोजनकल्पनावेलायां कथम्भावाकाङ्क्षा-युक्तप्रधानविधिदर्शनात् तदपेक्षितोपकारविध्यर्थत्वेन तेषामवधार्यमाणानां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विध्यादिगतानामपि शेषत्वमस्तीति, न विध्यन्तविधानमेवैकं शेषलक्षणत्वेनावकल्पते'[१] इति।

अयमभिप्रायः—उभयाकाङ्क्षारूपं प्रकरणं क्रियाया एव विनियोजकं भवति। तत्र प्रधानविधेः फलवतः कथम्भावाकाङ्क्षा तथाऽङ्गविधीनां फलविधुराणां किम्भावाकाङ्क्षा भवति। एवमुभयाकाङ्क्षारूपप्रकरणेनाङ्गाङ्गित्वं निश्चीयते। तत्र वाक्यप्रकरणेषु यदाऽङ्गविधय एवोपक्रान्ताः सन्ति, तदा तत्र फलाश्रवणात् पूर्वमेव यदा किंभावाकाङ्क्षयोपकार्यरूपं प्रयोजनं कल्पनीयं तदैव कथम्भावाकाङ्क्षायुक्तफलवत् प्रधानविधिर्दृश्यते। एवं प्रधानविधिनाऽपेक्षितो य उपकारस्तदर्थत्वेनादौ सन्त्यङ्गविधय इति निश्चीयते। इत्थमादौ विधीयमानानामप्यस्त्यङ्गत्वमित्यव्याप्तत्वान्न पूर्वोक्तं लक्षणं साधु।

अपरे पुनः प्रत्यवतिष्ठन्ते 'उपकारकत्वमेव शेषत्वलक्षणमिति वादरिसम्मतमपि न जैमिन्याचार्यमतविधुरम्। भाष्यकारा हि तत्र तत्र स्थाने निर्दिशन्त्येव। यथा प्रकृतसूत्र एव 'यः परस्योपकारे वर्तते स शेष इत्युच्यते' इति। तथा 'विद्यायां धर्मशास्त्रमिति' सूत्रे—'अथ यो धर्मविशेष उक्तो विद्याग्रहणार्थः, स न कर्मण उपकारकः। कथं गम्यते? श्रुत्यादीनामभावात्' इति।[२] अभिक्रमणाधिकरणसिद्धान्तभाष्येऽपि—'तस्मादभिक्रमणमुपकरोति होमस्येत्यवगम्यते'[३] इति।

एवं 'भिन्ने जुहोति, स्कन्ने जुहोति' इति भिन्नादिनिमित्तं प्रति होमादेरुपकारकत्वाभावान्नातिव्याप्तिः। तादर्थ्यमपि नैवान्यदुपकारात्। अत उपकारकत्वमेव शेषत्वलक्षणमिति स्वीकर्तव्यमिति।

नैतल्लक्षणमपि समीचीनम्। गोदोहनेन पशुकामस्य प्रणयेदित्यत्र फलार्थत्वेन विहितस्य गोदोहनस्य प्रणयनोपकारकत्वात् प्रणयनाङ्गत्वापत्तिः स्यात्, तथा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामीक्षा वाजिभ्यो वाजिनमित्यत्र आमीक्षार्थमुपात्तस्य दध्यानयनस्य वाजिनोपकारकत्वाद् वाजिनयागाङ्गत्वापत्तिरपि। न च गोदोहनं प्रणयनस्याङ्गं दध्यानयनञ्च वाजिनयागस्येत्यतिव्याप्तिः।

उपकारकत्वलक्षणपरिष्कारः

यद्युच्येत, केवलमुपकारकत्वं न लक्षणम्, किन्तु 'अन्यानुपकारकत्वे सत्युपकारकत्वं तदुच्यते। तथा सति गोदोहने दध्यानयने चान्यानुपकारकत्वस्याविद्यमानत्वान्न समन्वय इति नातिव्याप्तिरिति।

---

१. मीमांसादर्शने-३।१।२, शेषः परार्थत्वादिति सूत्रस्थवार्तिकम्।

२. मीमांसादर्शने-२।४।१४; ३. तत्रैव-३।१।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमपि पशुयागेऽनुष्ठीयमानानां प्रयाजानां पश्वङ्गत्वं न स्यादित्यव्याप्तिः, तेषां पशुपुरोडाशोपकारकत्वात्। पश्वर्थं क्रियमाणानां प्रयाजानां प्रसङ्गात् पुरोडाशोपकारत्वस्वीकारात्। अतोऽन्यानुपकारकत्वे सत्युपकारकत्वमिति लक्षणसमन्वयाभावादव्याप्तिः।

यद्युच्येत, अन्यानुपकारकत्वविशेषणस्य 'अन्याप्रयुक्तत्व'मित्यर्थो विवक्षितः। तेनान्याप्रयुक्तत्वे सति उपकारकत्वमिति स्वीकारेण पशुयागे क्रियमाणेषु प्रयाजेषु लक्षणं समन्वितं भवति। न हि प्रयाजेषु पशौ क्रियमाणेषु पुरोडाशयागनिष्ठप्रयोजकतानिरूपितप्रयोज्यताऽस्ति। न खलु पुरोडाशयागः प्रयाजानां प्रयोजकः। एवं लक्षणसमन्वयान्नाव्याप्तिरिति।

एवं सति 'पुरोडाशकपालेन तुषानुपवपती'ति विहितस्य कपालस्य तुषोपवापाङ्गत्वं न स्यादित्यव्याप्तिः, कपालस्य पुरोडाशप्रयुक्तत्वात्। 'कपालेषु श्रपयती'ति विधिना कपालानां पुरोडाशश्रपणप्रयुक्तत्वस्य गम्यमानत्वात्। 'कपालेन' इति तृतीयया कपालस्य तुषोपवापाङ्गत्वं तावत् सिद्धम्। तत्रान्याप्रयुक्तत्वाभावान्न लक्षणसमन्वय इत्यव्याप्तिः। यदि 'अन्याप्रयुक्तत्वे सत्युपकारकत्वमित्यस्य विवक्षितोऽर्थः—अन्यप्रयुक्ततानवच्छेदकं यदुपकारकतावच्छेदकं तद्धर्मवत्त्वमिति। पुरोडाशकपाले पुरोडाशप्रयुक्ततावच्छेदकधर्मः कपालत्वम्, स च पुरोडाशान्य-प्रयुक्ततानवच्छेदकः, अपि चोपकारकतावच्छेदककपालत्वधर्मवान् तुषोपवापि पुरोडाशीयत्वेनोपकारकत्वाल्लक्षणसमन्वय इति नाव्याप्तिरित्युच्यते, तथापि प्राकृताङ्गानां दीक्षणीयादीनां विकृत्यङ्गतानापत्तिः। पुरोडाशकपालस्य तुषोपवापाङ्गत्वं पुरोडाशीयत्वेन सिध्यति, 'कपालेषु श्रपयती'ति विधानात्। अतस्तत्र कपालत्वधर्मः अन्यप्रयुक्ततानवच्छेदकः, अपि चोपकारकतावच्छेदक इति समन्वय उक्तः। प्रकृते दीक्षणीयादयो ज्योतिष्टोमाङ्गत्वेन विहिता ज्योतिष्टोमप्रयुक्ताः। ज्योतिष्टोम-प्रयुक्ततावच्छेदकधर्मो दीक्षणीयत्वादिः। दीक्षणीयत्वादिना ज्योतिष्टोमोपकारकाः ज्योतिष्टोमप्रयुक्तत्वाद् दीक्षणीयादीनाम्। विकृतिषु तु न दीक्षणीयादयो विहिताः। अतिदेशेन ते प्राप्नुवन्ति। अतिदेशश्च न दीक्षणीयत्वधर्मपुरस्कारेण, तथा सति प्रत्यङ्गमतिदेशवाक्यं कल्पनीयं स्यात्। तच्च नाभिमतम्. तथा चोपकारकता-वच्छेदकत्वेन दीक्षणीयत्वादेरपरिग्रहात् कथं दीक्षणीयादीनां विकृत्यङ्गत्व-मित्यव्याप्तत्वान्न पूर्वोक्तलक्षणेनेष्टसिद्धिः।

यद्यपीयमव्याप्तिः परिहर्तुं शक्यते। दीक्षणीयत्वादिना प्रयुक्तत्वेऽपि प्राकृताङ्गत्वेन विकृत्युपकारकत्वे स्वीकृते दोषाभावात्। दीक्षणीयत्वादिना विकृत्युपकारकत्वं न भवितुमर्हति, यतश्च 'प्रकृतिवद् विकृतिः कर्तव्या'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यतिदेशशास्त्रं प्राकृतान्यङ्गानि न पृथक्पृथगतिदिशति, गौरवापत्तेः, अपि तु लाघवात् प्रकृतिसम्बन्ध्यङ्गत्वेनातिदिशति। विकृतिर्दीक्षणीयादीनां प्रयोजिका न भवितुमर्हति, विकृतौ तेषामनाम्नानात्। विकृतिभावनायाः कथम्भावाकाङ्क्षायां सादृश्येनातिदेशं कल्पयित्वा प्राकृताङ्गानि तदाकाङ्क्षापूरकाणि भवन्ति। तथा च यथा प्रकृतावुपकारकत्वमङ्गानां तथैव विकृतावपि तेषामुपकारकत्वं सिद्ध्यति। एवञ्च प्रकृतिप्रयुक्तताविच्छेदकं दीक्षणीयत्वादि तदन्यप्रयुक्ततानवच्छेदकं तदेव विकृत्युपकारकतावच्छेदकं तद्वत्त्वं विकृतौ प्राप्तानामङ्गानामस्तीति समन्वयः।

उपकारकत्वलक्षणखण्डनम्

एवं व्यभिचारवारणेऽपि नोपकारकत्वलक्षणं शेषत्वमङ्गीकर्तुं शक्यते। प्रधानानामङ्गानाञ्च तथाऽङ्गाङ्गानामन्योन्यशेषसाङ्कर्यप्रसङ्गात्। यथाङ्गानां प्रधानोपकारकत्वं तथैव प्रधानानामपि अनुष्ठापनद्वारा उपकारस्य स्वीकरणात् स्यादेवाङ्गोपकारकत्वम्। यतो ह्यङ्गानि तदैवोपकारं कर्तुं शक्नुवन्ति यदोपकार्यभूतैः प्रधानैः प्रयुक्तानि भवेयुः। एवमङ्गानुग्राहकत्वात् प्रधानान्यप्यङ्गशेषाणि भवेयुरिति परस्परोपकारकत्वेन परस्पराङ्गत्वप्रसक्तिः। अपि च कृषिर्द्रव्यार्जनमाधानं स्वाध्यायाध्ययनञ्च सर्वेषामेव क्रतूनामुपकारकत्वात् सर्वकर्माङ्गानि भवेयुः। इतरेतराश्रयताऽपि भवेत्। पूर्वमेव शेषत्वनिश्चयो यदा भवति तदैवोपकारो दृश्यते। एवमनिश्चितशेषत्वेषु प्रयाजादिष्वारादुपकारकेषूपकारानिश्चयादेवोपकाराधीननिश्चयं शेषत्वं कथं भवेत्। यथोक्तं वार्तिककारमिश्रैः—'यो हि यस्य फलस्य फलवतो वा शेषत्वेनावधारितो भवति, स कथं तस्योपकरिष्यतीत्यपेक्षिते सति दृष्टमुपकारमपश्यद्भिस्तस्माददृष्टः परिकल्प्यते। यावत्तु शेषत्वमेव नावगम्यते, तावत् केन प्रमाणेनादृष्टकल्पना स्यात्'[1] इति। एवं पूर्वोक्तेषु शेषलक्षणाभासेषु निराकृतेषु किन्तावच्छेषत्वमित्यपेक्षायां शेषत्वलक्षणं ब्रूते भगवान् जैमिनिः—'शेषः परार्थत्वात्' इति।

अङ्गत्वलक्षणम्

अनेन सूत्रेण किं शेषत्वलक्षणं केन च हेतुना शेषत्वमित्युभयमपि श्रुत्यर्थाभ्यां प्रतिपाद्यते चोदनासूत्रवत्। 'चोदनालक्षणोऽर्थो धर्म' इति सूत्रेण यदा चोदनैव धर्मे प्रमाणं न प्रत्यक्षादि, चोदना तत्र प्रमाणमेव नाप्रमाणमिति प्रमाणविधिरङ्गीक्रियते श्रुत्या, तदा धर्मस्य स्वरूपविशेषयोरर्थात् सिद्धिर्भवति चोदनागम्यस्याग्निहोत्रादेरेव धर्मत्वमिति 'द्वयमेकेन सूत्रेण श्रुत्यर्थाभ्यां निरूप्यते'[2]

१. जैमिनीये तृतीये शेषत्वलक्षणाधिकरणे।
२. चोदनासूत्रस्थश्लोकवार्तिकम्-२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति वार्तिकोक्तदिशा यथा प्रतिपाद्यते, तथैव प्रकृतेऽपि 'यः परार्थस्तं वयं शेषं ब्रूम' इति भाष्यात् पारार्थ्यमेव शेषत्वलक्षणं श्रुत्या प्रतिपाद्यते, प्राधान्येन कीदृक् शेष इति स्वरूपजिज्ञासायाः सत्त्वात्, अर्थात् स्वरूपज्ञानोत्तरं जिज्ञासितो हेतुः प्रतिपाद्यते। एवं परार्थत्वस्य शेषपदवाच्यत्वे निश्चिते तस्यैव शेषपदशक्यतावच्छेदकत्वरूपहेतुत्वमर्थात् सिद्ध्यति। एवं व्याख्याने परार्थत्वादिति पञ्चमी प्रथमार्थे। यदि हेतुत्वमेव श्रुत्या प्रतिपाद्यते तदा स्वरूपमर्थात्। प्रयाजादयः शेषपदवाच्याः परार्थत्वादिति सौत्रार्थे ज्ञातेऽर्थसिद्धं भवति परार्थत्वमेव शेषलक्षणमिति। एवं पारार्थ्येनैव शेषत्वस्य निश्चयात् पश्चात् फलतस्तस्योपकारकत्वनिश्चय इति न तादर्थ्योपकारकयोरभेदः। तादर्थ्ये चतुर्थीति वार्तिके नागेशभट्टैरुक्तम्, तादर्थ्यमुपकार्योपकारकभावसम्बन्ध इति तेनाभेदोऽप्यस्ति तयोरिति केचिद् मन्वते 'तथा नाङ्गीकरणीयम्। यतो हि तादर्थ्यस्योद्देशमात्रेणोपकारापकारयोस्तुल्या प्रसिद्धिः। मशकार्थो धूम इत्यपकारिण्यपि तस्य प्रयुज्यमानत्वात्। यथोक्तं वार्तिककारेण शेषत्वलक्षणाधिकरण एव—

अपकुर्वन्नपीष्टो हि तदर्थव्यपदेशभाक् ।
उपकुर्वन्नपि त्वन्यस्तदर्थ इति नोच्यते ।। इति।

उपकारिण्यपि प्रसज्यमाने प्रयोजके च न तादर्थ्यव्यवहारो भवतीत्युभयोर्भेद एव। एवं सति शेषत्वस्यापकारिणि प्रसक्तिः स्यादिति न वाच्यम्, अपेक्षाभावात्। शेषिभिरुपकारस्यैवापेक्षितत्वात् स एव कल्प्यते शेषत्वेन नापकारः। नन्वेवं स्वामिन्यतिप्रसक्तिः क्वचित् तस्यापि सेवके प्रवृत्तिदर्शनादिति चेत्, न, तस्यात्यन्तपरार्थाभावात्। यथाहुर्भाष्यकाराः—

'आत्मन एवाऽसौ संविदधानो गुणभावं गच्छति। नान्तरीयकत्वाद् गर्भदासस्योपकरोति, अनडुहो वा, यस्त्वत्यन्तं परार्थस्तं वयं शेष इति ब्रूमः'[१] इति। अस्याभिप्राय उक्तो वार्तिके—

'उद्देशेन हि तादर्थ्यं विविच्यते। न च स्वामिनो गर्भदासाद्युद्देशेन तदुपकाराय प्रवृत्तिः। किं तर्हि? स्वार्थसिद्धिप्रयुक्ता। नान्तरीयकतत्संविधानादशेषत्वम्' इति। इत्थमदुष्टत्वात् परार्थत्वमेव शेषत्वलक्षणमिति व्यवस्थिते चिन्त्यते किमिदं परार्थत्वं नामेति?

पारार्थ्यलक्षणपरिष्कारः

अत्र पार्थसारथिमिश्राः 'परोद्देशप्रवृत्तिश्च पारार्थ्यमभिधीयत'[२] इत्यनेन परोद्देशप्रवृत्तिमशेषत्वमभिमतस्य पारार्थ्यमाहुः। सा च परोद्देशप्रवृत्तता यदि

१. मीमांसाशाबरभाष्यम्-३।१।२; २. शास्त्रदीपिकायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परोद्देशप्रवृत्तकृतिसमवायित्वमुच्येत तदाऽचेतनभूते यागादौ तदभावादव्याप्तिः। यदि परोद्देशप्रवृत्तकृतिसाध्यत्वं तदोत्पत्त्यन्वयिनि गुणे तत्सत्त्वेऽपि 'राजा राजसूयेन स्वाराज्यकामो यजेत, अमावास्यायामपराह्णे पितृपिण्डेन चरन्ति, प्राचीनप्रवणे वैश्वदेवेन यजेत, समे दर्शपूर्णमासाभ्यां यजेत' इत्यादिविहितेषु प्रयोगान्वयिगुणेषु कर्तृकालदेशादिषु तत्तत्क्रतुप्रयोगाङ्गेष्वव्याप्तिः। तादृशकृतिव्याप्यत्वेऽयमेव दोषः। अतः परोद्देशप्रवृत्ततेत्यस्य परोद्देशप्रवृत्तकृतिसम्बन्धित्वमित्यर्थः। तथा च फलोद्देशेन प्रवृत्तस्य पुरुषस्य कृतौ यागानुकूलायां यागादेः सम्बन्धित्वान्नाव्याप्तिः। कर्तुर्देशस्य कालस्य च प्रयोगान्वयिनो गुणस्यापि सम्बन्धित्वान्नाव्याप्तिः।

LIBRARY Gurukul Kangri Vishwavidyalaya HARDWAR

नन्वेवमव्याप्तिनिरासेऽपि निमित्तेऽतिव्याप्तिः स्यात्, तस्य नियतानुष्ठापकत्वेन तादृशकृतिसम्बन्धित्वादिति चेत्, न, तादृशकृतिसम्बन्धित्वमित्यस्य तादृशकृतिकारकत्वमिति विवक्षितोऽर्थः। निमित्तस्य कारकत्वाभावान्नातिव्याप्तिः। कर्तृदेशकालादौ तादृशकृतौ कर्तृत्वाधिकरणत्वादिकारकत्वान्नाव्याप्तिरपि। ननु तथापि कृष्यादावतिप्रसक्तिः, तस्यापि यागादिकृतौ कारकत्वादिति चेत्, न, भिन्नयदुद्देश्यकप्रवृत्तिकारकतासम्बन्धित्वे विधिबोध्यं यत् तत्तदङ्गमित्यर्थस्य विवक्षितत्वात्। कृष्यादेराक्षेपादेव लाभाद् विधिगम्यत्वाभावान्नातिव्याप्तिः। यागादेः स्वर्गादुद्देश्यकप्रवृत्तिकारकतासम्बन्धित्वेन विधिगम्यत्वाल्लक्षणसमन्वयः। फलस्य स्वाङ्गत्ववारणाय स्वभिन्नेति। द्रव्यगुणकर्तृकालादौ तादृशप्रवृत्तौ करणत्वाधिकरणत्वादिना सम्बन्धित्वेन विधेयत्वादङ्गत्वोपपत्तिः। निमित्तोद्देश्यकप्रवृत्तिसम्बन्धित्वेन यागादेः कर्मणो विधेयत्वेऽपि न निमित्ताङ्गत्वापत्तिः, ईप्सितत्वेन विलक्षणोद्देश्यताया एवात्र विवक्षितत्वात्, निमित्तस्य चानुष्ठापकत्वाख्योद्देश्यत्वेऽपि तादृशोद्देश्यत्वाभावान्न निमित्ताङ्गत्वम्।

एतदभिप्रायकमेव शेषत्वलक्षणं परिष्कृतं श्रीखण्डदेवाचार्यैः[1] 'यदुद्देशप्रवृत्तकृतिकारकत्वेन विहितं यत् तत्त्वं तदङ्गमिति। अत्र लक्षणसमन्वयः पूर्ववदेव। स्वर्गाद्युद्देशेन प्रवृत्तपुरुषकृतौ यागानुकूलायां यागादेः करणकारकत्वेन विहितत्वाद् यागे तथा प्रधानयागाद्युद्देशेन प्रवृत्तकृतौ प्रयाजादेरङ्गजातस्य कारकत्वेन विध्यन्वयात् तस्य प्रधानाङ्गत्वम्। एवं द्रव्यस्य व्रीह्यादेः क्रियानिर्वर्तकत्वेन गुणस्यारुण्यादेर्द्रव्यपरिच्छेदकत्वेन कारकत्वेन विधानात् करणत्वेनान्वयात् क्रमस्यापि पदार्थपरिच्छेदकत्वेन विधानात् शेषत्वाविघातः। एवं 'गोदोहनेन पशुकामस्य प्रणयेदि'त्यत्र गोदोहनस्य प्रणयनोपकारकत्वेऽपि पशूद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वात् प्रणयनोद्देशेन कृतौ कारकत्वेन

१. भाट्टदीपिकायां शेषलक्षणाधिकरणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधानाभावान्नातिव्याप्तिः; अपि तु 'चमसेनापः प्रणयेदि'त्यत्र क्रत्वर्थत्वेन विहितस्य चमसस्यानर्थक्यतदङ्गन्यायेन प्रणयनाङ्गत्वम्। दध्यानयनस्याप्येवमेव न वाजिनयागाङ्गत्वम्, तस्यामीक्षायागोद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वात्। प्रयाजानां चातिदेशेन पशुयागोद्देशकृतिकारकत्वेन विहितत्वेऽपि न पशुपुरोडाशाङ्गत्वम्, पदार्थांशेऽतिदेशस्य कल्पनाभावात् पशुपुरोडाशोद्देशप्रवृत्तकृतिकारकत्वेन विधानाभावात्। 'पुरोडाशकपालेन तुषानुपवपती'त्यत्र कपालस्य पुरोडाशयागप्रयुक्तत्वेऽपि तुषोद्वापोद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वादङ्गत्वाविघातस्तेन नाव्याप्तिः। यत्र चेदं लक्षणस्यासम्भवो यथा यागस्य भावनां प्रति भावनायाश्च फलं प्रति शब्दभावनाया अर्थभावानां[1] प्रति पश्वादेः कारकं प्रति कारकाणाञ्च क्रियां प्रति, तत्र शेषत्वस्य भाक्तत्वमेव, मुख्यशेषत्वाभावात्। यथोक्तं श्रीखण्डदेवेन 'तत्र भाक्तोऽङ्गत्वव्यवहारः' इति।

अत्र लक्षणे फलस्यापि कर्मतासम्बन्धेन कृतिकारकत्वात् फलाङ्गत्ववारणाय परोद्देशप्रवृत्तार्थकं यदुद्देशप्रवृत्तेति कृतौ विशेषणम्। फलस्य फलं प्रति परत्वाभावात् भोक्त्रङ्गत्वेऽपि न फलाङ्गत्वम्। शेषदलप्रयोजनं तु पूर्वमेवोक्तप्रायम्। अङ्गत्वमत्र सर्वं श्रुत्यादिषट्प्रमाणगम्यमेव। तदपि चोत्तरोत्तरप्रमाणानां पूर्वपूर्वप्रमाणकल्पनद्वारैव विनियोजकत्वमिति प्रतिपादितं बलाबलाधिकरणे। एवं सर्वत्र तावत् श्रुतिः कल्प्यते। तस्याश्च कारकत्वमात्रवाचित्वान्न सम्भवति पूर्वोक्तशेषत्वलक्षणस्य श्रुत्यादिप्रमाणगम्यता, तथापि स्वर्गादिपदाद् यत्पदार्थस्य संसर्गादुद्देश्यकत्वस्य आख्याताद् भावनापरपर्यायायाः कृतेस्तृतीयादेः कारकताया विधिपदाच्च विहितत्वस्य लाभाद् अन्यपदार्थानामङ्गत्वघटकीभूतानां प्रमाणान्तरप्रसिद्धत्वेऽपि शेषत्वघटकस्य कारकत्वस्य श्रुत्यादिगम्यत्वेन श्रुत्यादीनामङ्गत्वप्रामाण्यव्यवहारो भवति।

अथ निरूपिते शेषत्वलक्षणे लक्ष्यप्रदेशस्तस्य निरूप्यते। तत्र बादरिराचार्यः 'द्रव्यगुणसंस्कारेषु[2] बादरिरिति सूत्रानुरोधाद् व्रीह्यादिद्रव्येषु, 'आरुण्यादिगुणेषु, अवघातप्रोक्षणाद्यङ्गेष्वेव शेषत्वं स्वीकरोति, तदपि श्रुतिलिङ्गवाक्यत्रितयप्रमाणगम्यमेव। तन्मते यागस्य समानपदश्रुत्या भाव्यत्वमेव भावनायां न तु करणत्वं स्वर्गकामपदानां कर्तृप्रतिपादकत्वान्न फलप्रतिपादकत्वम्। एवं न कर्मफलपुरुषेषु शेषत्वं तेषां प्राधान्यात्।

---

१. यद्यपि प्राचीनैरंशतयोपेतार्थभावनाशब्दभावनया सम्बध्यते शब्दभावनैव मुख्यविशेष्येति प्रतिपादितं, तथापि नवीनैः शब्दभावनाया अर्थभावनायां सम्बन्धः स्वीक्रियते।

२. मीमांसासूत्रम्-३।१।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यजैमिनिस्तु कर्मफलपुरुषेष्वपि शेषत्वं स्वीकरोति 'कर्माण्यपि जैमिनिः फलार्थत्वात्,[१] फलञ्च पुरुषार्थत्वात्[२], पुरुषश्च कर्मार्थत्वात्[३]' इति वदन्। यागप्रयाजादीनां कर्मणां स्वर्गं यागोपकारं प्रति वा वाक्यप्रकरणादिना पारार्थ्यनिश्चयादेव शेषत्वम्। फलमपि भोक्तृपुरुषं प्रति शेषं भवति। अतः पारार्थ्यादेव तस्यापि लक्ष्यताऽस्त्येव। पुरुषस्य तु द्रव्यत्वादेव कर्तृत्वे लक्ष्यत्वं बादरिसम्मतमेव। सूत्रन्तु स्वर्गकामपदस्य फलपरत्वस्वीकारात् कर्तृपरत्वाभावादाख्याताक्षिप्तस्य तस्य शाब्दत्वाभावाद् 'नाशाब्दं शाब्देनान्वेती'ति न्यायात् शाब्दविध्यन्वयाभावात् पारार्थ्यं न सम्भवतीति शङ्कानिरासायैव। लक्षणया प्रतिपाद्यस्य कर्तुः शाब्दत्वोपपत्तेर्भवति शेषत्वस्योपपत्तिरिति शङ्कानिरासः। 'यजमानसम्मितौदुम्बरी भवती'ति औदुम्बरीसम्मानादिषु यजमानस्य कर्तुः साधनत्वेन विधानात् प्रत्यक्षमङ्गत्वम्।

तदयं निर्गलितोऽर्थः—पारार्थ्यमेव शेषत्वम्। तत्तु पूर्वोक्तप्रकारमेव। तत्र श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि पञ्चप्रमाणानि। विधिसहकृतानि तानि पारार्थ्यं गमयन्ति। विधिस्तावच्चेतनस्य प्रवर्तयिता। अनुद्दिष्टफले व्यापारे तस्य प्रवर्तकत्वानुपपत्तेरर्थात् तद्विषयस्य व्यापारस्य फलोद्देशप्रवृत्तिसम्बन्धित्वं निश्चीयते। विधिविषयो व्यापारो भावनापदाभिधेयः फलार्थत्वादेव तथैव पुरुषाभिलाषविषयो यथा फलम्। साधनविशिष्टस्यैव तादृशव्यापारस्य विधेयत्वाद् विशेषणतया साधनभूतानामपि श्रुतिलिङ्गादिभिस्तत्त्वेनावगतानां विधिविषयत्वानपायाद् भवति शेषत्वम्। एवं दर्शपौर्णमासादेरीप्सितत्वाभावेनोद्देश्यत्वाभावान्न प्रयाजादीनां दर्शपौर्णमासाङ्गत्वमित्याशङ्काव्युदासः। फलेच्छाया उपायेच्छाहेतुत्वेनोपायस्यापि भवत्येवोद्देश्यता। एवमेव 'कर्तुः समीहितं येन सिध्यत्यङ्गं तदुच्यते। प्रमाणञ्च विधिस्तत्र श्रुतिलिङ्गादिसंयुतः'[४] इति पार्थसारथ्युक्तस्य वैधेष्टसाधनत्वरूपस्य शेषत्वलक्षणस्य पूर्वोक्तलक्षण एव तात्पर्याद् नान्यत्वम्। षष्ठाद्यन्यायेन यागादिकर्मणां पुरुषार्थताव्यावर्तनेन स्वर्गादेरेव तत्त्वेन स्वीकाराद् बादरिमतनिराक्रिया। एतेन सिद्धान्तत्वेन जैमिनिमतमेव शेषत्वं पारार्थ्यलक्षणं निश्चीयते। अथवा यदा वृत्तिकारमतेन सूत्रचतुष्टयस्यान्यथा व्याख्यानं विधीयते, तदा बादरिमतस्य नैवास्ति पूर्वपक्षता। पारार्थ्यलक्षणशेषत्वस्य सामान्यात्मना

---

१. मीमांसासूत्रम्-३।१।४।
२. तदेव-३।१।५।
३. तदेव-३।१।६।
४. न्यायरत्नमालायाम्, अङ्गनिर्णये प्रथमपरिच्छेदे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादितस्यैवान्यैः सूत्रैः प्रपञ्चमात्रकरणात्। द्रव्यगुणसंस्कारेषु यागं प्रति शेषत्वमेव न शेषित्वम्, यागफलपुरुषेषु तूभयात्मकत्वमिति भाष्यवार्तिकयोः सुस्पष्टमेव। तदिह तृतीयेऽध्याये सामस्त्येन शेषत्वमेव श्रुत्यादिषट्प्रमाणसहकृतं तदुपयोगित्वेन च विषयव्यवस्थापनार्थं प्रमाणानां विरोधाविरोधौ प्राबल्यदौर्बल्ये चेति सकलं प्रतिपाद्यते। द्वितीये त्वध्याये सर्वेषामङ्गानां गुणप्रधानरूपद्वैविध्यप्रतिपादनावसरे प्रधानाख्यादुपकारकं कर्म प्रतिपाद्य 'यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत तस्य द्रव्यप्रधानत्वात्'[१] इति सूत्रेणावघातादीनां यद्व्रीह्यादिद्रव्यं प्रत्यङ्गत्वं प्रतिपादितं तत् तृतीयाध्यायसिद्धस्यैव शेषत्वस्य प्रसङ्गादपूर्वार्थताव्यावर्तनमात्रम्, तेन न पुनरुक्तिशङ्कावतारः। यदाहुर्वार्तिककारमिश्राः—

हन्त्यादावपि शेषत्वमेतस्मादेव लक्षणात्।
दृष्टार्थत्वादपूर्वं तु ततो नेति पुरोदितम्[२] ।। इति।

●

१. मीमांसादर्शने-२।१।५।
२. तन्त्रवार्तिके शेषत्वनिर्वचनाधिकरणे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राच्यभारतीयान्वेषणकथासन्देशः - ३

डॉ. जानकीप्रसादद्विवेदी
शब्दविद्यासङ्कायाध्यक्षः
केन्द्रीय-उच्चतिब्बतीशिक्षासंस्थानम्
सारनाथः, वाराणसी

❀ ❀ ❀

नाविदितमिदं विदितवेदितव्यानां यद् अन्वेषणं वेदमारभ्य महाकाव्यं यावत् संस्कृतवाङ्मये ब्रह्म-ब्राह्मण-आत्म-सत्य-आन्तरज्योतिः-नल-दमयन्ती-सीतादीनाम् अन्वेषणैः पल्लवितं पुष्पितं फलितं च सञ्जातम्। अनुसमाहरण-मार्गण-विचय-शोधनप्रभृतयः प्रायेण पञ्चविंशतिः शब्दाः सम्प्रयुक्ताः समुपलभ्यन्ते। परमद्यत्वे तेषु चत्वार एव शब्दा व्यवह्रियन्ते—अन्वेषणम्, अनुसन्धानम्, गवेषणा, शोधश्चेति। एतेषामन्वेषणार्थकशब्दानां सायण-गोविन्दराज-महेश्वरतीर्थ-नीलकण्ठादि-व्याख्याकारैर्बहवोऽर्थाः परिभाषिताः सन्ति। एवं प्रत्नकालादेवानुष्ठीयमानं प्राच्यभारतीयमनुसन्धानं नूनमेव किञ्चिद् वैचित्र्यं वैशिष्ट्यं चावहति।

मया विविधग्रन्थरत्नेभ्यः **शतद्वयान्वेषणकथानां** सन्दर्भाः सुचिरेण कालेन सङ्गृहीताः। एतद्विषयकः प्रथमः शोधलेखः सारस्वतीसुषमापत्रिकायाः सप्तचत्वारिंशवर्षस्य प्रथम-द्वितीयसंयुक्ताङ्कयोः ८८ पृष्ठतः १२४ पृष्ठपर्यन्तं (४७/१-२; पृ. ८८-१२४) प्रकाशितो द्रष्टव्यः। तत्राष्टोत्तरशतकथानां सार-सङ्क्षेपः सन्दर्भसहितः सङ्गृहीतः। तास्वन्वेषणशब्दाधारिता अष्टचत्वारिंशत् (४८), गवेषणाशब्दाधारिताश्चतस्रः (४), विचयाधारिताः सप्तविंशतिः (२७), मार्गण-परिमार्गण-मृगण-अनुसमाहरण-शोधन-अनुसन्धानशब्दाधिकृताश्च क्रमेण सप्त (७), तिस्रः (३), अष्टौ (८), एका (१), पञ्च (५), पञ्च (५) कथा वेदोपनिषद्वाल्मीकिरामायणप्रभृतिग्रन्थेभ्यः समुद्धृताः सन्ति।

द्वितीयः शोधलेखः सारस्वतीसुषमायाः पञ्चाशत्तमवर्षीय-तृतीय-चतुर्थाङ्कयोः २८८ तमपृष्ठादारभ्य ३१४ तमपृष्ठपर्यन्तं प्रकाशितः। तत्र सप्तविंशतिः कथाः समुपनिबद्धाः। तास्वन्वेषणशब्दनिर्दिष्टाः सप्त (७), विचयशब्दाधारिता अष्टौ (८), मार्गणशब्दमधिकृत्य षट् (६), मृगणशब्दाच्च-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्रः (४), परिमार्गणप्रतिमार्गणशब्दयोः प्रत्येकम् एकैककथा सम्प्रस्तुता। एताः सप्तविंशतिः कथाः केवलं वाल्मीकिरामायण-श्रीमद्भागवतग्रन्थाभ्यामेवोन्नीताः। एतासां योजनेन १०८+२७=१३५ संख्याकाः कथा भवन्ति।

तदीयांशस्यैव सम्पूर्तये उक्ताभ्यो भिन्नानामन्यासामपि शोधादिशब्द-निर्दिष्टानां **सप्तविंशतिकथानामिह** सङ्क्षेपेण परिचयः प्रस्तूयते। यत्रान्वेषणशब्दमधिकृत्य एकादश (११), विचयशब्दमधिकृत्य दश (१०) मृगणशब्देन तिस्रः (३), शोध-परिमार्गणविमृगणशब्दैः प्रत्येकमेकैका (१+१+१=३) कथा निबद्धास्ति। एतासामनुशीलनेन किन्तावद् वस्तु भवेदन्वेषणीयम्, तदीयप्राप्तिदेशः कथं चिन्त्यते, तत्रावलम्बनीयाः के के भवन्ति, कश्चार्थस्तत्र विशेषेण ग्राह्यो भवेदित्यादिकमवगन्तुं शक्यते। किञ्च प्राच्यभारतीयान्वेषणस्य विविधं क्षेत्रमपि परिज्ञातुं शक्यते।

[अन्वेषणम्-१२]

१. पुरुषेण प्रयत्नपूर्वकमान्तरज्योतिषोऽन्वेषणम् – दर्शनं सम्प्राप्तिश्च

मुक्तिकोपनिषदि शुकसनकादिभिरहर्निशं स्तूयमानं सीताभरतादिभिः परिवृतमयोध्याधिपतिं श्रीराममाञ्जनेयो मारुतिः पृच्छति—मुक्तिप्राप्त्यर्थमहं भवदीयं स्वरूपमनुजिज्ञासामि। श्रीरामेण स्वरूपकथनप्रसङ्गे वेदाः स्वकीयनिःश्वासरूपाः प्रोक्ताः। तत्र चतुर्णां वेदानां ११८० परिमिताः (२१+१०९+ १०००+५०) शाखाः परिगणिताः। प्रतिशाखं पूर्वमेकोपनिषद् आसीत्। वेदेषु वेदान्तस्तथैव सुप्रतिष्ठितो यथा तिलेषु तैलमभिव्याप्तम्। तेन वेदान्तेन, रामनामभजनेन, काश्यां तारकमन्त्रोपदेशेन, साङ्ख्ययोगेन, भक्तियोगेन च मुक्तिः सम्प्राप्यते। मुक्तिरपि चतुर्विधा निरूपिता। तत्र नामसङ्कीर्तनेन सालोक्यमुक्तिः काश्यां ब्रह्मनालस्थले तारकमन्त्रोपदेशेनावृत्तिरहिता मुक्तिरधिगम्यते। काश्यां क्वचिदपि मरणे महेश्वरो दक्षिणकर्णे तारकमन्त्रमुपदिशति। कैवल्यमुक्तेरधिगमाय माण्डूक्योपनिषद् प्रभवति। तदभावे दशोपनिषदः पठितव्याः। बलीयस्यां भावनायां सत्यां द्वात्रिंशत्संख्याकानामुपनिषदामभ्यासो विधेयः। अष्टोत्तरशतोपनिषदामभ्यासेन त्रिविधभावनाविनाशः, ज्ञानवैराग्यप्राप्तिश्च भवति। आसां सम्प्रदानं नैव यस्मै कस्मैचित् कर्तव्यम्, किञ्च भक्तियुक्ताय योग्यायैव शिष्यायोपनिषदां सम्प्रदानं श्रेयसे प्रभवति।

बुधैरेवमुच्यते यत् प्राणिनां मलिना वासना पुनर्जन्मकरी भवति, यतो हि तस्यां सुघनमज्ञानं घनोऽहङ्कारश्च वर्तते। तत्र मारुतिं सम्बोधयता श्रीरामेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषत उक्तं यद् विविधशास्त्रकथाभ्यासेन नैवाभिलषितं सम्पादयितुं शक्यते, अपि च वाञ्छितस्य सिद्धये प्रयत्नपूर्वकमान्तरं ज्योतिरन्वेष्टव्यम्, दर्शनीयं प्राप्तव्यं च—

बहुशास्त्रकथाकन्थारोमन्थेन वृथैव किम्? ।
अन्वेष्टव्यं प्रयत्नेन मारुते ज्योतिरान्तरम् ।। (मुक्तिकोपनिषत्-२/६३)

स्वरूपकथनान्ते रामो वदति—आन्तरज्योतिषः सम्प्राप्तये शब्दस्पर्शादि-रहितम्, अव्ययम्, नामगोत्रादिहीनं च यन्मम रूपम्, तदेव नित्यं भजनीयम्—

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् ।
अनामगोत्रं मम रूपमीदृशं भजस्व नित्यं पवनात्मजार्तिहन् ।।
(मुक्तिकोपनिषत्-२।७२)

२. ब्रह्मविद्यानुसरणं कुर्याद् ब्रह्मलोकपदान्वेषी = ब्रह्मलोकप्रापणोत्सुकः

अमृतनादोपनिषदि मेधाविनः कर्तव्योपदेशः कृतः, तदनुसारं सर्वप्रथमं शास्त्राध्ययनं विधेयम्, अध्ययनानन्तरं तदीयाभ्यासः परमावश्यको निर्दिष्टः। यः पुरुषो ब्रह्मलोकपदान्वेषी = ब्रह्मलोकपदं वाञ्छति, स प्रणवम् = ओङ्कारं रथं कुर्यात्, तस्य सारथिकार्याय विष्णुं नियोजयेत, तस्मिन् रथे स्वयम् आरोहणं विधाय रुद्रमाराधयेत्—

ओङ्कारं रथमारुह्य विष्णुं कृत्वाऽथ सारथिम्।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ।।
(अमृतनादोपनिषद्, श्लोकः २)

उक्तकार्यस्य सिद्ध्यर्थं षडङ्गो योग आश्रयणीयो भवति। तत्र षडङ्गानि वर्तन्ते—१. प्रत्याहारः, २. ध्यानम्, ३. प्राणायामः, ४. धारणा, ५. तर्कः, ६. समाधिश्च।

प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा ।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ।। (श्लोकः ६)

प्राणायामेन दोषाः, धारणया किल्बिषाः, प्रत्याहारेण संसर्गः, ध्यानेन च ऐश्वर्यगुणरूपोऽहङ्कारो विनश्यति। यया आत्मा धार्यते सा धारणा, शास्त्रसम्मतमूहनं च तर्कपदेनाभिधीयते। समाधिः स भवति यत्रोपलब्धं वस्तु लौकिकमलौकिकं च नितरामवमन्यते। योगप्रक्रियायाः सुचारुसञ्चालनाय विविधानि योगासनानि निर्दिष्टानि। यो हि योगसिद्धिं वाञ्छति, स

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भयक्रोधालस्यानाहारात्याहारादिकमवश्यं परित्यजेत्। यदि योगी निर्दिष्ट-विधिना योगाभ्यासनिरतो भवति, तर्हि स निःसंशयं मासत्रितये ज्ञान-सम्पन्नो भवति, तदनन्तरं देवदर्शनं करोति। षष्ठे मासि स कैवल्यमपि सम्प्राप्तुं शक्नोति।

देहे जीवनीं शक्तिं सञ्चारयितुं ये पञ्च वायवो वर्तन्ते, तत्र प्राणो रक्तवर्णमणिसदृशः, अपान इन्द्रगोपसमप्रभः, समानः गोक्षीरधवलप्रभः, उदानोऽपाण्डुरः, व्यानश्चार्चिःसमप्रभो मन्यते। यस्य मारुतो मण्डलं भित्त्वा मूर्धानं प्रविशति, स कुत्रापि मरणं प्राप्नुयात्, परं स ब्रह्मलोकपदान्वेषी भूयो नैवाभिजायते।

३. दक्षपुत्रैः शबलाश्वैरग्रजानां पदव्या अन्वेषणम् = अनुसरणम्

प्राजापतिर्दक्षः पञ्चजनपुत्र्यामसिक्न्यां भार्यायां हर्यश्वनामकान् दशसहस्रपुत्रान् प्राप्तवान्। सन्तानोत्पादनार्थं ते तपश्चर्यामनुष्ठातुं सिन्धु-समुद्रसङ्गमस्थिते नारायणसरस्तीर्थे गतवन्तः। तत्र स्नानेन तदीयमन्तःकरणं विमलमभूत्, तेषां बुद्धिर्भागवतधर्मपरायणा सञ्जाता। एवं यदा ते प्रजावृद्धिप्रयोजनेनोग्रतपश्चर्यायां तत्परा आसंस्तदानीं तत्रोपस्थाय देवर्षिर्नारदस्तान-भाषत यद् यूयं सर्वे प्रजापतेः पुत्राः सन्तोऽपि वस्तुतो मूर्खा एव प्रतिभाथ, यतो हि युष्माभिरद्यावधि नैव दृष्टो भूमेरन्तः, अस्यामवस्थायां कथङ्कारं सन्तानोत्पादः कर्तुं शक्यते? यावत्पर्यन्तं सर्वज्ञस्य पितुरादेशस्यौचित्यं परिज्ञातं न भवेत्, तावत्पर्यन्तं तदीयादेशानुसारं सृष्टिः समीचीना कथं स्यात्?

देवर्षिनारदस्य गूढवचनानीमान्याकर्ण्य जन्मत एव परमबुद्धिमन्तस्ते हर्यश्वा विचारतत्परा बभूवुर्यद् वस्तुतः सर्वसम्मतस्य देवर्षिनारदस्योपदेशः सत्यनिष्ठ एव। अनादिबन्धनस्य यो हि अन्तो विनाशस्तद्दर्शनमन्तरेण मोक्षानुपयोगिकर्मसु प्रवर्तनेन को लाभः? अन्तर्ज्योतिःस्वरूपपरमात्मनो ज्ञानमृते विनाशशीलस्वर्गादि-फलप्रदायकानां कर्मणामनुष्ठानेन को लाभः? एवं नारदं परिक्रम्य ते मोक्षमार्गस्य यात्रिणोऽभूवन्—

इति व्यवसिता राजन्! हर्यश्वा एकचेतसः ।
प्रययुस्तं परिक्रम्य पन्थानमनिवर्तनम् ।।

(श्रीमद्भागवतम्-६।५।२१)

अनेन वृत्तेन दक्षः शोकाकुलो जातः। ब्रह्मणा परितोषितः स भार्यायामसिक्न्यामेकसहस्रपुत्रान् पुनरुत्पादयामास। ते शबलाश्वा नारायणसरस्तीर्थमुपगम्य तत्र स्नात्वा शुद्धान्तःकरणा बभूवुः, मन्त्राभ्यासं कुर्वन्तो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्त्राधिपतिमाराधयामासुश्च। नारदः पुनरुपेत्य तान् वाचः कूटानि प्राह। यदि भवन्तः सर्वे भ्रातृवत्सलाः सन्ति तर्हि नूनं भवद्भिरपि स एव मार्गोऽन्वेषणीयः = अनुसरणीयः, यः पूर्वम् अग्रजैरङ्गीकृतः—

दाक्षायणाः! संशृणुत गदतो निगमं मम ।
अन्विच्छतानुपदवीं भ्रातृणां भ्रातृवत्सलाः ।।

(श्रीमद्भागवतम्-६।५।३०)

एवं नारदोपदेशेन तेऽपि मोक्षपथानुयायिनोऽभूवन्।

४. हिरण्यकशिपुना विष्णुप्राप्तये जगदन्विष्टम् = दृष्टम्

नर्मदानद्या उत्तरभागे प्रतिष्ठिते भृगुकच्छसंज्ञके स्थाने भृगुवंशीयैर्बलेः क्रतूत्तमोऽनुष्ठितः। तत्र भगवान् वामनो देवानां हिताय उपस्थितः। दैत्यराजेन बलिना स्वागतवचोभिरभिनन्दितः स विधिवत् प्रपूजितः। अर्चनानन्तरं बलिराह यद् भवदागमनेनाद्य मे पितरस्तृप्ताः, अद्य मे कुलं पावितम्, पापानि च विनष्टानि। ब्राह्मणकुमार! एवं प्रतीयते यद् भवान् किञ्चिद् वाञ्छति। हे अर्हत्तम वटो! यदि काञ्चनम्, गाम्, मृष्टं धाम, कन्याम्, समृद्धान् ग्रामान्, तुरगान्, गजान्, रथान् वा वाञ्छसि, तर्हि तत् सर्वं वक्तव्यम्, मया तत् सर्वं दातुं शक्यते। बलेरिदं वचनं निशम्य परमां प्रीतिमुपगतो भगवांस्तदीयां वाचमभिनन्दितवान्। अब्रवीत् सः—भवदीयमेतद् वचो धर्मयुतं यशस्करं कुलोचितं च प्रतिभाति। अत्र कारणं यद् भवान् भृगुपुत्रं शुक्राचार्यं प्रमाणं मन्यते। भवदीयवंशपरम्परायां धैर्यहीनः कृपणः प्रत्याख्याता अदाता वा नैव कोऽपि समुत्पन्नः। भवत्पूर्वजः प्रह्लादोऽमलेन यशसाऽद्यापि तथैव समुद्भाति, यथा खे चन्द्रः समुद्भासते। यस्मिन् कुले जातो हिरण्याक्ष एक एवेमां महीं चरन् स्वसदृशं वीरं नाविन्दत। पृथिव्या उद्धारसमये समक्षमागतः स विष्णुना कृच्छ्रेण विनिर्जितः। तद्वधं निशम्य क्रुद्धो हिरण्यकशिपुर्विष्णोर्निलयं जगाम। तदानीं मायाविनां वरः कालज्ञो विष्णुः सूक्ष्मदेहः संस्तदीयहृदये प्रविवेश। हिरण्यकशिपुः सर्वत्र विष्णुं विचितवान्, परं स वीरो नैव तं ददर्श। सर्वमेव जगत् तेनान्विष्टम् = दृष्टम्, तस्याप्राप्तौ स इदं मनुते यद् भ्रातृहा विष्णुस्तत्र गतः, यतः पुमान् नावर्तत इत्यादि—

क्ष्मां द्यां दिशः खं विवरान् समुद्रान्
विष्णुं विचिन्वन् न ददर्श वीरः ।।

अपश्यन्निति होवाच मयान्विष्टमिदं जगत् ।
भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् ।।

(श्रीमद्भागवतम्-८।१९।११-१२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्ते वामनेन स्वपादसम्मिता पदत्रयपरिमिता मही बलिसकाशात् प्रार्थिता।

५. कोऽपि द्रोहं नाचरेद् आत्मनः क्षेममन्विच्छन् = कामयमानः

मोक्षदायिनीषु सप्तसु पुरीष्वन्यतमा वर्तते मथुरा, अत्र कृष्णः सर्वदैव विराजते—'मथुरा भगवान् यत्र नित्यं सन्निहितो हरिः' (श्रीमद्भागवतम्-१०।१।२८)। तस्यामेकदा शौरिर्वसुदेवः कृतोद्वहः सन् नवभार्यया देवक्या सह रथमारुह्य स्वभवनाय प्रस्थानमकरोत्। तदानीमुग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया हयानां रश्मीन् जग्राह। तस्मिन् प्रयाणप्रक्रमे वरवध्वोः सुमङ्गलाय शङ्खतूर्यमृदङ्गदुन्दुभीनां युगपदेव वादनं प्रवृत्तम्। यदा कंसो मार्गेऽग्रेसरति, तदा अशरीरिणी वागाह—हे मूर्ख कंस! यां स्वसारं त्वं वात्सल्येन वहसि, इयं तव श्रेयसे नालम्, यतो हि अस्या अष्टमगर्भाद् यः पुत्रः समुद्भविष्यति स एव त्वदीयमृत्युकारणं स्यादिति—

पथि प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् ।
अस्यास्त्वामष्टमो गर्भो हन्ता या वहसेऽबुध! ।।

(श्रीमद्भागवतम्-१०।१।३४)

इदमाकर्ण्य कंसः खड्गमादाय भगिनीं हन्तुमद्यतः। तथाविधं नृशंसं तं परिसान्त्वयन् महाभागो वसुदेव आह—हे वीर! मृत्युर्देहेन सहैव जायते, स प्राणिनां ध्रुव एवास्ते। कस्यचिदद्य स्यात् कस्यचिच्च शतवर्षानन्तरं स्याद् इदमेवान्तरं दृश्यते। तस्माद् यदि त्वं मृत्युभयेन भगिनीं हन्तुमिच्छसि, तत् त्वदीयं कार्यं नैवास्ति श्रेयस्करम्। वस्तुतः सर्वमेवेदं जगदनित्यमिति जानन् मेधावी विचारपूर्वकं श्रेयस्करमेव कर्म समारभेत्। यः कश्चिदात्मनः क्षेममन्विच्छति = कामयते तस्येदं कर्तव्यं यत् स केनापि सह द्रोहं नाचरेत्, यतो हि यः परेण द्रुह्यति, तस्य ततो भयमपि भवति—

तस्मान्न कस्यचिद् द्रोहमाचरेत् स तथाविधः ।
आत्मनः क्षेममन्विच्छन् द्रोग्धुर्वै परतो भयम् ।।

(श्रीमद्भागवतम्-१०।१।४४)

६. भीमसात्यकिभ्यां सेनायां प्रवेशः पार्थस्यान्वेषणार्थम् = परिज्ञानार्थम्

द्रोणपर्वणः कथावर्णनप्रसङ्गे उच्यते यद् भीष्मानन्तरमाचार्यद्रोणः सेनापतिपदेऽभिषिक्तः, तदा स युधिष्ठिरग्रहणस्य प्रतिज्ञामकरोत्। कार्यस्यास्य सफलतायै अर्जुनस्ततोऽन्यत्र नीतः। अस्मिन् पर्वणि शूरवीराणामधिकांशतो वधः सञ्जातः, यथा—भगदत्तस्य, अभिमन्योः, जयद्रथस्य, अन्येषां चापि बहूनां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीराणाम्। अभिमन्योर्वधानन्तरमर्जुनो जयद्रथवधं प्रतिज्ञातवान्। इदमपि च तेनोक्तमासीद् यदहं श्वः सायं यावज्जयद्रथमवश्यं वधिष्यामि, अन्यथाऽग्नौ प्रविश्य देहदाहं करिष्यामि। एवं मन्यते तस्मिन् दिवसे यो हि सेनाव्यूहः सेनापतिना द्रोणेन कल्पितस्तत्र केवलमर्जुन एव प्रविवेश नान्यः कश्चित्। दिवसस्याधिकांशभागो व्यतीतः, परमर्जुनस्य प्रतिज्ञानिर्वाहविषये युधिष्ठिरो नैव कामपि प्रवृत्तिं प्राप्तवान्। तदानीं चिन्तितेन तेन भीमः सात्यकिश्चाज्ञप्तौ युद्धस्थल्यामुपस्थायार्जुनस्य प्रवृत्तिं परिज्ञातुम्। तौ महावीरौ दुर्योधनस्य तस्यां सेनायां सम्प्रविष्टौ या सुरैरपि अगम्या आसीत्। सेनायां प्रवेशस्य प्रयोजनमासीत्—पार्थस्यान्वेषणम् = परिज्ञानम्—

यत्र भीमो महाबाहुः सात्यकिश्च महारथः ।।
अन्वेषणार्थं पार्थस्य युधिष्ठिरनृपाज्ञया ।
प्रविष्टौ भारतीं सेनामप्रधृष्यां सुरैरपि ।।

(महाभारतम्, आदिपर्व-२/२५९-६०)

ततस्तावर्जुनं प्राप्तवन्तौ। दिवसस्यावसानवेलायामर्जुनेन जयद्रथो निहितः। द्रोणपर्वणि १७० मिता अध्यायाः ८९०९ परिमिताः श्लोकाश्च सङ्गृहीताः सन्ति।

७. दक्षदुहिता स्वाहा अग्नेश्छिद्रमन्वैच्छत् = ज्ञातुमैच्छत्

प्रजापतेर्द्वे कन्यके आस्ताम्—दैत्यसेना देवसेना चेति। दैत्यसेनाया अनुरागः केशीनामके दानवे आसीत्, तेन स तां हृतवान्, परं देवसेना नैव तं दानवं कामयते, तथापि केशी अकामां तां हर्तुं वाञ्छति स्म। एकदा यदा मानसपर्वते केशी देवसेनां बलान्नेतुं कामयते, तदानीं तत्रेन्द्र उपस्थाय तथा कर्तुं वारयामास। तेन सहेन्द्रस्य युद्धं प्रवृत्तम्। गदाहीनो दानवः शिलाप्रहारमकरोत्, परमिन्द्रो वज्रेण तां चूर्णयामास। एवमस्त्रहीनो भीतः स दानवस्ततो देवसेनां विहाय पलायितो जातः। इन्द्रेण पृष्टा देवसेना स्वकीयं परिचयं ददौ। इन्द्रस्तां नीत्वा पूर्वं प्रजापतिसकाशं जगाम, ततो वसिष्ठादिमहर्षिसमीपमुपस्थितोऽभूत्।

एकदा अग्निदेवः सप्तर्षिपत्नीनां सौन्दर्येण विमोहितः सन् कामसन्तप्तो बभूव, परं तासां सकाशान्निराशो भूत्वा स वनं जगाम। दक्षदुहिता स्वाहा अग्निदेवं पूर्वमेव कामयते स्म, परमवसरं नैव लेभे अप्रमत्तेनाग्निदेवेन सह समागमस्य। कामसन्तापवशाद् वने प्रविष्टमग्निदेवं विज्ञाय स्वाहा तत्रोपस्थाय सप्तर्षिपत्नीरूपमवधार्याग्निदेवेन सह समागमं कृतवती। कार्येऽस्मिन् सा सफलतामधिजगाम, यतो हि सा चिरात् तस्य छिद्रमन्वैच्छत् = ज्ञातुमैच्छत्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वाहा तं दक्षदुहिता प्रथमं कामयते तदा ।
सा तस्य छिद्रमन्वैच्छच्चिरात् प्रभृति भाविनी ।।
(महाभारतम्, वनपर्व-२२४/३९)

समागमानन्तरं गरुडीरूपेण सा हस्ते वीर्यमवधार्य श्वेतपर्वतं जगाम। तस्मिन् दुर्गमे शैलशिखरे विरचिते सुवर्णमये कुण्डे सा वीर्यं शीघ्रतया चिक्षेप। ततः स्कन्दस्य स्वामिकार्त्तिकेयस्य प्रादुर्भावः सञ्जातः। इन्द्रस्तं देवसेनापति-पदेऽभिषिक्तवान्, प्रजापतिकन्यां देवसेनां च तस्मै समर्पयामास।

८. दुर्योधनस्य गुप्तचरैः परमप्रयत्नः कृतः पाण्डवानामन्वेषणे = परिज्ञाने

द्यूतक्रीडायां पराजयेन पाण्डवाः प्रतिज्ञानुसारं वनं गताः। द्वैतकाम्यकादि-वनेषु द्वादशवर्षाणि यापितवन्तस्ते, तत एकवर्षपर्यन्तमज्ञातवासाय ते विराटनगरं गतवन्तः। तत्र यथास्थानं नियुक्तास्ते दुर्योधनादिभिर्नैव परिज्ञाताः। कर्णदुःशासनादिसम्मत्या तेषामन्वेषणाय गुप्तचराः प्रहिताः, ते परं प्रयत्न-मास्थायापि पाण्डवान् परिज्ञातुं नैव प्राभवन्। महाभारतस्य विराटपर्वणि अध्यायचतुष्टये पाण्डवान्वेषणविषयो वर्णितः। प्रसङ्गेऽस्मिन्नन्वेषणार्थे अन्वेषणा-तिरिक्ता मार्गण-मृगण-परिमार्गणशब्दा अपि बहुशः सम्प्रयुक्ताः सन्ति। क्रमेण तदीयं वृत्तमेवमवगन्तव्यम्—

दुर्योधनेन नियुक्ता बहिश्चरा दूताः पाण्डवानां परिज्ञानाय बहून् ग्रामान्, राष्ट्राणि, नगराणि च गतवन्तः, परं नैव किमपि वृत्तं सम्प्राप्तम्, केवलं कीचकवधस्तैः श्रुतः। प्रत्यागत्य ते उक्तवन्तो दुर्योधनम्, यन्नरेन्द्र! बहुशोऽन्विष्टानामपि पाण्डवानां नैव किमपि वृत्तमस्माभिरुपलब्धम्। इन्द्रसेनादयो ये पाण्डवानां सारथय आसंस्ते पाण्डवैर्विहीना एव द्वारकामुपस्थितवन्तः, एतेन वयं सम्भावयामहे यत् पाण्डवाः पूर्णतो विनाशं सम्प्राप्ताः। भूयस्तत्रास्माकं किं विधेयमित्येतदर्थं भवदाज्ञां प्रतीक्षामहे—

नरेन्द्र! बहुशोऽन्विष्टा नैव विद्मश्च पाण्डवान् ।
अत्यन्तं वा विनष्टास्ते भद्रं तुभ्यं नरर्षभ! ।।
किञ्चित्काले मनुष्येन्द्र! सूतानामनुगा वयम् ।
मृगयित्वा यथान्यायं वेदितार्थाः स्म तत्त्वतः ।।
अन्वेषणे पाण्डवानां भूयः किं करवामहे ।
इमां च नः प्रियां वीर! वाचं भद्रवतीं शृणु ।।
(महाभारतम्-४/२५/१३,१५,१९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्णदुःशासनयोस्तत्रेयं सम्मतिरासीद् यत् सुनिपुणैस्तत्परैर्निपुण-संवृतैश्चारिभिश्छन्नवासिनः पाण्डवा अवश्यमन्वेष्टव्याः। आचार्यद्रोणेनोक्तम्—पाण्डवाः कथमपि विनष्टा नैव स्युः, केवलं तेऽनुकूलं समयं प्रतीक्षन्ते। तेषां प्राप्तिः परिचयश्च दुष्करः। द्रोणसम्मतिं समर्थयमानो भीष्मः प्राह—सत्यवादिनो युधिष्ठिरस्य विनाशो नैव सम्भाव्यते, यतो हि भरतनन्दन! यः सर्वथा उत्तमनीतिसम्पन्नस्तस्य नीतिः परैः कथमप्यन्वेषितुम् = परिज्ञातुं नैव शक्यते—

तत्र बुद्धिं प्रवक्ष्यामि पाण्डवान् प्रति भारत ।
न तु नीतिः सुनीतस्य शक्यतेऽन्वेषितुं परैः ।।

(महाभारतम्-४।२८।९)

कृपाचार्यो वदति—भीष्मेण युधिष्ठिरनिवासस्य ये गुणाः प्रकीर्तिताः, ते सर्वे रमणीये विराटनगरे एव सम्भाव्यन्ते। अतस्तस्य नगरस्य यात्रा विधेया इत्यादि।

९. वृद्धिमभीप्सता राज्ञा सुपुरुषा अन्वेष्टव्याः = परीक्ष्य प्राप्तव्याः

शरशय्यायां विराजमानं भीष्मं प्रति युधिष्ठिरः पृच्छति—हे भरतश्रेष्ठ! यत्र राज्ञः श्रेष्ठकुलोत्पन्नाः सहायका न सन्ति, तत्र नीचकुलोत्पन्नान् अपि सहायकान् स नियोक्तुं प्रभवति न वेति। प्रसङ्गेऽस्मिन् जितेन्द्रियस्य महर्षेः शुनश्च कथां श्रावयामास। तदनुसारं कस्मिंश्चिद् वने निवसतो महर्षेः सद्भावाद् वनस्य सर्वे पशवस्तस्य समीपमायान्ति स्म, कुशलवृत्तं पृष्ट्वा पुनः प्रत्याजग्मुः; परमेको ग्रामीणः श्वा कदापि नैव मुनिं विहाय गतः। रक्तभोजिनं शार्दूलमवलोक्य कदाचित् स भीतो बभूव, भीतं तं दृष्ट्वा मुनिः श्वानं शार्दूलं चकार। एवमेव द्वीपिना भीतं द्वीपिनम्, मदोन्मत्तेन हस्तिना भीतं हस्तिनम्, सिंहेन शरभेण च भीतं क्रमेण सिंहं शरभं च कृतवान्। शरभः स तस्मिन् वने निष्कण्टकविहाराय मुनिं हन्तुमियेष। शरभस्य दुर्भावं विज्ञाय मुनिस्तं पुनः श्वानं भवितुं शप्तवान्, हुङ्कारेण तमाश्रमान्निष्काशितवांश्च—

यस्मादेवमपापं मां पाप! हिंसितुमच्छिसि ।
तस्मात् स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि ।।

(महाभारतम्, शान्ति. ११७/२२)

युधिष्ठिर! अनेनोदाहरणेन राज्ञ इदं परमं कर्तव्यं प्रतिभाति यत् स प्रथमं सेवकानां शुद्धस्वभावादिकं परीक्षेत सर्वात्मना, तदनन्तरमेव तान् यथोचितकार्येषु नियोजयेत, अपरीक्ष्य कदापि मन्त्रिणं न कुर्यात्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नापरीक्ष्य महीपालः सचिवं कर्तुमर्हति ।
अकुलीननराकीर्णो न राजा सुखमेधते ।।
(महाभारतम्, शान्ति. ११८/४)

अकुलीनाः पुरुषा राज्ञा एकदापि स्वकीयां निन्दामाकर्ण्य तस्य शत्रवो भवन्ति। एतस्मादयमेव निष्कर्षः समायाति यद् वृद्धिमभीप्सता राज्ञा प्रयत्नेन कृतज्ञाः, धर्मशास्त्रसमायुक्ताः, राज्यधारणाः, कुलीनाः, सुपुरुषा अवश्यम् अन्वेष्टव्याः = परीक्ष्य प्राप्तव्याः सङ्ग्राह्याश्च—

अन्वेष्टव्याः सुपुरुषाः सहाया राज्यधारणाः ।
न विमानयितव्याश्च राज्ञा वृद्धिमभीप्सता ।।
(महाभारतम्, शान्ति. ११८/२४)

१०. शुकदेवः पितरं व्यासं सन्देहं कमपि पप्रच्छ नैष्ठिकं कर्म अन्विच्छन् = ज्ञातुमिच्छन्

युधिष्ठिरो भीष्मं पृच्छति—हे कौरव! इदानीमहं सर्वेषां प्राणिनां सृष्टिम्, प्रलयम्, आयुष्यम्, कर्म, लोकतत्त्वादिकं च वेदितुमिच्छामि। तेषां विषये तथ्यं भवता वक्तव्यम्। अस्मिन् विषये भीष्मो वदति यदहं पुरातनमितिहासमुपस्थापयंस्तदेव वक्ष्यामि यत् स्वपुत्रं शुकदेवं प्रति व्यास उक्तवान्—

अत्र ते वर्तयिष्येऽहमितिहासं पुरातनम्।
जगौ यद् भगवान् व्यासः पुत्राय परिपृच्छते ।।
(महाभारतम्, शान्ति. २२४/६)

वेदानाम्, षडङ्गानाम्, उपनिषदां चाध्ययनानन्तरं व्यासपुत्रः श्रीपरमहंसपदवीको नैष्ठिकं कर्म अन्विच्छन् = ज्ञातुमिच्छन् पितरं व्यासं परिपप्रच्छ—

अधीत्य वेदानखिलान् साङ्गोपनिषदस्तथा ।
अन्विच्छन्नैष्ठिकं कर्म धर्मनैपुण्यदर्शनात् ।।
(महाभारतम्, शान्ति. २२४/७)

प्राधान्येनैते प्रश्नाः शुकदेवपृष्टाः समक्षमायान्ति—भूतग्रामस्य कर्ता कः? ब्राह्मणस्य कृत्यं किम्? कालस्य मानं किम्? कालज्ञानविषये निश्चयः कः? इत्यादि। सर्वेषामेतेषां प्रश्नानां समाधानाय व्यासो ब्रवीति यत् कृतयुगे पुरुषाश्चतुर्वर्षशतायुषो भवन्ति, त्रेतायां द्वापरे कलौ चैषामायुः पादशो ह्रसति। प्रतियुगमन्ये एव धर्माः समाद्रियन्ते युगह्रासानुरूपतः। कृतयुगे तप एव परमो धर्मः, त्रेतायां ज्ञानम्, द्वापरे यज्ञः, दानं च कलियुगे मन्यते—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तपः परं कृतयुगे त्रेतायां ज्ञानमुत्तमम् ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ।। (महाभारतम्, शान्ति., २२४/२८)

११. हे धनञ्जय! त्वं बुद्धौ शरणमन्विच्छ = प्रार्थयस्व

निर्वेदमापन्नो मध्यमः पाण्डवोऽर्जुनः शोकसंविग्नमानसो भूत्वा युद्धनिश्चयं परित्यक्तवान्। तदा तदीयः सखा श्रीकृष्णस्तस्मै साङ्ख्यज्ञानमुपदिशन् वदति— हे अर्जुन! क्लैब्यं मा गमः, अपि च हृदयदौर्बल्यं विहाय युद्धार्थमुद्यतो भव। यतो हि पण्डिता गतासून् अगतासूंश्च प्राणिनो नानुशोचन्ति। यथाऽस्मिन् देहे देहिनः कौमारं यौवनं जरावस्था च प्रवर्तते, तथा देहान्तरप्राप्तिरपि तस्य सुनिश्चितैव। एतेन सर्वे एते देहा अन्तवन्त एव, परमात्मा नित्यः स्थाणुरचलः सनातनश्चास्ते, तस्मादयमच्छेद्योऽदाह्यश्च मन्तव्यः। यस्मिन् कस्मिन्नपि देहे देही जीवोऽवध्यो भवति, एतेन सर्वेषां प्राणिनां कृते त्वं शोचितुं नार्हसि। त्वादृशस्य क्षत्रियस्य कृते धर्म्याद् युद्धादन्यत् किञ्चिदपि श्रेयस्करं कर्म नैवास्ति। ईदृशं युद्धं भाग्यवन्त एव क्षत्रिया लभन्ते। तस्मात् त्वं युद्धाय कृतनिश्चयो भव। युद्धे परेण हतस्त्वं स्वर्गं प्राप्स्यसि, विजयं प्राप्तः सन् महीं भोक्ष्यसे। बुद्धिरियं नैव केवलं ज्ञानयोगाय श्रेयस्करी, अपि च कर्मयोगायापि श्रेयस्करी भवति। अत्र निश्चयात्मिका बुद्धिरेकैव मन्यते। विवेकहीनानां जनानामनन्ता बहुशाखाश्च बुद्धयो भवन्ति। एतादृशां भोगैश्वर्यासक्तानां पुरुषाणामात्मविषये निश्चयात्मिका बुद्धिर्नावलोक्यते। समत्वयोगस्य सम्प्राप्तये आसक्तिर्हेया सिद्ध्यसिद्ध्योः समभावश्चास्थेयः। बुद्धियोगापेक्षया सकामकर्मणो हीनतैवाङ्गीक्रियते। फलमुद्दिश्य ये कर्मणि प्रवर्तन्ते ते निश्चयेन कृपणा एवावगन्तव्याः, तस्माद् बुद्धौ शरणमन्विच्छ = योगविषयायां बुद्धौ तत्परिपाकजायां वा साङ्ख्यबुद्धौ शरणमाश्रयमभयप्राप्तिकारणं प्रार्थयस्व, परमार्थज्ञानशरणो भवेत्यर्थः—

दूरेण ह्यवरं कर्म बुद्धियोगाद् धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ।।
(श्रीमद्भगवद्गीता-२/४९)

१२. अर्जुनः प्रभासक्षेत्रे रामस्य कृष्णस्य च शरीरे दाहयामास अन्विष्य = सम्प्राप्य पृथक्कृत्य वा

महाभारतयुद्धे पृथ्वीभारभूतानां दुरात्मनां वीराणां विनाशानन्तरं वासुदेवेन भगवता चिन्तितं यदिदानीं मद्वंशीयाः शूरा अवशिष्टाः सन्ति। यद्येषां विनाशो न भवेत् तर्हि भूरियं भारमुक्ता न स्यात्। मयि स्थिते सति एतान् वीरान् हन्तुं कोऽपि नैव प्रभवेत्। तदानीं दुर्वासःप्रभृतयो बहवो महर्षयः समागता द्वारकायाम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्बादिराजकुमाराणामपराधेन महर्षिभिः शापोऽयं विसृष्टो यत् कृत्रिमनवयुवत्या उदरान्मुसलः प्रादुर्भविष्यति, येन सर्वस्यैव यदुवंशस्य विनाशः स्यादिति। तदनुसारं यदाऽपशकुनजन्यदुष्फलविनाशाय वृष्णिवंशीया वीरा प्रभासक्षेत्रे एकत्रिता बभूवुः, समुद्रे च स्नानसमये परस्परं कलहायमानास्ते विनष्टा अभूवन्। वृष्णिवंशं विनष्टं वीक्ष्य शेषावतारः कृष्णाग्रजो रामोऽपि योगबलेन प्राणांस्तत्याज। कृष्णोऽपि विमानमारुह्य परमधाम जगाम। परमधामगमनकाले सारथिं दारुकमुद्दिश्य कृष्णेनोक्तमासीद् यन्मया विहीनः समुद्रो द्वारकां प्लावयिष्यति, अतोऽर्जुनोऽवशिष्टान् वृष्णिवंशीयाञ्जनान् हस्तिनापुरं नयेत्। दारुकेण सन्दिष्टः पार्थस्तथैवाकरोत्। तत्र पूर्वं प्रभासक्षेत्रे कृष्णस्य बलभद्रस्य च शरीरे अन्विष्टे, अन्विष्य = सम्प्राप्य पृथक्कृत्य वा ते आप्तकारिभिः पुरुषैर्दाहकर्माकारयत्—

ततः शरीरे रामस्य वासुदेवस्य चोभयोः ।
अन्विष्य दाहयामास पुरुषैराप्तकारिभिः ।।

(महाभारतम्-१६/८/३१)

तदनन्तरमवशिष्टाञ्जनान् नीत्वा हस्तिनापुरमगच्छत्।

[विचयः-१०]

१. सलक्ष्मणो रामश्छत्रचापरथादिकमपश्यत् सकलं वनं विचिन्वन् = विशेषतो निरीक्षमाणः

सीताहरणवृत्तं वाल्मीकीयरामायणे विस्तरेणोपनिबद्धम्। संक्षेपेण महाभारतादावपि दृश्यते। अध्यात्मरामायणेऽपि वृत्तमिदमुपलभ्यते। तदनुसारं रावणस्य सीताहरणयोजनां विज्ञाय श्रीरामो रहसि सीतामाह यद् भद्रे! रावणो भिक्षुरूपेण त्वत्समीपमागमिष्यति, तस्मात् त्वयोटजे स्वाकारां छायां स्थापयित्वाऽग्नौ प्रवेशः कर्तव्यः। एकवर्षानन्तरं रावणे निहते सति पुनस्त्वं मां प्राप्स्यसि। सीता तथैवाकरोत्। राममुपेत्य प्रार्थयते स्वर्णमृगस्यानयनाय। सीतानुरोधेन रामो मारीचमन्वधावत्। दूरे च गत्वा तमवधीत्। 'हा हतोऽस्मि महाबाहो! त्राहि लक्ष्मण! मां द्रुतम्' इति मारीचशब्दमाकर्ण्य सीतानुरोधेन लक्ष्मण आश्रमं परित्यज्य रामसमीपं गतः। तस्मिन्नेवावसरे रावणेन बलात् सीता ततो हृता। तत्र रक्षार्थं समागतस्य जटायोः पक्षद्वयमसिना चिच्छेद रावणः। क्रमेण स द्वितीयरथेन सीतां लङ्कायां राजधान्यां नीतवान्। राम आश्रमे सीतामपश्यंस्तदीयान्वेषणे प्रयत्नपरोऽभवत्। स वदति यदहं कामुकसदृशो दुःखातुरो भूत्वा तां सीतां शोचामि, तर्हि क्रमेण सीतामनुचिन्वन्नसुरालये रावणं हत्वा पुनस्तां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्स्यामि। एवं यदा सर्वं वनमाचिन्वन् = निरीक्षमाणः सीतां नापश्यत्, तदा विलपन् स तदीयपरिचयं मृगपक्षिवृक्षादीन् प्रति पप्रच्छ। वनदेवीमुद्दिश्य स एवं ब्रूते परिचयप्रदानाय—

इत्याचिन्वन् वनं सर्वं नापश्यज्जानकीं तदा ।
वनदेव्यः कुतः सीतां ब्रुवन्तु मम वल्लभाम् ।।
(अध्यात्म., अरण्य. ८।१७)

अनासक्तोऽपि रामो मायामनुचरन्नासक्त इव सीतार्थं विलपन् समग्रमेव वनं विचिन्वन् = निरीक्षमाणो भुवि पतितं भग्नं रथं छत्रचापं कूबरं चापश्यत्—

एवं विचिन्वन् सकलं वनं रामः सलक्ष्मणः ।
भग्नं रथं छत्रचापं कूबरं पतितं भुवि ।।
(अध्यात्म., अरण्य. ८।२२)

पश्चाज्जटायुमुखात् सर्वं सीताहरणवृत्तं विज्ञाय रामो यथोचितमकरोत् रावणं हत्वा सीतां च प्राप्तवान्।

२. योगिनो दारुषु वह्निमिव कार्यकारणयोरुभयत्र भगवन्तं विचिन्वते = प्राप्नुवन्ति

मत्स्य-कच्छप-वराहावतारानन्तरं विष्णोश्चतुर्थावतारो नृसिंहरूपेण समभवदिति प्रसिद्धिः। हिरण्यकशिपोर्यो हि चतुर्थः पुत्र आसीत् प्रह्लादस्तस्य रक्षार्थं हिरण्यकशिपोर्वधार्थं चायमवतारः प्रवृत्तः। वह्निना सन्तप्ते लौहस्तम्भेऽपि ईश्वरो विद्यत इति प्रह्लादवचनं वरप्रयुक्ते ब्रह्मवचनं च सत्यापयन् विष्णुर्नृसिंहरूपेण स्तम्भमध्यादाविर्बभूव। हिरण्यकशिपुर्ब्रह्माणं प्रार्थितवान् यदहं नैव दिवसे न चापि रात्रौ मृत्यं प्राप्नुयाम, न पृथिव्यां नाप्याकाशे मम मृत्युर्भवेत्' इत्यादि। अत एव नृसिंहरूपमवधार्य सन्ध्यावेलायां दारुणैर्नखैर्हिरण्यकशिपोर्वक्षःस्थलं विदारयामास विष्णुः। हिरण्यकशिपोर्वधानन्तरं ब्रह्मरुद्रेन्द्रर्षिपितृगणसिद्धविद्याधरनागमनुप्रजापतिगन्धर्वचारणयक्षकिम्पुरुषवैतालिककिन्नरविष्णुपार्षदैः स बहुशः सम्प्रार्थितः। अन्ते च राजकुमारेण प्रह्लादेनापि भूयो भूयः संस्तुतः। स आह यद् यदि भवान् ब्रह्मादिदेवानां प्रार्थनया नैव सन्तुष्टस्तर्हि किमसुरजातौ समुद्भूतस्य मम प्रार्थनया भवांस्तोष्टुमर्हति? भवान् सत्त्वगुणाश्रयः सञ्जगतोऽभ्युदयाय आत्मानन्दस्य प्रापणाय लीलाविधानमाचरसि। वस्तुतो हिरण्यकशिपुदैत्यस्य संहारेणाधुना सर्वे सन्तः प्रसीदन्ति, ते सर्वे भवतः शान्तस्वरूपं प्रतीक्षन्ते। मां निजभृत्यपार्श्वमुपनय। पुरुषोत्तम! मोक्षस्य दश साधनानि प्रसिद्धानि—१. मौनव्रतम्, २. ब्रह्मचर्यम्, ३. शास्त्रश्रवणम्, ४. तपः, ५. स्वाध्यायः, ६. स्वधर्मपालनम्, ७. युक्तिबलेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्रव्याख्या, ८. एकान्तसेवनम्, ९. जपः, १०. समाधिश्च। परमेतानि नैव सर्वेषां श्रेयस्कराणि भवन्ति। वेदेषु बीजाङ्कुरवद् भवतः स्वरूपद्वयमुक्तम्— कार्यरूपं कारणरूपं च। वस्तुतो भवान् प्राकृतरूपहीनोऽस्ति। काष्ठमन्थनेन यथाग्निराविष्क्रियते, तथैव योगिनो भक्तियोगसाधनेन भवन्तं कार्यरूपे कारणरूपे च विचिन्वते = पश्यन्ति प्राप्नुवन्ति च—

रूपे इमे सदसती तव वेदसृष्टे
बीजाङ्कुराविव न चान्यद्रूपकस्य ।
युक्ताः समक्षमुभयत्र विचिन्वते त्वां
योगेन वह्निमिव दारुषु नान्यतः स्यात् ।।
(श्रीमद्भागवतम्-७/९/४७)

३. अन्यो भगवन्महिम्नस्तत्त्वं न जानाति चिरं विचिन्वन्नपि = विचारयन्नपि

भगवतः श्रीकृष्णस्य महिमातिशयमवलोक्य ब्रह्मा स्वकीयमायाबलेन वत्सान् वत्सपांश्चान्यत्र नीत्वाऽन्तरदधात्। अघासुरस्य मोक्षमवलोक्य स परं विस्मयं सम्प्राप्त आसीत्। तदा कृष्णः सर्वांस्तान् समन्ततो विचेतुं जगाम। परमप्राप्य विश्ववित् कृष्णस्तत् सर्वं विधिकृतमधिजगाम। ततः स वत्स-वत्सपमातॄणां मुदं वर्धयितुमात्मानमुभयायितं चक्रे। वस्त्राभूषण-शील-स्वभाव-गुण-नाम-रूपा-वस्थानुरूपानेव सर्वांस्तान् प्रकटयामास स्वमायया। रहस्यमिदं न ब्रह्मा, न बलरामः, न चाप्यन्ये ज्ञातवन्तः। यदा एकस्मिन् हायने पञ्चषा रात्रयोऽशिष्टा आसंस्तदानीमेकदा कृष्णः सरामो वनमाविशत्। गोवर्धनाद्रिशिरसि तृणं चरन्त्यो गावो दूराच्चरतो वत्सान् दृष्ट्वा जवेन तत्र गत्वा तानपाययन्। बलभद्र इदमद्भुतमवलोक्य रहस्यस्य स्पष्टीकरणाय कृष्णं पप्रच्छ। कृष्णस्तत् सर्वं विधिकृतं कथयामास। तदानीं ब्रह्मा समुपेत्य पूर्ववदेव सर्वं ददर्श, एतेन सोऽत्यन्तं विस्मितोऽभूत्। चिरं ध्यात्वापि रहस्यं किमपि ज्ञातुं स समर्थो नाभवत्। अन्ते स कृष्णं प्रणम्य स्तौति—ये पुरुषा ज्ञानाय प्रयत्नं विहाय सत्सङ्गमाचरन्ति, वाचा मनसा च विनयावनता भूत्वा सत्पुरुषैर्मुखरितां भवदीयवार्तामाकर्णयन्तो जीवन्ति, तैस्त्रिलोक्यामजितोऽपि भवान् प्रायशो जितोऽसि। भवद्भक्तिः श्रेयःस्रोतोऽस्ति, तां विहाय ये ज्ञानप्राप्तये यतन्ते, ते केवलं क्लिश्यन्ति। पुरा बहवो योगिनो योगादिना भवन्तमप्राप्य लौकिकानि वैदिकानि च सर्वाणि कर्माणि भवते समर्प्य तेन च भक्तिं सम्प्राप्य भवत्स्वरूपज्ञानेन परमपदं प्राप्तवन्तः। हे अनन्त! शुद्धान्तःकरणेन भवदीयनिर्गुणस्वरूपमहिमा ज्ञातुं शक्यते। भवान् केवलं जगतो हितायावतीर्णोऽस्ति। यथा सम्पूर्णविश्वस्य बाह्यं रूपं दृश्यते, तथैव भवतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुक्षावपि वर्तते। मयेदं साक्षात्कृतं यत् सर्वे गोपा वत्साश्च भवद्रूपाः सम्पन्नाः। वस्तुतो व्रजगोरमण्योऽत्यन्तं धन्याः सन्ति, यासां स्तन्यामृतं त्वया मुदा पीतम्। व्रजभूमेः कस्मिन्नपि वने, गोकुले वा कस्यामपि योनौ मम जन्म स्यात्, तर्हि स्वीयं परमं सौभाग्यं मन्ये। व्रजवासिनां जीवितं भवदीयमेव जीवनमस्ति। श्रुतयोऽनादिकालादेव भवच्चरणरजसां मृगणपराः परिलक्ष्यन्ते। भवत्प्रसादलेशानुगृहीत एव जनो महिमानं जानाति, नान्यः कश्चिदपि ज्ञानवैराग्यादिसाधनरूपैः प्रयत्नैश्चिरं विचिन्वन् अनुसन्धानपरायणः सन्नपि।

अथापि ते देव! पदाम्बुजद्वयप्रसादलेशानुगृहीत एव हि ।
जानाति तत्त्वं भगवन्! महिम्नो न चान्य एकोऽपि चिरं विचिन्वन् ।।
(श्रीमद्भागवतम्-१०/१४/२९)

४. अप्रमत्तैर्भाव्यम् इष्टां गतिं विचिन्वद्भिः = ज्ञातुं प्रयत्नपरायणैः

दुर्योधनादिकौरववीरैः सह युधिष्ठिरादिपाण्डववीराणां प्रायः स्वाभाविको वैरः प्रवृत्त आसीत्, तत्रापि मध्यमपाण्डवेन भीमसेनेन सह स वैरो विशेषतः प्रसिद्धः। तस्माद् धृतराष्ट्रस्तेषां विनाशाय योजनामेकां निर्धारितवान्, तदनुसारं वारणावतनगरे घृत-शण-मुञ्ज-वंश-लाक्षासंयोगेन नवीनमेकं राजभवनं निर्मितम्। दुर्भावनाग्रस्तो जात्यन्धो धृतराष्ट्रः सम्मानपुरस्सरं तान् वारणावतं प्रेषयामास। तत्र समुपस्थितानां तेषां सर्वेषां पाण्डवानां महान्तं सत्कारमकरोत् पुरोचनः, यस्य पर्यवेक्षणे भवनं निर्मितमासीत्। स दुर्योधेनेनादिष्ट आसीद् भवनेऽग्निदाहेन पाण्डवानां विनाशाय। विदुरस्य कथनानुसारेण युधिष्ठिरो दुर्योधनस्य दुर्भावनां विज्ञातवान्, तदीयदुर्भावनाविषये युधिष्ठिरो भीमं सूचितवान्। 'पूर्ववर्तिन्येव भवनेऽस्माभिर्वासो विधेयः' इति भीमाभिमतमाकर्ण्य युधिष्ठिरो विज्ञापयति यदिदानीमत्रैव निवासः समीचीनः, परमस्माभिस्तथैव यत्न आस्थेयो येन बाह्यचेष्टाभिर्मनोभावः प्रकाशितो न स्यात्, इतो मुक्तिप्राप्तये मनोऽनुकूलनिश्चितमार्गोऽपि अनुसन्धेयः। एवं मह्यमिदमेव रोचते यत् पर्याप्तावधानेनात्रैव वासः कर्तव्यः—

इह यत्तैर्निराकारैर्वस्तव्यमिति रोचये ।
अप्रमत्तैर्विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः ।। (महाभारतम्-१/१४५/२१)

इष्टां गतिम् = मनोऽनुकूलमार्गम्, विचिन्वद्भिः = अन्विच्छद्भिः। कथङ्कारं मनोऽनुकूलमार्गः सम्प्राप्येतेत्येतस्मिन् विषये युधिष्ठिरो वदति—वयमरण्ये मृगयाशीलाः स्याम, एतेन वसुधायां विचरणशीलैरस्माभिर्विविधा मार्गा विज्ञाताः स्युः, एवमितः पलायने सौविध्यं भवेत्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ते वयं मृगयाशीलाश्चराम वसुधामिमाम् ।
तथा नो विदिता मार्गा भविष्यन्ति पलायताम् ।।
(महाभारतम्-१/१४५/२९)

रात्रौ यदा तस्मिन् भवने पाण्डवा निश्चिन्तरूपेण सुप्ता आसन्, तदा निशीथे पुरोचनेन प्रज्वलितमग्निं वीक्ष्य पाण्डवा भूविवरमार्गेण बहिर्गताः सुरक्षिताश्चाभूवन्।

५. औशीनरं शिबिं प्रति कपोतो वदति—'छन्दो विचिनोमि' = जानामि

देवलोके एकदाऽयं विचारः प्रवृत्तो यद् भूलोके गत्वा औशीनरस्य शिबेः साधुतायाः परीक्षा कार्येति। ततोऽग्निदेवः कपोतरूपमवधार्य जगाम, इन्द्रश्च श्येनरूपेणामिषार्थं तमभ्यधावत्। तेन भीतः कपोतो दिव्यासनासीनस्य महीपतेरुत्सङ्गे न्यपतत्। पुरोहितो राजानं प्रार्थयते यदयं श्येनाद् भीतः कपोतः स्वकीयप्राणपरिरक्षार्थी भवन्तमाश्रयते, परमुत्सङ्गे निपातोऽस्य भवतामन्तं सूचयति, तस्य निष्कृतये भूरि द्रविणं ददातु भवान् कस्यचिदङ्के कपोतनिपतनं भयावहमुच्यते—

'वसु ददातु अन्तवान् पार्थिवोऽस्य निष्कृतिं कुर्याद् घोरं कपोतस्य निपातमाहुः' (महाभारतम्-३/१९७/५)

कपोतः शिबिं प्रार्थयते यदहं नैवास्मि कपोतः, परं हे राजन्! ब्रह्मचर्यपुरस्सरं स्वाध्यायमाचरन्तं मुनिं मामवेहि। अहम् इन्द्रियनिग्रहपूर्वकं तपोऽनुतिष्ठामि, आचार्यस्य प्रतिकूलं च किमपि नैव वदामि। वेदमन्त्रपाठं करोमि, छन्दांसि विचिनोमि = जानामि, मया सर्वे वेदा नैवांशतः किं चाक्षरशः समधीताः। श्रोत्रियाय दानं श्रेयस्करं भवति, न तु श्येनपक्षिणे कस्मैचित्। तस्मात् कथमपि भवता मम दानं श्येनाय नैव करणीयम्—

गदामि वेदान् विचिनोमि छन्दः सर्वे वेदा अक्षरशो मे अधीताः ।
न साधु दानं श्रोत्रियस्य प्रदानं मा प्रादाः श्येनाय न कपोतोऽस्मि ।।
(महाभारतम्-३/१९७/८)

'शरणागतं प्राणिनं यो न रक्षति, तमिन्द्रो वज्रेण प्रहरति, अपि च स स्वर्गादिलोकेभ्यो भ्रश्यति' इति विचारयन् राजा शिबिः कपोतरक्षणार्थं श्येनाय स्वशरीरमांसं प्रायच्छत्। राजा यदा स्वयं तुलामध्यरोहत, तदानीं श्येनस्ततोऽन्तर्हितोऽभूत्। कपोतो वदति राजानं प्रति यदावां देवलोकात्त्वत्परीक्षणार्थं समागतौ। श्येन आसीद् इन्द्रः, अहं च वैश्वानरोऽस्मि—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैश्वानरोऽहं ज्वलनो धूमकेतुरथैव श्येनो वज्रहस्तः शचीपतिः ।
साधु ज्ञातुं त्वामृषभं सौरथेय! नौ जिज्ञासया त्वत्सकाशं प्रपन्नौ ।।
(महाभारतम्-३/१९७/२५)

अन्ते कपोतो महीपतेर्जङ्घांशं पूरयित्वा पुत्रप्राप्तये वरं प्रदाय देवलोकं जगाम।

६. सत्यवतः पितरावाश्रमादिकं विचिन्वन्तौ = निरीक्षमाणौ जग्मतुः

'यथेयं द्रौपदी परमसौभाग्यवती पतिव्रता च नारी वर्तते, तथा काचिदन्यापि नारी दृष्टा श्रुता वा पूर्वम्' इति युधिष्ठिरवचनमाकर्ण्य मार्कण्डेयो महामुनिः सावित्र्याः कथां श्रावयामास। तदनुसारं मद्रदेशाधिपतिरश्वपतिः सन्तानप्राप्तये सावित्रीमाराधयामास। तुष्टा सती सा कन्याप्राप्तेर्वरं राज्ञे व्यतरत्। तत्प्रभावेण सम्प्राप्तायाः कन्याया नामधेयमभूत् सावित्रीति। नवयुवतिः सती सा पितुरादेशानुसारं स्वयमेव वरान्वेषणाय विविधान् देशान् बभ्राम। अन्ते सा शाल्वदेशाधिपतेर्द्युमत्सेनस्य पुत्रं सत्यवन्तं वररूपेण स्वीकर्तुं निश्चिकाय। स्वकीयं मतं सा पितरमकथयत्। तदानीं तत्रोपस्थितो नारदो विज्ञापयामास यत् स सदैव सत्यं भाषते तस्मात् 'सत्यवान्' इति नामधेयमश्वप्रियत्वाच्च चित्राश्वमिति नामधेयमभिधत्ते, स स्वकीयैर्विविधैर्गुणैरवश्यं प्रशंसनीयः, परं तत्रैको महान् दोषो यत् स संवत्सरानन्तरमेव मृत्युं प्राप्स्यतीति। परं सर्वेषां सम्मत्या विवाहः सम्पन्नस्तयोः।

मृत्युदिवसात् पूर्वं दिवसत्रयं यावत् तिष्ठन्ती सती सावित्री व्रतमकरोत्। यदा श्रान्तः सत्यवान् सावित्र्या अङ्केशिरो निधाय सुप्त आसीत्, तदा सावित्र्या समुपस्थितस्तत्र यमो दृष्टः। सत्यवन्तमादाय गच्छन्तं यममनुजगाम च। परितुष्टो यमस्तस्यै वरमददात्, तदनुसारं सत्यवाञ्जीवितो बभूव। जीवितः सन् स वदति— आवाभ्यामाश्रमे गन्तव्यम्, यतो हि पिता मम विचये प्रवृत्तः स्यादिदानीम्—

दिवापि मयि निष्क्रान्ते सन्तप्येते गुरू मम ।
विचिनोति हि मां तातः सहैवाश्रमवासिभिः ।।
(महाभारतम्-३/२९७/८४)

यमराजप्रदत्तवरानुसारं द्युमत्सेनेन दृष्टिः सम्प्राता। स रात्रौ भार्यया शैव्यया सह विविधमाश्रमादिकं विचिन्वन् सत्यवतः सावित्र्याश्च सम्प्राप्त्यर्थं वनं जगाम—

तावाश्रमान् नदीश्चैव वनानि च सरांसि च ।
तस्यां निशि विचिन्वन्तौ दम्पती परिजग्मतुः ।।
(महाभारतम्-३/२९८/३)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. विचक्षणः पापमिश्रितमार्गेण द्रविणं न विचिन्वीत = संगृहणीयात्

महाभारते शान्तिपर्वणि भीष्मो बहून् धर्मान् उपदिदेश युधिष्ठिराय। तत्र तेनोक्तम्—विप्राणां प्रतिग्रहसम्प्राप्ताः, क्षत्रियाणां युधि निर्जिताः, वैश्यानां न्यायार्जिताः, शूद्राणां च शुश्रूषयार्जिता अर्थाः प्रशंसनीया भवन्ति—

प्रतिग्रहागता विप्रे क्षत्रिये युधि निर्जिताः ।
वैश्ये न्यायार्जिताश्चैव शूद्रे शुश्रूषयार्जिताः ।।

(महाभारतम्, शान्ति. २९४/१)

एकदा प्रवृद्धे पापाचारे देवाः शिवं प्रार्थितवन्तोऽसुरविनाशाय, तदा शिवः सर्वानसुरान् विनाशयामास। अतो वदति भीष्मः, राजन्! हिंसात्मकेन कर्मणा कदाप्यभ्युदयं नैव वाञ्छेत्। इदं शास्त्रानुमोदितं सुविचारितं वचनं यद् बुद्धिमता केनापि पुरुषेण धर्माचरणाय न्यायं विहाय पापमिश्रितेनोपायेन धनसङ्ग्रहो नैव कर्तव्यः, यतो हि तेन कल्याणमवाप्तुं न शक्यते—

न सङ्करेण द्रविणं विचिन्वीत विचक्षणः ।
धर्मार्थं न्यायमुत्सृत्य न तत् कल्याणमुच्यते ।।

(महाभारतम्-१२/२९४/२५)

विचिन्वीत = सङ्ग्रहं कुर्यात्। भीष्मवचनानुसारेण महर्षिपराशरद्वारा राजर्षिजनकायैवमेव गृहस्थधर्मोपदेशः कृत आसीद् येनाविकृते सति मनसि अनृताभावेन कल्याणमवाप्यते।

८. वह्निदर्शनकामनया ऋषयस्त्रैलोक्यं व्यचिन्वन्त = निरीक्षितवन्तः

तारकासुरवधोपायं निर्दिशता ब्रह्मणा देवान् प्रति उक्तमासीत्—रुद्राणी देवेभ्यः शापं व्यतरत् सन्ततिप्राप्तेरभावस्य, तदानीं तत्र वह्निदेव उपस्थितो नासीत्, स क्वचिद् गुप्तो बभूव, तेन स शापाद् बहिर्भूतो वर्तते। स साम्प्रतं यत् स्खलितं शिवतेजो धारयति, तस्य गङ्गायां स्थापनेन यं बालकमुत्पादयिष्यति, स एव तारकासुरवधाय प्रभवेत्। अतो युष्माभिः सर्वैरग्निरन्वेषणीयः। देवैस्तदानीमन्वेषण-समये मण्डूको रसातलेऽग्निवासमुक्तवान्। तेन तस्मै शापः प्रदत्तो वह्निना रसानुभवस्याभावस्य। अश्वत्थवृक्षेऽग्निनिवासमुक्तवते हस्तिने जिह्वापरिवर्तनस्य शापं व्यसर्जयत्। अश्वत्थवृक्षान्निष्क्रम्य शमीवृक्षे प्रविष्टस्याग्नेः परिचयं यदा शुकः प्राह तदा 'वाग्विहीनो भव' इति शापस्तस्मै दत्तो वह्निना। एवं शमीवृक्षे निवसन्तमग्निदेवं देवा ददृशुः। तेजस्विबालकोत्पादनस्य प्रार्थनामङ्गीकृत्याग्नि-देवस्तेजो गङ्गायां स्थापितवान्, गङ्गा च तन्मेरुशिखरे तत्याज, तेन कुमारः कार्त्तिकेयः समुद्भूतः, देवसेनानीः स तारकासुरं निहत्य देवलोकं दुःखान्मुमोच।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वह्निदर्शनस्य कामनया ऋषयो न केवलमेकं स्थानं न च बहूनि स्थानानि, अपि च त्रैलोक्यं व्यचिन्वन्त = निरीक्षितवन्तः—

ततस्त्रैलोक्यमृषयो व्यचिन्वन्त सुरैः सह ।
काङ्क्षन्तो दर्शनं वह्नेः सर्वे तद्गतमानसाः ।।

(महाभारतम्-१३/८४/२०)

९. जनकः स्वविषयं नाधिगच्छति पृथिवीमिमां विचिन्वन् = ध्यानेन परीक्षमाणः

एकदा धर्मदेवोऽपराधिनो ब्राह्मणस्य वेषमास्थाय मिथिलादेशमुपस्थितः। मिथिलाधिपतेर्जनकस्य समक्षं यदा स आनीतः, तदा जनकेनादिष्टम्—त्वं मम देशाद् बहिर्गच्छेति। ब्राह्मणः स जनकं प्रति तदीयराज्यसीमाविषये पृच्छति। राजर्षिर्जनकः प्रत्युत्तरयन्नेवं तं वदति—ब्रह्मन्! यद्यपि पितृपितामहादिपूर्वजानां समयादेव मिथिलाप्रान्तीयराज्ये ममाधिकारः प्रवर्तते, तथापि विचारपुरस्सरमिमां समस्तां पृथिवीं विचिन्वन् = परीक्षमाणः स्वकीयं देशं नैव प्राप्नोमि—

पितृपैतामहे राज्ये वश्ये जनपदे सति ।
विषयं नाधिगच्छामि विचिन्वन् पृथिवीमिमाम् ।।

(महाभारतम्-१४/३२/८)

अन्यत्र पृथिव्यां स्वकीयं राज्यमनुपलभ्य मया मिथिलानगरी मार्गिता = अवलोकिता, ततोऽपि निराशो भूत्वा प्रजावर्गे स्वकीयाधिकारोऽन्विष्टः, तत्राप्यनिश्चयदशामापन्नः सन्नहं मोहमुपगतोऽस्मि। वस्तुतो मदीयं राज्यं कुत्रापि नैव वर्तते। अपि चेदं शरीरं नास्ति मम शासने। कदाचिच्चेयं समग्रैव पृथ्वी मम प्रतीयते। अस्मिन् विषये सर्वेषां कारणानां स्पष्टीकरणं यदा कृतं जनकेन तदा स ब्राह्मण आत्मानं धर्मं ब्रूते। स स्वकीयागमनकारणमित्थं वदति यदहं तव परीक्षार्थं समागत आसम्। वस्तुत इदानीं भवानेव ब्रह्मप्राप्तिरूपदुर्निवारचक्रस्य सञ्चालकोऽस्ति—

त्वमस्य ब्रह्मलाभस्य दुर्वारस्यानिवर्तिनः ।
सत्त्वनेमिनिरुद्धस्य चक्रस्यैकः प्रवर्तकः ।।

(महाभारतम्-१४/३२/२६)

१०. रामकृष्णौ प्रमुदितावास्ताम् पादपान् विचिन्वन्तौ = निरीक्षमाणौ

महाभारतसभापर्वणः क्षेपककथानुसारं रामकृष्णयोर्जन्मकथा विस्तरेण वर्णिताः। कृष्णलीलासु कालियनागदमनं रासक्रीडा च प्रामुख्येण कीर्तिता। भीष्मो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

युधिष्ठिरं प्रत्याह—बलरामो गर्दभरूपधारिणं धेनुकासुरं जघान। ततः कदाचित् कुन्तीनन्दन युधिष्ठिर! सुमुखो बलरामः श्रीकृष्णश्च समृद्धमात्मनो गोधनं चारयितुं वनं जगाम। तत्र भ्रातृयुगलौ रामकृष्णौ तौ भ्रमन्तौ, क्रीडन्तौ, गायन्तौ, विविधवृक्षान् विचिन्वन्तौ निरीक्षमाणौ महतीं मुदं लब्धवन्तौ—

विहरन्तौ मुदा युक्तौ वीक्षमाणौ वनानि वै ।
क्ष्वेलयन्तौ प्रगायन्तौ विचिन्वन्तौ च पादपान् ।।

(महाभारतम्, २/३८/२९-क्षेपकभागः)

इदं विदितमेव यद् रामः कृष्णश्चाजेयौ आस्ताम्। तौ गोवत्सान् नामग्राहमाह्वयतः स्म, लोकप्रचलिता विविधाः क्रीडाश्च चक्रतुः, अपि च अरिष्ट-केशि-चाणूर-मुष्टिकप्रभृतीन् महावीरान्निजघ्नतुः। एतयोश्चरितं श्रीमद्भागवतस्य दशमस्कन्धे विशेषेण वर्णितम्।

[मृगणम्- ३]

१. महाराज्ञी दलपत्नी ब्राह्मणेभ्यो मृगयती = ब्राह्मणान् सेवितुमिच्छन्ती आसीत्

ब्राह्मणानामद्भुतकथायाः कीर्तनानन्तरं महर्षिर्मार्कण्डेयोऽयोध्याधिपतेः परीक्षितः कथां युधिष्ठिरं प्रति श्रावयामास। तदनुसारं मृगयाप्रसङ्गे सम्प्राप्तया कन्यया सार्धं राज्ञो गान्धर्वविवाहः सम्पन्नो जलादर्शनानुबन्धेन। प्रधानमन्त्रिणा निर्मिते उपवने राज्ञा सह गता राज्ञी वापीमवलोक्य तत्र प्रविष्टवती, परं ततो बहिर्नागता। वाप्याः समग्रं जलं निस्रावितम्, तदा बिलमुखे उपविष्टः कश्चिन्मण्डूको दृष्टः। राजा सर्वान् एव मण्डूकान् निहन्तुमादिष्टवान्, परं तदानीं मण्डूकराजः स्वयमुपस्थाय तथा न कर्तुं राजानं प्रार्थयते। वस्तुतः सा नवयुवतिर्मण्डूकराजस्यैव पुत्री आसीत् सुशोभना। राज्ञा प्रार्थिता सती सा मण्डूकराजेन महाराजाय समर्पिता तस्यां त्रयः पुत्राः समुत्पन्नाः—शलः, दलः, बलश्च। शलेन वामदेवसकाशाद् वाम्यावश्वौ सम्प्राप्तौ, परं नैव तस्मै प्रत्यावर्तितौ, तेन राक्षसैः स निहतः। दलेनाप्यश्वौ नैव सम्प्रदत्तौ। परं राज्ञी तत्रोपस्थाय वामदेवं प्रार्थयते यदहं प्रतिदिनं नृशंसस्वभावं स्वामिनं प्रियवचनकथनाय प्रार्थये, अपि च स्वयं ब्राह्मणेभ्यो मृगयती = ब्राह्मणान् सेवितुमिच्छन्ती वर्ते। ब्रह्मन्! एभिः सत्कर्मभिर्मया पुण्यलोकाः प्राप्तव्याः—

ब्राह्मणेभ्यो मृगयती सूनृतानि
तथा ब्रह्मन्! पुण्यलोकं लभेयम्।। (महाभारतम्-३/१९२/६९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[एवं नृशंसं भर्तारं दिने दिने सूनृतानि कल्याणकराणि वाक्यानि संदिशन्तीति सम्बन्धः। ब्राह्मणेभ्यो मृगयती = ब्राह्मणान् सेवितुमिच्छन्ती—नीलकण्ठीया टीका]।

२. अनादिकालादेव श्रुतिभिः कृष्णस्य पदरजो मृग्यम् = प्राप्तये ज्ञातव्यम्

कृष्णस्य परीक्षानन्तरं ब्रह्मणा कृष्णो बहुधा स्तुतः। स वदति—बन्धनं मोक्षश्चाज्ञानस्यैव नामद्वयं वर्तते। एते द्वे अपि नामनी सत्यज्ञानस्वरूपात् परमात्मनोऽभिन्ने। यथा सूर्ये रात्रिदिवसयोर्भेदो नास्ति, तथैवाखण्डे चित्स्वरूपे शुद्धात्मतत्त्वे न बन्धनमस्ति न चापि मोक्ष एव। एतन्महदाश्चर्यं यज्जना आत्मानमपि भवन्तं परं मन्यन्ते। स्वामिन्! सृष्टिकालादद्यावधि महान्तो यज्ञा अपि भवतस्तोषाय नैव प्राभवन्, परं भवान् व्रजगवां वत्सो भूत्वा गोपीनां पुत्रश्च भूत्वा तदीयस्तन्यामृतं पीतवान्, तेन ता गावो व्रजरमण्यश्च वस्तुतो धन्याः सन्ति—

अहोऽतिधन्या व्रजगोरमण्यः स्तन्यामृतं पीतमतीव ते मुदा।
यासां विभो! वत्सतरात्मजात्मना यत्तृप्तयेऽद्यापि न चालमध्वराः ।।
(श्रीमद्भागवतम्-१०/१४/३१)

भगवन्! तन्मे भूरिभाग्यं भवेद् यन्मम जन्म व्रजभूमेः कश्मिंश्चिद् वने गोकुले कस्यामपि योनौ स्यात्। यतो हि तेन भवद्भक्तचरणरजसाऽवश्यमेव ममाभिषेको निर्वर्तेत। भवच्चरणरजस्तु श्रुतिभिरनादिकालादेव मृग्यमास्ते = प्राप्तये ज्ञातव्यं वर्तते—

तद् भूरिभाग्यमिह जन्म किमप्यटव्यां
यद् गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम्।
यज्जीवितं तु निखिलं भगवान् मुकुन्द-
स्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ।।
(श्रीमद्भागवतम्-१०/१४/३४)

३. बाणपुत्र्या उषयाऽनिरुद्धस्य मृगणम् = प्राप्तये निरीक्षणम्

दैत्यराजस्य बलेः शतपुत्रेषु ज्येष्ठ आसीद् बाणः। स रम्ये शोणितपुरे राज्यं कुर्वन् मान्यो वदान्यः सत्यसन्धो दृढव्रतश्च बभूव। सहस्रबाहुना तेन ताण्डवे शिवमतोषयत्। एकदा भगवन्तं शिवं स प्रार्थयामास यत् सहस्रबाहवो भवता मह्यं प्रदत्ताः, परमिमे साम्प्रतं भारभूता एव सन्ति। भवन्तमृते नैव कोऽपि मम प्रतियोद्धा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तते। क्रुद्धेन शिवेनोक्तम्—यदा ते केतुर्भग्नः सन् पतिष्यति तदा मत्समेन वीरेण तव युद्धमवश्यं भवेत्। स तद्घटनाप्रतीक्षापरायणो बभूव तस्मात् कालात्। एकस्यां रात्रौ तदीया पुत्री उषा स्वप्ने प्रद्युम्नपुत्रेणानिरुद्धेन सह समागमं प्राप्य अदृष्टे सति तस्मिन् 'क्वासि कान्त' इति वादिनी उत्तस्थौ, सखीमध्ये आत्मानं प्राप्य विह्वला सती व्रीडिता बभूव। तदानीं मन्त्रिणः कुम्भाण्डस्य सुता चित्रलेखा तामेवं पृच्छति—सखि! अद्यावधि त्वं नैव कस्मैचित् समर्पितासि, तर्हि त्वं कं पुरुषं मृगयसे = प्राप्तुं प्रयतसे, तव मनोरथश्च किंस्वरूपोऽस्ति—

कं त्वं मृगयसे सुभ्रूः कीदृशस्ते मनोरथः ।
हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये ।। (श्रीमद्भागवतम्-१०/६२/१५)

चित्रलेखया चित्रेऽर्पितमनिरुद्धं वीक्ष्य लज्जिता सती उषा तमेव कान्तं स्वीचकार। प्रसङ्गेऽस्मिन् हरिकृष्णयोर्महद् युद्धं प्रवृत्तमासीत्।

[विमृगणम्-१]

१. योगेश्वरैः कृष्णस्याङ्घ्रियुगलं विमृग्यते = दृश्यते, प्राप्त्यर्थं पुनः पुनश्चिन्त्यते वा

देवर्षिर्नारदो युधिष्ठिरं प्रति गृहस्थानां कृते मोक्षधर्मं वर्णयन्नाह—केषाञ्चिद् ब्राह्मणानां निष्ठा तपसि, अपरेषां स्वाध्यायप्रवचनयोः, कतिपयद्विजानां चात्मज्ञानसम्पादने, इतरेषां च योगे वर्तते। अक्षयफलप्राप्तये गृहस्थेन पुरुषेण ज्ञाननिष्ठायैव पुरुषाय हव्यं कव्यं च प्रदेयम्। ये हि पुरुषाः सद्धर्ममिच्छन्ति, तेषां कृते परमोऽयं धर्मो यत् कस्मैचिदपि प्राणिने मनसा वाचा कायेन च कष्टं नैव देयमिति। हे धर्मराज! सङ्कल्पपरित्यागेन कामम्, कामत्यागेन क्रोधम्, तत्त्वविचारेण भयम्, अध्यात्मविद्यया शोकमोहौ, महतामुपासनया दम्भम्, मौनेन योगान्तरायान्, दयया आधिभौतिकं दुःखम्, समाधिना आधिदैविकम्, योगबलेनाध्यात्मिकम्, सात्त्विकाहारादिना निद्राम्, सत्त्वेन रजोगुणतमोगुणौ, उपशमेन सत्त्वगुणं च जयेत्। गुरुभक्त्या दोषा एते सर्वेऽनायासेन जेतुं शक्यन्ते। हृदये ज्ञानदीपप्रदो गुरुः साक्षाद् भगवानेव विज्ञेयः। प्रकृतिपुरुषाधीश्वरस्य यस्याङ्घ्रियुगलं योगेश्वरैर्विमृग्यते = दृश्यते, प्राप्त्यर्थं पुनः पुनश्चिन्त्यते वा, स भगवान् गुरुरूपेणोपस्थितः, लोको भ्रमेण तं कृष्णं मनुष्यं मनुते—

एष वै भगवान् साक्षात् प्रधानपुरुषेश्वरः ।
योगेश्वरैर्विमृग्याङ्घ्रिर्लोको यं मन्यते नरम् ।।
(श्रीमद्भागवतम्-७/१५/२७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

[परिमार्गणम्- १]

१. श्रेयस्कामेन पुरुषेण परमपदं परिमार्गितव्यम् = प्राप्तये प्रयतनीयम्

श्रीमद्भगवद्गीतायाः पुरुषोत्तमयोगनामके पञ्चदशेऽध्याये श्रीकृष्णः पार्थमर्जुनमेवमुपदिशति—यः पुरुषः संसाररूपमश्वत्थवृक्षं समूलं तत्त्वतो वेत्ति, स वेदतात्पर्यं सम्यग् जानाति। स वृक्षो विलक्षण आभाति, यतो हि तस्यादिपुरुषः परमेश्वरो मूलमास्ते, ब्रह्मा च वर्तते तदीया मुख्यशाखा। स उच्यते अविनाशी, तस्य वेदा भवन्ति पर्णानि। तस्य विविधाः शाखाः सन्ति, या गुणत्रयजलेन प्रवृद्धाः, विषयभोगकिसलयात्मिकाः, देव-मनुष्य-तिर्यग्योनिरूपा उपरि अधश्च सर्वत्र प्रसृताः। अपि च मनुष्यलोके कर्मानुबन्धीनि अहन्ता-ममता-वासनात्मकानि मूलान्यपि सर्वत्र लोकेषु व्याप्तानि सन्ति। संसारवृक्षस्य स्वरूपमिदं विचारकाले नोपलभ्यते, तस्याद्यन्तस्थित्यभावात्। तस्मादेतदपेक्ष्यते यद् दृढेन वैराग्यशस्त्रेण संसाररूपमश्वत्थवृक्षं छित्त्वा परमेश्वरस्य परमपदमनिवर्तकं पुरुषः परिमार्गेत, यत्र गत्वा कदापि पुरुषो नैव निवर्तते, येन चास्य पुरातनस्य संसारवृक्षस्य प्रवृत्तिर्विस्तारं प्राप्तवती। तस्यैवाद्यपुरुषस्य शरणं सम्प्राप्तोऽस्मि—

ततः पदं तत् परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ।।
(श्रीमद्भगवद्गीता-१५/४)

एवं परमेश्वरस्य मनननिदिध्यासनाभ्यां येषां मानमोहौ विनष्टौ, यैरासक्तिदोषो जितः, ये परमात्मस्वरूपे नित्यं स्थिताः, येषां कामाः पूर्णतया विनष्टाः, तादृशाः सुख-दुःखद्वन्द्वेन विमुक्ता ज्ञानिन एवाव्ययं तत् पदं प्राप्नुवन्ति। यदधिगम्य पुरुषा नैव कदापि निवर्तन्ते।

[शोधः- १]

१. ऋषिभिररुणानद्याः समानयनेन सरस्वतीतीर्थस्य शोधनम् = रक्त-रूपदोषस्य निराकरणम्

बलरामस्य कुरुक्षेत्रीयतीर्थयात्राप्रसङ्गे दाल्भ्यबकस्य तपश्चर्यया धृतराष्ट्रराज्यस्य विनाशकथा कीर्तिता। तदनन्तरं वसिष्ठापवाहस्यारुणानामकतीर्थ-स्थलस्य कथा वर्तते। तदनुसारं विश्वामित्रेण निर्दिष्टा सरस्वती नदी धारायां वसिष्ठं निनाय, परं यदा विश्वामित्रो वसिष्ठस्य वधायास्त्रान्वेषणपरो जातः, तदा सरस्वत्या वसिष्ठस्ततोऽपवाहितः। एतेन तत् स्थानं वसिष्ठापवाहनाम्ना प्रख्यातं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बभूव। विश्वामित्रः सरस्वत्या वञ्चितो भूत्वा क्रोधाविष्टस्तस्यै शापमददात् शोणितस्य वहनाय। तेन राक्षसास्तदीयं शोणितमयं जलं पीत्वा प्रमुदिता बभूवुः। कदाचित् तत्र केचन ऋषयः समुपगत्योग्रतपस्यया सरस्वतीं दोषमुक्तामकुर्वन्। नमुचेर्मित्रस्य वधेन ब्रह्महत्यां प्राप्तो देवराज इन्द्रो ब्रह्मणो निर्देशानुसार-मरुणासरस्वतीसङ्गमे स्नानेन यज्ञविधानेन ब्रह्महत्यामुक्तो बभूव।

अत्र सरस्वतीस्वरूपाया अरुणानद्या वैशिष्ट्यं महत्त्वं च कीर्तितमस्ति। यदा तपोधनैः ऋषिभिः शोधनार्थं सरस्वती सम्प्रेरिता, तदा सा स्वशरीररूपामरुणामानीतवती—

शोधयित्वा ततस्तीर्थमृषयस्ते तपोधनाः ।
मोक्षार्थं राक्षसानां च नदीं तां प्रत्यचोदयन् ।।
महर्षीणां मतं ज्ञात्वा ततः सा सरितां वरा ।
अरुणामानयामास स्वां तनुं पुरुषर्षभ! ।।

(महाभारतम्-९/४२/२३-२४)

वामनपुराणेऽपि प्रसङ्गोऽयं निबद्धः। यत्रारुणायाः सरस्वत्याश्च सङ्गमः कुरुक्षेत्रे वर्णितः। इमां मुनयः सरस्वत्यां समानयन्। अस्याः सरस्वत्याश्च सङ्गममृषयो रक्षसां मोक्षार्थमकल्पयन् (वा.पु. २३/३०,४१,४२) इति।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानश्रीमित्रस्य कतिपयनिबन्धसमीक्षा

डॉ. वृजकिशोरत्रिपाठी
प्रवक्ता, संस्कृतस्य
राजकीयस्नातकोत्तरमहाविद्यालये
फतेहपुरम्, आलापुरम्, अम्बेडकरनगरम्

❀ ❀ ❀

ज्ञानमिह सर्वसुखास्पदं किं वा सुखस्वरूपमिति नास्त्यविदितमेकेषामपि। ज्ञानाभावे तु सर्वजगदान्ध्यप्रसङ्ग आपद्येत, यथा ऋते तरणेस्तमः। सर्वप्रकाशकमिदं ज्ञानं स्वयं प्रकाशते, अन्येन वा? इत्यत्रास्ति मतद्वयम्। केचित्स्वप्रकाशवादिनः, परप्रकाशवादिनश्चापरे। नैयायिकादीनां मते ज्ञानमनुव्यवसायात्मकेन ज्ञानान्तरेण प्रकाशते, न तु स्वतः। विषयप्रकाशकं ज्ञानं प्रकाशमानमेवोत्पद्यते, न तु स्वप्रकाशाय ज्ञानान्तरमपेक्षत इति स्वप्रकाशवादिनः। तत्र स्वप्रकाशवादिनः सन्ति प्राभाकराः, विज्ञानवादिनो बौद्धा वेदान्तिनश्च। एतेषां मते ज्ञानस्य स्वप्रकाशत्वात् स्वाभिन्नज्ञानविषयत्वावश्यकत्वादर्थाद् ज्ञानं स्वेनैव गृह्यते, न तु ज्ञानान्तरेण। यद्यपि आत्मवादिनामाचार्याणां मते ज्ञानं स्वस्यैव विषयो नास्ति, कर्म-क्रियाविरोधात्, तथापि बहूनां विदुषां मतेऽस्मिन्नेव पक्षपातत्वादुक्तमित्थमिति ज्ञेयम्। ज्ञानस्य तत्प्रमात्वस्य (तत्प्रकाशत्वस्य) च ज्ञानान्तरग्राह्यत्वे तद्ग्रहणार्थं पुनर्ज्ञानान्तरमपेक्षेतेत्यनवस्था स्यात्, अतो ज्ञानं तत्प्रकाशत्वञ्च तेनैव गृह्यते।

ज्ञानज्ञेययोर्भेदसमीक्षणम्

तत्र परप्रकाशवादिनां नैयायिकादीनां मते ज्ञानज्ञेययोर्भेदो वर्तते। तयोश्च विषयविषयिभावसम्बन्धः। ग्राहकं ज्ञानं विषयि, ग्राह्यञ्च वस्तु विषयः। विषयनिरूप्यञ्च विषयि। एवमेव बाह्यार्थवादिनोर्वैभाषिकसौत्रान्तिकयोर्मतेऽपि विषयज्ञानयोर्ग्राह्यग्राहकलक्षणो भेदसम्बन्ध एव वर्तते। वैभाषिकस्य बाह्योऽर्थः प्रत्यक्षः, सौत्रान्तिकस्य ज्ञानगताकारवैचित्र्येणानुमेयः। तथा हि ज्ञानगतं बाह्यनीलसारूप्यं भासमानमनीलाकारापोहरूपेण कल्पितम्, तच्च बाह्यमर्थं व्यवस्थापयति, प्रतिबिम्बमिव बिम्बम्। एषां मते नहि वित्तिसत्तैव तस्यार्थस्य वेदना युक्ता, तस्या वित्तिसत्तायाः सर्वत्रार्थे विशेषाभावात्। ज्ञानमात्रं हि सर्वज्ञेय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधारणम्। तस्मात्तां वित्तिं बाह्यं वस्तु स्वेन रूपेण सरूपं कुर्वत् तया सह विषयभावेन योजयति। यथोक्तम्—

न हि वित्तिसत्तैव तद्वेद्या युक्ता तस्याः सर्वत्राविशेषात् ।
तां तु सारूप्यमाविशत्, सरूपयत्तद्घटयेत् ।।इति।

तथा च विषयप्रतिबिम्बाकारेण समुत्पाद एव ज्ञानस्य विषयग्राहकत्वम्। तस्मिन् खलु ज्ञाने यो हि विषयस्याव्यवधानेन स्पष्टावभासः, स एव विषयप्रत्यक्षीकरणम्। अर्थग्राहकं ज्ञानं तावदर्थस्य कार्यम्। अर्थश्च नूनं ग्राहकत्वात्करणम्। कार्यकारणयोश्च नास्ति समानकालभावित्वं, कारणपूर्वकालभावित्वादिति ग्राह्यग्राहकयोर्भिन्नकालिकत्वेऽपि चक्षुर्विज्ञानादीनामव्यवधानेन रूपादिग्रहणं सम्पद्यत एव। यथोक्तम्—

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ।।
कार्यं ह्यनेकहेतुत्वेऽप्यनुकुर्वदुदेति यत् ।
तत् तेनाप्यत्र तद्रूपं गृहीतमिति चोच्यते ।। (प्र.वा. २/२४७-२४८)

ज्ञानज्ञेययोर्भेदस्वीकारादेव शब्दान्तरभेदसंख्यादेश्च कार्यभेदप्रतिपादकप्रमाणस्य प्रामाण्यमुपपद्यते। अस्यायमर्थः—शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तरैः कर्मभेदो निरूपितो द्वादशलक्षण्यां द्वितीयाध्याये। तत्र यजति, ददाति, जुहोतीत्यादौ धातुभेदेन धात्वर्थभेदेऽपि भावना भिद्यते न वेति सन्देहे धातूनां भेदेऽपि भावनान्वयलिङ्गादेः सर्वत्र प्रत्यभिज्ञयाऽभेदावगमाद् धात्वर्थस्य च भावनां प्रति गुणभूतत्वाद् गुणभेदेन प्रधानभेदस्यान्याय्यत्वाद् अभेद एवेति पूर्वपक्षयित्वा धातोरिति विवक्षितैकवचनेन सूत्रेणैकधातोरुपरि प्रत्ययविधानात् सर्वत्र धात्वर्थानुरञ्जिताया भावनायाः प्रतीतेरेकानुरञ्जितायाश्चान्यानुरञ्जनायोगात् प्रतिधात्वर्थं भिद्यत एव भावनेति राद्धान्तितं 'शब्दान्तरे अर्थभेदः कृतानुबन्धात्' इत्यत्र। अयमर्थोऽस्य शब्दान्तरे धात्वन्तरे सति कार्यभेदोऽवश्यमेव भवितुमर्हति। कुतः, कृतानुबन्धत्वात्, तेनैव कृतावच्छेदत्वाद् भावनाया इति। सोऽयं शब्दान्तरात्कार्यभेदः। एवमेवाभ्यासादीनामपि उदाहरणानि तत एव द्रष्टव्यानि विशेषजिज्ञासुभिः। शब्दान्तरस्यैव प्रकृतोपयोगित्वादिहोदाहृतम्। तथैव प्रकृतेऽपि ज्ञानज्ञेययोर्भिन्नौ शब्दौ प्रयुज्येते। यथा—ज्ञानं, वित्तिः, प्रमा, प्रमितीत्यादिशब्दा ज्ञाने। ज्ञेयश्च घटादिशब्दैर्व्यवह्रियते। अस्माद्धेतोर्यथा शब्दान्तरत्वात्कार्यभेदस्तथाऽत्रापि शब्दान्तरत्वाद् ज्ञानज्ञेययोर्भेदः स्वीक्रियताम्। तथा च तयोर्भेद-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्बन्ध एव। यदि च ज्ञानज्ञेययोर्भेदो न स्वीक्रियेत, तदा प्रमाणान्तरावृत्तिरापद्येत। तथा हि स्वप्रकाशं ज्ञानं स्वप्रामाण्याय यथा प्रमाणान्तरं नापेक्षते तथा ज्ञानज्ञेययोरभेदात् तुल्ययोगक्षेमाद् ज्ञेयोऽपि स्वप्रामाण्याय ज्ञानं नापेक्षत इति।

किन्तु यो हि यस्माद्भिन्नः स तं विनापि पृथक् प्रतिभासं सृजते। यथा अश्वाद्भिन्नो हस्ती अश्वादृते हस्तिज्ञानं रचयति इति। न तथा ज्ञानाद्भिन्नोऽर्थः कदाचिदपि ज्ञानेन विना प्रतिभासते, अपि तु ज्ञानेन सहैव। अतोऽस्मिन् पक्षे ज्ञानज्ञेययोः पृथक्प्रतिभासप्रसङ्गो दोषः।

ज्ञानज्ञेययोरभेदसमीक्षणम्

तमिमं ज्ञानज्ञेययोर्भेदमसहमाना विज्ञानवादिनो बौद्धा वेदान्तिनश्च प्रत्यवतिष्ठन्ते। क्षणिकमान्तरं विज्ञानमेवैकं मन्तव्यमिति विज्ञानवादिनः। बाह्यं ग्राह्यं नोपपद्यते। तथा हि क्षणिकत्वसाधकयुक्तिभिर्भावस्य क्षणिकत्वं सिद्ध्यति। तत्र क्षणान्तर एव वस्तु अतीतं भवति। तत्रेदं विकल्प्यते-वर्तमानोऽर्थो गृह्यते, अतीतो वा। नाद्यः, वर्तमानेनार्थेन सह चक्षुरादिसंयोगाभावात्। येन सह चक्षुरादिसंयोगो जातः, स तदग्रिमक्षण एव नष्टः। यश्च प्रत्यक्षेण गृह्यते नासाविन्द्रियसंयुक्तः, तथा चान्येन सहेन्द्रियसंयोगोऽन्यस्य प्रत्यक्षमिति व्याहतम्।

अथास्तु द्वितीयः पक्षः, अतीतोऽर्थो गृह्यत इति। सोऽपि न युक्तः, वर्तमानतावभासविरोधात्। चक्षुरादिभ्यो गृह्यमाणोऽर्थो वर्तमान इति भवति। न ह्यतीतं चक्षुषा पश्यामीति भवति, कस्यचिदपि प्रमातुर्धीः। किञ्च चक्षुरादिना ग्राह्योऽर्थोऽवयविरूपः परमाणुरूपो वा। नाद्यः, अवयविन एवानुपपन्नत्वात्। तथा हि प्रत्येकस्मिन् अवयवे अवयवी कार्त्स्न्येन वर्तते, एकदेशेन वा। आद्ये एक एव अवयवोऽवयविना सम्बध्यते नावयवान्तरम्। यदि प्रत्येकस्मिन्नवयवे अवयवी न सर्वात्मना, अपि तु एकदेशेन वर्तत इति द्वितीयः पक्ष आश्रीयते, चेत् सोऽपि न युक्तः। स एकदेशे किमाश्रयीभूतादवयवाद् भिन्नः, अभिन्नो वा। नाद्यः, व्याहतेः। न हि कपाले कपालान्तरेण घट उत्पद्यते। न द्वितीयः, आत्माश्रयात्। न हि स एवावयवः स्वस्मिन् वर्तते। यदि तु नावयवी गृह्यतेऽपि तु परमाणुरूप एवार्थः, सोऽपि नोपपद्यते। तथा हि परमाणूनामतीन्द्रियत्वेन प्रत्यक्षत्वायोगात्। न चातीन्द्रियाणां समूहस्यापि प्रत्यक्षता युक्ता, अतीन्द्रियत्वादेव। यथोक्तम्—

न तदेकं न चानेकं विषयः परमाणुशः।
न च ते संहता यस्मात् परमाणुर्न सिद्ध्यति ।। (विज्ञ., का. ११)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतो न कश्चिद् ग्राह्य उपपद्यते। ग्रहणात्मिका बुद्धिरेव स्वाव्यतिरिक्तामर्थाकारतां बाह्यामिवाभासयति। उक्तञ्च—

नान्योऽनुभाव्यस्तेनास्ति तस्य नानुभवोऽपरः ।
तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते ।। (प्र.वा., २।३२७)

ननु यदि ग्राहकबुद्धेर्व्यतिरिक्तं ग्राह्यन्नास्ति चेत्, कथं ग्राह्यस्य घटादेः पृथक्त्वेनावभासः। अनुभवापलापायोगाद् ग्राह्यग्राहकयोः पार्थक्यमवश्यमङ्गीकार्यमिति चेत्, न, एकस्मिन् चन्द्रमसि द्वित्वावभास इव ग्राह्यग्राहकभेदावभासो भ्रम एवेति स्वीकारात्। न च तादृशभ्रमस्य न किञ्चिन्निमित्तमिति वाच्यम्, अनाद्यवच्छिन्नप्रवाहभेदवासनाया एव निमित्तत्वात्। अत एवोक्तम्—

सहोपलम्भनियमादभेदो नीलतद्धियोः ।
भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाद्वये ।। इति।

अपि च—

विज्ञप्तिमात्रमेवैतदसदर्थावभासनात् ।
यथा तैमिरिकस्यासत्केशचन्द्रादिदर्शनम् ।। (विज्ञ.का.०१)

ननु कथं पुनरसति बाह्येऽर्थे नीलमिदं पीतमिदमित्यादिप्रत्ययवैचित्र्यमुपपद्यते। यतो हि यस्मिन् सत्यपि ये कदाचित्कास्ते सर्वे तदतिरिक्तहेतुसापेक्षाः। यथा सति मयि अविवक्षति, अजिगमिषति विवक्षुजिगमिषुपुरुषान्तरसन्तानाश्रितगमनवचनविषयप्रतिभासा मयि सति कदाचित्कास्ते मद्व्यतिरिक्तपुरुषान्तरसन्तानमपेक्षन्ते। तथा विवादाध्यासिताः प्रत्ययाः शब्दस्पर्शरूपरसगन्धसुखादिविषयाः षडर्थविषयप्रवृत्तिहेतुत्वात् प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञानसन्ताने कदाचिद् भवन्तस्तदतिरिक्तहेतुकाः। एवञ्च सत्यप्यालयविज्ञानसन्तानातिरिक्तः कदाचित्कप्रवृत्तिज्ञानहेतुः न बाह्योऽर्थ इति चेत्, न, वासनावैचित्र्यादेव स्वप्रत्ययासादिताज्ज्ञानवैचित्र्यसिद्धेस्तदतिरिक्तबाह्यार्थसद्भावे प्रमाणाभावात्। तथा चैकालयज्ञानसन्तानपतितेषु कस्यचिदेव ज्ञानलक्षणस्य स तादृशः सामर्थ्यातिशयो वासनापरनामा स्वप्रत्ययासादितः, यतो नीलाकारं प्रवृत्तिविज्ञानं जायते न पीताकारम्। कस्यचित्तु स तादृशो यतः पीताकारं ज्ञानं न नीलाकारमिति। तस्मात्केवलं विज्ञानमवश्यं मन्तव्यम्।

अभेदस्वीकारादेव ज्ञानज्ञेययोः पृथगुपलब्धिर्बाध्यते। यथोक्तं 'सहोपलम्भे'त्यादिना। अभेदस्वीकारे तु ज्ञानज्ञेययोः शब्दान्तरावृत्तिर्दोषः। विस्तारितोऽयं भेदप्रसङ्गे न पुनराकृष्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौगतब्रह्मवादिनोर्विशेषः

सौगतब्रह्मवादिनोरयं विशेषः, यदादिमः सर्वं ज्ञानं ज्ञेयञ्चानिर्वचनीयं वर्णयन्ति। तदुक्तं भगवता लङ्कावतारे—

बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते ।
अतो निरभिलप्यास्ते निःस्वभावाश्च देशिताः ।। इति।

अस्यायमर्थः—आदावन्ते च यन्नास्ति वर्तमानकालेऽपि तन्नास्ति यथा शुक्तिरजतम्। यद्यतो भेदेनास्ति तत्तद्व्यतिरेकेणोपलभ्यते, यथाऽश्वव्यतिरेकेण महिषः। संवेदनञ्च संवेद्यव्यतिरेकेण नोपलभ्यते, अतो न स्वतन्त्रमस्ति इत्यादियौक्तिकबुद्ध्या विविच्यमानानां ज्ञानानां ज्ञेयानाञ्च स्वरूपं नावगम्यते। ज्ञेयेन ज्ञानस्य निरूपणाद्, ज्ञानेन च ज्ञेयस्य निरूपणात् नैकमपि परमार्थम्। अतस्ते ज्ञानज्ञेयात्मना पदार्था निरभिलप्या निर्वचनानर्हा निःस्वभावाः सर्वप्रकारसत्त्वहीनाश्च देशिकैर्देशिता उपदिष्टा इति।

सर्वमनिर्वचनीयमिति ब्रह्मवादिनां वेदान्तिनां मते सर्वशब्दो विज्ञान-व्यतिरिक्ताभिधायी। तथा च सति विज्ञानव्यतिरिक्तं पुनरिदं विश्वं सदसद्भ्यां विलक्षणमनिर्वचनीयमिति ब्रह्मवादिनामुद्घोषः। तथा नेदं सद्भवितुमर्हति, सल्लक्षणं कर्त्तुमशक्यात्। अयं भावः—किन्नाम सत्त्वम्? अविसंवादित्वं वा, अर्थक्रियाकारित्वं वा, असद्विलक्षणत्वं वा। नाद्यः, व्यवहारकाले व्यभिचारात्। न द्वितीयः, स्वप्नकामिनीसन्दर्शनादौ व्यभिचारात्। नान्त्योऽपि, असद्विलक्षणत्वस्य सत्त्वव्यतिरेकेण सद्वादिमतेऽभावाद् इति। नाप्यसदेव, तथा सति लौकिक-विचारकाणां सर्वव्यवहारव्याहत्यापत्तेः। न चोभयोः परस्परविरुद्धस्वभावयो-रेकस्मिन्नसम्भवात्। यथोक्तमपि—

सत्त्वे न भ्रान्तिबाधौ स्तां नासत्त्वे ख्यातिबाधकौ ।
सदसद्भ्यामनिर्वाच्याविद्या वेद्यैः सह भ्रमाः ।। (इष्टसिद्धिः)

न हि ब्रह्मवादिनो नीलाद्याकारां वित्तिमभ्युपगच्छन्ति किन्त्वनिर्वचनीयं नीलादीति। बौद्धा हि विज्ञानस्यान्तरं नीलादिरूपमाचक्षते। विभागमात्रं ज्ञेयाद्याकाराणां परिकल्पितं ज्ञेयादिरूपं बुद्धेर्वास्तवमेव। विज्ञानस्यान्तरं ज्ञेयाकारत्वं नीलादिरूपं भ्रमाद्बाह्यत्वेनावभासते। आकारस्यासत्त्वं बाह्यरूपेण, आन्तररूपेण तु सत्यत्वमेव। एवं हि विज्ञानवादिनां ज्ञानज्ञेययोरभेदो वास्तविकः, वेदान्तिनां त्वारोपित इति विवेको बोध्यः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्तु परैर्ज्ञानज्ञेययोर्भेदसम्बन्धो विषयविषयिभावादिः स्वीकृतः, सोऽपि नोपपद्यते। यतो हि न हि विषयविषयिभावसम्बन्धो सम्बन्धिस्वरूपाद्भिन्नः। भिन्नत्वे सति विषयविषयिभावसम्बन्धः, सम्बन्धिभेदव्याप्तत्वान्न सम्बन्धः। किञ्च विषयविषयिभावस्य सम्बन्धिस्वरूपाद्भेदे तेन सम्बन्धोऽस्ति, उत न? न चेत्, तत्सम्बन्धो न स्यात्। अस्ति चेत्, तस्यापि भेदे सम्बन्धान्तरमित्यनवस्थानात् स्वाश्रयात्मकत्वं सम्बन्धिस्वरूपत्वमेष्टव्यम्। ततो वरं प्रथमसम्बन्धस्य तत्स्वीकरणम्। अन्यथा वैरूप्यप्रसङ्गादिति। एवमेव तुल्यवित्तिवेद्यतया ग्राह्यग्राहकोऽपि न सम्बन्धेनोरीकर्तुं शक्यम्।

भेदाभेदसमीक्षणम्

प्रत्येकपक्षोपजातिदूषणपरिजिहीर्षया केचिज्ज्ञानज्ञेययोर्भेदाभेदमाचक्षते। तं चिखण्डयिषुर्ज्ञानश्रीः प्रत्यवतिष्ठते। तत्र किमयं भेदाभेद उभयसमुच्चयस्वभावः, तदभावरूपो वा? अभावोऽपि प्रसज्यप्रतिषेधरूपः, पर्युदासवृत्त्या वा भावान्तरम्। भावान्तरमपि प्रकृतप्रत्यनीकं भेदाभेदाभ्यां भिन्नं तृतीयं रूपम्, आहोस्विदप्रकृतमेव किञ्चित्।

तत्र प्रथमपक्षे यावेव भेदाभेदौ पृथग्दोषजालकवलितौ तावेव, तदन्यौ वा? नाद्यः, तद्दूषणस्याप्यनुवृत्तेः, अत एव न द्वितीयः, तद्दूषणवद् गुणस्याप्यननुवृत्तेः। न च भेदपक्षभाविपृथक्प्रतीतिदूषणमभेदमुरीकृत्य परिहर्त्तुं शक्यते, भेदेऽपि अभेदाभ्युपगमप्रसक्तेः। किञ्चाभेदस्य पृथगुपलब्धिं बाधमानस्य प्रमाणान्तरावृत्तिशब्दान्तरावृत्तिश्चापद्येयाताम्। यदि चास्याभावस्य समुच्चयात्माभावाद्भिन्नत्वान्न प्रमाणान्तरावृत्तिशब्दान्तरावृत्त्योरापत्तिरिति तथा च पृथगुपलब्धिनिषेधस्याप्यसिद्धिः। न चाभेदस्य पृथगुपलब्धिबाधनमेव फलं न शब्दान्तरावृत्तिः, स्वाभाव्यात्। एवं भेदस्य शब्दान्तरवृत्तिरेव फलम्, न तु पृथक्प्रतीतिप्रसङ्ग इति वाच्यम्, तथा सति भेदाभेदपक्षस्वीकारस्य वैयर्थ्यमन्तरेणैव सिद्धेः।

ननु उभयस्य गुणदोषरूपमुभयं कार्यं दृश्यते। यथा—भेदस्य पृथक्प्रकाशप्रसङ्गो दोषः। शब्दान्तरापेक्षा च गुणः। अभेदस्यापि शब्दान्तरापेक्षा दोषः, अपृथक्प्रकाशो गुणः। अत उभयोर्गुणकार्यं गृहीत्वा कार्यान्तरे प्रत्यनीकप्रहार इति चेत्, अत्रोच्यते—किं कृतोऽयं विभागः स्वीकृतः? भवदभिप्रायानुविधायितया भावानाम्, स्वयमेव वा गुणदोषयोरनुनयपरिहारसम्भवात्, कालभेदसम्भवाद्वा स्वभावयोः कार्याणाञ्च तत्रापि नियतो गुणदोषक्रमोऽनियतो वा? नाद्यः, द्वैताभ्युपगमवैयर्थ्यात्, भेदाभेदयोरन्यतरेणैव दूषणस्पर्शरहितेन गुणमात्रकार्यमर्पयता सिद्धेः। न द्वितीयः, तस्याप्यात्मोपकारापकारिणि चैतन्य एव सम्भवात्। न

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाचेतनशब्दकरणकलापव्यापारवदभिप्रायानुवृत्तिः स्वभावादेव भवति। अर्थाद् यथाऽचेतनेन शब्देन इन्द्रियग्रामेण चाभिप्रायानुवृत्तिः स्वभावादेव ज्ञायते, तथाऽत्रापीति वाच्यम्, एकस्यैव व्यापारस्य तथा स्वभावकल्पनेन सिद्धेः, द्वैतपरिग्रहाग्रहात्।

नापि तृतीयपक्षोऽपि क्षोदक्षमः। तथा हि, स्वभावयोः कालभेदोऽभ्युपगम्यते। यदा भेदो न तदा अभेदः, यदा चाभेदो न तदा भेदः। एवञ्च न कदाचित्परस्याभावाद् दोषपरिहारः। ननु यथा भिन्नमभिन्नं वा वस्तु स्यात्, तत्र पर्याया न विहन्यन्ते,[1] तथैव स्वभावयोः कालभेदे दोषपरिहारो न शक्यः, प्रतिद्वन्द्विनोरभावात्। न चासमानकालिकत्वात् प्रतिद्वन्द्विनोरन्यस्याभावादेकस्य दोषपरिहाराभावेऽपि भाविना तु निषेधः कथं न स्यादिति वाच्यम्, अवस्तुत्वात्। न च कार्यभेदमादाय भेदो यावत् शब्दान्तरवृत्तिमाधाय प्रतिभासभेदमाधातुमुत्सहते, तावदेवाभेदेनोपनियता प्रतिबध्यत इति युक्तम्, प्रमाणाभावात्। स्यात् चेत्, क एवं न्यायविहस्तं हस्तसमारचितं वस्तु प्रस्तोतुमर्हति साहसैकभुवं भवन्तमन्तरेण। वस्तुनः स्वभावयोः कालभेदस्तावद् दुर्लभं नास्ति, किन्तु कार्यकालभेदेन। तथा चैकस्मात्कार्यादनन्तरं जायमानं कार्यं तस्यैव वस्तुन इति नात्र कथितुं शक्यते, एकस्वभावप्रतिबद्धे वस्तुनि तदसम्भवात्। तत्रापि नियतो गुणदोषाभिमतकार्यकरणक्रम इत्यहो भवत इष्टकामतापहतहृदयस्य व्यामोहापस्मारः।

अपि च यदा भेदस्य पश्चादभेदाभ्युपगमः, तदा पृथगुपलब्धिं बाधमानस्याभेदस्य द्वितीयं दोषकार्यं प्रमाणान्तरावृत्ति शब्दान्तरावृत्ति च केन निवार्यताम्? न भेदेनेति। विकल्पासहत्वात्। तथा हि, प्राक्तनेन तेनैव भेदेन, अन्येन वोत्तरकालभाविना निवार्यते। नाद्यः, तयैव शक्त्याऽभेदेनोपनीयमानापृथक्प्रतिभासस्यापि बाधात्। न च पूर्वापेक्षयोत्तरस्यापवादकत्वम्, पूर्वस्यापवादकत्वाभावे प्रमाणाभावात्, अतो गुणदोषमुभयमुभयकार्यत्वाद् भेदाभेदयोरेकप्रतिनियतः परिहारः स्वीकारो वेत्यनिबन्धनमत्र। ततः पृथक्प्रतिभासाप्रतिभासौ सहोत्पत्त्यनुत्पत्ती शब्दान्तरवृत्त्यवृत्त्यादयश्चैकस्यैकदा प्रसज्येरन्। न च कार्याद्युभादिभेदे (विकारे) उपाधिमतो वस्तुनो भेदेना(विकारेणा)नुभवगन्धोऽपि समस्ति। यथा नैयायिकादीनां मते व्यक्तिविनाशे विनाशलेशोऽपि सामान्यस्याभ्युपेयते। व्यक्तिरूपेण विकारेऽपि निजेन (सामान्येन) रूपेण विकाराभावादेव च विशेषणानां सार्थक्यम्। अन्यथा भेदमनुभवतोऽभावे भेदकानां

१. दिगम्बरमतेन, द्रव्यपर्यायरूपेण उत्पत्तिस्थितिप्रलयात्मको भावग्रामः स्वीक्रियते। तत्रावस्थासु सकलासु अनुगतस्वभावं द्रव्यमाचक्षते। यथा—केयूरकटककुण्डलाद्यवस्थासु अनुयायि सुवर्णम्। सद्द्रव्यात्मनि उत्पादव्ययधर्मकाः पर्यायाः। यथा सत्यपि द्रव्ये जायमाना व्ययमानाश्च केयूरादयः। (अनेकान्तवादः, बौद्धतर्कभाषायाम्, परिशिष्टम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशेषणानामानर्थक्यं स्पष्टम्। निजस्यैव रूपस्य च भेदाभेदचिन्ता तस्य च न रूपान्तरं सम्भवतीति निरुपाधयो धर्माः सिद्ध्यन्ति। अतः सौत्रान्तिकानुसारं ज्ञानरूपोपाधिभेदेनापि न भेदाभेदः सुसाध्यः।

ननु भिन्नयोरभेदे न शब्दान्तरवृत्तिर्दोषायेति चेत्, न, भिन्नोपाधेर्भिन्नप्रकाशाभावाद् एकान्तवादेऽपि दोषाभावात्। तेनैव सिद्धे भवत्परिश्रमोऽतिरिच्यते, आहोपुरुषिकेयञ्च। नन्वेकान्तवादे भेदपक्षोपनिपातिदूषणमभेदेनाभेदपक्षोपनिपातिदूषणञ्च भेदेन परिहर्त्तुं न शक्यत इति चेत्, न, पूर्वोक्तरीत्या भवत्पक्षेऽपि अनवस्थाया गुणकार्यस्यापि च बाधकत्वापत्तेः। किञ्च भवतोपनीयमानो धर्मो बाधकः साधको वा न स्वसामर्थ्येनैव वक्तुं शक्यम्, न हि जीवनाय भक्ष्यमाणं विषं न हिनस्तीति वक्तुं शक्यम्। तस्मादुभयतः स्पाशा रज्जु(भौतार्गलयुगल)-समानमेतदुभयदोषपरिजिहीर्षयोभयपक्षालम्बनं मन्दबुद्धीनामिति।

न हि केवलं तर्कबुद्ध्यैवापि तु अनुमानप्रयोगेणापि उभयपक्षपातिदूषणे आपादयितुं शक्येते। तथा हि प्रयोगः, भेदाभेदपक्ष उक्तदोषग्रस्तः, तन्निमित्तत्वात्, सम्प्रतिपन्नवत्। यद् यन्मात्रनिमित्तं तत्तस्मिन् सति भवत्येवेति व्याप्तिः। यथा चक्षुरादिसामग्रीमात्रनिमित्तं ज्ञानजन्म। भेदाभेदमात्रनिमित्तं चोक्तदोषजातमिति स्वभावहेतुः। ननु तन्मात्रनिमित्तत्वमस्तु उक्तदोषजातं माऽस्तु इति व्यभिचारशङ्काया बाधकस्तर्कः क इति जिज्ञासायामुच्यते—'तन्मात्रनिमित्तत्वमन्यानपेक्षत्वेन व्याप्तम्' इति। अर्थाद् यत्र यत्र तन्मात्रनिमित्तत्वं तत्र तत्रान्यानपेक्षत्वमिति। सामानाधिकरण्येनेयं व्याप्तिः। उक्तशङ्कया तन्मात्रनिमित्तत्वं यदि दोषजातं व्यभिचरेत्तदा अन्यानपेक्षत्वमपि अपेयात्। तथा हि, सति तन्मात्रनिमित्तत्वे असति च दोषजाते दोषजातनिमित्तमन्यानपेक्षत्वं न स्यात्, किन्तु तद्विरुद्धमन्यापेक्षत्वमेव स्यादिति व्यापकविरुद्धोपलब्ध्या विपक्षान्निवर्तमानं तन्मात्रनिमित्तत्वं दोषजात एव नियम्यते, न तदभावे। अस्यायं विस्तारः—विपक्षे यदि दोषाभावोऽस्ति तदा दोषजातस्य निमित्तं यत्तन्मात्रनिमित्तत्वमन्यानपेक्षत्वम्, तदतिरिक्तं किमप्यन्यन्निमित्तमवश्यमेवास्ति यस्य भावे दोषजातं नावतरति। न हि यतः कदाचिदपि सति निमित्ते कार्याभावो दृश्यते। तच्च निमित्तान्तरमन्यापेक्षत्वमिति। एवञ्च दोषाभावावस्थायाम्, विपक्षे अन्यापेक्षत्वं सदन्यानपेक्षत्वं निवर्तयति। तथा चात्रानुमानाकारः—विपक्षे नात्र तन्मात्रनिमित्तत्वम्, अन्यापेक्षत्वात्। एवञ्चानुपलब्ध्या हेतोरव्यभिचारसिद्धौ व्याप्तिसिद्धिः। न च हेतोः स्वरूपासिद्धिः, न ह्यभेदमात्रातिरिक्तं शब्दान्तरावृत्तेः, पृथक्प्रकाशस्य च भेदमात्रातिरिक्तं निमित्तमुपपद्यत इति शम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामाजिकन्यायव्यवस्थानुशीलनम्

डॉ. गिरीशदत्तपाण्डेयः
प्राध्यापकः (अंशकालिकः)
साहित्यविभागे
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी

❀ ❀ ❀

समाजे साम्य-स्वातन्त्र्य-बन्धुत्वभावस्थापनार्थमनेके वादाः प्रवर्त्तन्ते। विविधान् दर्शनवादानाश्रित्य विविधा व्यवस्थाः प्रत्यहं समनुष्ठीयन्ते। व्यवस्थाया आधारनिर्णये सत्यपि मतभेदे, साम्यादिविषये विद्वांसः संवादशीला एव। साम्यादित्रयात्मकः संवादबिन्दुः सामाजिकन्यायविषये विचारशृङ्खलाया रमणीयां परिपाटीमाटीकते। विविध-वर्ण-सम्प्रदाय-वर्ग-जाति-दर्शन-भाषा-वेश-प्रान्त-रूढिग्रस्तत्वादनेकत्वाक्रान्तोऽयं 'मानवसमाजः' समञ्जसः स्यादिति सर्वेषां सामाजिकार्थिकराजनैतिकवैज्ञानिकानां शिवः सङ्कल्पः।

न्यायः सर्वेषामभिलाषाविषयः। न केवलं मानवा एव, कीट-पतङ्ग-पशु-पक्षि-सरीसृप-वृक्षाद्या स्थावरा अपि न्यायं कामयन्ते। लोकसंवृतं पारमार्थिकं च सद् न्यायान्नातिरिच्यते। अभ्युदय-निःश्रेयसशब्दावपि नागार्जुनमतमनुकूलयतः। लोकसंवृत-सत्यस्वरूपः 'सामाजिको न्यायः' प्राचीनार्वाचीनसमाजशास्त्रिणां प्रमेयभूतः प्रमाणैः परिशीलनीयः। अधर्मनिरपेक्षश्चायं लोकसंवृतसत्य-स्वरूपः सामाजिको न्यायः कथं धर्मनिरपेक्षतामासादयितुमलमित्यपि मार्मिकविमर्शविषयः।

पूर्वपक्षोपक्षेपः

सामाजिकन्यायव्यवस्थाया आधारनिर्णये सन्ति वादिनां विप्रतिपत्तयः। श्रुतिस्मृतिपुराणेषु समाजव्यवस्थासमानार्थतया प्रयुक्तं 'वर्णव्यवस्था'पदं विश्वविश्रुतमपि विवादग्रस्तम्। मन्वादयः समाजवैज्ञानिकाः समष्टि-व्यष्टिहितानि पुरस्कृत्य यां सामाजिकार्थिकन्यायसरणिं व्यवस्थापितवन्तः, सेदानीन्तनैः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाजवैज्ञानिकैर्नाद्रियते। व्यवस्थेयं वैज्ञानिकी न वा? किमाधारा च सेत्यनिश्चितप्रायम्। वर्णव्यवस्था प्राचीना वा मध्ययुगीना वा? वैदिकी चेच्छोषणमूला, ततश्चोपेक्षणीया। अवैदिकी चेत्, व्यवस्थान्तराण्येव कथं नानुष्ठेयानि? न हि वर्तमानो मानवसमाजः सर्वात्मना वेदप्रामाण्यमाश्रयति। केचित् ख्रीस्तीयाः, अपरे मोहम्मदीयाः, इतरे ईश्वरवादिनः, अन्ये अनीश्वरवादिनः।

'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'। (कणादः)

'द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना।

लोकसंवृतसत्यं च सत्यं च परमार्थतः ।। (नागार्जुनः)

केचिद् धर्मनिरपेक्षाः, अन्ये धर्मसापेक्षाः, अपरे अधर्मनिरपेक्षाः। केचिद्वर्णजातिधर्मसापेक्षां समाजव्यवस्थामाक्रमणकारिभिरार्यैरारोपिताम्, केचिच्च वर्णव्यवस्थां वेदप्रतिपादितामागूरयन्ति। केचन व्यवस्थामिमां कालबाह्याम्, केचिच्च स्वाभाविकीमपि स्वीकुर्वन्ति।

'वर्णव्यवस्था कालबाह्या, अनार्याणां शोषकैरार्यैरानीतेति वदन्तः स्वस्वपक्षसमर्थने श्रुति-स्मृति-पुराण-रामायण-महाभारतादिवैदिकग्रन्थानां सन्दर्भान् प्रमाणत्वेनोपस्थापयन्तः प्रतिपक्षिभिरुपस्थापितानां तत्तद्ग्रन्थसन्दर्भान्तराणां स्वसमीहाविषयीभूतार्थप्रतिकूलत्वेन प्रक्षिप्तत्वमुद्घोषयन्ति।

'आर्या भारतीया एवेति वदन्तोऽपि स्वस्वपक्षसमर्थने स्वाभिप्रायप्रतिपिपादयिषया वेद-पुराण-रामायण-महाभारत-मन्वादिधर्मशास्त्रीयग्रन्थसन्दर्भानुपस्थापयन्त आर्याभियानवादिभिरुपस्थापितसन्दर्भान् प्रक्षिप्तानुद्घोषयन्ति।

अधर्मनिरपेक्षास्तु आर्यपदस्य सज्जनापरपर्यायत्वमेवाङ्गीकुर्वन्तो जातिबोधकत्वमेव नाङ्गीकुर्वन्ति, वर्ण-जाति-वर्ग-सम्प्रदायादिभेदानौत्सर्गिकानेव च मन्यन्ते। व्यवहारदशायां भेदं स्वाभाविकं मन्यमाना अपि परमार्थदशायां ब्रह्मव्यतिरिक्तं न किञ्चनेति वेदादिसच्छास्त्रप्रतिपादितमेव मन्यन्ते। अनादिलोकप्रवाहसिद्धान् स्वाभाविकान् भेदानुद्दिश्यैव यथाधिकारं शास्त्रेषु कर्तव्याकर्तव्यचोदनेति यथायथं साधयन्ति।

अधर्मनिरपेक्षसमाजवैज्ञानिकाः श्रुतिस्मृतिपुराणरामायणमहाभारतादिग्रन्थानामानुपूर्वीपरिवर्तन-राहित्य-साहित्यकृतमन्तरमभ्युपयन्तः 'अर्थैकत्वादेकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाक्यं साकाङ्क्षं चेद् विभागः स्यात्' इति न्यायेनार्थैक्यप्रतिपादकत्वाच्छ्रुति-स्मृतिपुराणरामायणमहाभारतादीनामेकग्रन्थत्वमुपपादयन्ति। अवान्तरं तात्पर्यमस्तु नाम विविधाभीष्टसिद्ध्यौपयिकेषु प्रकामम्।

'वैदिकवाङ्मये प्रक्षेपवादः' तेषामप्रामाण्यप्रतिपादकप्ररोहेष्वन्यतमो वैदिक-वाङ्मयानुशीलिनां गम्भीरमीमांसाविषयः। सामाजिकन्यायव्यवस्थानुशीलनक्रमे प्रक्षेपसमस्या विशेषरूपेण विवेचनाविषयीभवति। श्रीरघुनन्दनशर्मविरचिता वैदिकसम्पत्तिः, श्रीपार्जिटरमहोदयस्य पुराणविषयको ग्रन्थः, रामायणविषये कामिलबुल्केमहोदयस्य 'रामकथा' एम.ए.म्यूरकृतं मूलसंस्कृतोद्धरणं' प्रभृतयो ग्रन्थाः प्रक्षेपपक्षं साटोपमुपवर्णयन्ति।

ऐतिहासिका वैदिकग्रन्थेषु समुपलब्धसन्दर्भाणां यथाश्रुतं कर्तृत्वं नाङ्गीकुर्वन्ति। दीर्घतरकालान्तरालेष्वाविर्भूतैर्यथावसरं स्वनिर्मितसन्दर्भयोजनाद् रामायणमहाभारतादीनामनेककर्तृत्वं तेषां मते सिद्ध्यति। तेनाधर्मनिरपेक्षसमाज-वैज्ञानिकनिकायाभिमतमेकवाक्यतामतं सत्प्रतिपक्षितं भवति।

यदि तु वर्णजातिसमनियता समाजव्यवस्था आर्यैरानीता, तदा सा सिन्धुसभ्यतोन्मूलनानन्तरमेव सम्भवति। स च काल ई.पू. ३०००-२५०० वर्षात्मकः। अयमेव श्रुतिस्मृतिपुराणरामायणमहाभारतादीनां निर्माणकालः। केचिदृग्वेदमेतत्पूर्वमारचितं मन्वते।

प्राङ्महाभारतीयसमाजव्यवस्था

भौतिकसाम्यवादिमतम्

सामाजिकन्यायस्य विकासप्रक्रियायां महाभारतपूर्व-पश्चात्कालीनयोः प्रवृत्योरन्तरं वर्त्तते। महाभारतप्राक्कालिकभारतीयसामाजिकन्यायव्यवस्थाविषये भौतिकसाम्यवादिनां मतमस्ति यत् सामूहिकोपभोगशीले प्राचीने भारतीये समाजे उत्पादनादिक्रियाणां भेदे विकासमुपगते श्रमविभागमूलिका वर्णजातिसमाजव्यवस्था प्रादुर्भूता। तदानीमेव वर्णकर्तव्यानि निर्धारितानि, तथापि तत्रोत्पादनं फलभागश्च सामाजिकावेव न प्रातिस्विकौ।

वैयक्तिकसम्पत्तिदासप्रथाप्रवेशानन्तरमेव सबलैर्निर्बलानां शोषणम्। एवमियं शोष्यशोषकभावमूला, वर्णजातिसापेक्षा सामाजिकन्यायव्यवस्था नाति-प्राचीना। इयं समाजव्यवस्था प्रायो द्विसहस्रवर्षेभ्यः स्थिरीभूता। तदीयाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मकाण्डीया विधयः संस्काराः प्राचीनक्रान्तीरुज्जीवयन्ति। परं प्राचीन-व्यवस्थाभङ्गेन तद्भङ्गोऽप्यनिवार्यः।

अर्थसापेक्षवादः

मतेऽस्मिन् उत्पादनसाधनविकासेन वितरणप्रणाली परिवर्तते। विकासशीलेऽस्मिन् मानवसमाजे तत्तत्कालीना अर्थव्यस्था एवाधारभित्तयः। येषां मानवानामुत्पादनसाधनपरिवर्त्तनेऽधिकारः, येषाञ्च वितरणव्यवस्था-परिवर्त्तनेऽप्यधिकारः, एतेषामेव सामाजिकन्याय-नियम-व्यवस्था-परिवर्त्तनेऽप्यधिकारः, नवीनविधाननिर्माणेऽपि तेषामधिकारः। शास्त्रीयसमाज-व्यवस्थाविषयकनियमपरिवर्त्तनाभ्युपगमेन शाश्वतवादः प्रत्याख्यायते। ततश्च सामाजिकव्यवस्था अर्थसापेक्षा भवितुमर्हतीति स्पष्टमायाति। आर्थिकपरिस्थितिरेव सामाजिक-नियम-न्यायव्यवस्थामपि परिवर्तयति। परिवर्त्तमाने समाजे नैवैकोऽपि नियमः शाश्वतिको भवति।

एतन्मतानुसारेण वेदेषु विविधाः कल्पनाः, स्वप्नाः, पूर्वजानां वन्यावस्था जीवनप्रणाली वर्णिता। ज्ञानविज्ञानविकासात् पूर्वमर्धवन्यावस्थायां निर्मितेषु वेदमन्त्रेषु स्वैरकल्पनाः सन्ति। सर्वेष्वपि वैदिकग्रन्थेषु तादृश्यः कल्पनाः, ता एव पौराणिक्यः कथाः। सामाजिकसम्बन्धाभिव्यक्तिरेव तासां तत्त्वम्।

एतन्मतरीत्या आर्यैः ख्रीस्तीयत्रिसहस्रवर्षेभ्यः प्राक् सिन्धुतटवर्तिमूल-निवासिनामुन्मूलनं विधाय वर्णजाति-व्यक्तिगत-सम्पत्ति-परिवार-दासप्रथाः समानीताः। ततः प्राग् भारते 'वर्गविहीनसमाजव्यवस्था' आसीत्। तदानीमेव गणतन्त्र-मपहाय राज्यतन्त्रस्याविर्भावः। महाभारतयुद्धात् पूर्वं शूद्रदासादीनां कठोरदमन-मासीत्। दशरथकाले प्राचीनगणतन्त्रव्यवस्था समापिता। गणानामान्तरिक-विरोधमुपजीव्यैव रामस्य गणतन्त्रविरुद्धं परितोऽभियानम्। 'रामस्य शासनं प्राङ्-महाभारतीयदासशासनतन्त्रेष्वन्यतमम्' इति स्व.श्रीपाद-अमृतडाँगेप्रभृतीनां मतम्।

रामस्तस्मिन्नादियुगे प्रादुर्भूतो यदा भगिनी-भ्रातृ-पितृदुहितृयौनसम्बन्धा वैधा अभवन्, ऋग्वेदीययमयमीसूक्तमैतरेयकाण्वमाध्यन्दिनीयशतपथब्राह्मणादौ तथोपलम्भात्। राम-रावणयुद्धं महाभारतयुद्धात् पञ्चशतवर्षेभ्यः पूर्वमभवत्। केचिद् विपरीतमेव प्रतिपादयन्ति। एवं वेदोपनिषद्-रामायण-महाभारत-स्मृति-धर्म-गृह्य-सूत्र-गीतकाव्यनाटकादीन्याश्रित्य प्राङ्महाभारतयुगीयसामाजिकन्याय-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नियमवितरणोत्पादनप्रणाली-आर्याभियान-वर्णजातिप्रथोन्मुक्तयौनाचारादिकं सामाजिकवैज्ञानिकाः साधयन्ति।

एते सर्वेऽपि सामाजिकराजनीतिकविशारदा विविधभङ्ग्यन्तरै-र्वैदिकवाङ्मयस्य ऐतिहासिकस्वरूपाण्यप्युपस्थापयन्ति। शोषणमुक्तजातिविहीन-समाजनिर्माणार्थं वर्तमाने वैज्ञानिकयुगेऽर्थव्यावस्थायामाक्रामकैरार्यैरानीता वर्णजातिमयी सामाजिकनियमन्यायव्यवस्था यया कया वा रीत्या परिवर्तनीयेति वदन्ति। एवमवैदिकार्धवैदिकसमाजवैज्ञानिकानां वैदिकवाङ्मये सामाजिकन्याय-व्यवस्थाविषयकमतोपक्षेपसंक्षेपः।

उत्तरपक्षोपक्षेपः

पशूनां सङ्घः समजः। मनुष्याणां सङ्घः समाजः। पशुमानवयोराहार-निद्राभयमैथुनादिसाम्येऽपि किञ्चिद् व्यावर्त्तकं तत्त्वं विद्यते। अन्यूनोऽनतिप्रसक्तश्च कश्चन गुणो द्रव्ययोः पार्थक्यं प्रयोजयति। सजातीयत्व-विजातीयत्व-निर्णायका इतरव्यावर्त्तका गुणा नित्यद्रव्यवृत्तयो विशेषास्ते चानन्ताः। वैशेषिकं दर्शनं कणादमुन्युपज्ञं विषयेऽस्मिन् प्रवृत्तम्। परमाणुदर्शनमपीदमेवेति 'भौतिकसाम्यवादे सामाजिकन्यायव्यवस्था'-पक्षसमीक्षावसरे, एवागैड्रो-डाल्टन-नाइल्सबोर-कणाद-गौतम-कपिलमतानां सङ्ग्रहो मीमांसा च कर्त्तुं शक्यते। पृथ्वी-जल-तेजोवायु-परमाणूनां परस्परोपमर्दाद् बीजाङ्कुरवत् चेतनोत्पत्तिवादः, विकासवादः, सृष्टेराविर्भावप्रयोजकानां दृष्टादृष्टतत्त्वानां मीमांसा, विषमताया मूलविवेचन-प्रभृतिविषयाः, साम्यस्वातन्त्र्यबन्धुत्वाद्याः सर्ववादिसम्मतसामाजिकन्यायव्यवस्थादृशा विवेचनीयाः।

एकस्मात् पदार्थादपरपदार्थस्य वैशिष्ट्याधायकं तत्त्वमेव धर्मः। 'व्यष्टीनां समष्टिः समाजः'। समाजे सापराधा निरपराधाः, सधना निर्धनाः, अस्त्रीकाः सस्त्रीकाः, प्रबला निर्बलाः, अपुत्रा बहुपुत्राः, ह्रस्वाकारा दीर्घाकाराः, कृष्णाः गौराः, कृशाः स्थूलाः प्रत्यक्षमीक्षन्ते। शुक-पिक-गज-सिंह-श्वा-शूकर-शृगाल-मूषक-मार्जार-गो-महिष-मृग-वानरादियोनयो गुण-कर्म-स्वभावैर्भिद्यन्ते, न न भिद्यन्ते। प्राणित्वावच्छेदेन साम्येऽपि मानवत्वावच्छेदेन, पशुत्वावच्छेदेन च वैषम्यं को निवारयेत्? पिपीलिकायाः शोषणं कृत्वा गजः स्थूलीभूत इत्युपहासास्पदमेव।' ततश्च वैषम्यवैशिष्ट्यापरपर्यायं प्रतितिष्ठति। प्राणिषु यत्किञ्चिद्धर्मा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वच्छेदेन साम्यम्, यत्किञ्चिद्धर्मावच्छेदेन च वैषम्यमनपह्नवनीयम्, न नापह्नवनीयम्।

वर्गसम्प्रदायाकृति-भाषा-वेश-विचाराचार-संस्कार-गुण-स्वभाव-कर्मयोनिकृतं वैषम्यं भौतिकसाम्यवादेऽपि कथमपलाप्यम्? संसारे भौतिकान्यभौतिकानि च तत्त्वानि परस्परविरुद्ध-गुणकर्मस्वभावैर्विषमाणि भवन्त्येव। राज्यशतेनापि वैषम्योन्मूलनमसम्भवम्। वैदिकसन्दर्भान् पुरस्कृत्य 'पुरा सर्वमेव सामाजिकमभूत्' आर्थिकविकासक्रमेण 'बलवद्भिर्निर्बलानां शोषणेनैव व्यक्तिगतसम्पत्तिपरिवार-जातिप्रथा-धर्मसंस्कृतिसभ्यताविकासेन सामाजिकी विषमता समुत्पन्ना इत्याद्यापादनं तत्तच्छास्त्रीयसन्दर्भाभिप्रायानवबोधविजृम्भितम्।

आर्यत्वं गुण एव न जातिः। आर्याख्यां जातिमुपकल्प्य तेषां बर्बरत्व-शोषकत्वाक्रामकत्वाद्यापादनमपि वैदिकसन्दर्भविरुद्धमेव। वेदादिशास्त्राणामाविर्भावः, सम्प्रदायपौर्वापर्यम्, ऐतिहासिकविकासक्रमकर्तृत्वार्थावधारण-प्रक्रियादिविषये यदुक्तं तत्सर्वमपि वैदिकपौराणिकसन्दर्भाणामेकवाक्यता-प्रतिपादनरीतिपरिज्ञानाभावमूलकमेव। श्रुतिस्मृतिपुराणानां शोषणात्मकव्यवस्था-विधायकत्वमपि नैव विचारसहम्।

समाजे, प्रकारविशेष एव, विधानविशेष एव, संस्कारविशेष एव, उपासनाविशेष एव, वर्गविशेष एव, सम्प्रदायविशेष एव, भाषाविशेष एवेत्यादि-रूढिकृताहङ्कारमूलक-स्वार्थभावना प्रजातान्त्रिक-साम्य-स्वातन्त्र्यबन्धुत्व-सर्वधर्मसमभावादिभावनाप्रतिकूला, वर्गविद्वेष-वर्गसङ्घर्ष-वर्गविध्वंसादिक्रिया-प्रतिक्रियापरस्परोपमर्दविरोधजनिकेति पर्यन्ते मात्स्यन्यायजन्यातङ्काराजकता-पर्यवसायिनीति मध्यकालीनेतिहासपर्यालोचनया स्पष्टीभवति। अचेतनवादे कर्मफलतारतम्यं नाभ्युपेयत इत्यकिञ्चित्करमेव। वैदिकदर्शने प्राणिनां कर्मफल-वैचित्र्यमभ्युपेयते। यस्तु कर्मफलतारतम्यं नाभ्युपैति स जगद्वैचित्र्यं निषेधति। पृथिव्यादिचतुष्कसंयोगाच्चेतनोत्पत्तिः, मधूक-गुड-जलादिसंयोगजमदशक्तिवदिति मतेऽपि चेतनाख्यमभौतिकं तत्त्वं यावद्देहभावि स्वीक्रियत एव। 'अथ चैनं नित्य-जातमि'ति गीतायामभ्युपगमन्यायेनालोचितोऽयं पक्षः।

न हि चेतनानधिष्ठिता अर्थक्रियाकारिता जडे दृश्यते। वायुयानादावप्यर्थक्रियाकारिता चेतनाधिष्ठितैव विलोक्यते। स चेतनो वैदिकदर्शने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'जीवः' विभुर्नित्यः। यावद्देहं जीवो नित्य इत्यत्र कस्यापि विमतिर्नैव सम्भवति। शर्कराफलजलक्वाथजमदशक्तिवदभिव्यक्तिवादेऽपि ममायं पुत्रः ममायं देशो ममेयं प्रेयसीति प्रतीतिरप्रत्यूहैव। एवमेव ममेदं शरीरं स्थूलं कृशमिति प्रतीतिः सर्वसाधारणी। अहं समाजः, अहं देशः, अहं न्यायालयः, अहं संविधानमहमेव सर्वमिति प्रतीतिर्भ्रान्तिरेव। वैदिकसमाजदर्शने यथा 'अहं ब्रह्मास्मि' तथैव 'तत् त्वमसि' 'आत्मा वास्यमिदं सर्वम्' इति चौपनिषन्नयः। अधर्मनिरपेक्षसामाजिक-न्यायप्रक्रियायामुपर्युक्तं नीतिनिर्देशकं वैदिकं वाक्यं 'महावाक्य'संज्ञया विभूषितम्। तुरीयावस्थायां सर्वं शून्यं वापूर्णं वा आनन्दमनानन्दं वा, भवतु नाम प्रकामम्। व्यावहारिकभेदानङ्गीकारे साम्यस्वातन्त्र्यबन्धुत्वाद्याः प्रजातान्त्रिकसामाजिकनियम-न्यायव्यवस्था अनुपपद्येरन्। अधर्मनिरपेक्षसामाजिकन्यायव्यवस्थायां सर्वप्राणिनां धारण-पोषण-रक्षण-शिक्षण-विकास-व्यवस्था, परस्परविरुद्धस्वभावानां तत्त्वानां समन्वयेन सहास्तित्वम्, वैचारिकं स्वातन्त्र्यमार्थिक-धार्मिकसंरक्षणार्थविधयः समाम्नाताः।

अधर्मनिरपेक्षसमाजव्यवस्थायां व्यक्ति-समाज-राज्यानामार्थिकसत्ताया विकेन्द्रीकरणप्रक्रियाविधानेन परस्वत्वापहरणपरवृत्त्युच्छेदादिनिरोधेन परस्परं पोष्यपोषकभावनासामञ्जस्येन सामाजिकन्यायसौलभ्यमेव। 'रामादिवद् वर्तितव्यं न रावणादिवत्' इत्यधर्मनिरपेक्षसामाजिकन्यायव्यवस्थाया आधारभूतः सिद्धान्तः। नयेऽस्मिन् भेदेषु सत्स्वपि सामाजिकार्थिकाधिकाराणां परस्पराविरोधेन समन्वयार्थं देशकालपात्रयोग्यताविधिप्रमाणाद्यविरोधेन व्यवस्था विहिता।

वैदिकग्रन्थेषु शोषणमेव समर्थितमिति वेदादिशास्त्राणां परस्पराविरोधेनार्थ-निर्धारणशैलीतत्त्वानवबोधनिबन्धनमात्रम्। परस्वत्वापहरणं तु अनार्यचेष्टितमेव नार्यधर्मः। सबलाः सधना एव निर्बलानां पोषणार्थं समर्थाः। यतोऽभ्युदयनिःश्रेयस-सिद्धिः, स धर्मः, लोकसंवृत-परमार्थसत्स्वरूपः, धारितो धारयति, मारितो मारयति। तदुक्तम्—

धारणाद्धर्म इत्याहुर्धर्मो धारयति प्रजाः।
यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः।। (म.भा.शा.प.)

'धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदति। तस्माद् धर्मं परमं वदन्ति'।। इति। (तै.सं.कृ.य.वे.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखस्य मूलं धर्मः, धर्मस्य मूलमर्थः, अर्थस्य मूलं राज्यम्। तच्चाधर्म-निरपेक्षमेवेति तन्मूलैव सामाजिकार्थिकन्यायव्यवस्था। अधर्मनिरपेक्षराज्यमेव धर्मसापेक्षपक्षपातविहीनत्वान्मात्स्यन्यायमपाकृत्य शोषणं वारयितुमलम्। समाजे वैषम्यनियन्त्रणेनार्थिक-सामाजिक-साम्प्रदायिकापराधिकतत्त्वानां कण्टकशोधनमन्तरा साम्यबन्धुत्व-स्वातन्त्र्यभावनाविकासोऽसम्भवः।

अवैधार्थकामाभिनिवेशो मात्स्यन्यायमूलम्। सामाजिकन्यायश्च लोकसंवृतसद्धर्ममूलः। आर्थिकं शोषणं सामाजिकविषमताया मूलम्। मात्स्य-न्यायप्रतियोगितया सामाजिकन्यायव्यवस्थार्थं 'सामाजिकन्यायव्यवस्थाया वैज्ञानिकमनुशीलनम्' तुलनात्मकसमाजविज्ञानक्षेत्रे महोपकारायेति तदर्थमेष यत्नः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बौद्धनये निर्वाणस्वरूपविमर्शः

डॉ. देवीप्रसादद्विवेदी

प्राध्यापकः
भाषाविज्ञानविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ।। (गीता. २।७४)

तत्र निर्वाणशब्दस्य कोऽर्थः? इति जिज्ञासिते विचार्यते—निवारणं निर्वाणमज्ञानरूपावरणरहितं चैतन्यं मोक्ष इत्यर्थः। यथा—स्थित्वास्यां स्थितौ ब्राह्म्यां यथोक्तायामन्तकालेऽन्ते वयस्यपि ब्रह्मनिर्वाणं ब्रह्मनिवृत्तिं मोक्षमृच्छति। किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावतिष्ठते, स ब्रह्मनिर्वाणमृच्छतीति तत्र शाङ्करभाष्यः। परलोकादिगमनागमनराहित्यम्। यथा—निर्गतं वानं गमनं यस्मिन् प्राप्ये ब्रह्मणि तन्निर्वाणम् (गीता-२।७२ नी.) निर्वाणं जीवन्मुक्तस्वभावः। यथा—निर्गतं वानं गमनं यस्मिन्नित्यर्थोऽपि तावदयं शोकमोहाभिभूतत्वरूपः स्वभावो नोचितः; किन्तु जीवन्मुक्तस्वभाव एवेति (तत्रैव भाष्यो०)। ब्रह्मणि लयः। यथा—एनां परमेश्वराराधनेन शुद्धान्तःकरणः पुमान् प्राप्य न विमुह्यति पुनः संसारमोहं न प्राप्नोति। यतोऽन्तकाले मृत्युसमयेऽप्यस्यां क्षणमात्रमपि स्थित्वा ब्रह्मणि निर्वाणं लयम् ऋच्छति प्राप्नोति (तत्रैव श्राधरी)। अत्यूर्ध्वलोकप्राप्तिरिति जैनाः। दुःखक्षयः। निर्गतं वानं दुःखं यत्रेति बौद्धाः।

तत्र बौद्धनये निर्वाणस्य किं स्वरूपमिति विचार्यते। तत्र निर्गतो वाणः शरीरपरम्परा यतस्तन्निर्वाणं मोक्षः। गतिनिमित्ताद् वाणशब्दः स्कन्धोपलक्षकः। निष्क्रान्तो वाणाद् निर्वाण इति वा अथवा निरुपसर्गकाद् वाधातोर्गतिगन्धनार्थात्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मणि कर्तरि वा निष्ठा तस्य नत्वं 'निर्वाणोऽवाते' (पा.सू. ८।२।५०) इति सूत्रेण निपात्यते। 'निर्वाणोऽग्निः, निर्वाणः प्रदीपः, निर्वाणो भिक्षुरिति' काशिका। तत्र नस्य णत्वे कृते निर्वाणशब्दस्य सिद्धिः। निर्वाणो भिक्षुरुपशान्त इत्यर्थः प्रदीपवत्। अथवा निरुपसर्गाद् वाधातोर्भावे करणे अधिकरणे वा ल्युट्प्रत्यये निर्वाणमिति सिध्यति। निर्वाणशब्दो मोक्षविशेषार्थको गृह्यते।

तत्र भगवता सुगतेन सर्वज्ञेन उषितब्रह्मचर्याणां तथागतशासनप्रतिपन्नानां धर्मानुधर्मप्रतिपत्तियुक्तानां पुद्गलानां द्विविधं निर्वाणमुपवर्णितं सोपधिशेषं निरुपधिशेषञ्च। तत्र निरवशेषस्य अविद्यारागादिकस्य क्लेशगणस्य प्रहाणात् सोपधिशेषं निर्वाणमिष्यते। तत्र उपधीयतेऽस्मिन्नात्मस्नेह इति उपधिः। उपधिशब्देन आत्मप्रज्ञप्तिनिमित्तकपञ्चापादानस्कन्धा उच्यन्ते। शिष्यते इति शेषः। उपधिरेव शेषः, उपधिशेषः, सह उपधिशेषेण वर्तत इति सोपधिशेषो निर्वाणम्।

तत्र स्कन्धमात्रकमेव केवलं सत्कायदृष्ट्यादिक्लेशतस्कररहितमवशिष्यते निहताशेषचौरगणग्राममात्रावस्थानमिव। तत् सोपधिशेषनिर्वाणम्।

यत्र तु स्कन्धपञ्चकमपि नास्ति तन्निरुपधिशेषं निर्वाणम्। निर्गत उपधिशेषो यत इति। निहिताशेषचौरगणस्य ग्राममात्रस्यापि विनाश इव। उक्तञ्च—

असंलीनेन कायेन वेदनामध्यवासयत् ।
प्रद्योतस्येव निर्वाणं विमोक्षस्तस्य चेतसः ।। (थेरगाथा-९।६)

तदेवं निरुपधिशेषं निर्वाणं स्कन्धानां निरोधाल्लभ्यते। एतच्च निर्वाणं क्लेशानां स्कन्धानाञ्च निरोधे सम्भवति।

अत्रेदमाशङ्क्यते। यदि सर्वं शून्यम्, तदा—

यदि शून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद् वा निरोधाद् वा कस्य निर्वाणमिष्यते ।।
(मा.का. २५।२)

इति चेत्, न, स्वभाववादिनामयं दोषः स्यात्। स्वभावेन व्यवस्थितानां क्लेशानां स्कन्धानाञ्च स्वभावस्यानपायित्वाद् निवृत्त्यभावान्निर्वाणानुपपत्तिः। न च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शून्यतावादिनां दोषः। न हि ते क्लेशनिवृत्तिलक्षणं स्कन्धनिवृत्तिलक्षणं वा निर्वाणमिच्छन्ति येन दोषः समापतेत्; किन्तु अनुपलम्भलक्षणमेव। उच्यते हि मध्यमकशास्त्रे—

अप्रहीणमसम्प्राप्तमनुच्छिन्नमशाश्वतम् ।
अनिरुद्धमनुत्पन्नमेतन्निर्वाणमुच्यते ।। इति। (मा० का० २५।३)

अयमर्थः—यत् खलु नैव प्रहीयते रागादिवन्नापि प्राप्यते श्रामण्यफलवत्, नाप्युच्छिद्यते स्कन्धादिवत्, यच्चापि न नित्यमशून्यवत् तत् स्वभावतोऽनिरुद्ध-मनुत्पन्नं च सर्वप्रपञ्चोपशमलक्षणं निर्वाणमुक्तम्। तत् कुतस्तस्मिन्नेवंविधे निष्प्रपञ्चे क्लेशकल्पना येषां क्लेशानां प्रहाणाद् निर्वाणं भवेत्। कुतो वा स्कन्धकल्पना येषां निरोधात् तद्भवेत्। यावद्धि एताः कल्पनाः प्रवर्तन्ते, तावन्नास्ति निर्वाणाधिगमः। सर्वप्रपञ्चपरिक्षयादेव तदधिगमात्।

ननु निर्वाणे न सन्ति क्लेशादयः, न सन्तु; किन्तु निर्वाणात् प्राग् विद्यन्ते ते, तेषां परिक्षयाल्लभ्यते निर्वाणमिति चेत्, न, प्रागपि यदि स्वभावतस्ते स्युस्तदा तेषां स्वभावतो विद्यमानानां न परिक्षयः कर्तुं शक्येत, स्वभावस्यानिवर्तनात्। तस्मान्निर्वाणाभिलाषिणा नैषा कल्पना युक्ता यत् पूर्वं स्कन्धाः सन्ति। तस्माद् निर्वाणे संसारे वा निःस्वभावाः शून्या एव क्लेशाः स्कन्धा इति कल्पना युक्ता। तदुक्तम्—

न संसारस्य निर्वाणात् किञ्चिदस्ति विशेषणम् ।
न निर्वाणस्य संसारात् किञ्चिदस्ति विशेषणम् ।।
निर्वाणस्य च या कोटिः कोटिः संसरणस्य च ।
न तयोरन्तरं किञ्चित् सुसूक्ष्ममपि विद्यते ।।
(म.शा. २५।१९-२०)

अतो निर्वाणे क्लेशादीनां शून्यत्वादेव न प्रहाणं नापि निरोध इति विज्ञेयम्। तस्माद् निरवशेषपरिकल्पनाक्षयरूपमेव निर्वाणम्।

उक्तञ्च आर्यरत्नावल्याम्—

न चाभावोऽपि निर्वाणं कुत एवास्य भावना ।
भावाभावपरामर्शक्षयो निर्वाणमुच्यते ।।इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्तञ्च भगवता समाधिराजसूत्रे—

निर्वृत्तिधर्माण न अस्ति धर्मा
ये नेह अस्ति न ते जातु अस्ति ।
अस्तीति नास्तीति च कल्पनावता-
मेवं चरन्तान् न दुःखशाम्यति ।।

(समाधिराजसूत्रे-९।२६)

अस्या गाथाया अयमर्थः—निर्वृत्ते निरुपधिशेषे निर्वाणे धर्माणां क्लेशकर्मजन्मलक्षणानां स्कन्धानां वा सर्वथास्तङ्गमाद् अस्तित्वं नास्ति। एवञ्च सर्ववादिनामभिमतम्। ये तर्हि धर्मा इह निवृत्तौ न सन्ति प्रदीपोदयाद् अन्धकारोपलब्धरज्जुसर्पादिभयवत्, न ते जातु सन्ति कस्मिंश्चित् संसारकालेऽपि। न हि रज्जुस्तमसि स्वरूपतः सर्पोऽस्ति अनुपलम्भाद् व्यवहारे। एवञ्च निर्वाणे ये धर्मा न सन्ति, ते संसारेऽपि न चेत् स्युः, कथं संसारः प्रवर्तत इति चेत्, उच्यते, आत्मात्मीयसद्ग्रहग्रस्तानां बाल-पृथग्जनानामसत्स्वरूपा अपि पदार्थाः सत्यतः प्रतिभासन्ते तैमिरिकाणा-मिवासत्केशमशकादयः।

अतोऽस्ति क्लेशादिरिति वादिनां जैमिनीयकपिलकाणादादीनां नास्तीति वादिनां नास्तिकानामेवं भावस्वभावकल्पनावतां चरतां संसरतां च न दुःखसंसारः शाम्यतीति। अतो निर्वाणे न कस्यचित्प्रहाणं न कस्यचिन्निरोध इति विज्ञेयम्; किन्तु सर्वकल्पनाक्षयरूपमेव निर्वाणम्।

निर्वाणं च न भावरूपं नाभावरूपं नोभयरूपं नानुभयरूपमिति सर्वथा निर्वाणे चतस्रः कल्पना न सम्भवन्ति। न च संसारनिर्वाणयोः किञ्चिदन्तरमस्तीति। संसारनिर्वाणयोरुभयोरपि प्रकृतिशान्तत्वेनैकरसत्वात्। एवञ्च—

सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः।
न क्वचित्कस्यचित्कश्चिद्धर्मो बुद्धेन देशितः।।

(मा० का० २५।२४)

अयं भावः—सर्वेषां प्रपञ्चानां क्लेशस्कन्धादिरूपाणां निमित्तानां य उपशमोऽप्रवृत्तिस्तन्निर्वाणम्। स एव मोक्षः प्रकृत्यैवोपशान्तत्वाच्छिवः। तत्र

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानज्ञेयवाक्वाच्यादिनिरवशेषविकल्पजालाप्रवृत्तिरूपोपशमः शिवो निर्वाणमिति। अतो न कश्चिद् धर्मो बुद्धेन स्वभावतो देशितः। अत एवोक्तं भगवता—

अनिर्वाणं हि निर्वाणं लोकनाथेन देशितम्।
आकाशेन कुतो ग्रन्थिराकाशेनैव मोचितः।। इति।

सौगतब्रह्मात्मवादिनो विशेषः

इदमिह विचार्यते माध्यमिकमतशाङ्करमतयोः को विशेष इति।

तत्र शून्यवादिनो ब्रह्मसत्तां न स्वीकुर्वन्ति, आत्मनः प्रतिषेधात्। अनात्मनि आत्मत्वभ्रममेव सङ्गिरन्ते। न हि स्कन्धातिरिक्त आत्मोपलभ्यते। यन्नोपलभ्यते तन्नास्ति। उपलब्धभावा निःस्वभावा अनिर्वचनीयाः प्रतीत्यसमुत्पन्नाः सदसदादिचतुष्कोटिनिर्मुक्ताः संवृतिबलात् सत्यवत् प्रतिभासमानाः शुक्तिरजतादिवत्सन्ति तथापि व्यावहारिकाः सन्ति। व्यवहारोऽपि गन्धर्वनगराजिता एव। सर्वशून्यत्वभावनया तेषां भावानामविद्यादीनां निरोधो जायते। अविद्यानिरोधाच्च आत्मात्मीयस्य सर्वस्योपक्षयरूपं निर्वाणमधिगम्यते।

ब्रह्माद्वैतवादिनस्तु सर्वस्य अनिर्वचनीयत्वे मनःप्रत्ययमनासादयन्तो विज्ञानं सत्त्वेन निर्वाच्यं स्वप्रकाशं नित्यं कूटस्थं चिदानन्दरूपमात्मेति सङ्गिरन्ते। प्रपञ्चस्तु तत्रानिर्वचनीयो मिथ्या आरोपितः सत्यवत् प्रतिभासते यथा शुक्तौ रजतम्, रज्जौ सर्पः, यथा वा गन्धर्वनगरादिकम्। न चात्मनि प्रमाणाभावः, श्रुतिरेव तत्र प्रमाणम्। 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै०उ० २.१.१) 'अयमात्मा ब्रह्म'[१] 'एकमेवाद्वितीयम्'[२] इत्यादि च युक्तिरपि अस्ति। तथा हि, आरोपितस्य मिथ्याभूतस्य प्रपञ्चस्य सत्याधिष्ठानमन्तरेण आरोपः स्फुरणं वा न सम्भवति। मायायाः संवृतेर्वा अधिष्ठानमवश्यं वक्तव्यम्। न च विज्ञानमेव क्षणिकं तदधिष्ठानमिति वाच्यम्, विज्ञानस्यापि आरोपितत्वात् तन्मते प्रपञ्चस्य मिथ्यात्वानुपपत्तेः। अत आत्मा सर्वाधिष्ठानभूतो नित्यः सत्यः परमार्थतश्चेतनः सर्वविकाररहितोऽवश्यं वाच्यः। एवञ्च सति आत्मस्वरूपावाप्तिः, अविद्यानिवृत्तिश्चास्य मते मोक्षो न केवलमविद्यानिवृत्तिरेव। मोक्षप्रवृत्तिरपि बौद्धमते न सम्भवति, न हि आत्मध्वंसे तदभावे वा कश्चन प्रवर्तेत, आनन्द एव प्रवृत्तिदर्शनात्। बौद्धमते मोक्षस्य च

१. माण्डूक्यो. २।
२. छान्दोग्यो. ६.२.१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनन्दरूपत्वाभावात्। न चापौरुषेयस्य आप्तोच्चरितरूपपौरुषेयस्य वा वेदस्य मोहादप्रामाण्यस्वीकारोऽपि युक्तः। अन्यथा बुद्धवचनमपि पौरुषेयं प्रामाण्यं न स्पृशेत्। तस्माद् आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतिशतवचनात् स्वीकर्तव्य आत्मा। न च भावानां शून्यत्वं प्रतीत्यसमुत्पन्नता वा युक्ता। कार्येष्वपि कारणानुवृत्तिदर्शनात् कारणे कार्यस्य तदात्मना स्वीकार आवश्यकः, अन्यथा सर्वस्य सर्वत्र प्रसक्तिः स्यात्। न हि द्वितीयक्षणे विनश्यतः कारणस्य कार्येण सह प्राप्तिरपेक्षा वा सम्भवति। नियमाभावात् तथाऽदर्शनात्, प्रथमक्षणेऽपि कार्यस्याभावाद् अनुत्पन्नत्वान्न प्रतीतिर्युज्यते। किञ्च घटादौ चेतनकर्तृत्वं प्रत्यक्षत एवोपलभ्यते। यच्चोक्तं निर्व्यापार एव हेतुः कार्यं प्रति सम्भवतीति तदपि नोपपद्यते, न हि निर्व्यापारस्य कारकत्वं क्वचित् सम्भवति। सव्यापारस्य कारणत्वे तु अक्षणिकत्वमेव भवेद् भावानाम्। एवं क्षणिकत्वनिरासे शतशो युक्तयः श्रुतिविरोधाश्च शङ्करदर्शने अन्यदर्शने च प्रदर्शिताः सन्ति। ब्रह्मवादिनो न भावानां क्षणिकत्वं स्वीकुर्वन्ति किन्तु स्थैर्यमेव। तस्मात् सर्वस्य प्रपञ्चस्य सत्त्वार्थम् अवभासार्थञ्च मायिकस्यापि नित्यविज्ञानाधिष्ठानमवश्यं वक्तव्यम्। न हि निरालम्बना संवृतिरेवंविधं प्रपञ्चमारब्धुं शक्नोति। ब्रह्म सत्यं जगन्मिथ्या, जीवस्तु ब्रह्मैव परमार्थत संक्षेपेणेह सौगतब्रह्मवादितो विशेष उक्तः। एवं सति ब्रह्मात्मवादी शङ्करः प्रच्छन्नबौद्ध इति वदन्ति। महानुभयोर्भेदः।

सौगतनैरात्म्यवादे बन्धमोक्षव्यवस्थोपपत्तिः

अथेदानीं विचार्यते—शून्यवादे को बन्धः को मोक्ष इति। यथा ब्रह्माद्वैतवादिनो वदन्ति परमार्थतो न बन्धो न मोक्षः, न चात्मा संसारेण मनागपि संसृज्यते असङ्गत्वात् तस्य नित्यमुक्तत्वाच्छुद्धत्वाच्च। व्यवहारिकावेव बन्धमोक्षौ। अहं बद्ध इत्येवं बुद्धिर्यस्य स तत्त्वज्ञानेन मुच्यते। संसारस्यैव सर्वस्य ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वाद् मिथ्यात्वात्परमार्थतोऽभावान्न परमार्थतो बन्धो विद्यते। बन्धनाभावे मोक्षोऽपि नास्ति। नित्यमुक्तस्यैव स्वरूपावाप्तिर्मोक्षः।

तथैव शून्याद्वैतवादिनो माध्यमिका अपि वदन्ति न परमार्थतो बन्धः, बद्धः, मोक्षो मुक्तो वा कश्चिदस्ति। परमार्थतः सर्वस्य शून्यत्वावगमात्। यथोक्तम्—

बद्धो न बध्यते तावद् अबद्धो नैव बध्यते ।
बद्धाबद्धविनिर्मुक्तो बध्यमानो न बध्यते ।। (प्रसन्नपदा, पृ० १२८)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथैव—

बद्धो न मुच्यते तावद् अबद्धो नैव मुच्यते ।
स्यातां बद्धे मुच्यमाने युगपद्बन्धमोक्षणे ।। (मा० का० १७।८)

यदि तावद् नित्यं बद्ध एव तर्हि न निर्मुक्तः स्यात् नित्यबद्धत्वादेव, न चाबद्धोऽपि मुच्यते नित्यमुक्तत्वादेव। बद्ध एव मुच्यमानो भवतीति यदि कल्प्यते, तथा बन्धमोक्षौ युगपत् स्यातां तच्चासम्भवि तमःप्रकाशवत् परस्परविरुद्धस्वभावत्वात्।

ननु तर्हि किमर्थं भगवता निर्वाणाय उपदेशायासः कृतः, किमर्थानि आर्यसत्यादीन्युपदिष्टानीति चेत्, अत्रोच्यते, परमार्थत एव बन्धमोक्षौ सर्वशून्यात्मकत्वाद् अनुपपन्नौ। संवृतिसिद्धौ तु बन्धमोक्षौ लोके व्यवह्रियमाणौ न निराक्रियेते। तस्माद् यो ह्येव निःस्वभावेषु प्रतीत्यसमुत्पन्नेषु सर्वभावेषु मरुमरीचिसलिलगन्धर्वनगरोपमेषु आत्मात्मीयस्वभावरहितेषु विपर्यासमात्रानुगमाद् अहं ममेत्यभिनिविष्टः सत्कार्यदृष्टिं करोति, तथा कदा नु मे निर्वाणो भविष्यति, कदा न्वहं निरुपादानो निर्वास्यामीत्येवं धीमान्, तदर्थमेवोक्तोपदेशः। न च तादृशाहङ्कारममकारभावाभिनिवेशबुद्धिः क्वचिच्छान्तिमेति ऋते तत्परित्यागादिति निर्वाणं तदर्थमेव। यथोक्तं भगवता आर्यध्यायितमुष्टिसूत्रे—

"अथ खलु भगवान् मञ्जुश्रियं कुमारभूतमेतदवोचत्, चतुर्णामार्यसत्यानां यथाभूतार्थादर्शनाच्चतुर्भिर्विपर्यासैर्विपर्यस्तचित्ताः सत्त्वा एवमिमं संसारं नातिक्रामन्ति। एवमुक्तो मञ्जुश्रीः कुमारभूतो भगवन्तमेतदवोचद् देशयतु भवान् कस्योपलम्भतः सत्त्वाः संसारं नातिक्रामन्ति। भगवानाह, आत्मात्मीयोपलम्भाद् मञ्जुश्रीसत्त्वाः संसारं नातिक्रामन्ति।"

अयं भावः—आत्मात्मीयोपलम्भाद् अहंत्वममत्वाभिनिवेशात् कर्माभिसंस्कारा भवन्ति। तादृशाभिनिवेशादेव रागद्वेषमोहाः प्रादुर्भवन्ति। रागद्वेषमोहयुक्त आत्मत्वाभिमानी कायिकं वाचिकं मानसञ्च कर्म करोति। एवमनिशमावर्तमानः संसरति। तथागतोपदेशाच्च ससत्त्वोऽहं शीलब्रह्मचर्यादियुक्तोऽस्मि संसारं समतिक्रमिष्यामि निर्वाणमनुप्राप्स्यामीति भावाभिनिविष्टः पश्यति दुःखं ज्ञातव्यम्, समुदयो हातव्यः, निरोधः साक्षात्कर्तव्यः, मार्गो भावयितव्य इति। एवं तस्य संस्कारादिषु अनित्यत्वबुद्धिर्जायते तदा भवति दुःखं ज्ञातमिति। यदा चास्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दुःखसमुदयस्य जिहासा भवति, तदा संस्कारादिभ्यो धर्मेभ्यः सर्वेभ्यो वैराग्यं जायते। तथा विषयेभ्यो जुगुप्सादिवैराग्यमेव दुःखसमुदयहानम्। ततश्चास्य निरोधसाक्षात्कारभावना जायते। तत्समये न धर्मकल्पनां करोति काञ्चित्। तदनन्तरञ्च मार्गभावना भवति, मुक्तोऽस्मीति। न मम किञ्चिद् भूयः करणीयम् अर्हन्नस्मि। एतेन विज्ञायते यद् आत्मात्मीयत्वबुद्ध्या बध्यते तच्छून्यत्वबुद्ध्या मुच्यते। बन्धमोक्षौ तावद् विकल्पमूलावेव, न परमार्थतः। आचार्यचन्द्रकीर्तिनाप्युक्तम्—

'अत एव आगमाद् असद्विपर्यासकल्पनामात्रलताबन्धनविच्छेदो विमोक्षो निर्वाणमित्युच्यते। स्वप्नोपलब्धदहनज्वालानिर्वापणवत् तदनिलसलिलैरिति'[१]।

तथोक्तञ्च—

अनिर्वाणं हि निर्वाणं लोकनाथेन देशितम् ।
आकाशेन कृतो ग्रन्थिराकाशेनैव मोचितः ।।

तस्मात् परमार्थतो न कश्चिद् बद्धो मुक्तो बध्यते मुच्यते वा, आत्मात्मीयस्य सर्वस्य परमार्थतः शून्यत्वादिति।

●

१. प्रसन्नपदा, पृ. १३१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासस्य सन्देशः

प्रो. शिवजी-उपाध्यायः
आचार्योऽध्यक्षश्च
साहित्यविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी

❀ ❀ ❀

नानोपदेशकृतसंस्कृतवाङ्मयेऽस्मिन्
आदेशतः श्रुतिवचः स्मृतिवाङ्निदेशात् ।
सन्देशतश्च सरसस्वरसं सुकाव्यं
स्वान्तं प्रवर्तयति सत्यपथे समेषाम् ।।

तत्रादिकाव्यनिकषीकृतकालिदास-
च्छन्दोनिबद्धकविताकलनाकलायाः ।
वैशिष्ट्यमस्ति किमपि प्रतिभाप्रमाणं
सन्दिश्यमानजनमानसमोदमानम् ।।

प्राक्तनभारतीयवाङ्मये पुरुषार्थचतुष्टयौपयिकसाधनाध्वसन्दर्शनार्थं प्राणिमात्रस्य जीवनोन्नयनार्थं विशिष्टा विदुषां सतां सचेतसां च जीवनावैदुष्यसत्त्वसद्वृत्तिसमुन्मीलनार्थं श्रुतिस्मृतिपुराणादिशास्त्रसन्दर्भात्तदनुकूलकाव्यादिसन्दर्भाच्च त्रिविधोपदेशशैलीकपारम्परीप्रवर्तमाना परिलक्ष्यते। प्रभुसुहृत्कान्तासम्मितोपदेशविभागस्य तत्र तत्र प्रसिध्या उपदेशत्रैविध्ये समस्तस्य वाङ्मयस्य विषया विनिबद्धा व्यवस्थाप्यन्ते। तत्र हि श्रौतोपदेशः प्रभुसम्मितः, तत्र प्रश्नान्तरस्यानवकाशात्, सुहृत्सम्मितः स्मृतिपुराणेतिहासाद्युपदेशः, तत्र प्रश्नस्य विमर्शस्य च पर्याप्तावकाशात्, तदुभयव्यतिरिक्तः कान्तासम्मितोपदेशः सत्काव्यसन्दर्भात् प्रदीपमानः सरसतापादनेनाभिमुखीक्रियमाणः सहृदयलोकाकर्षणकारणीभूतो भवति, तत्र प्रश्नान्तरादिविमर्शविस्मृत्या लोकानां स्वारस्येन सामञ्जस्येन च स्वतः प्रवर्तनात् कान्तासम्मितस्य काव्योपदेशस्य तदुभयोपदेशापेक्षया स्पृहणीयतमत्वं सुतरां सिध्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रौतोक्तो विषयो ग्राह्योऽनाग्रहात् प्रभुसम्मितः।
साक्षाद् वाच्यतया तत्रोपदेशो दुरपह्नवः ।।
स्मार्तः पौराणिकः किं वोपदेशः सुहृदुम्भितः।
तात्पर्याद् वा प्रसङ्गाद् वा हिताय परिकल्पते ।।
सद्योनिर्वृतये किञ्च स्वरसात्सरसीकृतः।
कान्तासम्मितकाव्याङ्गोपदेशो व्यङ्ग्यतो मतः ।।
वाच्यतात्पर्यव्यङ्ग्योक्तवाक्येभ्यस्ते पृथक् पृथक् ।
उपदेशास्त्रिधा बोध्याः सम्बन्धपरिकल्पने ।।
तत्रोभयं व्यतिक्रम्य रम्यभावार्थपेशलः ।
व्यज्यमानोपदेशोऽयं काव्यस्याह्लादकारकः ।।

उक्तोपदेशत्रयं पुनर्वाच्यत्वेन तात्पर्यवत्त्वेन व्यङ्ग्यत्वेन च व्यापारत्रयमनुबध्नन्ति, तत्रापि उत्तरोत्तरं व्यङ्ग्यत्वेन जायमानोपदेशवैशिष्ट्यं नितरां सहृदयसामाजिकान् प्रभावयति। किञ्च श्रौतोपदेशः प्रभुसम्मितत्वेन आदेशात्मकः, स्मृतिपुराणाद्युपदेशः सुहृत्सम्मितत्वेन निर्देशात्मकः, काव्योपदेशश्च कान्तासम्मितत्वेन सन्देशात्मकः—इत्येषोऽपि विभागो निरुक्तोपदेशत्रयस्य कर्तुं युज्यते।

कविकुलगुरुः कालिदासः शृङ्गाररससाम्राज्यसर्वस्वाधिपत्यं सम्बिभर्ति, शृङ्गाररसश्च रतिस्थायिभावालम्बनाद् विभावाद्यैः स्वीयैः सम्यक्तदभिव्यक्तौ प्रमातृभिः स्वाभेदेनास्वाद्यते। यथोक्तम्—'शृङ्गारी चेत् कविः सर्वं जातं रसमयं जगत्'।

यदि च कविः शृङ्गारी स्यात्तदा सर्वं जगदिदं रसमयं सरसमानन्दस्वरूपं सुखमुखीभूतं भवतीति तस्य कवेः प्रभावातिशयः सर्वत्र प्रतिफलति। शृङ्गारोऽपि द्विविधो विप्रलम्भसम्भोगलक्षणाभ्याम्, विप्रलम्भमन्तरा सम्भोगो न खलु पुष्टिमश्नुते। विप्रलम्भश्च प्रेमपरिपाकप्रत्यायकस्तपःप्रधानस्तन्मयीभावापन्नः प्रियवियोगानुसन्धानपरः परमप्रकर्षप्रतिष्ठितः कालिदासकाव्येषु सर्वथाऽधिगन्तुमनुभवितुं च शक्यते। कालिदासस्य सर्वा नायिकाः सर्वे नायकाश्च तादृशतपोमयप्रियवियोगयोगानुकूलविप्रलम्भसाधनानिष्ठाः प्रेमाकृष्टमानसाः स्वानुरागनिकषायमाणस्वरूपाः सन्दृश्यन्ते। एकैकमुदाहरणं किमु तद्वैपुल्यं तत्र तत्र तदीयकाव्येषु सर्वत्रावगन्तुं शक्यते सुधीभिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालिदासस्य रघुवंशे प्रारम्भ एव वर्णाश्रमव्यवस्थानिदर्शनपराणि पद्यानि वैदिकसंस्कृतिसन्देशनिगूढानि व्यङ्ग्यविधया लोकोपयोगाय सन्दृब्धानि दृश्यन्ते।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।
त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ।।

इत्यारभ्य 'रघूणामन्वयं वक्ष्ये' इत्यन्तं यावद् यत् पद्यकुलकेन महाकविना सन्दिष्टं तत् सर्वं राजोचिताचारप्रचारपूर्वकं प्रजोचिताचारः प्रचारयति, 'यथा राजा तथा प्रजा' 'राजा प्रकृतिरञ्जनात्' इत्युक्तेः। यदि च वर्णाश्रमाचारो राज्ञा न परिपाल्येत तदा प्रजया कथमाचर्येत—इत्येष सन्देशः सार्वयुगीनो राज्ञां प्रजानां च कृते समसमयसमानार्थकः कविकुलगुरुणा सम्प्रसारितः सम्प्रवर्तितश्च।

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती महीयताम् ।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः।। (शाकु. भरतवा.)

अत्र पार्थिवो राजा पार्थिवो लोकश्च प्रकृतेः प्रजायाः पञ्चभूतात्मिकायाः प्रकृतेर्जगत्या हिताय पालनाय रक्षणाय पोषणाय च प्रवर्ततां दिवानिशमनुक्षणमिति भावः, . किञ्च श्रुतिमहती श्रौतमाहात्म्यसम्भृता अथवा श्रुतिः कर्णस्तत्र माधुर्येण महत्त्वाधायिका सरस्वती वाणी किं वा काव्यभारती कालिदाससम्बन्धिनीति भावः। महीयतां पूज्यतामधिश्रयतां महत्त्वमनुविन्दताम्। परिगतशक्तिरात्मभूः अन्तर्निविष्टपदा शक्तिरत एवात्मभवो नीललोहितो महेश्वरो ममापि पुनर्भवं क्षपयतु—इत्यत्र अपिना समग्रस्य जगतः प्राणिनामपुनर्भवं हत्वा ततोऽखिलानन्तरं मम (कालिदासस्यापि) पुनर्जन्म भूयो भूयो जायमानां जनिं क्षपयतु स्वतादात्म्यमापाद्य स्वस्मिन् निवेशयतु शिवसायुज्येन संयोजयतु—इत्येतादृशः सन्देशः कविकुलगुरुणा कालिदासेन सर्वसाधारण्येन सर्वान् प्राणिनः प्रत्याहरति। त्यागतपःसदाचारप्रकृतिप्रेमकाव्यानुरागधर्माविरुद्धकामधर्मार्थमोक्षप्रभृतिसम्पूर्णसद्वृत्तसन्दर्भगर्भं कालिदासस्य सन्देशमाकलयन् आत्मसात्कुर्वन् जगज्जीवलोकः स्वीयां जीवनयात्रां सर्वात्मना सार्थकीकर्तुं शक्नोतीति सुतरां वक्तुं युज्यते। कालिदासस्य प्रतिकाव्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपद्यं च दीयमानः सन्देशः स्फुटास्फुटलक्षणः सन् व्यङ्ग्यत्वेनैव प्रतीयते, वाच्यत्वापेक्षया व्यङ्ग्यत्वस्य समधिकप्रभावजननक्षमत्वात्।

मेघदूतं नाम महाकवेर्विश्वप्रसिद्धं खण्डकाव्यम्। इदं हि सन्देशकाव्य-परम्पराया मूलस्रोतोरूपं यद्युच्यते तदा नास्त्यन्यथोक्तिः, श्रुत्युपनिषदादिषु स्यान्नाम तत्सूत्रानुस्यूतं स्रोतोमूलम्, परं लौकिकाख्यानवृत्तनिबद्धेषु काव्येषु नूनमेतदेव सन्देशकाव्यपरम्पराया आदिमं स्रोतस्वत्काव्यमिति निर्विचिकित्सं वक्तुं शक्यते। अयमपि सर्वत्र प्रदीयमानः प्रियावियोगयोगानुसन्धानपरः सन्देशो व्यङ्ग्यत्वेन महाकविना प्रतिपादितः। प्रकृष्टप्रेमारूढपरानुरक्तिभूमिसंविष्टः प्रतिकणं प्रतिक्षणं प्रतिदिशं प्रतिव्यक्ति च चेतनाचेतनचेतनाशून्यो महाकवेः काव्यप्रतीकायमाण-यक्षाकृतिकृती नायकः स्वप्रियानुरागातिशयाविष्टः सन्देशहरं मेघं स्वात्मीयदूतत्वेन नियोजयति, योजयति चाखिलान् लोकान् अनेन लोकोत्तरेण प्रकृष्ट-प्रेमाख्यानात्मकेन सन्देशेन—इत्यहो महीयान् महाकवेः काव्यमहिमा। अन्ते च—

सर्वेषु किल काव्येषु कालिदासः कलापटुः ।
प्रेम्णः परात्मसन्देशप्रदानाय प्रवर्तते ।।

त्यागेन तपसा प्रेम्णः पराकाष्ठाऽधिगम्यते ।
ततश्च मानुषं जन्म सार्थक्यं प्रतिपद्यते।।

पारस्परिकसौहार्दं हार्दप्रेमप्रकर्षणात् ।
निःस्वार्थपरमार्थात्मप्रणयः प्राणिनां सुखम् ।।

कालिदासादिसुख्यातकवीनां चिरजीविनाम् ।
तत्काव्यानां च सन्देशः प्रेमाख्यः सार्वकालिकः ।। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबन्धकाव्यरचनापरम्परायां मुक्तककाव्यावदानविमर्शः

डॉ. बालकृष्णशर्मा
सहायकप्राध्यापकः, साहित्यविभागाध्यक्षश्च
शासकीयसंस्कृतमहाविद्यालये, ग्वालियरस्थे

❀ ❀ ❀

काव्यं नाम विविधजीवनानुभूतानां ललितशब्दार्थाश्रया सहजाभिव्यञ्जना। अतस्तत्रानुभूत्यभिव्यक्त्योः समष्टिः संशोभते। तत्रानुभूतिर्भवति भावसम्पृक्ता अभिव्यक्तिश्च भाषासम्बद्धा। नानापरिस्थितिजन्यजीवनानुभूतिजातानां सशक्ताभिव्यञ्जनायै प्रजापतिस्थानीयकवेः सामर्थ्यशालिनी भाषा भवति साधनम्। एतस्मादेव कारणात् काव्यशास्त्रनिबन्धेषु क्वचिदनुभूतिपक्षस्य महत्त्वं व्यञ्जयितुकाम आचार्यः काव्यं रसेन योजयति, क्वचिच्चाभिव्यक्तिपक्षस्य माहात्म्यं व्यञ्जयितुकामः स तदलङ्कारेण विशिनष्टि। अतः काव्यशास्त्रिणां कानिचित् काव्यलक्षणानि सन्त्यनुभूतिमूलकानि, कानिचिच्चाभिव्यक्तिमूलकानि। यथा मम्मटाचार्यस्य 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'[१] इति काव्यलक्षणमभिव्यक्तिमूलकमस्ति। साहित्यदर्पणकारविश्वनाथस्य 'वाक्यं रसात्मकं काव्यम्'[२] इति काव्यलक्षणमनुभूतिमूलकमस्ति। अनेन तथ्यमिदं विशदतरं भवति यत् काव्ये अनुभूत्यभिव्यक्तीत्युभयोः समानमहत्त्वं वर्तते। अत एवोक्तं भट्टतौतेन—

नानृषिः कविरित्युक्तमृषिश्च किल दर्शनात्।
विचित्रभावधर्मांशतत्त्वप्रख्या च दर्शनम्॥
स तत्त्वदर्शनादेव शास्त्रेषु कथितः कविः।
दर्शनाद्वर्णनाच्चाथ रूढा लोके कविश्रुतिः॥
तथा हि दर्शने स्वच्छे नित्येऽप्यादिकवेर्मुनेः।
नोदिता कविता लोके यावज्जाता न वर्णना॥[३]

काव्यस्वरूपमिव तस्य भेदनिरूपणेऽपि द्वयोरेव पक्षयोः प्रभावः परिलक्ष्यते। कवेरनुभूतिपक्षस्य प्रबलतरतया मुक्तककाव्यानि प्रणीयन्ते। तद्यथा भर्तृहरेः

१. काव्यप्रकाशे प्रथमोल्लासे।
२. साहित्यदर्पणे प्रथमपरिच्छेदे;
३. हेमचन्द्रस्य काव्यानुशासने काव्यकौतुकग्रन्थोद्धरणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबलानुभूतयस्तस्य शतकत्रये, अमरुककवेर्वा प्रबलानुभूतयस्तस्य शतककाव्ये विराजन्ते। एवमेव सातवाहनहालगोवर्धनाचार्यपुष्पदन्तशङ्कराचार्यादीनां प्रबलानुभूतयस्तेषां मुक्तकसङ्ग्रहेषु बोधगम्या भवन्ति। कवेरभिव्यक्तिपक्षस्य प्रबलतरतया प्रबन्धकाव्यानि प्रणीयन्ते। संस्कृतसाहित्यगतानि सकलकाव्यानि मुक्तकप्रबन्धाख्ययोरनयोर्वर्गयोः समादधति। मुक्तककाव्यसाहित्ये सकलस्तोत्रसाहित्यं निखिलनीतिसूक्त्युपदेशान्योक्तिगर्भसाहित्यमन्यसजातीयशृङ्गारप्रकृतिचित्रणादिसम्पृक्तसाहित्यञ्च समाधीयन्ते। प्रबन्धकाव्यसाहित्ये महाकाव्यनाटकादीन्यन्तर्भवन्ति।

संस्कृतकाव्यरचनापरम्परायां मुक्तकप्रबन्धेत्यनयोर्द्वयोः काव्यरूपयोः समानभावेनावदानं वर्तते। प्रसङ्गेऽस्मिन् तथ्यमिदं ध्यातव्यं यद् यस्मिन् काले प्रबन्धकाव्यानां सद्भावो दृश्यते, तस्मिन् काले तु मुक्तककाव्यानि रचितानि एव; परन्तु यस्मिन् काले येन केनापि कारणेन प्रबन्धकाव्याभावो दृश्यते, तस्मिन् कालेऽपि मुक्तककाव्यानि लभ्यन्ते। अनेन काव्यरचनासातत्यसंरक्षणे मुक्तककाव्यानां महदवदानमिति ज्ञातुं शक्यते। सातवाहनहालस्य गाथासप्तशतीगतानि मुक्तकपद्यान्यत्र निदर्शनानि। परिनिष्ठितमुक्तकपद्यानां सङ्ग्राहिकायामस्यां गाथासप्तशत्यां हालविरचितानि मुक्तकपद्यानि तु सङ्कलितान्येव, तदानीन्तनान्यनेकनामशेषसंस्कृतकवीनां पद्यान्यपि सङ्गृहीतानि, येन तत्कालीनानेककाव्यरचनाकाराणां तेषां काव्यानाञ्च सद्भावोऽनुमीयते। अथ च भासकालिदासाश्वघोषकालेषु सततकाव्यप्रणयनपरम्पराऽपि प्रमाणिता भवति।

वस्तुतो मुक्तककाव्यानि काव्यसर्जनाप्रवाहं द्विधा प्रभावयन्ति। प्रथमं प्रबन्धकाव्यरचनासातत्याभावजन्यावकाशपूरणेन, द्वितीयञ्च प्रबन्धकाव्ये बन्धशैथिल्यजन्यावकाशपूर्त्या। अनयोः प्रथमप्रभावो निरपेक्षरूपेण भवति, द्वितीयश्च प्रबन्धकाव्यसापेक्षरूपेण। नीत्युपदेशसूक्तिशृङ्गारभक्तिवैराग्यप्रधानानि मुक्तककाव्यानि स्वतन्त्रतया निर्बन्धरूपेणावस्थितानि प्रबन्धकाव्यरचनासातत्याभावजन्यावकाशं पूरयन्ति, सुष्ठुरीत्या प्रबन्धकाव्यमध्यवर्तिरूपेणावस्थितानि च तत्र बन्धशैथिल्यजन्यावकाशं निवारयन्ति, चारुतामुद्भावयन्ति च कथावस्तुनि। अनेनैव प्रकारेण प्रकृतिचित्रणवन्ति पद्यानि प्रबन्धकाव्यमध्यवर्तिरूपेणावस्थितानि तत्र वैचित्र्यमुत्पादयन्ति, स्वतन्त्रतया निर्बन्धरूपेणावस्थितानि च काव्यरचनापरम्परां रक्षन्ति, पूर्वापरनिरपेक्षरूपेण काव्यानन्दञ्चानुभावयन्ति। प्रबन्धान्तर्वर्तिनां मुक्तकपद्यानां बन्धोपेतत्वं प्रबन्धेनैव सिद्ध्यति। यथा प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं तत्र प्रबन्धरससद्भावाङ्गीकारेण सिद्ध्यति, तथैव प्रबन्धगतानां मुक्तकपद्यानां बन्धवत्ता प्रबन्धेनैव सिद्ध्यति। अत्र साहित्यदर्पणकारविश्वनाथस्य विचारसरणिः प्रमाणम्। तद्यथा—'ननु तर्हि प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न स्यादिति चेत्, न, रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात्'[१]।

एवम्प्रकारेण प्रतिभाति यद् मुक्तककाव्यानि प्रबन्धान्तर्वर्तिरूपेण पूर्वापर-निरपेक्षनिर्बन्धरचनारूपेण चेत्युभाभ्यामेव प्रकाराभ्यां प्रबन्धकाव्यरचना-परम्परां प्रभावयन्ति, येन प्रबन्धकाव्यरचनापरम्परायां मुक्तककाव्यानां महदवदानं वर्तते। तथ्यमिदं मनस्यवधाय शोधनिबन्धेऽस्मिन् प्रबन्धकाव्यरचनापरम्परायां मुक्तककाव्यावदानविमर्शो विधीयते। हालस्य गाथासप्तशत्यां रतिराजगतलङ्घित-मिहिर-वाहव-नरसिंह-राम-प्रवरसेन-सुचरित-कल्याण-विधि-विग्रह-केशव-मीन-स्वामी-पराक्रम-अणुराज-अनिरुद्ध-मकरन्द-कुमारिल-बहुरस-चन्द्रस्वामी-माऊराज-दुर्धर-अवन्तिवर्मा-देववज्र-सिंह-सरल-कालिराज-चन्द्रहस्त-भोज-चुल्लोग-वसन्त-पालित-काल-वल्लभ-अलङ्कार-माहवसेन-ईशान-मत्तगजेन्द्र-अनङ्ग-विषमसेन-वत्स-कालसार-गुणमन्दिर-मन्दर-महादेव-पुण्यभोज-कदलीहर-सुरभिवत्स-सिंहनाद-गजसिंह-महेन्द्र-विलास-प्रसन्न-कविराज-गन्धराज-सत्यस्वामी-नरवाहन-भ्रमर-सुन्दर-माणिक्यराज-सुशील-मुखराग-कल्लणसिंह-दामोदर-राजहस्ती-केलास-पुण्डरीक-धनञ्जय-रोलदेव-मातङ्ग-मान-निष्कलङ्क-अवटङ्क-त्रिलोक-अलक्क-इन्द्र-आदिवराह-ब्रह्मराज-अन्ध-जीवदेव-मल्लसेन-उद्धव-कुमार-काल-इभ-विक्रमराज-कुविन्द-अङ्गराज-अहराज-मणिराज-दुर्गस्वामी-कलशगन्ध-कृतज्ञशील-शूर-कुवलय-शक्तिहस्त-अर्द्धराज-विश्वेश्वरसिंह-शशिराज-मङ्गलकलश-बोलदेवप्रभृतिशताधिक-संस्कृतकाव्यकाराणां पद्यानि सङ्कलितानि येन हालस्य समये काव्यप्रणयनस्याक्षुण्णा परम्परा प्रमाणिता भवति। हालस्य पूर्ववर्तिनो भासादयोऽङ्गुलिगण्यमानाः कवय-स्तेषां काव्यानि चेदानीमुपलभ्यन्ते; परन्तु गाथासप्तशत्यामुल्लिखितशताधिककवीनां तेषां मुक्तककाव्यानाञ्चानुशीलनेन प्रतिभाति यत् तस्मिन् समये काव्यप्रणयनस्य समृद्धा परम्परा आसीत्। हालेन सङ्कलितानि सर्वाणि पद्यानि मुक्तककाव्यानि सन्ति। अतो वक्तुं शक्यते यद् गाथासप्तशतीसङ्कलितमुक्तकपद्यैस्तेषां प्रणेतृभिश्च तदानीन्तनकाव्यसाहित्यगगनं पूर्णतयाच्छादितमिति निश्चितरूपेण महदवदानं वर्तते मुक्तककाव्यानां प्रबन्धकाव्यभावजन्यरिक्ततां पूरयितुम्।

संस्कृतसाहित्ये समुपलब्धप्रबन्धकाव्यानां सङ्ख्या अपि मुक्तककाव्य-सङ्ग्रहसङ्ख्यापेक्षया अल्पतरा अस्ति। अथ च प्रबन्धकाव्यप्रणयनपरम्परायां सातत्यमपि नोपलभ्यते। अस्य प्रबन्धकाव्यप्रणयनसातत्याभावस्य पूर्तिर्भवति प्रभूतमुक्तककाव्यसङ्ग्रहसद्भावेन। संस्कृतसाहित्ये सर्वेषु कालेषु स्तोत्रकाव्यानि विरचितानि। एतानि प्रबन्धकाव्यरचनाभावजन्यरिक्ततां पूरयन्ति। एवमेव समये

१. साहित्यदर्पणे प्रथमपरिच्छेदे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समये नीतिसूक्तिशृङ्गारवैराग्यान्योक्तिप्रधानानि मुक्तककाव्यानि विरचितानि येन साहित्येऽस्मिन् काव्यप्रणयनपरम्परा अक्षुण्णा वर्तते। एतेषां मुक्तककाव्यानां काव्यशास्त्रसिद्धान्तव्याख्याने निदर्शनत्वेन भूयानुपयोगः कृत आचार्यैः। ध्वनिसिद्धान्तपोषकध्वन्यालोक-लोचन-काव्यप्रकाश-साहित्यदर्पण-रसगङ्गाधरप्रभृति-निबन्धेषु निदर्शनत्वेन गृहीतानि भूयांसि पद्यानि मुक्तककाव्यानि सन्ति। ध्वनेर्भेदानां निदर्शनत्वेन प्रस्तुतानि प्रायः समस्तपद्यानि मुक्तककाव्यानि सन्ति। रुद्रट-मम्मट-वाग्भट-विश्वनाथप्रभृतिभिराचार्यैः स्वस्वसाहित्यशास्त्रनिबन्धेषु उदाहरणतया गाथासप्तशतीगतपद्यानि गृहीतानि। एवमेवामरुकशतकगतपद्यानां भूयानुपयोगः कृतः काव्यशास्त्रिभिः। भोजराजेन 'सरस्वतीकण्ठाभरणे' प्रायः सम्पूर्णगाथासप्तशती विविधप्रसङ्गेषु निदर्शनत्वेन गृहीता। अनेन मुक्तककाव्यानां माहात्म्यं प्रबन्धकाव्यकोटिमधिरोहति। अत एव सहृदयशिरोमणिर्ध्वन्यालोककारानन्दवर्धनः अमरुकशतकमभिलक्ष्य आह—

'मुक्तकेषु प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते। यथा ह्यमरुकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव'[१]।

प्रकृतिवर्णनस्य विन्यासो मुक्तकपद्येष्वेव सम्भवति। एतस्मादेव कारणात् प्रबन्धगतान्यपि प्रकृतिवर्णनानि मुक्तककाव्यलक्षणोपेतानि भवन्ति। यतो हि तेषु पूर्वापरनिरपेक्षरूपेण रसचर्वणा क्रियते सहृदयैः। यथा कालिदासस्याभिज्ञान-शाकुन्तलगतं पद्यमिदम्—

यात्येकतोऽस्तशिखरं पतिरोषधीनामाविष्कृतोऽरुणपुरस्सरमेकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशान्तरेषु[२] ।।

यथा वा शिशुपालवधमहाकाव्यगतं पद्यमिदं मुक्तककाव्यवैशिष्ट्यं क्रोडीकरोति—

कुमुदवनमपश्रिश्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिलसितानां हा! विचित्रो विपाकः[३] ।।

---

१. ध्वन्यालोके-३/६ वृत्तौ; २. अभिज्ञानशाकुन्तले-४/२।
३. शिशुपालवधे-११/६४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं प्रतीयते यत् सर्वत्र प्रबन्धकाव्येषु प्रकृतिवर्णनवन्ति पद्यानि मुक्तककाव्यस्य निदर्शनानि भवन्ति। प्रकृतिवर्णनन्तु मुक्तकशैलीसापेक्षं भवति। एवमेव भावध्वनेरभिव्यक्तिर्मुक्तकपद्येष्वेव सम्भवति। एतस्मादेव कारणात् सर्वाणि स्तोत्रकाव्यानि मुक्तककाव्यस्य निदर्शनानि भवन्ति। पूर्वापरनिरपेक्षेषु स्तोत्रपद्येषु सर्वत्र पृथक्तया स्वतन्त्रतया स्वमात्रपर्यवसितरूपेण च चमत्कारकारिणी क्षमता विद्यते। इदं वैशिष्ट्यमेव मुक्तककाव्यमन्येभ्यः काव्येभ्यः पृथक्करोति। यथाभिनवगुप्ताग्निपुराणकारवचनाभ्यां विशदीभवति—

'पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकम्'[१]।

'मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्'[२]।

एवम्प्रकारेण प्रतीयते यत् प्रकृतिचित्रणे देवस्तवने च मुक्तककाव्यमेव पदं लभते। एवमेव सूक्तिनीतिप्रभृतिविषयेषु मुक्तककाव्यमेव प्रभावशालि युक्ततरं वा भवति; परन्तु तथ्यमिदमत्र ध्यातव्यमस्ति यत् प्रबन्धकाव्यानुशीलनान्तरमेव सहृदया मुक्तककाव्यरसास्वादने समर्था भवन्ति। अत एव प्रबन्धकाव्यं मुक्तक-काव्यानामुपजीव्यतां भजते। यथा अभिनवगुप्तो नाट्यशास्त्राभिनवभारतीटीकायां विशदयति—

'इति तद्रूपरसचर्वणया तु प्रबन्धे भाषावेषप्रवृत्त्यौचित्यादिकल्पनात्। तदुपजीवनेन मुक्तके। तथा च तत्र सहृदयाः पूर्वापरमुचितं परिकल्प्य ईदृगत्र वक्तास्मिन्नवसरे इत्यादि बहुतरं पीठबन्धरूपं विदधते। तेन ये काव्याभ्यासप्राक्तनपुण्यादिहेतुबलादिभिः सहृदयास्तेषां परिमितविभावाद्युन्मीलनेऽपि परिस्फुट एव साक्षात्कारकल्पः काव्यार्थः स्फुरति'[३]।

प्रबन्धकाव्यमध्ये मुक्तककाव्यसद्भावं स्वीकरोत्यभिनवगुप्तः ध्वन्यालोक-लोचने। तद्यथा—'मुक्तकमन्येनानालिङ्गितं तस्य संज्ञायां कन्। तेन स्वतन्त्रतया परिसमाप्तनिराकाङ्क्षार्थमपि प्रबन्धमध्यवर्ति न मुक्तकमुच्यते। .....। यदि वा प्रबन्धेऽपि मुक्तकस्यास्तु सद्भावः, पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते, तदेव मुक्तकम्। यथा 'त्वामालिख्य प्रणयकुपिताम्' इत्यादि-श्लोकः'[४]।

अनेन प्रमाणितं भवति यत् प्रबन्धकाव्येषु कवयोऽनेकत्र मुक्तककाव्यानि प्रकृतिचित्रणवन्ति नीत्यन्योक्तिसूक्तिमयानि वा भावध्वनिनिर्भराणि स्तोत्ररूपाणि पद्यानि वा विरचयन्ति प्रबन्धकाव्यकलेवरञ्च वर्धयन्ति। येन प्रतीयते यत् प्रबन्धकाव्यरचनायां भवति मुक्तककाव्यानां महदवदानम्। अत्रैवेदमपि तथ्यमवधेयं

१. ध्वन्यालोके-३/७ लोचने;
२. अग्निपुराणे-३३७/३६।
३. नाट्यशास्त्रे-६/३१ भारत्याम्;
४. ध्वन्यालोके-३/७ लोचने।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत् संस्कृतसाहित्यकविषु मुक्तककवीनां सङ्ख्या भूयसी वर्तते। अत एवोक्तं राजशेखरेण काव्यमीमांसायाम्—'मुक्तके कवयोऽनन्ताः सङ्घाते कवयः शतम्'[१]।

परिणामतो विश्वभाषासाहित्येषु संस्कृतसाहित्यस्य विपुलपरिणामत्वमूले मुक्तककाव्यानां विशालकायसाहित्यमिदं वर्तते। संस्कृतभाषायां निबद्धं केवलं स्तोत्रकाव्यसाहित्यमेव अन्यभाषासाहित्यमतिशेते, का कथा पुनरन्येषां मुक्तककाव्यानां साहित्यस्य? सर्वेषां वेदानां संहितासाहित्यं मुक्तकशैल्यां वर्तते। अष्टादशपुराणोपपुराणरामायणमहाभारतादिषु नीतिसूक्तिभक्तिवैराग्यविषयकाणां मुक्तकपद्यानां भूयसी सङ्ख्या अस्ति। एवमेव सर्वेषां प्रबन्धकाव्यानां मध्ये प्रभूतमुक्तकपद्यानि विराजन्ते। पुनः पृथक्तया स्वमात्रपर्यवसितरूपेण वा विद्यमानं मुक्तककाव्यसाहित्यमप्यधुना यावद्विद्वद्विमर्शसापेक्षमस्ति।

वस्तुतः संस्कृतसाहित्ये मुक्तककाव्यप्रणयनस्यातिप्राचीना परम्परा विद्यते। इयं परम्परा प्राचीनकालतोऽधुना यावद् अक्षुण्णा वर्तते। संस्कृतभाषाविचक्षणाः सहृदयाः सदैव मुक्तककाव्यानि विरचयन्ति। क्वचित् पद्यपूर्तिव्याजेन क्वचित् समस्यापूर्तिव्याजेन क्वचित् प्रश्नोत्तरव्याजेन क्वचिद् हासपरिहासव्यञ्जनाव्याजेन क्वचिद् देवनृपादिस्तुतिव्याजेन क्वचिन्मनोविनोदाय क्वचिद् हार्दिकानुरागव्यञ्जनायै क्वचित् खड्गबन्धादिप्रणयनप्रयोजनेन क्वचिच्च प्रहेलिकानिमित्तेन सुरभारतीरसिका मुक्तककाव्यानि रचयन्ति समाश्रयन्ते वा। एतस्मादेव कारणात् चतुष्षष्टिकलासु नैकाः कलाः काव्यरचनासम्बद्धाः। लोके एतासां मुक्तककाव्यरचनासम्बद्धानां कलानां विपुलप्रचारः प्राचीनकालतोऽद्यावधि विद्यते। परिणामतः संस्कृतसाहित्ये प्रभूततरं मुक्तककाव्यसाहित्यं यत्र तत्र सर्वत्र व्यवस्थितमव्यवस्थितं प्रकाशितमप्रकाशितं सङ्गृहीतं विस्तीर्णं वा समुपलभ्यते। महावैयाकरणपाणिनेर्मुक्तकपद्यानि यत्र तत्र काव्यशास्त्रिभिः समुल्लिखितानि। तद्यथा—

उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।
यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं न लक्षितम्[२]॥

अपि च—

ऐन्द्रं धनुः पाण्डुपयोधरेण शरद् दधानार्द्रनखक्षताभम्।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार[३]॥

बाणमयूरयोः सम्मिलितप्रयासेन रचितमिदं मुक्तककाव्यं भृशमुल्लिख्यते। तद्यथा—

१. काव्यमीमांसाया दशमेऽध्याये; २. ध्वन्यालोके-१/१३ वृत्तौ।
३. वक्रोक्तिजीविते-३/१५ वृत्तौ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गतप्राया रात्रिः कृशतनुशशी शीर्यत इव
प्रदीपोऽयं निद्रावशमुपगतो घूर्णत इव ।
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो
कुचप्रत्यासत्त्या हृदयमपि ते चण्डि! कठिनम्[1] ।।

एवमेव पण्डितराजजगन्नाथमभिलक्ष्य अप्पयदीक्षितमुखान्निःसृतं मुक्तकपद्यमिदं प्राय उल्लिख्यते। तद्यथा—

किं निःशङ्कं शेषे शेषे वयसि त्वमागते मृत्यौ ।
अथवा सुखं शयीथा निकटे जागर्ति जाह्नवी भवतः[2] ।।

पण्डिराजजगन्नाथस्य मुक्तककाव्यानां सङ्ग्रहो भामिनीविलासः संस्कृतसाहित्यरसिकेषु परमप्रथितोऽस्ति। महाकविकालिदासभर्तृहरिप्रभृतिकवीनां जीवनघटनासम्बद्धानि नैकानि मुक्तकपद्यानि सहृदयैरुल्लिख्यन्ते। एतेषां सर्वेषां पद्यानां प्रबन्धकाव्यरचनापरम्परायामस्ति महद्योगदानम्। अम्बिकादत्तव्यासप्रणीतशिवराजविजयाख्यगद्यकाव्यगतं मुक्तकपद्यमिदं सहृदयजनकण्ठहारतां सम्प्राप्तम्। तद्यथा—

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त! हन्त!! नलिनीं गज उज्जहार[3] ।।

निखिलमुक्तककाव्यसाहित्यानुशीलनेन प्रतिभाति यद् भारतवर्षेऽस्मिन् वैदिककालतोऽधुनापर्यन्तं मुक्तककाव्यप्रणयनस्याजस्रा परम्परा विद्यते। इयं परम्परा संस्कृतभाषानिबद्धकाव्यरचनापरिपाटीं संरक्षति पुष्णाति च।

पूर्वापरनिरपेक्षरूपाणि स्वमात्रपर्यवसितानि शृङ्गारमुक्तककाव्यानि शृङ्गारशतकादीनि वैराग्यमुक्तकानि वैराग्यशतकादीनि नीत्युपदेशमयानि मुक्तककाव्यानि नीतिशतकादीनि अन्योक्तिमयानि भल्लटशतकादीनि सूक्तिमयानि सुभाषितरूपाणि वा मुक्तककाव्यानि सुभाषितरत्नसन्दोहादीनि प्रकृतिमुक्तककाव्यानि षड्ऋतुवर्णनादीनि च प्रथितान्येव सन्ति। एवमेव गाथासप्तशतीसुभाषितरत्नकोशसदुक्तिकर्णामृतसूक्तिमुक्तावलीशार्ङ्गधरपद्धतिसुभाषितावलीप्रसन्नसाहित्यरत्नाकरप्रभृतिकोशमुक्तककाव्यसङ्ग्रहा अपि सुप्रथिताः सन्ति। देवविशेषस्तुतिमूलकानि वैष्णवशैव-

---

१. बाणमयूरयोः सम्बन्धविवेचनावसरे प्राय उल्लिखितं पद्यम्।
२. भामिनीविलासे ४/३१; ३. शिवराजविजयस्य द्वितीयनिःश्वासारम्भे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शाक्तादीनि स्तोत्रकाव्यान्यपि सुप्रथितानि सन्ति। एतानि सर्वाणि मुक्तककाव्यानि सन्ति। राजस्तुतिमूलकानि प्रशस्तिमुक्तककाव्यानि राजेन्द्रकर्णपूरादयोऽपि विराजन्ते। 'वक्रोक्तिपञ्चाशिका'-'खड्गशतक'मित्यादीनि प्रकीर्णमुक्तककाव्यानि चापि प्रसिद्धानि सन्ति। एवमेव स्त्रीकवयित्रीणामपि बहूनि मुक्तकपद्यानि सन्ति। प्रायश्चत्वारिंशत् स्त्रीकवयित्रीणां सार्द्धशतपद्यानि मुक्तकरूपाणि यत्र तत्र ग्रन्थेषु विस्तीर्णानि प्राप्यन्ते। काव्यप्रकाशे उदाहृतं शिलाभट्टारिकायाः पद्यमिदमत्र निदर्शनत्वेन प्रस्तूयते। तद्यथा—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेसतीतरुतले चेतः समुत्कण्ठते[१] ।।

मुक्तककाव्यमिदं कमनीयकाव्यस्य सर्वाणि वैशिष्ट्यानि क्रोडीकरोति।

एवम्प्रकारेण प्रमाणितं भवति यत् संस्कृतकाव्यसाहित्यसंवर्द्धने पोषणे च मुक्तककाव्यसाहित्यस्य महदवदानं वर्तते। एतानि मुक्तककाव्यानि क्वचित् स्वतन्त्रतया निबद्धानि स्वमात्रपर्यवसितानि सहृदयहृदयमाह्लादयन्ति, क्वचिच्च प्रबन्धकाव्यान्तर्वर्तिरूपेण भावकचित्तं चमत्कुर्वन्ति। एकत्र तानि प्रबन्धकाव्य-विषयवस्तुनि विचित्रतामानयन्ति, अन्यत्र चारुताहेतोः प्रबन्धायमानानि विराजन्ते। क्वचित् स्फुटरूपेणापि रचितानि प्रभूततरमानन्दमनुभावयन्ति सहृदयान्, क्वचित् जीवनादर्शशिक्षासम्पृक्तानि लोकं शिक्षयन्ति, क्वचिच्च सहजतया विशदरूपेण वा काव्यवैशिष्ट्योपलब्धिहेतोः काव्यशास्त्रिणां चित्तं चोरयन्ति। निष्कृष्टरूपेण वक्तुं शक्यते यद् मुक्तककाव्यसाहित्यं न केवलं प्रबन्धकाव्यरचनाभावजन्यरिक्ततां निवारयति, काव्यरचनासातत्यं वा प्रमाणयति; अपि तु झटिति अनायासेन वा विविधरसालङ्कारध्वन्यौचित्यवक्रोक्तिप्रभृतीनामानन्दमनुभावयति, एकस्यैव विषयस्य विधिरूपं प्रस्तौति विविधविषयाणाञ्चैकत्र सङ्कलनमपि प्रस्तौति। अन्यस्मिन् रूपेण सहृदयहृदयाह्लादने विषयवैविध्यचित्रणे सूक्ष्मघटनासङ्घटने रमणीयदृश्यप्रदर्शने कमनीयकल्पनाकवने प्रभूतकाव्यभेदनिदर्शने सद्यः सहजानुभूतिप्रकटने भक्तिभावा-भिव्यञ्जने नृपादिप्रशस्तिसम्पादने निसर्गाभिरामरूपनिरूपणे च मुक्तककाव्यानि प्रबन्धकाव्यविकल्परूपाणि भवन्ति। एतस्मादेव कारणात् संस्कृतकाव्यसाहित्ये प्रबन्धकाव्यापेक्षया मुक्तककाव्यसाहित्यमतिविस्तृतं प्रथितञ्चास्ति। अतः प्रबन्ध-काव्यरचनापरम्परायां मुक्तककाव्यसाहित्यस्यास्ति महदवदानमिति शम्।

---

१. काव्यप्रकाशे प्रथमोल्लासे पद्यमिदमुदाहृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्यावरणसंरक्षणार्थं सन्देशः

(अभिज्ञानशाकुन्तलस्य सन्दर्भे)

डॉ. रामप्रतापतिवारी
अध्यक्षः, संस्कृतविभागे
हे.न.ब. गढवालविश्वविद्यालये
श्रीनगर-गढवालस्थे

❀ ❀ ❀

प्राणिनो वनस्पतयश्च यैस्तत्त्वैः प्रभाविता जायन्ते, तेषां तत्त्वानां समष्टिरेव पर्यावरणम्। परित आव्रियतेऽनेन इति पर्यावरणम्। यत्र जीवधारिणो निवसन्ति तज्जैवमण्डलमित्युच्यते। जलमण्डलस्थलमण्डलवायुमण्डलेषु जीवा जायन्ते, तिष्ठन्ति, विनश्यन्ति च। एतेषां मण्डलानां समष्टिर्जैवमण्डलम्। अस्मिन् जीव-जन्तवो वनस्पतय जलवायुप्रकाशोर्जागैसधातुखनिजादितत्त्वानि विद्यन्ते। एतानि सर्वाणि तत्त्वानि यानि जीव-जन्तू वनस्पतींश्च प्रभावयन्ति 'पर्यावरणम्' इत्युच्यन्ते।

प्रकृतौ समतोलनं वर्तते; किन्तु मानवा लौलुप्यात् प्रकृतेरत्यधिकं दोहनं कुर्वन्ति। तस्मात् प्रकृतावसमतोलनं जायते। पर्यावरणञ्च प्रदूषितं भवति। अधुना संस्कृतेः स्थानं सभ्यतया गृह्यते। अतः कलयन्त्रालयानां सङ्ख्या वर्धते, स्वार्थपूर्तय एव वृक्षा वनानि च च्छिद्यन्ते, तस्मात् पर्यावरणप्रदूषणं वर्धते। यथा जलप्रदूषणम्, अन्नप्रदूषणम्, वायुप्रदूषणम्, ध्वनिप्रदूषणम्, रेडियोधर्मिप्रदूषणमिति प्रदूषणानि वर्धन्ते। जनसङ्ख्यावृद्धिरपि कारणं प्रदूषणस्य। उर्वरकाणां प्रयोगेण भूमिरपि प्रदूषिता भवति।

पर्यावरणं द्विविधम्—प्राकृतिकपर्यावरणम्, सांस्कृतिकपर्यावरणञ्च। जीव-जन्तुवनस्पतयः परस्परं क्रियाः कुर्वन्ति। सर्वैः शुद्धं जलं, शुद्धो वायुः, शुद्धमन्नं, शुद्धावासाश्चापेक्ष्यन्ते। सांस्कृतिकपर्यावरणे परिजन-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवेशस्य महत्त्वपूर्णं स्थानं वर्तते। यतो हि गृहशान्तिरेव ध्वनिप्रदूषण-मपनयति प्रथमम्।

पर्यावरणसन्दर्भे महाकविकालिदासस्य कः सन्देशः? इति विचार्यते 'अभिज्ञानशाकुन्तलमि'ति नाटकदृष्ट्या।

अभिज्ञानशाकुन्तलस्य प्रथमे श्लोके 'पर्यावरणम्' शिव एव इति मन्यते महाकविकालिदासः, यतो हि येषां तत्त्वानां वर्णनमस्मिन् श्लोके कृतं तेषां समष्टिरेव पर्यावरणम्। शिवस्याष्टतनूनां समष्टिः पर्यावरणम्—

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः[१] ।।

अत्र अष्टाभिस्तनुभिः प्रपन्नो भगवान् शिवो रक्षतु सर्वान्। एतासामष्टतनूनां जलादीनां समष्टिरेव पर्यावरणम्। यतो हि एताभिः प्राकृतिकतनुभिरखिलं जगत्, तत्र स्थिताः प्राणिनो वनस्पतयश्च प्रभाविता भवन्ति। यथा शिवो वन्दनीयस्तथैव पर्यावरणमपि वन्दनीयं, रक्षणीयञ्च।

काश्च ता अष्टतनवः? प्रथमा—या स्रष्टुः आद्या सृष्टिः-**जलम्**। द्वितीया—या विधिहुतं हविर्वहति-**अग्निः**। तृतीया—या होत्री-**यजमानः**। अन्ये—ये द्वे कालं विधत्तः—**सूर्यः चन्द्रश्च**। अन्या—श्रुतिविषयगुणा—शब्दगुणा या विश्वं व्याप्य स्थिता—**आकाशः**। अन्या च—यां सर्वबीज-प्रकृतिरिति आहुः—**पृथ्वी**। अन्या—यया प्राणिनः प्राणवन्तः—**वायुः**। जलाद्यष्टतत्त्वानां समूहः पर्यावरणम्। जीव-जन्तूनां वनस्पतीनां च उत्पत्तये, संरक्षणार्थमेतेषां तत्त्वानां महत्त्वपूर्णं स्थानं वर्तते। यथा पृथिव्यां त्रिचतुर्थभागे जलं विद्यते, एवं जीवितशरीरेष्वपि। जलं विना जीवन-मपि भवितुं न शक्यते। पातुं, शरीरवस्त्रादिप्रक्षालनार्थं जलमपेक्ष्यते। जलं विना वनस्पतयोऽपि स्थातुं न शक्नुवन्ति। अतः कुसुमपेलवाऽपि शकुन्तला वृक्षान् सिञ्चति। जलं शुभं मन्यते। शकुन्तलायाः पतिगृह-प्रयागसमये स्निग्धजनो जलस्थानपर्यन्तं गच्छतीति सन्देशः प्रदत्तः—

१. अभिज्ञानशाकुन्तले-१।१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'ओदकान्तं स्निग्धोऽनुगम्यत इति'[१]। अन्यत्रापि पन्थाः कमलिनीहरितैः सरोभी रम्यान्तरः स्यादिति कामना क्रियते—रम्यान्तरः कमलिनीहरितैः सरोभिः। जलं शिवस्य शरीरम्। अतो निर्मलं भवेदिति यतनीयम्। जलप्रदूषणेन जनो रुग्णो भवति, अतो जलशोधनमनिवार्यमिति सन्दिष्टं महाकविना। अग्निर्हव्यगन्धैः पापानपहन्ति। अग्नयो हव्यगन्धैः सर्वान् पावयन्ति—त्वां वह्नयः पावयन्तु[२]। तीर्थजलानि वह्नयश्च न शुद्धतामपेक्षन्ते, एते निसर्गतः शुद्धा भवन्ति, अन्यांश्च शोधयन्ति।

पर्यावरणशोधने यजमानस्यापि महत्त्वपूर्णं स्थानमस्ति। यज्ञकारणाद् यजमानो व्रतं धारयति, शरीरं मनश्च शोधयति। यज्ञार्थं पुष्पवाटिकामारोपयति। पुष्पगन्धैर्यजमानकृतयज्ञानां हव्यगन्धैश्च पर्यावरणं प्रदूषणविरहितं जायते।

पर्यावरणशोधने चन्द्रमसोऽपि योगदानमस्ति। रात्रौ न कमलं विकसति। तस्य गन्धं रात्रौ न लभ्यते। चन्द्रमसः प्रकाशेन कुमुदिनी एव विकसति। हिमांशोरंशवो जनान् प्रसादयन्ति। कुमुदिन्याः पुष्पगन्धै रात्रौ पर्यावरणं शुद्धवायुसमन्वितं जायते। प्रकृतौ नैकमपि तत्त्वं निष्फलं निरर्थकं वा।

जन्तूनां वनस्पतीनां कल्याणाय प्रकाशस्य महत्त्वपूर्णं स्थानमस्ति। सूर्यस्य प्रकाशं विना सर्वे रुग्णा भविष्यन्ति। सूर्यस्य प्रकाशात् सर्वे आनन्द-मनुभवन्ति, स्वकार्येषु रता जायन्ते। तापस्य प्रभावात् पर्यावरणमार्द्रता-विरहितं शुद्धं च जायते। सविता सूर्य एवास्माकं बुद्धिं शोधयतीति गायत्री-मन्त्रेण ज्ञायते।

आकाशं विना न कस्यचिदस्तित्वं भवितुं शक्नोति। अखिलं पर्यावरण-मेव 'आकाशे' विद्यते। तत्र रेडियोधर्मिप्रदूषणं, वायुप्रदूषणं, ध्वनि-प्रदूषणञ्च भवितुं शक्नुवन्ति। शब्द एव आकाशस्य गुणः। यत्र यत्र शब्दस्तत्र तत्र आकाश इति शब्देन हेतुना आकाशोऽनुमीयते। ध्वनिनियन्त्रणेन आकाशः प्रदूषणरहितो भवति।

पृथ्वी एव जीवजन्तूनां वनस्पतीनामाश्रयदात्री। इयमेव सर्वबीजानां संरक्षिका। जलान्नखनिजादितत्त्वानि भूमौ विद्यन्ते। भूमौ वयं जन्म गृह्णामः,

---

१. अभिज्ञानशाकुन्तले चतुर्थाङ्के।
२. तत्रैव-४।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमौ खेलामः, भूमौ कार्याणि कुर्मः, भूमेरन्नजलादितत्त्वानि गृह्णामः। भूमिशोधनेन एवास्माकं पर्यावरणं शुद्ध जायते। अतो भूप्रदूषणं न स्यादिति यतनीयम्।

प्राणवायुं विना जन्तवः श्वसनकार्यं कर्तुं न समर्थाः। शुद्धवायुश्वसनेन जना जन्तवश्च स्वस्था भवन्ति। वायुप्रदूषणं वृक्षा एवापकर्तुं शक्नुवन्ति; यतो हि वृक्षाः प्रदूषितं कार्बनडाई-आक्साइडनामकं गैसं गृह्णन्ति, आक्सीजन-नामकं शुद्धं गैसं निःसारयन्ति। वृक्षारोपणेन शुद्धो वायुर्जायते, पर्यावरणञ्च शुद्धं जायते।

एतान्येवाष्टतत्त्वानि पर्यावरणम्, एतान्येन शिवः। अतः पर्यावरणं शिव एव। अतः पर्यावरणशोधने प्रयासः शिवः कल्याणप्रद एव। यथाऽष्टरूपधारकः शिवः सर्वेषां कल्याणाय भवति, एवमष्टरूपधारकं पर्यावरणमपि सर्वेषां कल्याणाय भवति। पङ्कजरजोभी रेणवः कोमला भवन्ति। पवनाः शान्ता अनुकूलाश्च भवेयुः। पन्थाः शान्तानुकूलपवनः शिवश्च भवेत्[१]। अत्र पन्थाः कमलिनीहरितैः सरोभिर्युक्तो भवति। कं जलम् अलति भूषयति इति कमलम्। पर्यावरणसंरक्षणे आश्रमस्य विशिष्टं स्थानं वर्तते। अत्र नावकाशं लभते प्रदूषणम्। दुष्यन्तः पुण्याश्रमं द्रष्टुं गच्छति—'पुण्याश्रमदर्शनप्रसङ्गेन धर्मारण्यमिहागतः'—प्रथमेऽङ्के। 'पुण्याश्रमदर्शनेनात्मानं पुनीमहे'—तत्रैव। प्रवातसुभगोऽयं वनोद्देशः। कण्वोऽपि शकुन्तलां कथयति यत् शान्त्यै करिष्यसि पदं पुनराश्रमेऽस्मिन्।

आश्रमे न कोऽपि कटुशब्दान् उच्चारयति। आश्रमकन्याभिः सुनृतया वाचा दुष्यन्तस्यातिथ्यं कृतम्। 'भवतीनां सुनृतयैव वाचा कृतातिथ्यम्'[२]। आश्रमे सर्वे मधुरमालपन्ति, शब्दरहितमेव 'अरण्यम्'।

आश्रमस्थानं पवित्रं ध्वनिप्रदूषणरहितं विशुद्धवायुसमन्वितं कल्याणकरमस्ति।

आश्रमस्य वृक्षाः प्रियतराः सन्ति। शकुन्तलादिकन्यकाः कुसुमपेलवा अपि वृक्षान् लताश्च सिञ्चन्ति। एका शकुन्तलां कथयति—'त्वत्तोऽपि तातकण्वस्य

१. अभिज्ञानशाकुन्तले-४।१२।

२. तत्रैव प्रथमाङ्के।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आश्रमवृक्षाः प्रियतराः'[१]। वृक्षेभ्यो जलं दत्वा स्वयं जलं पिबन्ति। तेभ्यः पल्लवान् न त्रोटयन्ति। तेषु पुष्पेषु विकसितेषु सर्वा उत्सवं मन्यन्ते। कालिदासस्य सन्देशोऽयं यदस्माभिरपि वृक्षा आरोपणीया रक्षणीयाश्च।

प्राणिनामपि पर्यावरणसंरक्षणे योगदानमस्ति। प्रणालिकाकीटाः संदूषितानि भुक्त्वा पर्यावरणं शोधयन्ति। निकृष्टो गृद्धोऽपि पर्यावरणं प्रदूषणाद् रक्षति। मानवजीवजन्तुषु गहनसम्बन्धो विद्यते। क्रीडनकरूपेणापि जन्तवः प्रयुज्यन्ते। यथा दुष्यन्तपुत्रो भरतः सिंहशावकेन सह क्रीडति। आश्रमे मृगान् प्रति पक्षिणश्च प्रति सर्वेषां विशिष्टस्नेहो दृश्यते। जन्तवोऽपि आश्रमपदे आत्मानं भयरहिताः सुरक्षिताश्च मन्यन्ते—'शब्दं सहन्ते मृगाः' (प्रथमेऽङ्के)।

वर्तमानसमये कृत्रिमालङ्करणानि स्वास्थ्यहानाय सन्ति। कालिदासस्य सन्देशोऽस्ति यद् उशीरानुलेपनेन शरीरतापो विनश्यति। मृणालवन्ति कमलिनीपत्राण्यपि शरीरतापमपनयन्ति। फोमास्तरणस्थाने कुसुमास्तरणं लाभप्रदम्।

प्राकृतिकपर्यावरणे शुद्धेऽपि तावन्न कोऽपि मानवः स्वास्थ्यं लभते यावत् पारिवारिकपरिवेशः शान्तो न भवति। पतिगृहगमनसमये कण्वः शकुन्तलामुपदिशति—'गुरुजनानां सेवा करणीया, प्रियजनैः सह प्रियव्यवहारो विधेयः, भर्ता अनुसरणीयः, परिजनेषु दया करणीया। अहङ्काररहिता गृहिण्यो गृहिणीपदं लभन्ते। वामा विपरीताचरणवत्यः कुलं विनाशयन्ति' (चतुर्थेऽङ्के)। 'वामा कुलस्याधयः। वियोगावस्थायां दुष्यन्तो रम्यं वस्तु द्वेष्टि' (षष्ठाङ्के)। मानसिकशान्तिः पारिवारिकशान्त्या जायत इति कालिदासेन सन्दिष्टम्।

सामाजिकपरिवेशस्यापि महत्त्वं वर्तते पर्यावरणसंरक्षणे। 'भार्या रूपवती शत्रुः' इत्युक्तिः प्रसिद्धा। रूपं दृष्ट्वा, मादकजलं पीत्वा च जनाः कलहं कुर्वन्ति। कालिदासस्य सन्देशोऽस्ति—'अनिर्वर्ण्यं परकलत्रम्'[२]। वायुशोधनार्थं रथप्रयोगो दृश्यते। एवं कालिदासस्य ध्वनिप्रदूषणवायुप्रदूषणशान्त्यर्थं धूम्ररहितवाहनप्रयोगः सदाचरणञ्च कर्तव्यमिति सन्देशः। जनसङ्ख्यावृद्धिः पर्यावरणप्रदूषणस्य कारणमस्ति। 'पुत्रं त्वमपि अवाप्नुहि' इति कालिदासस्य अभिज्ञानशाकुन्तले कण्वः

१. अभिज्ञानशाकुन्तले प्रथमाङ्के।
२. तत्रैव पञ्चमेऽङ्के।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथयति। अत्र पुत्रान् अवाप्नुहि इति नोक्तं कण्वेन। अनेन वाक्येन कालिदासः सन्दिशति यद् जनसङ्ख्यावृद्धिर्न करणीया।

निष्कर्षोऽयं यदखिलं पर्यावरणं शिवरूपमस्ति। शिवरूपं मत्वा जलादितत्त्वानि देवरूपाणि, अतस्तेषां तत्त्वानां प्रदूषणमपनेतव्यम्। आश्रमाः, वन्यजीवजन्तवो रक्षणीयाः, वनानि च रक्षणीयानि। पर्यावरणसंरक्षणेन वयं स्वस्था भवामः। स्वस्था मानवा विवेकशीला भवन्ति, स्वस्य परेषाञ्च रक्षां कर्तुं समर्था भवन्ति। जलादीनां महत्त्वं ज्ञात्वा एव कालिदास एतान् 'शिवतनुः' इति स्वीकृतवान्। अतोऽस्माभिरपि एतेषां प्रदूषणाद् रक्षा करणीया। महाकविकालिदासस्यायं सन्देशोऽवश्यमेव सुखदः कल्याणप्रदो भवेदिति विचारयामीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वनाथः शब्दकाव्यतावादी वा

श्रीश्यामानन्दमिश्रः
वाराणसी

❀ ❀ ❀

काव्यपदस्य प्रवृत्तिनिमित्तं शब्दार्थयुगलत्वं वा शब्दमात्रत्वं वेत्ययं विषयस्त्वद्यावधि जिज्ञासूनां समाधेय एव। काव्यस्वरूपं प्रतिपादयत्सु काव्यशास्त्रिषु काव्यत्वं शब्दार्थोभयानुगतो धर्मः शब्दमात्रानुगतो वेत्यत्र सम्प्रतिपत्तिर्न। केचन दण्डी-जयदेव-पण्डितराजजगन्नाथादयस्तु काव्यपदस्य प्रवृत्तिनिमित्तं शब्दत्वमेव न तु शब्दार्थत्वमिति मन्यन्ते। शब्दमात्रस्य काव्यत्वमिदम्प्रथमतया काव्यादर्शकृता दण्डिना प्रतिपादितम्—'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली'[१] इति। अनेन इष्टमनोहारिणा अर्थेन समन्वितपदानां समूहे काव्यत्वं तिष्ठतीत्यवगन्तव्यम्। अत्र 'इष्टार्थव्यवच्छिन्ना पदावली' इत्यनेन काव्यपदस्य शब्दमात्रपरत्वमेवाङ्गीकृतम्। अग्निपुराणकृतापि लक्ष्यतावच्छेदकस्य शब्दमात्रवृत्तित्वमेव प्रतिपादितम्—'सङ्क्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली'[२] इति। अत्रापि इष्टार्थविशिष्टः शब्द एव काव्यमिति स्पष्टम्। शब्दकाव्यतावादिष्वाचार्येषु रसगङ्गाधरकृत् पण्डितराजजगन्नाथः सर्वप्रमुखः। काव्यपदप्रवृत्तिनिमित्तं शब्द एव, न तु शब्दार्थयुगले इति प्रबलयुक्त्या प्रतिपादयता तेन निर्दिष्टं काव्यलक्षणम्—'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'[३] इति। पुनरन्ये भामह-वामन-रुद्रट-मम्मटभट्टादयस्तु आस्वादव्यञ्जकत्वस्योभयत्रापि समानवृत्तित्वात् काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोरुभयोरपि व्यासक्तमिति स्वीकुर्वन्ति। एतेषां मते आस्वादव्यञ्जकत्वस्योभयत्राप्यविशेषात् शब्दमात्रे कविसंरम्भगोचरत्वायोगाच्च काव्यत्वं शब्दार्थयोर्व्यासक्तं न तु शब्दमात्रे इति। शब्दार्थयुगलस्य काव्यत्वमिदम्प्रथमतया काव्यालङ्कारकृता भामहाचार्येण विनिर्दिष्टम्। यदुक्तं काव्यालङ्कारे—'शब्दार्थौ सहितौ काव्यम्'[४] इति। रुद्रटाचार्येणापि स्पष्टं प्रतिपादितं शब्दार्थयोर्व्यासक्तस्य काव्यत्वम्—'शब्दार्थौ तावत् काव्यम्'[५] इति। पश्चात् सुविख्यातकाव्यशास्त्री वामनाचार्योऽपि शब्दार्थयोरुभयोरपि काव्यत्वमन्वयमुखेना-

१. काव्यादर्शे-१।१०; २. अग्निपुराणे-३३८।६-७।
३. रसगङ्गाधरे, पृ. १०; ४. भामह-काव्यालङ्कारे-१-१६; ५. रुद्रट-काव्यालङ्कारे, पृ. २।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ङ्गीकरोति। यदुक्तं तेनैव काव्यालङ्कारसूत्रवृत्तौ—'काव्यशब्दोऽयं गुणालङ्कार-संस्कृतयोः शब्दार्थयोर्वर्त्तते'[१]। वामनाचार्यमते वैशिष्ट्यमिदं यत् काव्यत्वं न केवलं सामान्यशब्दार्थयोः यथोक्तं भामहरुद्रटाभ्यां प्रत्युत गुणालङ्कारविशिष्टयोः शब्दार्थयोरिति। अत एव वामनाचार्यः काव्यशास्त्रे विशिष्टशब्दार्थोभय-काव्यतावादीति रूपेण ख्यातः। वामनमतमेवानुसृत्य परवर्तिभिर्मम्मटहेमचन्द्रादिभिः प्रमुखैः काव्यशास्त्रिभिर्गुणालङ्कारविशिष्टयोः शब्दार्थयोः काव्यत्वमङ्गीकृतम्। अत्रेदं विचारणीयं यद् विश्वनाथकविराजमते लक्ष्यतावच्छेदकस्य शब्दमात्रवृत्तित्वं शब्दार्थोभयवृत्तित्वं वेति। कविराजेन स्वकीये साहित्यदर्पणनामके ग्रन्थे काव्यस्वरूपं प्रतिपिपादयिषया निर्दिष्टं काव्यलक्षणम्—'वाक्यं रसात्मकं काव्यम्'[२] इति।

लक्षणवाक्येऽस्मिन् 'काव्यम्' इति पदं लक्ष्यम्, शेषं लक्षणम्। लक्षणेऽपि विशेष्यभूतं वाक्यमेव यत् खलु आकाङ्क्षादियुक्तः पदसमूह इति स्वयमेवोक्तं कविराजेन—'वाक्यं स्याद्योग्याताकाङ्क्षासत्तियुक्तः पदोच्चयः'[३] इति। अत्र प्रधानीभूतं वाक्यं काव्यस्य शरीरम्, तत्रात्मवत् स्थितं तत्त्वन्तु रस एवेति 'रसात्मकम्' इति विशेषणबलेन लभ्यते। अत्र रसस्यात्मत्वकथनं त्वौपचारिकमेव वर्त्तते। अत एव स्वयमेव ग्रन्थकृता स्वलक्षणं विवृण्वतोक्तम्—'रस एवात्मा साररूपतया जीवनाधायको यस्य'[४] इति। अत एव रसवत एव वाक्यस्य काव्यत्वं नेतरस्य मुक्तकादेः। प्रबन्धे तु यद्यपि कानिचन नीरसान्यपि पद्यानि लभ्यन्त एव, तथापि तेषामपि रसवत्ता प्रबन्धरसेनैव मन्तव्या—'प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं..... रसवत्पद्यान्तर्गतनीरसपदानामिव पद्यरसेन, प्रबन्धरसेनैव रसवत्ताङ्गीकारात्'[५] इति वचनानुसारेण। अत एव च 'नीर-सेष्वपि गुणाभिव्यञ्जकवर्णसद्भावाद्दोषाभावाच्च काव्यव्यवहारः..... रसादिमत्काव्यबन्धसाम्याद् गौण एव'[६]। अत्र नीरसेष्वपीत्यादिकथनं मुक्तकादिविषयमिति मन्यामहे। रसवत्त्वस्यापरिहार्यत्वं काव्ये ग्रन्थकृता आचार्यान्तसंवादेनापि भूयो भूय उपपादितं साहित्यदर्पणे। अत्रायं प्रश्नः समाधेयो यद् रसात्मकं वाक्यं काव्यमिति लक्षयतो विश्वनाथस्य शब्दार्थौ काव्यमिति मते सर्वथा विप्रतिपत्तिरेव, उत सम्प्रतिपत्तिरप्यस्ति, नैकान्ततो विप्रतिपत्तिरेव। प्रोक्तात्

---

१. काव्यालङ्कारसूत्रवृत्तौ, सूत्रसंख्या-१ (वृत्तिः)।
२. साहित्यदर्पणे, पृ. २१ (रामचरणतर्कवागीशटीकायुतस्येयं पृष्ठसंख्या)
३. साहित्यदर्पणे, पृ. २६; ४. तत्रैव, पृ. २१।
५. तत्रैव, पृ. २०; ६. तत्रैव, पृ. २०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यलक्षणाद्यद्यप्यापातत इदमेवानुभूयते यत्तन्मते काव्यपदस्य प्रवृत्तिनिमित्तं शब्द एव, न तु मम्मटादिवत् शब्दार्थयोरुभयोरपि व्यासक्तम्। लक्षणे वाक्यमिति विशेष्यपदमात्रमेव दृष्ट्वा कैश्चिदालोचकैः प्रतिपादितमपि यत् शब्दकाव्यतावादी विश्वनाथ इति, परमेतन्नास्मभ्यं रोचते। तथा हि मम्मटोक्तं काव्यलक्षणं विस्तरेण खण्डयता विश्वनाथेन शब्दार्थयोः सर्वाणि विशेषणानि दोषप्रदर्शनपूर्वकं निरस्तानि, परं विशेष्यभूतस्य शब्दार्थयुगलस्य काव्यशरीरत्वमुचितं न वेत्यत्र न किञ्चिदुक्तं दर्पणकृता। ततश्च परमतमप्रतिषिद्धमनुमतं भवतीति तन्त्रयुक्त्या शब्दार्थयोः काव्यशरीरे समप्राधान्ये न विप्रतिपत्तिर्विश्वनाथस्येति प्रतीयते। यदि च शब्दार्थयुगलभिन्नं वाक्यमात्रं काव्यशरीरं विशेषेण निर्दिशतो विश्वनाथस्य न प्रोक्ततन्त्रयुक्तिविषयता काव्यलक्षणप्रसङ्गे मन्यते, तथाप्युत्तरग्रन्थस्थेनानेकेन दर्पणवचनेनैतदेव सिद्ध्यति यत् शब्दार्थयोः समप्राधान्येन काव्यत्वमेवाभिमतं साहित्यदर्पणकृतः। तथा हि—

(क) काव्यलक्षणकारिकाया द्वितीयपादस्य 'दोषास्तस्यापकर्षकाः' इत्यस्य स्वकृता वृत्तिः—'श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव शब्दार्थद्वारेण देहद्वारेणेव, व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात् काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते'[१]।

अत्र वृत्तौ 'शब्दार्थद्वारेण देहद्वारेण.....' इत्यंशेन देहशब्दार्थयोरुपमानोपमेयभावप्रदर्शनमुखेन साहित्यदर्पणकृत् स्पष्टमेव शब्दार्थौ काव्यमित्यत्र सम्प्रतिपत्तिं प्रदर्शयति।

(ख) पुनश्च प्रोक्तकारिकाया एवोत्तरार्धम्—'उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः' इत्यंशं विवृण्वता आचार्येणोक्तम्—'गुणाः शौर्यादिवत्, अलङ्काराः कटककुण्डलादिवद्, रीतयोऽवयवसंस्थानविशेषवत् देहद्वारेण शब्दार्थद्वारेण तस्यैव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः काव्यस्योत्कर्षका इत्युच्यन्ते'[२]।

अत्रापि वृत्तौ देहशब्दार्थयोः प्रोक्त उपमानोपमेयभावो दर्पणकृतः शब्दार्थौ काव्यशरीरमित्येव प्रसाधयति।

(ग) एवमेव साहित्यदर्पणस्य रामचरणतर्कवागीशविरचिताया विवृतेरधस्तान्निर्दिष्टोंऽशोऽपि शब्दार्थयोरेव काव्यत्वमाचार्याभिमतमिति प्रदर्शयति—

१. साहित्यदर्पणे, पृ. २४।
२. तत्रैव, पृ. २४-२५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'स्वसमर्पकेति स्वं रसस्तस्य समर्पको व्यञ्जको यः पदसन्दर्भो वाक्यं तस्य.....। एतच्च गुणालङ्कारसंस्कृतयोः शब्दार्थयोः काव्यशब्दोऽयं वर्त्तत इति प्राचीनमतानुसारेणोक्तम्। ..... यद्वा रसवत्त्वं काव्यलक्षणम्। व्यवहारबीजं तु गुणालङ्कारसंस्कृतशब्दार्थत्वमेवेति स्वमतेनैवेदमुक्तम्'[१] इति।

(घ) भूयश्च नवमपरिच्छेदारम्भे स्वकीयामलङ्कारलक्षणकारिकां विवृण्वतो दर्पणकृतः शब्दार्थयोः काव्यत्वमभिमतमेवेति प्रतीयते। तथा हि तत्रत्या वृत्तिः— 'यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथानुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारकाः'[२] इति।

इदमपि प्रसङ्गेऽस्मिन् विवेचनीयं यद् वाक्यात्मकशब्दमात्रं काव्यपदस्य प्रवृत्तिनिमित्तं यदि स्यान्नार्थस्तर्हि येऽर्थालङ्कारास्तेषां शरीरभूतशब्दद्वारेणैव रससम्बन्धो व्यवहितः स्यात्, तथा चार्थालङ्काराणां शब्दालङ्कारापेक्षया हीनत्वं सिद्ध्यति। परं साहित्यदर्पणकृता नैवमुक्तम्। किमर्थालङ्काराणां शब्दालङ्कारापेक्षया हीनत्वं विद्वद्भ्यो रोचते? नो चेत्, कथं तर्हि शब्दार्थयोः काव्यशरीरत्वे कस्यापि विदुषो विमतिः?

इदमत्र निष्पन्नं यत् साहित्यदर्पणकृतोऽभिमतं काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तमेव, न तु शब्दमात्रम्। अतो विश्वनाथकविराजो मम्मटभट्टादिवद्विशिष्टशब्दार्थोभयकाव्यतावादी, न पुनः रसगङ्गाधरकारादिवत् शब्दकाव्यतावादी यथा प्रतिपादितं कैश्चिदालोचकैः; किन्त्वेवं स्थितेऽपि वाक्यात्मकशब्दमात्रस्य रसात्मकत्वेन स्थिते काव्यत्वं वदतः कविराजविश्वनाथस्य परस्परविरुद्धमिवेदमापाततः प्रतीयते। तत्र कारणं नाज्ञानमाचार्यस्य, प्रतिज्ञाहान्यादिस्वीकारस्यानुचितत्वात्। अस्माकं तु प्रतीयते यदाचार्यविश्वनाथो हृदयेन शब्दार्थौ काव्यमिति मन्वानोऽपि स्वग्रन्थे किञ्चिदपूर्वं प्रस्तोतुं प्राचीनमतखण्डनं च कर्तुमेवं काव्यं लक्षितवान्—**वाक्यं रसात्मकं काव्यमिति।** इतः परं मनीषिण एवात्र प्रमाणमिति।

●

१. साहित्यदर्पणविवृतौ, पृ. ४४९।

२. साहित्यदर्पणे, पृ. ४७१।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाकविकालिदासस्य विमानविज्ञानम्

डॉ. रामाशीषपाण्डेयः
आचार्योऽध्यक्षश्च, संस्कृतविभागस्य
मारवाडीमहाविद्यालये
राँची

❀ ❀ ❀

विमानशब्दार्थविवेचनम्

विमानशब्दो वि+मा+ल्युट्[१] प्रत्ययेन निष्पन्नो विशेषेण मान्त्यस्मिन्निति विगतं मानमुपमाऽस्येति वा विमानं व्योमयानस्य देवयानस्य देवरथस्य यानमात्रस्य सप्तभूमिगृहस्य चावबोधकं विद्यते[२]। पुन्नपुंसके प्रयुक्तोऽयं शब्दो विमानं विमानो वेति मेदिनीकोषे[३]। व्योमयानस्य कृते प्रयुक्तं विमानं देवरथस्यार्थमपि नितरां प्रकटयति। देवरथः पुरा देवानां विमानभूतो वर्तमानकालस्य विकसिताद्विमानादपि महत्त्वसम्पन्न आसीत्। महाकविना कालिदासेन स्वकीयग्रन्थे मेघदूते विमानशब्दस्य प्रयोगः सप्तभूमिगृहस्य कृतेऽपि विहितः।[४] तेन स्वग्रन्थेषु विमानशब्दस्य प्रयोगो व्योम्नि गमनशीलस्य यानस्य कृतेऽपि कृतः। तस्य काव्येषु देवा वैमानिका गगनचारिणः स्वेच्छया विमानेन गगने विचरन्ति[५]। विमानस्य विशिष्टं ज्ञानं विमानविज्ञानमिति प्रयुक्तेन शोधपत्रस्यास्य शीर्षकेण कालिदासस्य विमानविषयकं विशिष्टं ज्ञानमेवात्र विचार्य्यते। तत्र तस्य काव्येषु विमानविषयकं विविधं विशिष्टं वा ज्ञानं कीदृशमस्ति चित्रितमिति वैमानिकेऽस्मिन् युगे विश्लेषितम्।

---

१. अष्टा. ६/३/११७।

२. अमरकोषे- १/१/४८ (रामाश्रमीटीका द्रष्टव्या)

३. विमानो व्योमयाने च सार्वभौमगृहेऽपि च।
घोटके यानपात्रे च पुन्नपुंसकयोर्मतः ।। (मेदिनीकोषे-९२/३०,३१)

४. मेघदूते-१/६३, २/६।

५. रघुवंशे-१०/४६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विमानविज्ञानविवेचनाम्

भारते प्राचीनकाले विमानस्य ज्ञानमासीदिति संस्कृतवाङ्मयस्यानेकेषु ग्रन्थेषु विमानस्योल्लेखादनुमीयते। आधुनिककाले विमानाविष्कारस्य श्रेयः 'आविरल राइट'—'विलवर राइट'—बन्धुभ्यां दीयते। १९०३ ख्रीस्ताब्दे दिसम्बरमासे नियन्त्रितयानस्य सञ्चालनमाभ्यां राइटबन्धुभ्यां कृतम्। इतः पूर्वमप्यनेके विमान-वैज्ञानिका विमाननिर्माणे तस्य विज्ञाने च कार्यरता आसन्, परं विमानस्य निर्माणे सञ्चालने च साफल्यमेकोनविंशतिशताब्द्यामेवाभूत्[१]।

संस्कृतवाङ्मये विमानविज्ञानमनेकेषु स्थलेषु विवेचितमस्ति। महर्षि-भरद्वाजप्रणीते बृहद्विमानशास्त्रस्य वैमानिके प्रकरणे विमानानां निर्माणप्रकारं तेषां भेदाश्चेत्यादयो विवेचिताः[२]। वैमानिकं प्रकरणमिदमष्टाध्यायात्मकं शताधिकरणयुतञ्च विद्यते। तत्र विमानचालकानां कृते विविधपरिज्ञानस्य, विमाननिर्माणे प्रयुक्तानां कृत्रिमलौहानां निर्माणस्य, विमानसञ्चालने द्रावकादीनां प्रयोगस्य च वर्णनं विस्तरेण प्राप्यते। विमाने प्रयुक्तं लौहं त्रिणेत्रसंज्ञकं लौहत्रयस्य मिश्रणेन निष्पन्नं जलाग्निवातातपादिभिरविकार्यमदाह्यं भाररहितमत्रोट्यमच्छेद्यं नीलाभं कान्तिमयं केकापिच्छसमप्रभं मृदुलं सर्वर्तुसुखप्रदं भवति स्म—

समीकृतं चेन्मृदुलं केकापिच्छसमप्रभम् ।
अदाह्यमच्छेद्यमत्रोट्यञ्च भारवर्जितम् ।।
जलाग्निवाताऽऽतपाद्यैरभेद्यं नाशवर्जितम् ।
शुद्धं सूक्ष्मस्वरूपं भवेल्लौहं त्रिणेत्रकम्[३] ।।

वैमानिकप्रकरणे त्रिविधस्य विमानस्य मान्त्रिकस्य तान्त्रिकस्य कृतकस्य चोल्लेखः प्राप्यते। तत्र मान्त्रिके विमाने पुष्पकाद्याः पञ्चविंशतिः, तान्त्रिके विमाने षट्पञ्चाशत्, कृतके विमाने च पञ्चविंशतिभेदा विद्यन्ते। विमानसञ्चालनं भास्करांशुभिर्विद्युद्यन्त्रैर्गणपयन्त्रैश्च भवति स्म[४]। नाम्ना प्रतीयते यन्मान्त्रिकस्य

---

१. संस्कृतमञ्जरी (सं. त्रैमा.) ८/१, १४ पृष्ठे।
(संस्कृतवाङ्मये विमानविज्ञानम्—डॉ. प्रकाशमित्रशास्त्री, कानपुरम्)

२. बृहद्विमानशास्त्रान्तर्गतस्य वैमानिकप्रकरणस्य प्रकाशनं विंशशताब्द्याः प्रथमे द्वितीये वा दशके प.तो.गोरेसुब्रायशास्त्रिमहोदयेन कृतम्। तस्य लिपिबद्धः कृतः बैंगलोरस्थशेषाद्रिपुरस्य पं. गो.वेङ्कटाचलशर्म्मणा (संस्कृतमञ्जरी, ८/१,१९ पृष्ठे)

३. बृहद्विमानशास्त्रे वैमानिकप्रकरणे, श्लो. १७-१९।

४. तत्रैव-३९-३९९ श्लोकाः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विमानस्य मन्त्रेण तान्त्रिकस्य विमानस्य तन्त्रेण कृतकस्य च भौतिकसाधनैः सञ्चालनं भवति स्म।

विमानस्य प्राचीनवर्णनोपलब्धिः

ऋग्वेदे विमानशब्दस्य प्रयोगो निर्मातुः कृते प्राप्यते।[१] निरुक्तेऽपि विमानस्यार्थो निर्माता एवास्ति[२]। बृहद्विमानशास्त्रान्तर्गतवैमानिकप्रकरणस्य वृत्तिं सम्पादयता यतिवरेण बोधानन्देन प्रतिपादितम्—वेदाम्बुधिं निर्मथ्य महामुनिभरद्वाजो यन्त्रसर्वस्वं निर्मितवान्[३]। महर्षिदयानन्दसरस्वती स्वकीय-ऋग्वेदादिभाष्य-भूमिकायां विमानादिविद्यायाश्चर्चां कृतवान् तथा तेषामुत्सो वेदेष्वेवास्तीति वर्णितवान्।

आदिकविना वाल्मीकिना निर्मिते आदिकाव्ये रामायणे विमानस्य वर्णनमायाति। रामो लङ्कापतिं रावणं हत्वा ससीतया पुष्पकविमानमधिरुह्याकाशमार्गेण लङ्कातोऽयोध्यापर्यन्तमागतवान्। तत्रैव सुन्दरकाण्डे महावीरो हनुमान् लङ्कायां पुष्पकं विमानं पश्यति। विमानमिदं सर्वरत्नविभूषितं पुष्पकं नाम ब्रह्मणः कृते विश्वकर्मणा निर्मितम्। देवानां धनाध्यक्षः कुबेरः परेण तपसा पितामहात्तल्लेभे। लङ्काधिपती रावणस्तं कुबेरं बलेन जित्वा तस्मादपि तद्विमानं हृतवान्[४]। उत्तरकाण्डे प्राप्यते यत् कुबेरस्य पुष्पकं विमानं रावणेन स्वायत्तीकृतम्[५]। तस्य पुष्पकविमानस्य वैशिष्ट्यं वर्णयता महर्षिणा वाल्मीकिना प्रतिपादितम्—विमानमिदं स्वर्णस्तम्भसंवीतं वैदूर्यमणितोरणं मुक्ताजालप्रतिच्छन्नं सर्वकालफलप्रदं मनोजवं कामगवं कामरूपं विहङ्गममासीत्[६]।

महाभारतकालेऽपि विमानस्य स्थितिरासीदिति व्यासप्रणीतेन श्रीमद्भागवतपुराणेन ज्ञायते। तत्र राजा शाल्वो यदुभिः सह युद्धं विमानमधिरुह्य करोति। शाल्वो वृष्णिकृतं वैरं स्मरन् कामगं यानं लब्ध्वा द्वारवतीं ययौ। विमानं

---

१. ऋ.सं. १०/१२३/१, ३/२७/७।

२. नि. १४/१।

३. निर्मथ्य तद्वेदाम्बुधिं भरद्वाजो महामुनिः।
नवनीतं समुद्धृत्य यन्त्रसर्वस्वरूपकम्।। (यन्त्रसर्वस्वम्, बोधानन्दवृत्तिः)

४. वा.रा., सुन्दरकाण्डे-९/१०-२०।

५. तत्रैवोत्तरकाण्डे-१५/३८।

६. तत्रैव-१५/३९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद् बहुरूपैकरूपं मायामयं मयकृतं शत्रुभिर्दुर्विभाव्यं भूमौ व्योम्नि गिरिमूर्ध्नि जले च अलातचक्रवद् भ्रमति स्म[१]।

एकादशशतकस्य धाराधिपतेर्भोजराजस्य समराङ्गणसूत्रधारग्रन्थे यन्त्रविधानाध्याये काष्ठनिर्मितस्य दारुविमानस्य वर्णनं प्राप्यते। दारुमये लघुविमाने अग्निपूर्णस्य रसयन्त्रस्य सन्निवेशे तथा पारदस्य शक्त्या ऊर्जाप्रदानेन च कथं चित्रं कुर्वन् दूरं यातीति वर्णितमस्ति—

लघु दारुमयं महाविहङ्गमं दृढसुश्लिष्टतनुं विधाय तस्य।
उदरे रसयन्त्रमादधीत ज्वलनाधारमयोऽस्य चाग्निपूर्णम् ।।

तत्रारूढः पूरुषस्तस्य पक्षद्वन्द्वोच्चालप्रोज्झितेनानिलेन।
सुप्तस्यान्तः पारदस्यास्य शक्त्या चित्रं कुर्वन्नम्बरे याति दूरम् ।।
इत्थमेव सुरमन्दिरतुल्यं सञ्चलत्यलघु दारुविमानम् ।।[२]

महर्षिभरद्वाजस्य बृहद्विमानशास्त्रेऽपि विमानस्य वर्णनमस्ति। तत्र विमानस्याकाशसञ्चरणायाष्टधा शक्तयो वर्णिताः। तस्य वर्णनस्य वृत्तिं कुर्वता यतिवरेण बोधानन्देन शक्त्युद्गमो भूतवाहो धूमयानः शिखोद्गमोंऽशुवाहस्तारामुखो मणिवाहो मरुत्सखश्चेति विमानानां शक्तयो वर्णिताः। शक्त्युद्गमे विद्युत्शक्त्या, भूतवाहे अग्निजलवाय्वादीनां शक्त्या, धूमयाने वाष्पशक्त्या, शिखोद्गमे तैलेन्धनशक्त्या, अंशुवाहे सौरशक्त्या, तारामुखे चुम्बकशक्त्या, मणिवाहे सूर्यकान्तादिमणीनां शक्त्या, मरुत्सखे वायुशक्त्या च विमानं सञ्चाल्यते स्म[३]।

भरद्वाजस्य वैमानिकप्रकरणे मङ्गलाचरणे ये शास्त्रकाराः सङ्केतितास्तेषामनुसारेण वृत्तिकारो बोधानन्दः षडाचार्याणां तथा तेषां ग्रन्थानामपि वर्णनञ्चकार। तेषु नारायणस्य

---

१. स लब्ध्वा कामगं यानं तमोधाम दुरासदम् ।
यथौ द्वारवतीं शाल्वो वैरं वृष्णिकृतं स्मरन् ।।
बहुरूपैकरूपं तद् दृश्यते न च दृश्यते ।
मायामयं मयकृतं दुर्विभाव्यं परैरभूत् ।
क्वचिद् भूमौ क्वचिद् व्योम्नि गिरिमूर्ध्नि जले क्वचित् ।
अलातचक्रवद् भ्राम्यत् सौमं तद् दुरवस्थितम् ।। (श्रीमद्भाग. १०/७६/८,११,२९)

२. समाराङ्गणसूत्रधारे, यन्त्रविधानाध्याये-३९/९५-९७।

३. शक्त्युद्गमो भूतवाहो धूमयानश्शिखोद्गमः।
अंशुवाहस्तारामुखो मणिवाहो मरुत्सखः।।
इत्यष्टकाधिकरणे वर्णान्युक्तानि शास्त्रतः ।।
(बृहद्विमानशास्त्रे वैमानिकप्रकरणे बोधानन्दवृत्तिः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विमानचन्द्रिका, शौनकस्य व्योमयानतन्त्रम्, गर्गाचार्यस्य यानकल्पम्, वाचस्पतेर्यानबिन्दुश्चाक्रायणीत्याचार्यस्य खेटयानप्रदीपिका, धुण्डिनाथस्य व्योमयानार्कप्रकाशश्चेत्यादयो विमानसम्बद्धा ग्रन्थाः प्रसिद्धाः[१]।

कालिदासस्य काव्येषु विमानवर्णनम्

महाकविकालिदासस्य द्वे महाकाव्ये द्वे खण्डकाव्ये त्रयश्च नाट्यग्रन्थाः प्रसिद्धाः। तेषु ऋतुसंहारे मालविकाग्निमित्रे च विमानस्य वर्णनं न विद्यते। मेघदूते विमानस्य वर्णनं प्रोच्चभवनस्य कृते लभ्यते, न तु देवयानस्य व्योमयानस्य वा कृते। अभिज्ञानशाकुन्तले कुमारसम्भवे रघुवंशे च व्योमयानस्य कृते विमानं वर्णितम्। विक्रमोर्वशीयेऽपि चित्ररथो रथेन मध्यमलोकादवतरति।

अभिज्ञानशाकुन्तले विमानवर्णनम्

अभिज्ञानशाकुन्तले राजा दुष्यन्त इन्द्ररथेन भूलोकादिन्द्रलोकं गच्छति। कालनेमिवंशजान् दैत्यान् हत्वा पुनरिन्द्रलोकाद् भूलोकमवतरति तेनैव रथेन। रथस्य सारथिर्मातलिर्वर्तते। अवतरणकाले राजा दुष्यन्तो मातलिमिन्द्रसारथिं कथयति—मातले, असुरसम्प्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता मया न लक्षितः स्वर्गमार्गः। कतमस्मिन् मरुतां पथि वर्तामहे? तदनन्तरं मातलिर्मरुतां मार्गस्य वर्णनं करोति—

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतिंषि वर्त्तयति च प्रविभक्तरश्मिः।
तस्य द्वितीयहरिविक्रमनिस्तमर्कं
वायोरिदं परिवहस्य वदन्ति मार्गम्॥ (अभि. ७/६)

यो हि गगनस्थितामाकाशगङ्गां धारयति प्रविभक्तरश्मिर्नक्षत्राणि च भ्रमयति। तस्य परिवहनामकस्य पवनस्य द्वितीयविष्णुचरणविन्यासनिर्मलमेतं निस्तमर्कं मार्गं वदन्तीति। ज्ञातव्यमस्ति यद् वायोः सप्त मार्गाः प्रसिद्धाः—आवहः प्रवहः संवहोद्वहो विवहः परिवहः परावहश्चेति[२]। कालानन्तरं दुष्यन्तः स्वीकरोति—अत एव खलु स बाह्यान्तःकरणो ममात्मा प्रसीदति। यानेनागच्छन् दुष्यन्तः कथयति—प्रकटीभवतां पर्वतानां शृङ्गादवरोहतीव पृथिवी प्रतीयते।

---

१. संस्कृतमञ्जरी-८/१, पृ. २२ (संस्कृतवाङ्मये विमानविज्ञानम्—डॉ. प्रकाशमित्रशास्त्री, कानपुरम्)।

२. आवहः प्रवहश्चैव संवहश्चोद्वहस्तथा।
विवहाख्यः परिवहः परावह इति क्रमात्॥ (अभि. शा. ७/६, ४३६ पृष्ठे टीकायां द्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाण्डप्रकाशात् पत्राभ्यन्तरगुप्ततां त्यजन्ति। क्षीणतया नष्टसलिला नद्यः प्रकाशतां प्राप्नुवन्ति। ऊर्ध्वं निक्षिपतेव भूलोकः केनापि मम समीपे आनीयते।[१]

विमानावतरणकाले पृथिव्यां यादृशी स्थितिरवलोक्यते तादृशी स्थितिस्तदानीमासीदिति प्रतीयते। पुनश्चानेन स्पष्टं भवति यदिन्द्ररथो विमानरूपो विद्यते। देवा गगनचारिणो भवन्तीति कालिदासेनान्यत्रापि वर्णितम्[२]। विमानस्य कृते पर्यायभूतशब्दो देवरथोऽप्यस्ति।[३] इन्द्ररथोऽपि देवरथो विमानमेव देवयानम्।

कुमारसम्भवे विमानवर्णनम्

महाकविकालिदासस्य कुमारसम्भवमष्टमसर्गं यावदेव तस्य कृतित्वेन स्वीक्रियते। प्रसिद्धटीकाकारेण मल्लिनाथेनापि अष्टमसर्गपर्यन्तमेवास्य टीका कृता। तत्राष्टमसर्गं यावत् कुमारसम्भवे एकस्मिन्नेव स्थले विमानशब्दस्य प्रयोगो विद्यते। द्वितीयसर्गे प्राप्यते यत् पथि विमानानां खिलीभूते तदापातभयात् स्वर्गिभिर्भुवनालोकनप्रीतिर्नानुभूयत इति[४]।

रघुवंशमहाकाव्ये विमानवर्णनम्

रघुवंशे देवानां कृते वैमानिकानामिति शब्दस्य प्रयोगो दृश्यते[५]। विमानैश्चरन्तीति वैमानिकाश्चरन्तीति ढक्प्रत्ययेन निष्पन्ना देवानां कृते प्रयुक्ताः।[६] अनेन प्रतीयते यद् देवा विमानेन स्वेच्छयाऽऽकाशे परिभ्रमन्ति स्म। राज्ञो दिलीपस्येन्द्रलोकगमनमपि रघुवंशमहाकाव्ये वर्णितमस्ति। तत्र महर्षिवशिष्ठो राजानं दिलीपं कथयति—पुरा शक्रं संसेव्य त्वं पृथिवीलोकमागच्छन्नासीः, मार्गे कल्पवृक्षस्याधः स्थितां कामधेनुं त्वं प्रदक्षिणादिकर्मणा साधु न सत्कृतवान्। अतः सा तुभ्यं शापं ददौ—यतस्त्वं मां तिरस्करोष्यतस्तव सन्ततिर्मम सन्ततेराराधनं विना न भविष्यति। तदानीं कामधेन्वा प्रदत्तः स शापस्त्वया तव सारथिना वा न श्रुतो यत आकाशगङ्गाया उत्कटे प्रवाहे मज्जतां दिङ्नागानां महान् कलकल आसीत्[७]। अनेन प्रतीयते यदभिज्ञानशाकुन्तले यो वायोर्मार्गः परिवहनामको वर्णितः, स मार्गस्त्वत्रापि प्राप्यते यत्र राजा दिलीपः शापस्य ध्वनिं न शृणोति।

---

१. अभि.शा. ७/८; २. रघु. ६/१।

३. अम.को. १/१/४८।

४. भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते।
खिलीभूते विमानानां तदापातभयात् पथि ।। (कुमा. २/४५)

५. रघु. १०/४६; ६. अष्टा. ४/४/८।

७. रघु. १.७५-७८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुवंशस्य पञ्चमे सर्गे रघो रथस्य वर्णनमपि विमानवदेव विद्यते। यथा पवनसहायवतो मेघस्य गतिः सर्वत्र निर्बाधा, तथैव मन्त्राणां प्रोक्षणसामर्थ्याद्रघो रथस्यापि गतिः सागरे पर्वते गगने सर्वत्र प्रतिबन्धरहिता आसीत्[१]। आकाशयानं तु केवलमाकाश एव गच्छति। अत्र वर्णितोऽव्याहतगतियुक्तो रथो मान्त्रिक आकाशयानसदृशः। लङ्कां विजित्य रामः स्वभुजार्जितं पुष्पकविमानं सुग्रीवेण लक्ष्मणेन विभीषणेन च सहाधिरुह्यायोध्यां प्रति प्रतस्थे[२]। रामस्ततः प्रस्थानानन्तरमाकाशं पुष्पकविमानेन प्रविशन् रत्नाकरं वीक्ष्य जायां सीतां प्रावोचत्[३]—पुष्पकविमाने समुपविष्टा वयं विमानवेगाद् मुहूर्तेन पयोधेः कूलं प्राप्ताः[४]। तत्रैव विमानगतिं वर्णयता रामेणोक्तम्—

क्वचित्पथा सञ्चरते सुराणां क्वचिद्घनानां पततां क्वचिच्च।
यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम्[५] ।।

मनसोऽभिलाषो यथाविधिः प्रवर्तते, तथैव पुष्पकविमानमपि क्वचित्सुराणां पथा क्वचिद्वनानां क्वचित्पक्षिणां पथा च सञ्चरते। रामः सीतां पुनः कथयति—त्वया वातायनलम्बितेन करेण स्पृष्ट उद्भिन्नविद्युद्वलयो घनस्ते द्वितीयमाभरणमिव आमुञ्चति[६]। तस्मिन् विमाने काञ्चनस्य क्षुद्रघण्टिका अपि सन्नद्धा आसन्, येभ्यो मनोहरा ध्वनयो निस्सरन्ति स्म[७]। आकाश एव प्रायेण विमानमार्गो भवति[८]। आकाशादवतरतो विमानस्यापि वर्णनं तत्र प्राप्यते। रामचन्द्रस्य यथावदुक्तवति सति तत् पुष्पकं विमानं तदीयामिच्छामधिदेवतया विदित्वा यदा ज्यातिष्पथोऽवततार तदा भरतानुगामिभिः प्रकृतिभिः सविस्मयमुद्वीक्षितम्[९]। विमानादवतरणकाले स्फटिकरचितसोपानसरणी अपि पृथिवीं यावत् संलग्ना भवति स्म, यया विमानयात्रिणोऽवतरन्ति स्म[१०]। पुष्पकविमानमिदं कामगतियुक्तं पताकया विभूषितमासीत्[११]। कामगतियुक्तं पुष्पकबिमानं रावणस्य प्राणैः सह रामेणापहृतम्। अयोध्यायामागमनानन्तरं दिवः पुष्पमिव विमानमिदं पुनः कुबेरारोहणाय राम आदिष्टवान्[१२]। विमानमपि कुबेरं प्रति ययौ। पुरा रावणः कुबेराद् बलपूर्वकं तस्य पुष्पकं विमानं जहारेति पूर्वमेव विवेचितम्।

---

१. रघु.-५.२७; २. तत्रैव-१२.१०४।
३. तत्रैव-१३/१; ४. तत्रैव-१३/१७।
५. तत्रैव-१३/१९; ६. तत्रैव-१३.२९।
७. तत्रैव-१३.३३; ८. तत्रैव-१३.३७।
९. तत्रैव-१३.६८; १०. तत्रैव-१३.६९।
११. तत्रैव-१३.७६; १२. तत्रैव-१४.२०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रघुवंशमहाकाव्यस्य पञ्चदशसर्गे वर्णितमस्ति यद् रामो विप्रपुत्रस्याकालमृत्युं विदित्वा तस्य कारणमन्वेष्टुं वैवस्वतस्यान्तकस्यापि जिगीषया कौबेरं यानं पुष्पकं सस्मार[१]। रघुकुलोद्भवानां रक्षादिभारधारको रामः स्वयं शस्त्रं धृत्वा तत्पुष्पकविमानमध्यास्य[२] वर्णापचारमपनेष्यन् वेगेन निष्कम्पकेतुना पुष्पकविमानेनाकाशे भ्रमन्नारेभे।[३]

उपसंहारः

उपर्युक्तवर्णनेन स्पष्टं भवति यद् भारते विमानस्य प्रचलनं प्राचीनकालादेवासीत्। तदानीं देवसंस्कृतिर्मानवसंस्कृतिर्दानवसंस्कृतिश्च विश्रुताः। देवसंस्कृतिर्भृशमुन्नता तत्रस्था देवाश्च विमानादिसाधनैः सम्पन्ना आसन्। मानवसंस्कृतिरपि विकसिता आसीत्। मानवास्तदा देवानामपि साहाय्यं कुर्वन्ति स्म। देवदानवयुद्धस्य चर्चा वैदिककालादेवोपलभ्यते। कालिदासस्य काव्येष्वपि तयोर्युद्धस्य वर्णनमस्ति, यत्र राजानो देवानां पक्षतो युद्धं कर्तुं गच्छन्ति। अभिज्ञानशाकुन्तलस्य नायको राजा दुष्यन्तः केशिना सह प्रवर्द्धिते युद्धे इन्द्रस्य सहायतां कर्तुं तस्य रथमारुह्येन्द्रलोकं गच्छति, तथा तत्र तेन केशिना सह युद्धं करोति। इन्द्ररथोऽयं देवरथो विमानमेव यस्य गतिराकाशेऽप्यासीत्। तेन रथेनैवेन्द्रलोकादाकाशमार्गेण दुष्यन्तो भूलोकमायाति। रघुवंशमहाकाव्ये राजा दिलीपोऽपि देवस्य पक्षतो दानवैः सह युद्धं कर्तुमिन्द्रलोकं गच्छति। राज्ञो रघो रथोऽपि विमानसदृशः सर्वत्र गन्तुं समर्थः। राजा रामो रावणेनापहृतं कुबेरस्य पुष्पकविमानं रावणं हत्वा जहार, तथान्ते तस्मै कुबेराय ददौ। ब्राह्मणपुत्रस्याकालमृत्यौ स्वयं रामः कुबेरस्य पुष्पकविमानं सस्मार तथा समागतं विमानमारुह्य कारणमन्वेष्टुमाकाशे भ्रमणञ्चकार। अनेन प्रतीयते यत्तदा देवानां पार्श्वे विमानमासीत्। दानवा उग्रेण तपसा देवैः प्राप्तबलेन देवानपि विजित्य तेषां विमानस्यापहरणं कुर्वन्ति स्म। मानवानां रथविशेषोऽपि विमानसदृशस्तदानीमासीत्। विक्रमोर्वशीये गन्धर्वराजश्चित्ररथो रथेन पृथिवीलोकमवतरति।

कालिदासेन विमानं दृष्टं न वा दृष्टं परं तेन संस्कृतवाङ्मये चित्रितं विमानविज्ञानमेव स्वकाव्येषु विवेचितम्। विमानविषयकं ज्ञानं तत्र तेन प्रतिपादितमिति दिक्।

---

१. रघु. १५/४५।

२. तत्रैव-१५/४६;

३. तत्रैव-१५/४८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यस्य भूमिः

डॉ. ददन-उपाध्यायः
सहायकसम्पादकः, प्रकाशनसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम्

❀ ❀ ❀

काव्यस्योपादेयता

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथाऽसौ रोचते विश्वं तथेदं परिवर्तते ।। (ध्वन्या., तृ.उ.,पृ. ५५१)

पुरुषार्थचतुष्टयस्य प्राप्तिरेव पुरुषस्य पुरुषार्थता। तस्मै शास्त्राध्ययन-योगसाधन-तपश्चरण-देवताराधन-तन्त्रमन्त्रोपासनादिकानि विविधानि साधनानि शास्त्रेषु प्रथितानि। तत्र वेदादिशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव चतुर्वर्गफलप्राप्तिर्जायते। परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव तत्प्राप्तिर्भवति, नास्त्यत्र सन्देहलेशस्यावसरः। अत एव चतुर्दशभाषाविलासिनीभुजङ्गेन महापात्रविश्वनाथेनोक्तं साहित्यदर्पणे—

चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ।। (सा.द.१.२)

भामहस्तु काव्यात् पुरुषार्थचतुष्टयस्य प्राप्त्या सह कलासु वैलक्षण्यं कीर्तिः प्रीतिश्च प्राप्यत इति स्वीकरोति। यथा—

धर्मार्थकाममोक्षाणां वैलक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ।।

अपरञ्च कालिदासादीनामिव यशः, श्रीहर्षादेः धावकादीनामिव धनं मयूरादीनामिव कुष्ठादिमहारोगनिवृत्तिः काव्यश्रवणसमनन्तरमेव ब्रह्मानन्द-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहोदरानन्दलाभः, कान्तासम्मितसदुपदेशप्राप्तिश्च भवति। यथा मम्मटाचार्येण काव्यप्रकाशे साधूक्तम्—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।।

रुद्रटस्तु काव्यं समस्ताभिमतप्रदायकं मन्यते । यथा—

अर्थमनर्थोपशमं शमसममथवा मतं यदेवास्य ।
स्वरचितरुचिरसुरस्तुतिरखिलं लभते तदेव कविः ।।

(काव्याल० १.४)

राजानकः कुन्तकस्तु काव्यं पुरुषार्थचतुष्टयस्य प्राप्तेरधिकमानन्दप्रदायकं स्वीकरोति। यथा—

चतुर्वर्गफलस्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ।। (वक्रोक्तिजीवितम्)

इदमेव कारणमस्ति यत् कष्टसाध्ययोगतपश्चर्यादिसाधनानि परित्यज्य काव्यसेवनेन मानवस्य चरमोद्देश्यस्य प्राप्त्यर्थं सहृदयजनानां काव्ये प्रवृत्तिर्भवति। आचार्येण भामहेनोद्घोषितम्—

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुज्यते ।
प्रथमालीढमधवः पिबन्ति कटुभेषजम् ।। (काव्यालङ्कारे-५.३)

राजानकेन कुन्तकेनापि काव्येतरशास्त्रान् कटुकौषधं काव्यञ्चाविवेक-रोगशमनीयं मधुरं भेषजं स्वीकुरुते। यथा—

कटुकौषधवच्छास्त्रमविद्याव्याधिनाशनम् ।
आह्लाद्यमृतवत्काव्यमविवेकगदापहम् ।। (वक्रोक्तिजीवितम्)

मानवजीवने सर्वं समभीप्सितं वस्तु प्राप्तुं शक्यते काव्यात्, अत एव कथितम्—

न स शब्दो न तद्वाच्यं न सा विद्या न सा कला ।
जायते यन्न काव्याङ्गमहो भारो गुरुः कवेः ।।

किमधिकमाचार्यैः काव्यं ब्रह्मरूपेण प्रतिपादितम्। यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदेतद्वाङ्मयं विश्वमर्थमूर्त्या विवर्तते ।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ ।।

विष्णुपुराणे काव्यं शब्दमूर्तिधरस्य महात्मनो विष्णोरंशः स्वीकृतः। यथा—

काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ।।

काव्यस्योपादेयताग्निपुराणेऽप्युक्तम्—

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ।।इति।

'काव्यालापांश्च वर्जयेत्' इत्युक्तिस्तु निकृष्टाश्लीलकाव्यं प्रत्यस्ति, न तूदात्तचरितप्रतिपादकानां काव्यानां कृते। तेषां वर्णनेन तु कलेः पापस्य नाशो भवति। तानि पुण्येन कीर्तनीयानि भवन्ति। यथोक्तम्—

कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ।।

अन्यच्च—

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ।।

अतः काव्यानि सन्तसहृदयजनसेव्यानि भवन्ति। तत्रापि यथैकदेवोपासका देवद्वयोपासका बहुदेवोपासका जना रुचीनां वैचित्र्यादवलोक्यन्ते, तथैव केऽपि काव्यमेकमन्ये काव्यद्वयमितरे च बहुकाव्यं प्रति स्वकीयां श्रद्धामर्पयन्ति। एतादृशीं श्रद्धामेवोररीकृत्य केनापि कथितम्—'मेघे माघे गतं वयः'।

प्रतिपाद्यकाव्यस्य प्रणेतृणा महाकविना श्रीनीलकण्ठदीक्षितेनापि डिण्डिमघोषेनोद्घोष्यते—

हालास्येशितुरीशितुर्यदि सखे! लीलासु शुश्रूषसे
तत्सर्वागमगुप्तमस्य यदि वा तत्त्वं विजिज्ञाससे ।
पारं वाथ दिदृक्षसे यदि परं काव्यागमस्रोतसां
तत्कर्णे कुरु नीलकण्ठमखिनो वाचं शिवैकाश्रयाम् ।।
(शिवली. २२.९९)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्यमल्पपुण्यवान् कथमपि प्राप्तुं न शक्नोति, यतो हि जगन्मङ्गलकर्त्तुः परमेश्वरस्याङ्गभूतं काव्यम्। तद्यथा—

सव्यं वपुः शब्दमयं पुरारेरर्थात्मकं दक्षिणमामनन्ति ।
अङ्गं जगन्मङ्गलमैश्वरं तदर्हन्ति काव्यं कथमल्पपुण्याः ।।
(शिवली. १.१५)

काव्यकारणता

काव्यस्य कारणताविषये विद्वत्सु मतैक्यं नास्ति। रुद्रटवामन-पण्डितराजजगन्नाथादयः प्रतिभामेव काव्यस्य कारणं स्वीकुर्वन्ति। दण्डी-मम्मट-वाग्भट-पीयूषवर्षादयस्तु प्रतिभाव्युत्पत्त्यभ्यासांश्च काव्यं प्रति कारणं मन्यन्ते। राजशेखरस्तु भिन्नं मतमुपस्थापयति। सामान्यतयाऽऽचार्याणामेषां मतमत्रोपस्थाप्यते।

काव्यकारणविषये दण्डिना प्रोक्तम्—

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः ।।

अर्थात् स्वाभाविकी प्रतिभा, प्रचुरं दोषहीनञ्च शास्त्रश्रवणं, तेन व्युत्पत्तिः, परिपूर्णोऽभ्यासश्च, तेन पौनःपुन्येन काव्यकरणस्याभ्यासः। एते त्रयः काव्यसम्पत्तयः। पुनश्च ते कथयन्ति—यद्यपि पूर्ववासनागुणानुबन्धिप्रतिभा नैवास्ति, तथापि शास्त्रश्रवणाभ्यासाभ्यां सेविता वाग्देवी सेवकानामुपरि कञ्चिदनुग्रहं करोति। यथा तैरुक्तम्—

न विद्यते यद्यपि पूर्ववासनागुणानुबन्धिप्रतिभानमद्भुतम् ।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम् ।।

वाग्देवतावतारो मम्मटाचार्योऽपि दण्डिनः कारणतावादमेव स्वीकरोति। तस्य वचनमस्ति—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ।। (का. प्र. १.३)

कवित्वबीजरूपः संस्कारविशेषः शक्तिः, लोकशास्त्रकाव्याद्यवेक्षणा-न्निपुणता, काव्यज्ञशिक्षयाभ्यास इति एतत्त्रितयं तस्य काव्यस्य उद्भवे निर्माणे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुल्लासे च हेतुः। हेतुरित्यत्रैकवचनता 'जात्याकृतिव्यक्तयः पदार्थः' इति गौतमसूत्रे पदार्थ इत्यत्रैकवचनता यथा त्रिष्वेव पदशक्यत्वं तथा हेतुरित्यत्रैकवचनेन दण्डचक्रचीवरादिन्यायेन परस्परसापेक्षतया हेतुत्वमिति लभ्यते, न तु तृणारणिमणिन्यायेन व्यस्तानामिति।

अस्मिन् प्रसङ्गे वाग्भटस्याभिप्रायमस्ति—प्रतिभा काव्यस्य कारणम्, व्युत्पत्तिर्भूषणम्, अभ्यासस्तु काव्यरचनायां प्रगतिं करोति। तस्य शब्देनैवावलोकयन्तु सुधियः—

प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम्।
भृशोत्पत्तिकृदभ्यास इत्यादि कविसङ्कथा ।।

पीयूषवर्षो जयदेवस्तु पूर्वाचार्याणां मतमनुसरन् कथयति। यथा—

प्रतिभैव श्रुताभ्याससहिता कवितां प्रति।
हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव ।। (चन्द्रालोके-१.६)

रुद्रटः केवलां शक्तिमेव काव्यस्य कारणं स्वीकरोति, सः शक्तिं विवेचयन् कथयति—

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः ।।

सहजोत्पाद्या च सा द्विधा भवति, उत्पाद्या तु कथञ्चिद् व्युत्पत्त्या जन्यते परया।

वामनोऽपि केवलां प्रतिभामेव कारणं मन्यते। तस्य कथनमस्ति-'कवित्वस्य बीजं प्रतिभानम्। यद् विना काव्यं न निष्पद्यते निष्पन्नं वा हास्यायतनं स्यात्'।

पण्डितराजो जगन्नाथः स्वकीयं मतमुपस्थापयन् कथयति—'तस्य (काव्यस्य) च कारणं कविगता केवला प्रतिभा। सा च काव्य-घटनानुकूलशब्दार्थोपस्थितिः। तस्याश्च हेतुः क्वचिद् देवतामहापुरुष-प्रसादादिजन्यमदृष्टम्, क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ'।

राजशेखरोऽपि काव्यमीमांसायां विषयेऽस्मिन् विस्तरेण स्वकीयं मतमुप-स्थापितवान्। स तु श्यामदेवस्य मतमुद्घाटयन् कथयति—'काव्यकर्मणि कवेः समाधिः परं व्याप्रियते' इति श्यामदेवः। 'मनस एकाग्रता समाधिः'। समाहितं चित्तमर्थान् पश्यति, उक्तञ्च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वतं किमपि तत्सुमहारहस्यं
यद्गोचरं च विदुषां निपुणैकसेव्यम् ।
तत्सिद्धये परमयं परमोऽभ्युपायो
यच्चेतसो विदितवेद्यविधेः समाधिः ।।

आचार्यो मङ्गलः काव्यतत्त्वस्य सिद्धेश्चरमोपायो विच्छेदेन शीलनात्मकोऽभ्यासः स्वीकरोति। स हि सर्वगामी सर्वत्र निरतिशयं कौशलमाधत्ते। समाधिरान्तरः प्रयत्नो बाह्यस्त्वभ्यासः। तावुभावपि शक्तिमुद्भावयतः। 'सा (शक्तिः) केवलं काव्ये हेतुः' इति यायावरीयः। विप्रसृतिश्च सा प्रतिभाव्युत्पत्तिभ्याम्। शक्तिकर्तृके हि प्रतिभा व्युत्पत्तिकर्मणी। शक्तस्य प्रतिभाति शक्तश्च व्युत्पद्यते। या शब्दग्राममर्थसार्थमलङ्कारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति, सा प्रतिभा। अप्रतिभस्य पदार्थसार्थः परोक्ष इव प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इव। यतो मेधाविरुद्रकुमारदासादयो जात्यन्धाः कवयः श्रूयन्ते। केचन महाकवयोऽपि देशद्वीपान्तरकथापुरुषाद्यदर्शनेन तत्रत्यां व्यवहृतिं निबध्नन्ति स्म। अनेन प्रकारेण काव्यमीमांसायां काव्यकारणविषये बहुचर्चितवान् राजशेखरः। जिज्ञासवः सुधियस्तत्रैवावलोकयन्तु।

कवेः काव्यस्य च लक्षणम्

'कवेः कर्म काव्यम्' इति व्युत्पत्त्या कविशब्दसिद्धिविषयिणी जिज्ञासा समुत्पद्यते। तत्र शब्दकल्पद्रुमे 'कु शब्दे' इति धातोः 'अच इ' (उणादि-सू. ५७८) इति सूत्रेण 'इ'प्रत्यये कृते कविशब्दस्य व्युत्पत्तिः साधिता। अमरकोशस्य टीकाकारेण भानुजीदीक्षितेन 'कवते श्लोकान् ग्रथते, वर्णयति वा कविः' इति कविशब्दस्य व्युत्पत्तिर्निर्दिष्टा। एकावलीकारेण विद्याधरेण 'कवयति। इति कविः, तस्य कर्म काव्यम्' इति कवेः काव्यस्य च व्युत्पत्तिः कथिता। ध्वन्यालोकस्य लोचनटीकाकारेण श्रीमदभिनवगुप्तपादाचार्येण 'कवनीयं काव्यम्' इति काव्यस्य निर्वचनं कृतम्। काव्यमीमांसायां श्रीमद्राजशेखरेण 'कवृ वर्णे' धातोः कविशब्दस्य सिद्धिः साधिता। तद्यथा—कविशब्दश्च 'कवृ वर्णे' इत्यस्य धातोः काव्यकर्मणि रूपम्। वाग्देवतावतारः श्रीमम्मटाचार्यः काव्यशब्दार्थमाह—काव्यं लोकोत्तरवर्णनानिपुणकविकर्म। तेन लोकविलक्षणा चमत्कारबोधजनिका या वर्णना मुखादेः कमलत्वादिरूपेण कथनादि, तत्र निपुणस्य कवेरसाधारणतादृग्वर्णनात्मकं कर्म काव्यं भवति। कर्म च योजनं न तूच्चारणं मौनिपद्ये व्यभिचारात्। अनया रीत्या वस्त्वसाधारणवर्णयिता कविः, तस्य कर्म कृतिर्वा काव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्यपि वैदिके लौकिके च साहित्ये कविशब्दस्य प्रयोगो विभिन्नेष्वर्थेषु दृश्यते। तद्यथा—

कविर्मनीषी परिभूः स्वयम्भूः। (शुक्लयजु० ४०.८)

इत्यत्र कविशब्दः परमेश्वराय प्रयुक्तः। भागवतमहापुराणे 'आदिकविः' इति प्रयोगो ब्रह्मणः कृतेऽभवत्। 'विद्वान् विपश्चिद् दोषज्ञः ..... पण्डितः कविः' (अमर. २.७.५) इत्यत्र शुक्राचार्याय विदुषे च कविशब्दस्य प्रयोगो दृश्यते। 'किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः' (गी. ४.१६) इत्यत्र विदुषे कविशब्दः प्रयुक्तः, निर्दिष्टादर्थादतिरिक्तं कविशब्दो वाल्मीकिव्यासयोः कृते प्रयुक्तोऽभवत्। ततः स एव कविशब्दः कालिदास-भास-दण्डी-बाण-हर्षादीनां काव्यनिर्मातॄणां कृते प्रचलितोऽभवत्।

कवेः कृतिरेव काव्यम्। तत्र कविकृतिः शब्दरूपेणार्थरूपेण शब्दार्थोभयरूपेण वा अस्तीति जिज्ञासायां पूर्वाचार्याणां स्वप्रतिभया प्रसूतं काव्यलक्षणमत्र प्रस्तूयते। तत्र प्रथमं 'शब्द एव काव्यम्' इति मत्वा कृतानि चिरन्तनाचार्याणां काव्यलक्षणानि प्रदर्श्यन्ते। तत्राग्निपुराणे—सङ्क्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली काव्यम्'। काव्यादर्शे दण्डिना—'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली' इति काव्यलक्षणं कृतम्। काव्यदीपिकायां कान्तिचन्द्रेण च 'इष्टार्थव्यवच्छिन्ना पदावली' इति काव्यलक्षणमभिहितम्। शौद्धोदनिना अलङ्कारशेखरे तद्वृत्तिकारेण केशवमिश्रेण च 'काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्' इति। श्रीमता भोजदेवेनापि सरस्वतीकण्ठाभरणे—

निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ।।इति।

पीयूषवर्षेण जयदेवेन चन्द्रालोके—

निर्दोषा लक्षणवती सरीतिगुणभूषिता ।
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक् ।। इति।

महापात्रेण विश्वनाथेनापि साहित्यदर्पणे—

'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणं प्रत्यपादि।

पण्डितराजेन जगन्नाथेन रसगङ्गाधरे—'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इत्येवंप्रकारेण काव्यलक्षणं कृतम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ ये च शब्दे चार्थे चोभयत्र काव्यत्वमभ्युपगच्छन्ति, तेषां विवरणं प्रदर्श्यते। तत्र रुद्रटः शब्दार्थौ काव्यं स्वीकरोति। काव्यालङ्कारे वामनेन 'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते' इति कथितम्। विद्याधरेणैकावल्याम्—'शब्दार्थौ वपुरस्य शब्दार्थवपुस्तावत्काव्यम्' इति। विद्यानाथेन प्रतापरुद्रीये—

गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ ।
गद्यपद्योभयमयं काव्यं काव्यविदो विदुः ।। इति।

अच्युतरायेण साहित्यसारे—

तत्र निर्दोषशब्दार्थगुणवत्त्वे सति स्फुटम् ।
गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम् ।। इति।

मम्मटेन काव्यप्रकाशे 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति। न्यायवागीशेनालङ्कारचन्द्रिकायाम्—

गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावगौ ।
नित्यदोषविनिर्मुक्तौ काव्यमित्यभिधीयते ।।

शब्दार्थयोः साहित्यं काव्यं मन्यमानानामाचार्याणां लक्षणमत्राभिधीयते। तत्र भामहोद्भटानन्दवर्धनाचार्याः 'शब्दार्थौ साहित्यं काव्यम्' इति स्वीकुर्वन्ति। कुन्तकेन वक्रोक्तिजीविते—

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी ।
वन्दे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी ।। इति।

वाग्भटेन—

साधुशब्दार्थसन्दर्भगुणालङ्कारभूषितः ।
स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ।। इति।

क्षेमेन्द्रेण कविकण्ठाभरणे—

काव्यं विशिष्टशब्दार्थसाहित्यसदलङ्कृतिः ।। इति।

श्रीमता भोजदेवेन शृङ्गारप्रकाशे 'शब्दार्थयोः साहित्यं काव्यम्' इति स्वीकृतम्। आचार्यमम्मटोऽपि 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि'

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति काव्यलक्षणं संवदते। तत्र शब्दार्थयोः काव्यत्वप्रयोजकं चमत्कारत्वम्, तत्प्रयोजको गुणोऽलङ्कारो रसश्च। यद्वा गुणादेश्चमत्कारातिशयाधायकत्वाद् रसालङ्कारावेव काव्यत्वप्राणभूतचमत्कारप्रयोजकौ। श्रीनीलकण्ठदीक्षितोऽपि 'शब्दार्थौ काव्यं' प्रति स्वकीयां स्वीकृतिमददात्। तद्यथा—

शब्दार्थौ दोषनिर्मुक्तौ सालङ्कारौ गुणोत्तरौ ।

काव्यमातिष्ठमानेभ्यः कविभ्योऽयं कृताञ्जलिः ।। (शिवली. २०.६)

काव्यस्य भेदाः

दृश्यश्रव्यभेदेन काव्यं द्विविधं भवति। तत्र दृश्यमभिनेयं भवति। तद् दृश्यं काव्यं नटे रामादिस्वरूपारोपाद् रूपकमित्युच्यते। यथा विश्वनाथेन साहित्यदर्पणे प्रोक्तम्—

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।

दृश्यं तत्राभिनेयं तद्रूपारोपात्तु रूपकम् ।। (सा.द. ६.१)

रूपकमिदं नाटकादिभेदेन दशधा भवति। रूपकमिव किञ्चिद्विशेषणविशिष्टमुपरूपकमपि चाष्टादशभेदविभक्तं भवति। श्रवणमात्र-गोचरीभूतं काव्यं श्रव्यं कथ्यते। तत्तु गद्यपद्योभयात्मकभेदेन त्रिविधं भवंति। तद्यथा साहित्यदर्पणे—

श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा। (सा.द. ६.३१३)

छन्दोबद्धपदं पद्यकाव्यं भवति। तत्तु सप्तविधं प्रोक्तम्—

१. मुक्तकम्, २. सन्दानितकम्, ३. कलापकम्, ४. कुलकम्, ५. युग्मकम्, ६. खण्डकाव्यम्, ७. महाकाव्यञ्चेति। तत्तु साहित्यदर्पणे प्रतिपादितम्—

छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।

द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते ।।

कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्।। (सा.द.६.३१४-३१५)

काव्यस्यैकदेशानुसारि खण्डकाव्यं भवति, यथा— मेघदूतादिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुनश्च गद्यकाव्यं कथाख्यायिकाभेदेन द्विधा विभजते। श्रीविश्वनाथो गद्यं मुक्तक-वृत्तगन्धि-उत्कलिकाप्राय-चूर्णकभेदेन चतुर्विधं स्वीकरोति। तद्यथा—

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।

भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम् ।। (सा.द. ६.३३०-३३१)

गद्यपद्यमिश्रितं काव्यं चम्पूनाम्ना व्यवह्रियते। गद्यपद्यमयी राजस्तुति-र्विरुदनाम्नाभिधीयते। विविधाभिर्भाषाभिर्विनिर्मितं काव्यं करम्भकसंज्ञया ज्ञायते।

महाकाव्यस्य लक्षणम्

छन्दोबद्धपद्यमयं सर्गेण बद्धं महाकाव्यं भवति। तत्र धीरोदात्तगुणान्वितः सद्वंशः क्षत्रियः सुर एको नायको भवति, क्वचिदेकवंशभवाः कुलजा बहवोऽपि भूपा नायका भवन्ति महाकाव्ये। अस्य सुविस्तृतं लक्षणं साहित्यदर्पणे प्रपञ्चितम्। तद्यथा—

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ।।
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ।।
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम् ।।
चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ।।
क्वचिन्निन्दा खलादीनां सतां च गुणकीर्त्तनम् ।।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ।
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ।
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संयोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ।
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।।
नामास्य सर्गोपादेयकथया सर्गनाम तु ।।

(सा.द. ६.३१५-३२५)

महाकाव्यस्योद्भवो विकासश्च

संस्कृतसाहित्यजगति महाकाव्यस्योद्भवः कदाप्रभृत्यभूदिति यद्यपि न पार्यते निश्चयेन वक्तुम्, तथापि महाकाव्यस्य प्रथमं स्रोतमृग्वेदे प्राप्तुं शक्यते। तत्र विद्यमाना मन्त्राः कविप्रतिभां प्रति सङ्केतयन्ति; किन्तु काव्यशैल्याः पूर्णो विकासो वैदिककाले नैव मन्तुं शक्यते। ब्राह्मणग्रन्थेषु पुराणकाले सुपर्णाध्यायेऽपि काव्यस्याभा दृष्टिपथमायाति; परन्तु संस्कृतसाहित्ये सर्वप्रथमं महाकाव्यमादिकवेर्वाल्मीके रचितं रामायणमेव। तेन वाल्मीकिर्हि लौकिकसंस्कृतसाहित्यस्यादिकविरादिकाव्यञ्च तस्य रामायणम्। अत एव केनापि कथितम्—

धर्म्यं यशस्यमायुष्यं राज्ञञ्च विजयावहम् ।
आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम् ।। इति।

अत्र हि सप्तकाण्डानि, प्रतिकाण्डञ्च सर्गेषु विभक्तम्। अत्र हि नायको धीरोदात्तगुणान्वितः सद्वंशक्षत्रियो रामः। तत्र वीरो मुख्यो रसः शृङ्गारादयश्चान्येऽङ्गानि। फलञ्चास्य धर्मः ।

यद्यपि महाभारतेऽपि काव्यात्मकत्वं विलसत्येव, तथापि न तथा तत्र काव्यलक्षणं घटते यथा रामायणे।

एतावेव संस्कृतसाहित्यकाव्यधाराया उद्गमस्रोतसी । ये भास-कालिदास-अश्वघोष-भारवि-माघ-श्रीहर्षादिविभिन्नधारायां विभज्य संस्कृतसाहित्यकाननं चिरकालादेव सिञ्चतः। रामायणस्य सरला स्वाभाविकी च शैली पूर्ववर्त्तिनः कालिदासादीन् महाकवीन् पूर्णतया स्वभासा चमत्करोति। परवर्तिनां कृते महाकाव्यस्यादर्शं प्रस्तौति। यद्यपि रामायणमहाभारतयोरनन्तरं कालिदासं यावत् कस्यापि कवेर्महाकाव्यस्य दर्शनं न भवति, तथापि महर्षिः पाणिनिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(२८००वि.पू.) 'पातालविजयम्', 'जाम्बवतीविजयम्' महाकाव्यद्वयं रचितवानित्युल्लेखः प्राप्यते। महर्षिः पतञ्जलिरपि (१२००वि.पू.) स्वकीये महाभाष्ये काव्यसाहित्येन पूर्णपरिचितः प्रतिभाति। एकतः 'भारत'-नाम्ना काव्येन स्वकीयं परिचयं प्रकटयति, तत्रैवान्यतः 'कंसवधम्', 'बलिबन्धम्' अभिधेययोर्नाटकयोर्निर्देशं करोति। कविकुलगुरोः कालिदासस्य साहित्यकाव्यधारा अजस्रं प्रवहति। अस्मिन्नेव क्रमे श्रीनीलकण्ठदीक्षितप्रणीतं 'शिवलीलार्णवं' नाम महाकाव्यं दृष्टिपथं परिपूतं करोति। अन्येऽपि परश्शतानि काव्यानि संस्कृतसाहित्यजगति निर्मितानि, निर्मीयन्ते चाधुनापीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टिस्तस्य काव्यत्वञ्च

श्रीरंजनकुमारपाण्डेयः
शोध-छात्रः
वीर-कुँवरसिंहविश्वविद्यालयस्य
आरा

❀ ❀ ❀

संस्कृतवाङ्मयस्येतिहासे वैयाकरणरूपेण समादृतो भट्टिरस्माकं कविरूपेण समीक्ष्यो वर्तते। भट्टिरचितरावणवधं काव्यत्वस्य दृष्ट्याऽतीव-महत्त्वपूर्णं विद्यते, महाकाव्यस्य च श्रेण्यां स्थानं लभते। रावणवधं महाकाव्यं भट्टिकाव्यमिति रूपेण चर्चितं वर्तते। भट्टिमाश्रित्य विदुषां मध्ये पर्याप्तो विवाद आसीत्। यतः स्वविषये तेनात्मनः कृतिषु विशेषः सङ्केतो न दत्तः; किन्तु स स्वस्मिन् काव्ये स्वाश्रयदातुः श्रीधरसेनस्योल्लेखः कृतवानस्ति—

काव्यमिदं विहितं मया वल्भ्यां श्रीधरसेननरेन्द्रपालितायाम्।
कीर्तिरतो भवतान्नृपस्य तस्य क्षेमकरः क्षिपतो यतः प्रजानाम्[१]।।

अनेनेदमपि विदितं भवति यत् श्रीधरसेनो वलभीनरेश आसीत्; किन्तु वल्भ्यां चतुर्णां श्रीधरसेनानामस्तित्वं प्राप्यते। प्रथमस्य श्रीधरसेनस्य कालः ५०२ ख्रीष्टाब्दो विद्यतेऽन्तिमस्य च ६४१ ख्रीष्टाब्दोऽस्ति। श्रीधरसेनस्य द्वितीयस्य ६१० ख्रीष्टाब्दस्य शिलालेखे कस्मैचिद् भट्टिनाम्ने विदुषे किञ्चिद् भूमिदान-मुल्लिखितमस्ति।[२]

निश्चयेनानुमीयते यदयमेव श्रीधरसेनो भट्टेराश्रयदाता प्रशंसकश्चासीत्। यस्य समयः षष्ठशतकस्योत्तरार्द्धः सप्तमशतकस्य चारम्भे मन्यते। अयमेव कालो भट्टिकवेः स्थितिकालोऽवगन्तव्यः।

---

१. रावणवधम्-२२।३५।
२. संस्कृतसाहित्यस्य रूपरेखा—पाण्डेयो व्यासश्च, पृष्ठ-सं.५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

केचन भट्टेर्वत्सभट्टिना[१] साकं साम्यं दर्शयित्वा भट्टिसम्बन्धिनं विवादं वर्धयन्ते। वी.सी. मजूमदारमहानुभावस्तु मन्दसौराभिलेखस्य रचयितरि वत्सभट्टौ भट्टौ चाभिन्नतां स्वीकृतवानस्ति; किन्त्विदमुचितं न प्रतीयते, यतो भट्टिरेकः प्रख्यातो वैयाकरण आसीत्, अभिलेखे च व्याकरणसम्बन्धिन्यः कतिपया अशुद्धयो विद्यन्ते। वैयाकरणेन भट्टिना नैतच्छक्यम्[२]। भट्टेर्भर्तृहरेश्चोभयोर्नाम्नोरत्यधिकं साम्यं दृष्ट्वा केचिद्विद्वांसो द्वावेवैकं पुरुषं स्वीकुर्वन्ति। तेषां मतमस्ति यद् भट्टिर्भर्तृहरेरेवापरं नामाऽऽसीत्। भर्तृहरेरेव प्राकृतं रूपं भट्टिरस्ति। उभावेव वैयाकरणावास्ताम्। उभयोर्जीवनकालेऽपि समता विद्यते। इत्सिंगस्यानुसारेण भर्तृहरेर्मृत्युः ६४० ख्रीष्टाब्दे प्रायो निर्णीयते। इत्थमुभयोर्नाम्नि काले च साम्यं विदुषामेतं विचारं पुष्णाति यद् भट्टिकाव्यस्य रचयिता कविर्भट्टिर्भर्तृहरेर्भिन्नो नासीत्, किन्त्वेवं प्रतीयते यदुभयोरभिन्नतां स्वीकुर्वन्तो विद्वांसस्तयोः साम्यमेव द्रष्टुं प्रयत्नवन्तो न तु वैषम्यम्। यद्युभयोर्व्यक्तिनिष्ठस्य जीवनस्य विविधपक्षाणां कयाचिद्गहनया दृष्ट्याऽध्ययनं कुर्याच्चेदुभयोर्नाम्नैव साम्यं दृश्यते, शेषं केवलं वैषम्यमेवावलोक्यते। भर्तृहरिः क्षत्रिय आसीत् किन्तु भट्टिर्ब्राह्मणः। प्रथमस्य सम्बन्धो मध्यभारते नासीत्; किन्तु द्वितीयस्य वल्लभीराज्यपरिवारेण। भर्तृहरिर्यद्यपि हरिहरयोर्भेदं न मनुते स्म, तथापि विष्णोरपेक्षया शिवे तस्याधिका निष्ठाऽऽसीत्। भर्तृहरिः शैवः, किन्तु भट्टिः परमनिष्ठावान् वैष्णव आसीत्। उभयोः कृतीनां परिशीलनेन सुस्पष्टं भवति यत् ताः कृतयो नैकस्य कवेर्बुद्धेर्विलासाः। भर्तृहरेस्तुलनायां भट्टिर्व्याकरणशास्त्रस्य मर्मज्ञो विद्वानासीत्। स वैयाकरणस्त्वासीदेव कविरप्यासीत्। शब्दसम्पत्तौ तस्य पूर्णाधिपत्यमासीत्। तस्य भट्टिकाव्यं व्याकरणस्यापि विशिष्टो ग्रन्थोऽस्ति। केवलं भट्टिकाव्यमधीत्यैव कश्चिद् व्याकरणस्य यथेष्टं ज्ञानं प्राप्तुमर्हति; किन्तु 'सुभाषितत्रिशती' इत्यस्य विषये नेत्थं कथयितुं पार्यते। तद्भाषारूपं नास्ति व्यवस्थितम्। शब्दयोजना क्वचिद्भारस्वरूपा लक्ष्यते। कालगतसाम्यकथनमपि न प्रामाणिकम्। यत इत्सिङ्गानुसारेण ६५० ख्रीष्टाब्दे मृत्योः कथनं न प्रमाणसम्मतम्। अतो

---

१. संस्कृतसाहित्यस्येतिहासः-भाग १, सेठ-कन्हैयालालपोद्दारः, पृ.१०६ (१९६८)।

२. संस्कृतसाहित्यस्येतिहासः — डॉ. शर्मा सिंहलश्च, पृ.३९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वावभिन्नावास्तामिति न सन्देहलेशः[१]। डॉ. हाल्ट्समहोदयेनासां युक्तीनां सम्यग् रूपेण विवेचनं विहितम्[२]। केषाञ्चिदितिहासकाराणां मान्यता विद्यते यत् कविर्भट्टिर्द्वितीयस्य वल्लभीनरेशस्य राजकुमाराणां गुरुरासीत्, स चैतेषां राजकुमाराणां शिक्षणाय कमनीयायां काव्यमय्यां भाषायामस्य व्याकरणपरकस्य महाकाव्यस्य रचनां कृतवानासीत्[३]।

अस्मिन् भट्टिकाव्ये द्वाविंशतिः सर्गाः १६२४ श्लोकाः सन्ति। काव्येऽस्मिन् रामस्य जन्मना आरम्भ राज्याभिषेकं यावत् कथास्ति। इत्थमिदं काव्यं रामायणकथामनुसृत्य रचितं विद्यते। अस्य महाकाव्यस्य रचनाया मुख्यं लक्ष्यं रामकथावर्णनेन सार्धं व्याकरणस्य जटिलनियमानामुदाहरणस्य प्रस्तुतीकरणं विद्यते। वैयाकरणानां कृते काव्यमिदं दीपकतुल्यमस्ति किन्त्ववैयाकरणानां कृते नेत्रहीनस्य हस्ते दर्पण इव—

दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।
हस्तादर्श इवान्धानां भवेद्व्याकरणादृते[४]॥

काव्यमिदं प्रकीर्णकाण्डम्, अधिकारकाण्डम्, प्रसन्नकाण्डम्, तिङन्तकाण्डञ्चेति चतुर्षु भागेषु विभक्तं कर्त्तुं शक्यते। प्रकीर्णकाण्डे प्रथमसर्गादारभ्य पञ्चमसर्गं यावदित्यस्य कथा समाविष्टा वर्तते। काण्डेऽस्मिन् रामजन्मतः सीताहरणं यावत् कथा कथिताऽस्ति। व्याकरणस्य दृष्ट्याऽत्र कृत्प्रत्ययानां दर्शनं भवति। अधिकारकाण्डे षष्ठसर्गान्नवमसर्गपर्यन्तं चत्वारः सर्गाः समाविष्टाः सन्ति। अस्मिन् बालिवधराज्याभिषेकादिघटना वर्णिताः सन्ति। अस्मिन् लुङ्-कृत्-षत्व-कारक-आत्मनेपदादीनां वर्णनं विद्यते। प्रसन्नकाण्डे दशमसर्गात् त्रयोदशसर्गपर्यन्तं चत्वारः सर्गाः सम्मिलताः सन्ति। काण्डेऽस्मिन् सीताभिज्ञानदर्शनविभीषणागमनसेतुबन्धादीनां घटनानां माध्यमेन शब्दालङ्काराणामर्थालङ्काराणां च माधुर्यं दरीदृश्यते।

---

१. नीतिशतकम्—कृष्णचन्द्रशुक्लः, पृ. १०।
२. एपिग्राफिका इण्डिका, पृ. १२।
३. संस्कृतकविदर्शनम्—डॉ. व्यासः, पृ. १४२।
४. रावणवधम्-२२।२३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिङन्तकाण्डे चतुर्दशसर्गाद्द्वाविंशतिसर्गपर्यन्तं नवसर्गाः समाविष्टाः। काण्डेऽस्मिन् रावणवधरामराज्याभिषेकादीनां घटनानां माध्यमेन लिट्-लृट्-लङ्-लट्-लोटादि-लकाराणां प्रयोगो दर्शितः।

भट्टेः काव्यमिदं शास्त्रकाव्यं मन्यते। काव्यत्वस्य दृष्ट्येदं सफलं पूर्णञ्चास्ति। भट्टिना काव्यस्य विविधानि तत्त्वानि यथास्थानं कलात्मकतया प्रयुक्तानि सन्ति। तेनालङ्काराणां प्रचुराः प्रयोगाः कृताः। शब्दालङ्काराणामर्थालङ्काराणाञ्च समुचितः प्रयोगः काव्येऽस्मिन् परिलक्ष्यते। यमकालङ्कारस्यैकः सुन्दरः प्रयोगो द्रष्टव्यः—

न गजा न गजा दयिता विगतं विगतं ललितं ललितम्।
प्रमदा प्रमदा महता महता मरणं मरणं समयात् समयात्[१] ।।

'एकावली' इत्यभिधेयस्यार्थालङ्कारस्यैकमुदाहरणं निम्ने पद्ये दर्शनीयम्—

निशातुषारैर्नयनाम्बुकल्पैः पत्रान्तपर्यागलदच्छबिन्दुः।
उपारुरोदेव ननत्पतङ्गः कुमुद्वतीं तीरतरुर्दिनादैः।।

अस्य काव्यस्याङ्गीरसो वीरोऽस्ति; किन्तु वीररसातिरिक्तानां रसानामपि साफल्येन समायोजनं भट्टिना कृतम्। भट्टिना सम्भोगशृङ्गारस्यैकं प्रकृष्टमुदाहरणं प्रस्तुतीकुर्वन् लिखितमस्ति—

स्रस्ताङ्गचेष्टो विनिमीलिताऽपः स्वेदाम्बुरोमोद्गमगम्यजीवः।
अशेषनष्टप्रतिभापटुत्वो गाढोपगूढो दयितैर्जनोऽभूत् ।।

भट्टेरुक्तिवैचित्र्यमतीवमनोहारि विद्यते। अनेनोक्तिवैचित्र्येण तस्य वाणीप्रकर्षः सूचितो भवति। समुद्रमुल्लङ्घ्य लङ्कां गतेषु वानरेषु तेषु महती प्रसन्नता जाता। कपीनां स्फालनं कूर्दनञ्च कविना लिट्-लकारस्य क्रियापदैः सह विहितम्—

भ्रेमुर्ववल्गुर्ननृतुर्जजक्षुर्जगुः समुत्पुप्लुविरे निषेदुः।
आस्फोटयाञ्चक्रुरभिप्रणेदुः रेजुः ननन्दुर्वियुयुः समीयुः ।।

---

१. रावणवधम्-१०।९।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भट्टिनाऽधिकतया लघूनां छन्दसामेव प्रयोगः कृतः। अनुष्टुपार्या-पुष्पिताग्रोपजातयस्तस्य प्रियाणि छन्दांसि सन्ति। एतदतिरिक्तेषु छन्दःसु प्रहर्षिणी-मालिनी-वंशस्थ-पृथ्वी-रुचिरा-मन्दाक्रान्तादीनां छन्दसां प्रयोगोऽपि तेन विहितः।

भट्टेरिदं काव्यं क्लिष्टकाव्यानां श्रेण्यां स्थानं लभते। व्याकरणस्य प्रयोगाणामलङ्काराणाञ्च कारणेन काव्यस्य जटिलता पराकाष्ठां प्राप्नोति। वस्तुतो भट्टिर्गुणस्य कविरासीत्। भारवेः कालादेव काव्यस्य कथानकस्य लघुत्व-मलङ्कारस्य प्राचुर्यञ्च वर्धमानं परिलक्ष्यते। भट्टिर्भारवेरलङ्कारप्रियतामनुकृत्य स्वकाव्यमलङ्कृत्य च पाण्डित्यप्रदर्शनस्य प्रयत्नं कृतवान्। सन्दर्भेऽस्मिन् महाकविकालिदासादारभ्य भट्टिं यावत् काव्यपरम्पराणां वैशिष्ट्यं वैविध्यञ्च निरूप्य डॉ.व्यासमहोदयो लिखितवानस्ति—'भारवौ कालिदासोत्तरकाव्यस्य पाण्डित्य-प्रदर्शनस्य प्रवृत्तेः कलात्मकसौष्ठवस्य चैकः पक्षो दृश्यते चेत्, भट्टावन्यः पक्षः। भारविर्मूलतः कविरस्ति यः स्वकवितां विदुषामभिरुचेरनुरूपं सज्जीकृत्योपस्थितां करोति, भट्टिर्मूलतो वैयाकरणोऽलङ्कारशास्त्री च यो व्याकरणस्यालङ्कारशास्त्रस्य सिद्धान्तान् सुकुमारमतिराजकुमाराणां व्युत्पत्तिलाभाय भाविकाव्यपथपथिकानाञ्च कृते काव्यमार्गमिषेण निबध्नाति। भारवेर्भट्टेश्च काव्यानां लक्ष्यं पृथक् पृथग् अस्ति। एतयोर्लक्ष्ये सैव भिन्नता वर्तते या विभिन्नता कालिदासाश्वघोषयोर्वर्तते। कालिदासो रसवादी कविरस्ति चेद् भारविः कलावादी; अश्वघोषो दार्शनिकोपदेशवादी कविरस्ति चेद् भट्टिर्व्याकरणो-पदेशवादी।[२]

केचनाऽऽलोचका भट्टौ कृत्रिमताया आडम्बरस्याक्षेपं कुर्वन्ति; किन्तु, तस्य काव्यस्य प्रयोजनविशेषं मनसि निधाय नेदं कथनमनुचितं भविष्यति यत्तस्मिन् वास्तविकानां काव्यगुणानां न्यूनता नास्ति। प्रथमं तु तल्लक्ष्यमिदमासीद् यद् व्याकरणस्य जटिलतराणामपि नियमानामुपस्थापनं काव्यमाध्यमेन कथं स्यात्। सर्वजनविदितकथानके मौलिकतायाः सन्निवेशो द्वितीयमुद्देश्यमासीत्। नास्त्यस्ति सन्देहलेशो यदुभयोरुद्देश्ययोरेकेन सह

१. रावणवधम्-२।४।

२. संस्कृतकविदर्शनम्—डॉ.व्यासः, पृ.१४०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्यापि कवेः कृते नितान्तं कठिनं कार्यमस्ति। काठिन्यमिदमनुभूयापि भट्टि-र्द्वाविंशतिसर्गसमन्वितं विपुलकायं महाकाव्यमरचयत्। काव्येऽस्मिन् रोचकतायाः, मधुरतायाः, काव्योचितसरलतायाश्चाभावो नास्ति। प्रभावशालिसंवादः, प्राकृतिकदृश्यानां मनोरमं चित्रम्, प्रौढव्यञ्जनाशैली वस्तुवर्णन-ञ्चोत्कृष्टकोटेरस्ति। काव्येऽस्मिन् वस्तुविन्यासस्य प्रबन्धात्मकप्रौढताया वर्तमानायामपि न्यूनतायां काव्यस्य भाषायां प्रसन्नता प्राञ्जलता च विद्यते[१]। यथा—

न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः ।। इति।

●

१. संस्कृतसाहित्यस्य रूपरेखा—पाण्डेयो व्यासश्च, पृ. ५२।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लघु-ग्रन्थमाला

[६२]

पार्वतीमङ्गलम्

प्रणेता सम्पादकश्च

प्रो. पारसनाथद्विवेदी

आचार्योऽध्यक्षश्च, वेदान्तविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणसी

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वि.सं. २०५८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भूमिका

लोकोत्तरवर्णनानिपुणकविकर्मरूपमदोषगुणवच्छब्दार्थोभयलक्षणं सालङ्कारं निरलङ्कारं वा काव्यं श्रव्यदृश्यभेदेन द्विविधं प्रोक्तं काव्यशास्त्रविशारदैः। काव्यस्यापि कान्तासम्मितोपदेशरूपत्वाद् हिताहितप्रवृत्तिनिवृत्तिकरत्वाच्च शास्त्रत्वं सिद्धम्। काव्यशास्त्राद्यवेक्षणादित्यादिकाव्यप्रकाशकारकारिकायां काव्यस्य शास्त्रात् पृथगुक्तिर्ब्राह्मणवसिष्ठन्यायेन कान्तासम्मितोपदेशरूपतया प्रभुसम्मितोपदेशरूपेभ्यो वेदपुराणादिभ्यो वैशिष्ट्यप्रकाशायेति वा बोध्यम्। तत्र श्रव्यं श्रोतव्यमात्रम्, दृश्यं दर्शनीयप्रधानम्। श्रव्यकाव्ये श्रवणमात्रेण काव्यार्थसाररसास्वादः। तत्र श्रव्यस्याभिनयोऽवस्थानुकाररूपोऽपेक्ष्यते। दृश्ये पुनः श्रवणासत्त्वेऽपि काव्यार्थस्य दृश्यत्वमभिनेयत्वमपेक्ष्यते। या काव्यार्थस्याभिनेयता सैव तस्य दृश्यता नाम। तत्राभिनयो नाम दृश्यकाव्ये वर्णितानां रामादिनायकादीनां परमार्थभूतावस्थानमनुकारः। अत एव दृश्यं काव्यं रूपस्य नायकादेरारोपाद् नटादावनुकृतत्वाद् रूपकमित्युच्यते। स चाभिनयोऽवस्थानुकाररूप आङ्गिकवाचिकाहार्यसात्त्विकभेदेन चतुर्धा भिन्नः। अङ्गेन हस्तपादादिना निष्पाद्य आङ्गिकः, वाचाभिनयेन निष्पाद्यो वाचिकः। आहरणं धारणं तद्योग्यमाहार्यम्। छत्रचामरमुकुटधनुर्बाणवस्त्रालङ्कारधारणैरवस्थानुकारोऽभिनय आहार्यः। सात्त्विकभावस्वेदरोमाञ्चादिभिर्निष्पाद्यः सात्त्विकः। यथोक्तं दर्पणे—

भवेदभिनयोऽवस्थानुकारः स चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा ।। (साहित्यदर्पणे, ६.२)

नाट्यशास्त्रे—

विभावयति यस्माच्च नानार्थान् हि प्रयोगतः।
शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः।।

चतुर्भिः प्रकारैः सर्वासां दृश्योक्तानामवस्थानामनुकारः समाप्यते। अतोऽभिनयप्रधानं दृश्यं काव्यम्।

दृश्यकाव्यस्य वैशिष्ट्यम्

समानविषयकं प्रत्यक्षं शाब्दाद् बलवद् भवतीति लोकसिद्धम्। यच्च महाकविभी रामादिलोकोत्तरचरितं शब्देन वर्णितं यदि आङ्गिकादिचतुर्विधाभिनयेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वात्मनि आरोप्य नटादिः चिराभ्यासपाटवादिभिः प्रदर्शयति तच्चमत्कारातिशयमावहति। काव्यार्थस्य सम्यक् प्रतिपत्तिर्भवति। श्रव्ये काव्ये श्रवणमात्रात् तत्तदुपवर्णितविभावाद्याकाराकारितमनोवृत्त्युल्लासमात्रं भवति, तेन च स्वात्माभिन्नानन्दरसास्वादो जायते। दृश्ये पुनः उक्तचतुर्विधप्रकाराभिनयेनारोपितदुष्यन्तत्वादिभिर्नटादिभिरुपनीतविभावाद्याकारचित्तवृत्तिभिर्बहिर्निःसृतै रसोदयोऽक्लेशेन सुतरां भवति। एवं नटादिकौशलाद् अभिनयवैशारद्यात् कौतुकातिशयावहत्वात् प्रत्यक्षविषयत्वाच्चास्ति दृश्यकाव्यस्य वैशिष्ट्यम्। न च नटादौ प्रावीण्यभाञ्जि रामादिविषयकविज्ञानस्याहार्यारोपरूपत्वाद् अनाहार्यारोपरूपत्वाद् वा परमार्थत्वासहभावाद् भ्रमविज्ञानेन जायमाने रसे भावे वा तदाभासत्वमेवेति काव्यम्। नटादौ रामत्वादिभावविज्ञानरूपभ्रमत्वाभावाद् उत्तरकालेऽबाधात्। तादृशविज्ञानस्य प्रमाऽप्रमाकोटिबहिर्भावात्। किञ्च नटाद्युपस्थापितानां विभावादीनां रत्यादिस्थायिभावास्वाद्ययोग्यतापादकानां विगलितप्रमातृसम्बन्धविशेषत्वात् सामान्येनोपस्थितानां विलक्षणानां भ्रमप्रमोभयकोटिविलक्षणलोकोत्तरविज्ञानविषयत्वं न विरुध्यते। उपपादितञ्चैतत् काव्यप्रकाशादौ तत्रैव विस्तरतो द्रष्टव्यम्।

किञ्च परोक्षविज्ञानाद् प्रत्यक्षविज्ञानं चमत्कारातिशयकारीति लोकप्रतीतिः। न हि अभिनायके नटादावपि नटत्वबुद्धिः। न चोपस्थापितविभावादौ स्वत्वपरत्वौदासीन्यबुद्धिः। न च रसानुभवो भ्रमः प्रमा वा। न वा सविकल्पो निर्विकल्पो वा। तस्माल्लोकोत्तरसामग्रीसचिवः स्थायी आस्थाय्यतां नीतो रसो भवति। स च दृश्येऽधिकचमत्कारी। चमत्कारस्यैव रससारत्वम्। उक्तञ्च—'रसे सारः चमत्कारः'। अतो दृश्यं श्रव्यमतिशय्य वर्तते।

दृश्यकाव्यभेदाः

तच्च दृश्यं रूपकापरपर्यायं दशविधं शास्त्रकारैर्वर्णितम्, यथोक्तं दर्पणे—

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।

किञ्चाष्टादशोपरूपकाण्यपि शास्त्रे वर्णितानि सन्ति, तत्रैव—

नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा।।
संलापकं श्रीगदितं शिल्पकञ्च विलासिका।
दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अष्टादश प्राहुरुपरूपकाणि मनीषिणः।
विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्।।

एतेषां सर्वेषामेव प्रकरणादारभ्य भाणिकापर्यन्तानां दृश्यकाव्यानां सामान्येन विशेषं विना लक्षणं नाटकवदेव बोध्यम्। विस्तरभयादेतेषां सर्वेषां विशेषलक्षणानि भेदाश्चात्र नोच्यन्ते।

नाटकलक्षणम्

प्रकृतं पार्वतीमङ्गलं नाम नाटकं श्रीशिवरात्रिमहोत्सवेऽभिनयाय प्रकाशितं श्रीविश्वनाथविषयकरतिभावप्रधानम्। इदं सहृदयानां भक्तानां मनोविनोदाय श्रीसाम्ब-शिवप्रीत्यर्थं स्वमनस्तोषाय च। तत्र—

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्।
विलासहर्यादिगुणवद् युक्तं नानाविभूतिभिः।।

सुखदुःखसमुद्भूतिर्नानारसनिरन्तरम्।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः।।

प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः।।

एक एव भवेदङ्गी शृङ्गारो वीर एव वा।
अङ्गमन्ये रसाः सर्वे कार्यो निर्बहणेऽद्भुतः।।

चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः।
गोपुच्छाग्रसमाग्रं तु बन्धनं तस्य कीर्तितम्।। (सा.द. ६)

श्रीशिवदिव्यनायकं श्रीपार्वतीदिव्यनायिकं ख्यातवृत्तं पञ्चसन्धिसहितं ऐश्वर्यादिगुणसुखदुःखसमुद्भूतिनानारसभावभरितं पञ्चभिरङ्कैः क्रोडीकृतं भक्तिरसाङ्गिकं शोभनबन्धं पार्वतीमङ्गलं नाटकमेवेदम्।

प्रस्तावकः

तत्र पूर्वरङ्गप्रसङ्गे नान्दीपाठो देवी-सतीत्यादिभिर्द्वादशपादैः कृतः। तत्-स्वरूपमुक्तं दर्पणे—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी।

पादैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत।।

नटपारिपार्श्विकयोः प्रस्तुताक्षेभिः शिवसतीमाहात्म्यवर्णनैः प्रस्तावना क्रियते। सा प्रस्तावना आमुखापरपर्याया कथोद्घातनाम्ना शास्त्रे प्रसिद्धा। यथोक्तम्—

सूत्रधारस्य वाक्यं वा समादायार्थमस्य वा।

भवेत् पात्रप्रवेशश्चेत् कथोद्घातः स उच्यते।। (सा.द.६.३५)

पञ्चविधलक्षणलक्षिताः प्रस्तावना वर्णिताः सन्ति।

उद्घातकः कथोद्घातः प्रयोगातिशयस्तथा।

प्रवर्तकावलगिते पञ्च प्रस्तावनाभिदाः।। (सा.द.६.३३)

प्रथमं प्रवेष्टुः पात्रस्याभिप्रेतार्थे स्थापकस्य सूत्रधारादेरभिप्रेतार्थे उद्घाट्यतेऽन्तर्लीयतेत्युद्घातको नाम प्रस्तावना उच्यते। नटाद्युक्तपदानि अन्यार्थान्यपि स्वाभिलषितार्थे संयोज्य यत्र पात्रप्रवेशः सा उक्ता प्रस्तावनेति भावः। यत्र च सूत्रधारवाक्यं वा तदर्थं वा यथाश्रुतं न त्वन्यर्थे प्रयुक्तं नीतं वा आदाय पात्रप्रवेशश्चेत् कथोद्घातः।

यद्येकस्मिन् प्रयोगे सम्प्राप्तेऽन्यप्रयोगः प्रयुज्यते तेन पात्रप्रवेशश्चेत् प्रयोगातिशय उच्यते। यदि सूत्रधारः कालादिमाश्रित्य वर्ण्यते तेन पात्रप्रवेशश्चेत् प्रवेशक उच्यते। यदि चैकस्मिन् विषये एकस्योपमेयस्य समावेशाद् उपमानभूतस्य पात्रस्य प्रवेशश्चेदवलगितं नाम प्रस्तावनोच्यते।

वस्तु

इतिवृत्तं वस्तु, अत्र नाटके शिवपार्वतीविवाहः प्रधानं तदेवाधिकारिकं प्रासङ्गिकं तु कामविजयादि। अधिकारिवस्तुसिद्ध्यर्थमेवान्यत् पताकाप्रकरीस्थानीयं प्रासङ्गिकं वृत्तं योजितम्।

तत्र रामविरहादिवर्णनं प्रकरीवृत्तं दक्षविद्वेषवर्णनञ्च ततो व्यापित्वात् पताकारूपं द्रष्टव्यम्।

अर्थोपक्षेपाय च विष्कम्भको योजितः, तल्लक्षणं यथा—

वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः।

सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्र नाटके द्वितीयाङ्कादौ योजितः। तथाङ्कद्वयान्तर्निवेश्यः प्रवेशकोऽपि चतुर्थेऽङ्के शृङ्गिभृङ्गिसंवादरूपेण निवेशितः। अस्मिन्नाटकेऽर्थप्रकृतयोऽपि यथासम्भवं योजिताः सन्ति। अर्थप्रकृतयो नाट्यवस्तुनः स्वभावभूताः पञ्च भवन्ति—

बीजं बिन्दु पताका च प्रकरी कार्यमेव च।
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि।।

अत्र नाटके पार्वत्यधिगतिः फलम्, तस्य बीजं प्रथमाङ्क एव सूत्रधारवाक्ये निक्षिप्तमस्ति—भूयाद् गिरीन्द्रतनयावर एष नित्य इत्यादिरूपे। एवम्—

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः।
इति पञ्चास्य भेदाः स्युः क्रमाल्लक्षणमुच्यते ।।

इत्यादिदर्पणवाक्यैरुक्ता मुखप्रतिमुखादिसन्धयोऽपि क्रमशो योजिताः सन्ति। अन्तिमेऽङ्के निर्बहणसन्धौ शिवविवाहे भूतपिशाचलीलाऽपि अद्भुतरसोल्लसिका योजिताऽस्ति।

कार्यस्य फलस्य पञ्चावस्था आरम्भयत्नप्राप्त्याशानियताप्तिफलागमरूपा अपि यथायथं सुयोजिताः सन्तीति सुधीभिराकलनीयमेतत्। अन्ते च भरतवाक्येन नाटकमिदं परिपूर्णतां प्राप्तम्।

नायकः

अत्र नाटके भगवान् महेश्वर एव नेता, नेत्री च भवानीति सुविदितम्।

रसः

अत्र शिवपार्वतीविषयको भाव एव प्राधान्येन भ्राजते। भावप्रधानमेव नाटकमिदं भक्तिप्रवणताकरमिति महदुपकारकं लोकानाम्। नातिसङ्क्षिप्तं नाति-विस्तृतं भक्तिभावसमन्वितं नाटकमिदं संसाराग्निपरितप्तानां जनानां कृतेऽमृतसेकमिवाभाति। नानाव्यापारव्यस्ते युगेऽस्मिन् लघुनाटकानामेतादृशानामस्ति महानुपयोग इति लोकदृष्ट्याप्यस्य महत्त्वमतिरोहितम्।

एवं स्वलघुमत्योपस्थापितमिदं सहृदयानां गुणग्राहिणां यदि किञ्चिदप्युपकारं करोति, तदास्योपस्थापनसाफल्यं मन्ये। तदत्र दोषान् परिहृत्य सज्जनाः क्षमावन्तः सुधियस्तृप्तिमुपगच्छन्त्विति साभिलाषो भक्त्या श्रद्धया चेदं पुष्पोपहाररूपं भवानीविश्वनाथयोश्चरणारविन्देषु समर्पयन् सन्तुष्यामीति।

अथ च दृश्यरूपमिमं ग्रन्थं प्रस्तुवन् कृतज्ञोऽहमुपकारिणां महानुभावानां मान्यमान्यानां कृतज्ञतां प्रकटयामि। तत्र प्रथमं महामान्यानां सरल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हृदयानामगाधपाण्डित्यपूर्णानां वेदान्तशास्त्रपयोधिपारदृश्वनां कुलपतिपदभाजां **प्रो. राममूर्तिशर्मणां** कुलपतित्वे तदुपकारित्वे चेदं काव्यं प्रकाशतामगमदिति तान् प्रति कृतज्ञतां हार्दिकीं प्रकटयन् भूयो भूयः प्रणमामि। अथ च प्रकाशननिदेशकानां नानाविधमहत्त्वशालिग्रन्थप्रकाशनतत्पराणां स्वभावत एवोपकारपराणां **डॉ. हरिश्चन्द्रमणित्रिपाठिवर्याणा**मुपकारं स्मारं स्मारं कृतज्ञतामावहामि।

अतः परं सहायकसम्पादकानां सरलचित्तानां **डॉ. ददनउपाध्यायानां** कार्यकलां प्रशंसन् चाशीराशिभिरभिनन्दामि। ततः परमीक्ष्यशोधकानां **डॉ. हरिवंशकुमारपाण्डेयाना**मुपकारमावहन् तेषामभ्युदयार्थं चिरायुष्यार्थञ्च भगवन्तं प्रार्थयमान आशीर्वचोभिस्तमभिनन्दामि। श्रीजीकम्प्यूटरप्रिण्टर्स-सञ्चालकानां **श्रीअनूपकुमारनागर**महोदयानां कृतज्ञतां प्रकटयन् आशीर्वादाम् प्रददामि, तैर्महता श्रमेणास्य काव्यस्य सुस्पष्टं सुन्दरं मुद्रणं विधाय महोपकारः कृतः।

अन्ते चेमं ग्रन्थं सश्रद्धया सभक्त्या श्रीसिद्धिदात्री-जैगीषव्येश्वरमहादेवयो-र्भवानीविश्वनाथस्वरूपयोः श्रीचरणकमलेषु प्रणतिपरम्परापूर्वकं समर्पयन् विद्वद्भ्यः प्रणामाञ्जलिं विधाय ग्रन्थलेखेषु त्रुटिक्षमार्थं सर्वान् प्रार्थयमानो विरमामि।

वाराणसी
वसन्तपञ्चमी,
२०५८ विक्रमाब्दः

विदुषां वशंवदः
पारसनाथद्विवेदी
आचार्योऽध्यक्षश्च, वेदान्तविभागस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पात्र-परिचयः

पुरुषपात्राणि

१. सूत्रधारः	प्रधानो नटः
२. नटः	प्रधाननटस्य सहायकः
३. शिवः	भगवान् शङ्करः
४. रामः	दशरथनन्दनः
५. लक्ष्मणः	रामस्यानुजः
६. नन्दिकेश्वरः	शिवस्य गणेश्वरः
७. गणः	शिवस्य दूतः
८. वीरभद्रः	शिवस्य दूतः
९. दक्षः	सत्याः पिता दक्षप्रजापतिः
१०. भृगुः	दक्षस्य गुरुः
११. शृङ्गी	शिवस्य गणेश्वरः
१२. भृङ्गी	शिवस्य गणः
१३. नारदः	देवर्षिः
१४. हिमाचलः	पर्वतराजः, उमायाः पिता
१५. इन्द्रः	देवानां राजा
१६. कामः	कामदेवः
१७. ब्रह्मा	सृष्टिकर्ता देवः
१८. ब्रह्मचारी	वटुवेषधारी शिवः
१९. विष्णुः	पालनकर्ता देवः

स्त्रीपात्राणि

१. सती	भवस्य पत्नी, दक्षपुत्री
२. अपराजिता	सत्याः सखी
३. मेना	हिमाचलस्य पत्नी, उमायाः माता
४. उमा	पार्वत्यपरनाम्नी हिमाचलस्य कन्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचार्यश्रीपारसनाथद्विवेदिविरचितं

पार्वतीमङ्गलम्

अथ प्रथमोऽङ्कः

नान्दीपाठः :

देवी सती शिवमयी करुणैकमूर्त्ति-
र्नित्या हिमाद्रितनया भवमाश्रिता या ।
कल्पद्रुमाधिगतकल्पलतेव भाति
भूयाच्छिवाय भवतां भजतां सदा सा ।।१।।

पुष्पाञ्जलिः प्रणतभक्तजनार्थकल्पा
विश्वेश्वरं भगवती शिवमर्चयन्ती ।
प्रोद्भिन्नकञ्जनिचयैरुदयाचलार्कं
पूर्वा विभाति वररागवतीव सन्ध्या ।।२।।

सौभाग्यमङ्गलकरी ललिताङ्गशोभा-
भासा गिरीशवरराजगृहे भ्रमन्ती ।
लक्ष्मीरिवास्तु नवविग्रहबालरूपा
भूयः प्रदीपकलिकेव तमोपहा वः।।३।।

(नान्द्यन्ते सूत्रधारः)

सूत्रधारः : (प्रविश्य, परितो विलोक्य) अये! कथं समवेता एव आर्यास्तत्रभवन्तः पारिषदाः। महान् प्रमोदः, तद् यावन्नागच्छति मम सखा तावदार्यमिश्रान् भवतो विज्ञापयामि—

अस्ति खलु सिद्धपरम्परापरिपूतो विविधविद्याविधानबन्धुरो विबुधवाग्वैभवविभूषितो गाजीपुरमण्डलान्तर्गतः सिद्धपीठो 'हथियाराम' इति विख्यातो मठो नाम। तत्र बहवो महात्मानः सिद्धास्तपोधनाः सुचरिता यतयो बभूवुः। तेषां सिद्धानां सिद्धासनपरम्परायां तपोमूर्त्तयोऽधिगताखिलवेदवेदाङ्गा अद्वैतवेदान्तसिद्धान्तानुरक्ताः श्रीविश्वनाथचरणैकभक्ता ब्रह्मनिष्ठाः सकलसंन्यासिमण्डलमहामण्डलेश्वराः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीकाशीस्थश्रीविश्वनाथगुरुकुलसंस्कृतमहाविद्यालयाध्यक्षाः श्रीपावाहारिबालकृष्ण-यतिमहाराजाः सम्प्रति प्रतिष्ठिताधिष्ठिता राजन्ते विद्यार्थिवृन्दकल्पद्रुमाः। तैरादिष्टा वयं भवतां मनोविनोदाय। श्रीकाशीस्थहथियाराममठसम्बद्धश्रीजैगीशव्येश्वर-(जागेश्वर)मठे सद्यः सर्वकामदस्य जैगीशव्यमहर्षिस्थापितस्य सर्वसिद्धिप्रदस्य सिद्धिदात्रीजगदम्बाभवानीसहितस्य श्रीजैगीशव्येश्वरमहादेवस्य परमपूजकैर्वीतरागैः श्रीस्वामिशिवानन्दैरनुज्ञाताश्च तदद्य शिवरात्रिमहोत्सवे युक्तो भवतां समवायः। मनोविनोदश्च मधुरया गिरा भवतीति मन्यामहे। यतः—

वाणी महाकविगिरेः प्रभवा पवित्रा
मन्दाकिनीव मधुरा सरसा सुशीता ।
तप्तान् सुतर्पयति संसृतिशोकमग्नान्
स्वेनामृतेन सकलान् भुवनत्रयेऽपि ।।४।।

नटः : (प्रविश्य) साधु! साधु! एवमेतत् कः सन्देहः।

श्रेयस्करी श्रुतपदा भवतापहीना
कान्ता हिता रुचिरवर्णभृता प्रसन्ना ।
दिव्यार्थबोधललिता सुकविप्रयुक्ता
वागेव रञ्जयति संजयतीह लोके ।।५।।

सूत्रधारः : अहो! सत्यम् उच्यते।

मारिष! कथय अस्माकं कलादर्शनोत्सुकानां सहृदयानां सामाजिकानां विनोदाय किं युष्माभिरनुष्ठितम्।

नटः : भाव! विदितमेतद् भवतां यदद्य अस्माभिः सर्वैः कुशीलवैः "पार्वतीमङ्गलम्" नाम नाटकमभिनेतव्यमिति।

सूत्रधारः : सुष्ठु स्मारितोऽस्मि। तच्चाभिनवं नाटकं श्रीभवानीजैगीशव्येश्वर-महादेवचरणारविन्दमकरन्दरजोलुब्धेन तत्कृपैकभाजनेन पदवाक्यप्रमाण-पारावारपारीणब्रह्मविद्वरिष्ठपण्डितश्रीदेवस्वरूपमिश्रशिष्येण राम-सखीशिवशङ्करात्मजेन पारसनाथाभिधेन द्विवेदिना कविना स्वान्तःसुखाय कृतं साम्बशिवप्रीतये च।

नटः : सत्यम्, एतन्नाटकं साम्बशिवविचित्रलीलालसितं भक्तिरसायनमस्ति।

सूत्रधारः : युक्तश्चैतत् शिवरात्रिमहोत्सवे प्रस्तुते साम्बशिवप्रीतये भक्तजना-नुरञ्जनाय च।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नटः : एवमेतत्।

सूत्रधारः : **एषा सभा शैलसुतेशपादा रविन्दभक्तैर्लसिता विभाति ।**
काव्यञ्च तद्भक्तिरसप्रपन्नं नेत्रैरनेकैः पिबताच्च कर्णैः ।।६।।

नटः : एवं भक्त्या परितुष्टः शिवः श्रेयो विधास्यति।

सूत्रधारः : अत्र कः कल्पः। करुणावरुणालय आशुतोष उच्यते शिवः।

नटः : सच्चिदानन्दो भगवान् भक्तान् पालयन् यथेच्छं विचरति।

सूत्रधारः : एवमेतत्, मायाधीशोऽनादिमायया भवान्या सह स्वेच्छया पूर्णकामोऽपि विहरति जगत्याम्।

नटः : एवमेतत्, परमदयालुरसौ!

भूयात् सदा शशिधरः परबोधरूपः
पीत्वा ररक्ष भुवनानि हलाहलं यः ।
श्रेयो निमित्तमिह यः करुणावतारः
सद्यः प्रभुः प्रणमतां भजतां जनानाम् ।।७।।

सूत्रधारः : एवम्,

भूयाद् गिरीन्द्रतनयावर एष नित्यो
लोकानुरञ्जनकरः कृपया परात्मः ।
स्वेच्छं चरत्यखिललोकपतिः पृथिव्यां
यो नः सदा भवतु दक्षसुतासहायः।।८।।

नटः : भाव! सत्यं भवतु।

सूत्रधारः : साधयावस्तावत् कार्यनिष्पादनाय। (इति निष्क्रान्तौ) इति प्रस्तावना।

(ततः प्रविशति यथोक्तः सतीसहायः शिवः)

शिवः : देवि! अपि मया सह भुवनानि विचरन्ती रमसे? अपि विलोकिता त्रिलोकी?

सती : प्रभो! न किञ्चिदपि दृष्टवती ।

शिवः : किं व्यक्तमपि जगत् न दृश्यते भवत्या?

सती : भवतोऽतिरिक्तं न दृश्यते।

शिवः : तर्हि न रमसे वृथा भ्रान्तम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सती : भवति सति सदा रमे। न च वृथा भ्रान्तम्। भवतो महिमानं दृष्टवती।

शिवः : प्रिये! रामस्य महिमाऽयम्।

सती : कोऽयं रामः?

शिवः : **रामः प्रभुः सकलदेवमयः परात्मा**
दृश्योद्भवस्थितिलयाश्रयपूर्णकामः।
लीलामनुष्यतनुरत्र वसुन्धरायां
जातो महारघुकुले जगतां हिताय ।।९।।

सती : सत्यमेवैतद् भगवान् प्राह; किन्तु श्रूयते खलु—

रामो महागुणयशा रघुवंशनाथः
श्रेष्ठः सतां जगति सर्वधनुर्धराणाम् ।
लोकप्रियो नृपसुतः करुणैकसिन्धुः
सीतापतिर्नरकुलोत्तमसुप्रसिद्धः ।।१०।।

शिवः : देवि! किमुच्यते रामो मनुष्य इति, नेदं शोभनम्। रामो मायामनुष्य इति वक्तव्यम् ।

सती : किमिदं मायामनुष्य इति?

शिवः : **साक्षात्परं ब्रह्म चिदेकरूपं त्राणाय धर्मस्य निजप्रियस्य ।**
कर्तुं जगत्पावनचारुवृत्तं स्वमाययाऽभूत् नरदेहधारी।।११।।

सती : एवमेतद् देव! अवदधामि।

शिवः : प्रिये! जानासि शिवलोकं विहाय किमर्थं वसुधायामिह चरामि?

सती : छायेव भवतोऽनुगन्तुं जानामि। न किञ्चिदन्यत्।

शिवः : इदानीं धन्योऽयं वसुधाभागः।

सती : कोऽयं वसुन्धराया भागो यो भवता प्रशंसनीयो भवति।

शिवः : अयं भारतवर्षस्य पुण्यमयस्य पुण्यतमो मध्यभागो दण्डकारण्यमिति जनेषु प्रसिद्धः,

धर्मात्मनो मुनिजनान् वनवासिनस्तान्
रक्षः कुलं प्रविचरद् विनिहन्ति यत्र ।
पूतस्तपस्विकुलकर्मविबोधनैर्यः
सोऽयं महागिरिगुहागहनः प्रदेशः।।१२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सती : ज्ञातम्। शिवलोकादपि का धन्यताऽस्य?

शिवलोकमहानन्दमात्राल्पापि न लक्ष्यते।
वसुधा दण्डकारण्ये किमर्थं स्तूयतेऽधुना।।१३।।

शिवः : परमानन्दरूपस्य ब्रह्मणो रामस्यानन्दमात्रया सर्वे लोकाः सुखावहा दृश्यन्ते। न च स्वतस्तेषां सुखरूपता।

सती : व्यापकं ब्रह्म सत्यं ज्ञानमनन्तमिति श्रूयते। तत् समानमेव सर्वम्।

शिवः : सर्वगतं चिन्मयं रामं सर्वत्र पश्यामि। नात्र कश्चिदभिलाषः।

सती : तर्हि पूर्णकामस्य भवतः क्वचित् काभिलाषा?

शिवः : देवि!

भावो ममास्ति सविशेषवपुर्धरस्य श्रीलीलया दशरथात्मजसुन्दरस्य ।
रूपेऽद्भुते गुणपरिग्रहनिर्मितस्य प्रीते चकोरसदृशस्य कलाधरस्य ।।१४।।

सती : तत् श्रीरामदर्शनमभीष्टं भवताम्। तदर्थमिह वसुधातले सञ्चरणमिति मन्ये।

शिवः : सम्यग् ऊहितं देव्या। तदर्थमेव शिवलोकं विहाय वसुधायां दण्ड-कारण्ये चरामि।

सगुणो निर्गुणो वाऽपि न रामे दृश्यते भिदा ।
विशेषानन्दहेतुत्वात् सगुणे प्रीतिरिष्यते ।।१५।।

सती : रामदर्शनमिष्टञ्चेत् अयोध्या गन्तव्या।

शिवः : (अश्रवणं नाटयन्)

कदा नु लोके कृपयोपलब्धं गुणाभिरामं विमलं महान्तम् ।
नीलोत्पलश्यामतनुं दयालुं कलङ्कशून्यं प्रियरामचन्द्रम् ।।१६।।

सती : ननु तद्दर्शनाय अयोध्या गन्तव्येति प्रोक्तम्।

शिवः : (स्वगतम्) रामभावानुसक्तचेतसा न सतीवाक्यं गृहीतं मया। (प्रकाशम्) देवि! यत्र रामः सैवायोध्या ।

रामशून्या गृहारामशतसङ्कुलिताऽपि सा ।
नायोध्या, यत्र रामस्तु सायोध्या परमा मता ।।१७।।

सती : क्व रामस्तर्हीदानीम्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवः : अपि न श्रुतं देव्या। कैकेयीवरदानमोहितेन स्ववचनं सत्यापयता महाराजदशरथेन निर्वासितः सीतानुजाभ्यां सहितश्चतुर्दशसमा वस्तुं दण्डकं प्रविष्ट इति।

सती : (सखेदम्) कष्टम्! रामनिर्वासनं श्रुत्वा व्यथते मे मनः।

शिवः : **निर्वास्य तं पुरजनप्रियरामचन्द्रं वित्तं पुरस्कृतवती परिहाय धर्मम्।**
मानं यशःप्रियपतिं स्वयमीश्वरञ्च चक्रे तमो जगति केकयराजपुत्री।।१८।।

सती : असाधुदर्शिनी सा,

कथं प्रियं सर्वजनानुरक्तं रक्तोत्पलाक्षं गुणवन्तमीशम्।
अदोषधर्मिष्ठमहाकृतज्ञं निर्वासयामास सुतं शुभाङ्गम्।।१९।।

शिवः : देवि! तस्यैव सर्वान्तर्यामिणो भगवतो मायाचेष्टितमिदम्।

सती : सत्यं भगवान् वदति।

शिवः : अस्मिन्नेव प्रदेशे इदानीं रामः समागतः।

सती : अत एवायं प्रदेशो धन्यतम इति देवेनोक्तम्।

शिवः : एवमेतत्,

दूर्वाङ्कुरश्यामलकान्तगात्रं सबाणचापासिकरः कृपालुः।
सीताद्वितीयः सरसीरुहाक्षः यत्रास्ति रामो भुवि तद् वरीयः।।२०।।

सती : किं तत्र विदेहराजतनया महाभागा सीतापि सङ्गता?

शिवः : देवि! कष्टम्।

सती : किमत्यहितं देव्याः?

शिवः : रावणेन दुरात्मना रक्षसा मायया अपहृता सा।

सती : हा महाकष्टम्। निर्मर्यादं जगज्जातम्।

शिवः : एतदपि तस्यैव परमात्मनो लीलाचेष्टितम्। न च रामेण परेण ब्रह्मणा वियुक्ता आदिशक्तिः सीता।

सती : तदपि लोके महान् स्त्रीपरीभावः।

शिवः : लोकश्रेयसे भगवान् सर्वोपायेन प्रवर्तते। अपि च देव्याः सीतायाश्चारित्र्यप्रकर्षोऽनेन भविष्यति।

सती : सत्यम् (सखेदम्)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हीत्वार्थकामौ पतिदेवता सा सीता विदेहेशसुता शुभाङ्गी ।
अचिन्तयन्ती वनवासकष्टं रामं श्रिता चन्द्रमसं प्रभेव।।२१।।

सा कथमद्य तं विना भविष्यति।

शिवः : देवि! अशोच्यमचिन्त्यं रामविधानम्।

सती : यथाह देवेशः।

शिवः : तदा प्रभृति भगवान् सह लक्ष्मणेनास्मिन्नेव वनोद्देशे तामन्वेषयन् वर्तते।

(ततः प्रविशति लक्ष्मणानुगतो रामो विमना वैकल्यं नाटयन्)

रामः : वत्स! सौमित्रे! न मनः शोकवेगो धैर्यसेतुं सहते। हा प्रिये! राम-मानसचारुराजहंसि!

क्वासि प्रिये जनकराजसुते वराङ्गि !
अन्तर्हिता सततमानस राजहंसि !
त्वामन्तरेण सरसीरुहलोचनेऽहं
नीरश्मिरस्मि विरहार्कनिरस्तचन्द्रः।।२२।।

हा हा! प्रिये! सीदन्ति गात्राणि !

चारुस्मितं प्रियवचांसि सुधामयानि !
पूर्णेन्दुशोभिवदनं वरकञ्जनेत्रम् !
मद्बाहुकल्पलतिके! हृदयाब्जलक्ष्मि !
स्मृत्वा हतोऽस्मि तव कोमलकान्तगात्रि!।।२३।।

(इति मूर्च्छति)

लक्ष्मणः : आर्य! आर्य! समाश्वसिहि, समाश्वसिहि।

रामः : (समाश्वस्य) वत्स!

आश्वासितेन हृदयेन च जीवितेन
देहेन शोकहुतभुग् ज्वलितेन किं मे ।
प्राणाः प्रयान्तु लघु यत्र मनोरथश्रीः
सीता प्रिया गतवती जनकात्मजा सा ।।२४।।

लक्ष्मणः : आर्य! न खलु सीताधिगमोपायोऽयम्। तस्माद् धैर्येण वर्त्तितव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मैवं प्रभो ! धृतमहावरचापहस्त !
शोकं कृथा रघुकुलाब्जसहस्ररश्मे !
आलम्ब्य धैर्यमधुना विषमे विचिन्वन्
सीतामवाप्स्यसि मया सह लक्ष्मणेन।।२५।।

रामः : क्व सीता वर्तते। राक्षसैः कृतवैरैर्नियतं भक्षिता सा! कष्टम्।

अद्यापि नाम न मया नरशब्दभाजा
सीता विदेहतनयाधिगता वनानि ।
कान्तारघोरगिरिदुर्गमकन्दराणि
यत्नेन हन्त ! सकलानि विचिन्वतापि।।२६।।

(इति पुनर्मोहं नाटयति)

लक्ष्मणः : किं पुनर्मोहमुपगत आर्यः। आर्य! समाश्वसिहि, समाश्वसिहि।

रामः : वत्स! किं दृष्टा सा। इहैव तु अभूत्, पुनः क्व गता। हा! प्रिये!

कृत्तं मनोऽन्धतमसाकुलितं विभिन्नं
तप्तं वपुर्विरहितं घनचन्दनाङ्गि !।
दृष्टा भवाशु दयया मम चारुहासे !
त्वामन्तरेण न हि जीवितुमुत्सहेऽहम्।।२७।।

लक्ष्मणः :

विहाय कातर्यममोघशक्ते! समाश्रयन् पौरुषमात्मतुल्यम् ।
चिनुष्व राजन् गिरिकन्दराणि मया सहैवापदि भाति धैर्यम् ।।२८।।

रामः : वत्स! एवं स्थिरीक्रियते आत्मा। तद् गत्वा गोदावरीं पृच्छेव ।

लक्ष्मणः : (सोत्साहम्) एवमेतत्। (इति निष्क्रान्तौ)

शिवः : (साञ्जलिं तदुन्मुखः प्रणामं नाटयन्)

नमो नमोऽनन्तसहस्रलील! समस्तविश्वेश चिदेकसत्य ।
परात्ममायाधिपते सुरेश! अशेषशेषाश्रय निर्विशेष!।।२९।।

(सतीं प्रति) देवि! अपि साक्षात्कृतो रामः सानुजः।

सती : देव! सानुजो रामः प्रत्यक्षीकृतः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवः : किमिव धारितम्।

सती : (सविस्मयम्) ननूक्तं देवेन परं ब्रह्म राम इति।

शिवः : अत्र कः सन्देहः?

सती : विषमं प्रतिभाति,

परं ब्रह्म समं प्राप्तं निर्मायं जगदाश्रयम् ।
आप्तकामं कथं नाम स्त्रीहेतोर्विलपेद् वने।।३०।।
यदि रामः परं ब्रह्म सर्वज्ञः सर्ववित् प्रभुः।
किं न पश्यति सीतां तां हृतां क्व केन किं कृतम्।।३१।।

शिवः : (स्वगतम्) अहो! मोहोऽयं सतीं स्पृष्टः। (प्रकाशम्) देवि! मया तु ससीतः सानुजो रामो दृष्टः। लीलामात्रं तु सीताविरहः।

सती : किन्तु मया सीताविरहवेदनापराकाष्ठां प्राप्तः पदे पदे मोहमुपगतो लक्षितः। न तु जनकात्मजा तत्र दृष्टा।

शिवः : स एव तु दृष्टिभेदः,

अनादिशक्तिर्जनकात्मजा सदा
न जातु सा दाशरथेः पृथक् सती ।
न वीचिरम्भोनिधितो वियुज्यते
न वा कला चन्द्रमसो रवेः प्रभा।।३२।।

सती : यद्यपि भवद्वचनाद् युज्यते, तथापि रामवैकल्यं विलोक्य सन्देहदोलाधिरूढं मनः।

शिवः : सन्देहस्तु यथार्थदर्शने निवर्तते। न च भवत्या यथार्थं दृष्टम्।

सती : कथं पुरतो निरूपयन्त्या मे अयथार्थदर्शित्वमुच्यते?

शिवः : यत एवंवादिनी भवती।

सती : एवं यदि अनुजानाति भवान् पुनर्गत्वा द्रक्ष्यामि।

शिवः : अनुजाने! इहैव तरुतले उपविष्टस्तवागमनं प्रतीक्षे।

सती : यथा वदति देवः। तद् गच्छामि। (इति निष्क्रान्ता)

शिवः : अहो! मायामाहात्म्यं भगवतो यद् देव्या अपि तत्परमात्मत्वे सन्देहः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथवा—

विलोक्य लीलां नररूपधारिणो
विचित्रकल्पां सकलावमोहिनीम् ।
न कस्य मोहो भवताद् विपश्यतो
विशुद्धधीस्तत् कृपया विमुच्यते।।३३।।

न च श्रेयोऽनुपश्यामि प्रियाया गमने पुनः।
अथवा रामविधाने हि शुभोदर्कं भविष्यति।।३४।।

तदिहैव महातरुतले उपविष्य प्रतीक्षे तदागमनम्। मन्ये, सती भगवन्तं सलक्ष्मणं प्राप्तैवेति। (इति उपविशति)

(ततः प्रविशति सलक्ष्मणो रामस्तथैव वैकल्यं नाटयन्)

रामः : वत्स लक्ष्मण! अलमन्वेषणेन! बहुशो विचयेनापि नावलोक्यते। न च वनदेवता शंसति ताम्। हा! सीते!

अहो! नु कष्टं मम नेत्रकौमुदी मनोरथश्रीर्हृदयानुवर्त्तिनी।
निपात्य मां शोकदुरन्तसागरे गता हृता वा मृगलोचना कुतः।।३५।।

लक्ष्मणः : उपायेन प्रवर्तितव्यम्, न शोकेन।

रामः : (अश्रवणं नाटयन्) अयि! विदेहराजपुत्रि!

राज्याच्च्युतिश्चीरवनाधिवासो रक्षो महावैरमथापि सर्वम्।
सोढं मया नाम सुखं त्वया तु ह्यसह्यशल्यस्तव विप्रयोगः।।३६।।

(इति मोहं नाटयति)

लक्ष्मणः : आर्य! समाश्वसिहि, समाश्वसिहि।

शोकं न गच्छन्ति भवादृशा ये गृहीतचापाः पुरुषा महान्तः ।
अलं विषादेन निपीड्य पादौ वदामि सत्यं श्रय पौरुषञ्च।।३७।।

रामः : (समाश्वस्य अश्रवणं नाटयन्)

तं देशमद्य नय मामपि वीर वत्स !
यत्र प्रिया मम गता हृदयं गृहीत्वा ।
नाहं भवानि मिथिलेश्वरराजपुत्रीं
पूर्णेन्दुसुन्दरमुखीं क्षणमप्यदृष्ट्वा।।३८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हा! प्रिये! क्वासि! वनस्पते! गिरे! नद्यः! किं युष्माभिः दृष्टा सा? अथवा सर्वत्रैव तु दृश्यते न व्याहरति। प्रिये! (इति मोहं नाटयति)

लक्ष्मणः : कथं विषमामवस्थां प्राप्तः। आर्य! आर्य! समाश्वसिहि! शोके अति-स्नेहो व्यसनाय उपकल्पते। अवश्यमेव सीतामधिगमिष्यसि।

रामः : (आश्वस्य)

आलोडितं वनमिदं सगुहाप्रदेशं
पृष्टो वनस्पतिरहो बहुशस्तथापि ।
सीता विदेहतनया न मया मृगाक्षी
लब्धा कथं वदसि लप्स्यत एव वत्स।।३९।।

लक्ष्मणः : पुरुषारम्भस्तु अशक्यकारी तथावक्तुं प्रयोजयति।

रामः : सत्यमेवैतत्। न च शोकाहतमनसावदधामि।

लक्ष्मणः : धारयात्मानम्। कबन्धनिर्दिष्टः पन्था अनुसर्तव्यः।

रामः : धृत एवात्मा। हा सीते! (इति परिक्रामति सानुजः)

(ततः प्रविशति सती सीतावेषधाधरिणी)

सती : (प्रविश्य) यद्यपि भगवतो वचने नास्ति विकल्पः, तथापि मम मनो न प्रत्ययं याति। तत् परीक्षणीयं रामः परमेश्वरो नरो वेति। तदर्थमेव मया सीतारूपं धृतमस्ति। विलेक्य धृतसीतारूपां मां नरश्चेद् अवश्यं प्रत्ययं यास्यति, अन्यथा परिचेष्यति। तद गच्छेयम्। (इति समीपमुपसर्पति)

रामः : (स्वगतम्) अहो! देवी सती सन्देहमोहग्रस्ता परीक्षणार्थं सीताविग्रहा आगता। (प्रकाशम्) जगज्जननि! शिवप्रिये! दक्षात्मजे! दाशरथिरहं सानुजो नमामि।

कथं विहायाम्ब! सुदुर्गमे वने
शिवं पतिं ब्रह्म परं भयानके।
त्वमेवमेका रमसेऽत्र दक्षजे!
क्व वर्ततेऽसौ जगदीश्वरः प्रियः।।४०।।

सती : (लज्जां नाटयन्ती स्वगतम्) कथमेकपदे एव परिज्ञाताऽस्मि। तन्न क्षममिह स्थातुम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामः : अम्ब! गच्छ शिवं वयमपि गच्छामः। (इति निष्क्रान्तौ)

सती : अहो! आश्चर्यम्! सर्वत्र राममेव सीतया सहितं पश्यामि। रामः परं ब्रह्मैव।

शिवेन साक्षात् प्रतिबोधिताऽप्यहं
विमूढधीर्ब्रह्म गता परीक्षितुम्।
परीक्षिता नाम पतिं वदानि किं
विषादसिन्धौ नितरां निमज्जिता।।४१।।

अनन्त रामं सह सीतया तया
विलोकये सर्वजगत् तदागतम् ।
भयाकुला नैव शमं लभे क्वचिद्
नमामि मायां परमात्मनस्तथा।।४२।।

तत् शीघ्रमेव शिवं पतिं प्रतीक्षमाणं गच्छामि। (इति सखेदं निष्क्रान्ता)

शिवः : कथं चिरायते देवी। अद्यापि नागता।

सती : (प्रविश्य) एषा उपस्थिताऽस्मि।

शिवः : किमागतैव देवी? अपि प्रेक्षितो रामः? निवृत्तस्ते सन्देहः?

सती : (सव्रीडम्) नास्ति भवतां वचने सन्देहः।

शिवः : तर्हि किमर्थं गतं त्वया, किं वाचरितम्?

सती : (भावं गोपयन्ती) न किञ्चित् कृतम्। केवलं दूरत एव प्रणामः कृतः।

शिवः : न हि कश्चिद् विशेषोऽस्ति। पश्यामि। (इति ध्यानं नाटयति)

सती : देव! नाहमसत्यं वच्मि।

शिवः : (नेत्रे उन्मीलयन् स्वगतम्) अहो! महान् अपराधः कृतो देव्या। पुनरपि मिथ्याभाषणमिति। प्रबलं दैवम्। किमत्र प्रतिकर्त्तव्यं मम एवं परिस्थितौ।

सतीपरित्याग एव कर्त्तव्यः। (प्रकाशम्) अहो! देवि! न युक्तमाचरितम्।

न खलु जानकीविग्रहधारिणीं त्वां स्प्रष्टुमुत्सहे।

सती : (भयलज्जावैकल्यं नाटयन्ती) नाथ! स्त्रीस्वभावकृतमिति क्षन्तव्यम्, क्षन्तव्यम् (इति पादयोः पतति)।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवः : (अपसृत्य) देवि! नाहं विमनाः क्रुद्धो वा वपुषा त्वां त्यजामि। भागवतीच्छैवेदृशी।

सती : हा! हतास्मि। परित्यक्ता सती शिवेन कथं स्थास्यामि?

पश्चात्तापाग्निदग्धाहं निजकर्मजुगुप्सता।
विहाय पतिमीशानं क्व गच्छामि निराश्रया।।४३।।

शिवः : देवि! न शोकः कार्यः। दैवी ह्येषा गतिः।

रामं समायं मम देवि विश्वं
यदाश्रितं ते भविताऽचिरं शम्।
विहाय मन्युं भवभक्तियुक्ता
कालं प्रतीक्षस्व हितं वदामि।।४४।।

सती : यथाह भगवान्। भवत्सेवापरायणाहं कालं यापयेयम्।

शिवः : भवतु तत्,

रामस्य माया प्रबला न मेया सुरासुराणामपि मोहनीया।
शिवं हि देव्या भविता न कल्पः ह्यमोघदृष्टिः खलु तस्य सिद्धा।।४५।।

सती : अनुगृहीतास्मि।

शिवः : देवि! गन्तव्यं तावदिति शिवलोकं प्रतीक्षन्ते तत्र भक्ताः।

सती : तथा।

(इति निष्क्रान्तौ)

।। इति श्रीपारसनाथद्विवेदिविरचिते पार्वतीमङ्गले प्रथमोऽङ्कः।।१।।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ द्वितीयोऽङ्कः

(ततः प्रविशति सगणो नन्दिकेश्वरः)

नन्दिकेश्वरः : प्रेषितोऽस्मि अम्बया भगवत्या मन्दारकुसुमानयनाय। देवी प्रियं शिवमर्चितुकामास्ति।

गणः : देव! इतः प्रभृति माता सती दुर्मना इव लक्ष्यते।

नन्दिकेश्वरः : वत्स! माता सती दुःखिता इदानीमस्ति।

गणः : ननु देव्याः को दुःखहेतुः।

नन्दिकेश्वरः : भगवतः स्वामिनः शिवस्य तस्यामुदासीनभावः।

गणः : कथमकारणकरुणापरायणां दीनानुकम्पिनीम्, अशरणशरणां प्रति प्रभोरीदृशो भावः।

नन्दिकेश्वरः : वत्स! अनन्तलीलस्य प्रभोः शङ्करस्य को जानाति चेष्टितम्। न खलु कश्चिदपराधोऽम्बायाः।

को वेत्तुमीशो जगदीश्वरस्य लीलाविभूतेश्चरितं भवस्य ।
श्रेयस्तु पश्यामि तदीयवृत्ते शिवेक्षणं नैव हिताद्वियुक्तम्।।१।।

गणः : देव! सत्यमुच्यते ।

लोका नु कम्पाकरमानसायाः प्रभोर्मनोवृत्तिरिव श्रिता कः ।
तस्यास्तु दोषो जगतां जनन्याः कुतो भवेदीश्वरकल्पितायाः।।२।।

नन्दिकेश्वरः : वत्स! लीलामात्रं भगवतो न खलु तदीयशक्तिः सती उपेक्षिता भवितुमर्हति त्यक्ता वा।

गणः : एवमेतद् देव! भवान् तदन्तिकचरः।

नन्दिकेश्वरः : वत्स! इदं मन्दारवनम्, चेतव्यानि तर्हि कुसुमानि।

गणः : यथा वदति भवान् (इति पुष्पावचयं नाटयतः)

नन्दिकेश्वरः : वत्स! महागुणा अम्बातिसरलस्वभावा, यतः —

उपेक्षिता यद्यपि साधुदर्शिना शिवेन सा भक्तजनानुकम्पिनी ।
तथापि तस्या न च भावभिन्नता पतिव्रताया हृदयेऽभिलक्ष्यते।।३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदन्तिकस्था तदभिन्नभावका तदादिमध्यान्तगतिस्तदीश्वरा ।
वरा सती सा पतिदेवता नता विभाति शम्भोरिव मूर्तिरद्वयी।।४।।

गणः : सत्यमेतत्, अम्बा प्रभोश्छायेवानुगता भाति।

अनन्यभावा पुरतः शिवस्य सदा स्थिता तत् प्रियमाचरन्ती ।
प्रभेव सा भाति सुधाकरस्य विभासयन्ती भजतां मनांसि।।५।।

नन्दिकेश्वरः : वत्स! सम्यगुच्यते। भगवानपि भक्तवत्सलः!

वपुषैव विपिप्रिये प्रियां मनसा नैव हि भक्तवत्सलः।
हृदये निहिता चिरन्तनी महतां प्रीतिरमोघबन्धना।।६।।

गणः : अहो! प्रभोर्दयालुता अवाच्यास्ति।

गुणाधिवासे जगदीश्वरे परे दयालुता सर्वगुणातिशायिनी।
अहेतुवृत्ता हि घने पयोधरे सुवृष्टिधारेव जगत्सु जीवनम्।।७।।

नन्दिकेश्वरः : सत्यं भोः!

ददाति सर्वं स च भक्तवत्सलः प्रियाय भक्ताय विशुद्धचेतसे।
स्वयं विरक्तो महितो महेश्वरः परार्थमेवास्ति परिग्रहः सताम्।।८।।

तद् अवचितानि कुसुमानि। साधयावस्तावत्।

देवी सती अपि सखीसहाया भवन एव विराजत इति तर्कयामि।

गणः : तथा। (इति निष्क्रान्तौ)

(इति विष्कम्भकः)

(ततः प्रविशति सती सख्या सह दुर्मनाः)

सती : (सखेदं) अपराजिते! चिरं निर्व्यूढं मे दुःखम्, न च शाम्यति चेतः।

हितवचोऽमृतमीश्वरभाषितं न हि मतं तु मया हतभाग्यया।
गतवती खलु रामपरीक्षया प्रियतमादपि दूरतरं शिवात्।।९।।

अपराजिता : देवि! न शोकः कर्तव्यः। दयालुः परमेश्वरः।

सती : सखि! भारमिव शरीरमनुभवामि।

वियोगवह्निज्वलितं व्यथाकुलं शिवेन साक्षाद् रहितं विगर्हितम्।
न धारये दोषगृहं कलेवरं प्रियं न यत् पत्युरधीश्वरस्य मे।।१०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपराजिता : देवि! शोकं त्यज, न त्वं शिववियुक्तासि।

अनादिशक्तिः शिवतत्त्वदर्शिनी ह्यमोघवाक् त्वं भुवनस्य नन्दिनी।
न शोभते शम्भुरपि त्वया विना तरङ्गमालारहितो यथाम्बुधिः।।११।।

सती : सखि! पश्चात्तापाद् दह्यते हृदयम्।

परस्य दोषान् सुबहूनपि क्षमे तथानुकम्पे न च मे प्रतिक्रिया।
मयैव मोहाद्धृदयन्तुदः कृतः महापराधः सहितुं न शक्यते।।१२।।

सखी : **हृदये तव दक्षनन्दिनि प्रभुशम्भुर्नितरां विराजते।**
स हि देवि शमं समन्विते कृपया मङ्गलमातनिष्यति।।१३।।

सती : अपराजिते! एवं भगवान् विदध्यात्। दक्षनन्दिनीति वचसा तातः स्मृतिमागतः।

सखी : देवि! तव तातेन प्रजापतिना महान् मख आरब्धः।

सती : महान् हर्षः। सखि! किं नु तातभवने कतिचिद् दिनानि शोकमयानि गत्वा यापयेयम्।

सखी : एवमेतत्। देवि! शोभनमुक्तम्। मन्ये भगवानपि गमिष्यत्येव तत्र।

सती : आम्! अवश्यमेव तातेन निमन्त्रिता भगवन्तो भवेयुः। तद् गत्वा भगवतोऽभिजाने।

सखी : एवमेतत्।

सती : चिराद् गतो नन्दिकेश्वरोऽद्यापि नागच्छति।

नन्दिकेश्वरः : (प्रविश्य) एष समागतोऽहं दासः। इमानि कुसुमानि।

सती : प्रियं मे कृतम्। वत्स चिरं जीव! गच्छ स्वनियोगमशून्यं कुरु।

नन्दिकेश्वरः : यथाह देवी! नमस्ते। (इति निष्क्रान्तः)

सती : अपराजिते! मन्ये भगवानपि एकान्ते सुखोपविष्टो भविष्यति। तदधुनैवार्चितुं याचितुञ्च वाञ्छामि। तत् साधयावस्तावत्।

सखी : यथा वदति भवती। (इत्युभे परिक्रामतः)

(ततः प्रविशति यथोक्तः शिवः)

शिवः : **मिथ्याप्रपञ्चं सुविदो वदन्ति ब्रह्मैव नित्यं चिदहं तथा च।**
न मेऽस्ति कामस्तदपि प्रसह्य सतीवियोगस्तु मनो निहन्ति।।१४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं प्रत्याख्याता प्रिया सती वर्तयतीति सीदति मनः। अथवा रामः श्रेयो विधास्यति।

मायामयं जगदिदं प्रतिभासमात्रं
भिन्नं विभाति विभुतः सुविदां परं तत् ।
सत्यं वदन्ति बहवोऽल्पधियो विमूढा
जानन्ति ते श्रुतिरहस्यरसं न सम्यक्।।१५।।

सती अपि कथमद्य चिरायते।

सती : (प्रविश्य) देव! प्रणमति एषा मन्दभागिनी।

शिवः : देवि! मैवं वक्तव्यम्। न हि शिवसङ्गतं मन्दमिति साम्प्रतम्।

सती : सुधाकल्पेन वचसानेनाभिषिक्तं मे चेतः।

शिवः : प्रिये!

आदाय देवि! जगतां समवायिनीं त्वां
सर्वं दधामि विपरीतविवर्तितञ्च ।
भक्ताभयार्थमसकृद् वितनोमि लीलां
कुत्रासि मद्विरहिता प्रकृतिः परार्था ।।१६।।

सती : नाथ! न भवादृशो दयालुः।

कलाधरोदारसदम्बुवाहस्त्रिशूलहस्तोषितसर्वभक्तः ।
विभूतिभूषो विषमाक्षनाथः पपौ विषं विश्वमतुल्यरूपः ।।१७।।

शिवः : (सस्मितम्) सम्यगुपालब्धोऽस्मि देव्याः। दारसदम्बुवाह इति।

सती : देव! नायमुपालम्भः। कलाधरोदारः कृपया पूजां गृहाण (इति पुष्पाञ्जलिमर्पयति)

शिवः : परितुष्टोऽस्मि! किं ते प्रियं करवाणि।

सती : भवच्छरणागता भवेयम्।

प्रियं न किञ्चिद् भवदन्यदेतद् वदामि सत्यं निखिलार्थविज्ञ।
त्वय्येव नाथे रतिरस्तु नित्यमिष्टो वरस्त्वं भव मे दयालुः।।१८।।

शिवः : तथास्तु, प्रतिजाने।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सती : अनुगृहीतास्मि। (नेपथ्ये ध्वनिमभिनीय) देव! किमिदं श्रूयते।

शिवः : तव पितुर्दक्षस्य मखोत्सवे मखभागभाजां देवानां विहायसा गच्छतां विमानध्वनिः।

सती : (स्मृतिमभिनीय) (सहर्षम्) नाथ! अहमपि तत्र गन्तुमिच्छामि।

अमूनि वाञ्छामि दिनानि सोत्सवे पितुर्गृहे यापयितुं यदीच्छसि ।
अलोकितैरिष्टजनैश्च बन्धुभिश्चिराज्जनन्या सह सङ्गता सुखम्।।१९।।

शिवः : किम् अनाहूता गन्तुमिच्छसि।

सती : किं महादेवो भवान् नाहूतः।

शिवः : दक्षः खलु मया सह कृतवैरः कथमाह्वयेत्।

सती : कथं तातः सापकारो भगवति।

शिवः : देवि! पुरा ब्रह्मसभायामुपस्थितोऽसौ उपविष्टं मामवलोक्य नाभ्युत्थानमनेन कृतमिति द्रुह्यति।

समेऽपि मे चेतसि शान्तभावे दक्षोऽन्यथा पश्यति दुष्टबुद्धिः ।
मदात्तवैरो मदमानकर्ता वक्रं प्रयातीव जले जलूकाः ।।२०।।

सती : अन्यथाख्यातिरस्ति तातस्य भगवति।

शिवः : अत एव त्वया न तत्र गन्तव्यम्।

न क्षणं तत्र गन्तव्यमात्मनो हितमिच्छता ।
आहूतेनापि वैरित्वे गुरुमित्रगृहेष्वपि ।।२१।।

सती : समर्थे सति भवति नास्ति भयम्।

शिवः : न च तव गमने तत्र श्रेयः पश्यामि।

सती : भृशं बन्धुषु चित्तमनुबद्धं बाधते माम्।

शिवः : देवि! शिवं पश्य। पुनरपि मोहो न स्पृशेत्।

सती : भगवति प्रकाशमाने सति कुतो मोहतमः।
इदमेकं प्रियं भवता क्रियमाणं प्रार्थये।

शिवः : (स्वगतम्) भवितव्यं भवत्येव। अबन्धुषु बन्धुत्वमतिमोहोऽनर्थकारी। भवतु का गतिः। (प्रकाशम्) देवि! प्रबला तेऽभिलाषा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सती : एवमेतत्। देव! अनुजानीहि माम्।

शिवः : कथं भवतीमवरोद्धुं शक्नुयाम्। तद् गच्छ श्रेयस्ते भूयात्। (नेपथ्याभिमुखम्) कः कोऽत्र भोः।

नन्दिकेश्वरः : (प्रविश्य) अयमहमस्मि। को नियोगोऽनुष्ठीयताम्।

शिवः : वत्स! नन्दिकेश्वर! गणैः सह देवीं सत्वरं यथासुखं प्रापय दक्षमखोत्सवे! तत्रभवती गन्तुमिच्छति।

नन्दिकेश्वरः : यथाज्ञापयति देवः।

शिवः : देवि! सज्जीभव। अयं वत्सोऽनुचरो बलैः सह त्वां यथासुखं प्रापयिष्यति।

सती : यथाज्ञापयति भगवन्। एषा गच्छामि। अचिरादेव त्वामागत्याश्रयिष्ये।

शिवः : तथास्तु।

सती : अनुगृहीताऽस्मि। (इति निष्क्रान्ता)

शिवः : वत्स! नन्दिकेश्वर! त्वया सावहितेन भवितव्यम्। मम वैरी खलु दक्षः। कदाचित् सत्यपमानं न कुर्यात्। तद् गच्छ नय देवीम्।

नन्दिकेश्वरः : यथाज्ञापयति भगवान्। (इति निष्क्रान्तः)

शिवः : (दुर्निमित्तमभिनीय) अहो! दुर्निमित्तानि प्रादुर्भवन्ति। न देव्याः कल्याणं पश्यामि।

हठात् हि सा मोहमुपागता पुरा
निषेधिता सत्यपि शम्भुना मया ।
तथाद्य यान्त्याः सदनं सुवैरिणः
शिवं न पश्यामि मनो विशङ्कते ।।२२।।

तद् गन्तव्यमितः।

(इति निष्क्रान्तः)

।। इति श्रीपारसनाथद्विवेदिविरचिते पार्वतीमङ्गले द्वितीयोऽङ्कः।।२।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ तृतीयोऽङ्कः

(ततः प्रविशति सचिन्तः शिवः)

शिवः : अहो! दैवं विपरीतं पश्यामि। अपि स्वस्ति देव्यै।

प्रवाति वायुर्न सुखावहो रविः प्रकाशतेऽल्पं विगतप्रभो दिशः ।
वृता महारेणुचयैश्च लोचनं स्फुटं स्फुरत् सव्यमनिष्टमिङ्गति ।।१।।

न जाने प्रियायाः सत्याः का दशा। (इति चिन्तां नाटयति)

(ततः प्रतिशति सहसा नन्दिकेश्वरः)

नन्दिकेश्वरः : देव! देव! (सोद्वेगम्)

शिवः : (सोद्वेगम्) किमिति वत्स! अपि कुशलं देव्याः?

नन्दिकेश्वरः : अप्रियम्, अप्रियम्, देव्याः।

शिवः : अपि धारयत्यात्मानं देवी।

नन्दिकेश्वरः : न हि।

शिवः : हा हतोऽस्मि।

उपस्थितो यः प्रथमो विशङ्कितः सतीविनाशोऽशनिदारुणो मम ।
हता प्रिया घोरतरं वचो विषं न शक्नुवे सोढुमहं कथञ्चन ।।२।।

वत्स! कथय, कथय, किं वृत्तम्?

नन्दिकेश्वरः : (सखेदम्) नाथ! अस्माभिः सुरक्षिता पितृगृहं प्राप्ता सबन्धुदक्षेन नाभिनन्दिताऽपमानिता च।

शिवः : प्रथममेव मया प्रतिषिद्धाऽऽसीत्। ततस्ततः?

नन्दिकेश्वरः : ततो मखमण्डपे क्वचिदपि भवतो भागं न दृष्टवती।

शिवः : ततस्ततः?

नन्दिकेश्वरः : ततो भगवतोऽपमानमसहमाना सक्रोधमुवाच—

धिगस्तु दक्षं सपुरोधसो मतान् सुराँश्च सर्वान् शिवतत्त्ववर्जितान् ।
भविष्यति ध्वंसनमीदृशस्य वः शिवद्रुहां वच्मि मखस्य नान्यथा ।।३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिता न माता न सखी न बान्धवः
न कोऽपि सत्योऽस्ति महेश्वरादृते
नमामि कैलासपतिं शिवं पुनः
पुनर्न मोहः समुपागतो भवेत्।।४।।

शिवः : हा! देवि! ततस्ततः?

नन्दिकेश्वरः : ततो भवन्तं मनसा स्मरन्ती प्राह—

अनुग्रहस्तस्य भवेज्जगत्पतेः
कृपाधिनाथस्य भृशं नमाम्यहम् ।
कदापि जायेत न विच्युतिः प्रभो,
दृढोऽनुरागोऽस्तु पदाब्जरेणुषु ।।५।।

शिवः : हा देवि! अनाथा त्वं विनष्टा। ततः?

नन्दिकेश्वरः : तदनन्तरं प्रभो! देवी सामर्षमवोचत्—

इदं शरीरं खलदक्षदेहजम् अनर्थबीजं गिरिशावधीरितम् ।
प्रदह्यमानं मलिनं दुरम्बरं मुहूर्तमप्यत्र न धर्तुमुत्सहे ।।६।।

शिवः : (सोद्वेगम्) ततः किमकरोत् सा।

नन्दिकेश्वरः : देव! ततः (सखेदम्)—

इतीदृशं प्रोच्य भवद्विमाननाद् रुषा दहन्तीव सभासदो भृशम् ।
शिवं वदन्ती खलदक्षसम्भवां ददाह योगोद्भववह्निना तनुम्।।७।।

शिवः : हा! हा! देवि! ईदृशस्ते विपाकः।

नन्दिकेश्वरः : ततो देव! दिव्यज्योतिःस्वरूपा सती अन्तर्हिता।

शिवः : कष्टं भोः! (सक्रोधम्) अरे रे दक्षाधम!

पिनाकपाणिर्न च शूलहस्तः रुद्रोऽन्धकारिस्त्रिपुरान्तकश्च ।
त्रिलोचनो वा गणितः खलेन त्वयात्महन् कालपशो मदेन ।।८।।

नन्दिकेश्वरः : ततोऽहं क्रुद्धो गणैः सह दक्षमखं नाशयितुमारब्धवान्।

शिवः : ततः?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्दिकेश्वरः : ततो पुरोधसा मन्त्रबलेनोत्पादिता महासैनिकाः। तैः सह कृतसंग्रामो भगवन्तं निवेदयितुमागतः। तदत्र भगवान् प्रमाणम्।

शिवः : (सक्रोधम्) आः पाप अचिरादेव,

सुरसहितसमग्रं सैन्यमेतत् प्रसह्य
मम रिपुवनवह्निस्तीव्रवेगं त्रिशूलम् ।
अधम तव शिरोंऽशच्छेदरक्तोत्पिपासु-
र्ह्यशिवमखममोघं नाशयत्येव शीघ्रम्।।९।।

नन्दिकेश्वरः : (सक्रोधम्) देव! सद्य एवादिश्यन्तां प्रमथगणाः। वयं क्षणान्तरं गत्वा दक्षं सपुरोधसं हन्मः।

शिवः : एवमेतत्। (इति ध्यानं नाटयति)

वीरभद्रः : (सहसा प्रविश्य सक्रोधम्) नाथ! को नियोगो विधातव्यः? किमर्थमुत्पादितोऽहम्?

पीतं केन हलाहलं जगति को वध्यो ममास्ति प्रभो!
को दग्धुं खलु वाञ्छति प्रदहति क्रोधान्तकालानले।
कं शूलं शतवज्रकोटिसदृशं प्रोद्दण्डवैवस्वतं
ओषेत् किं द्रुहिणस्य सुप्तिसमयः प्राप्तोऽधुनैवास्ति सः।।१०।।

नन्दिकेश्वरः : (सविस्मयम्) अये! कोऽयम्?

महाद्रिकायः कुपितोऽन्तको यथा
त्रिशूलचापासिधरैः करैर्नभः।
स्पृशत्यदम्याप्तबलः प्रकाशते
सुरासुराणामपि नाशनक्षमः।।११।।

महौजसा रूपगुणेन तुल्यो
रुद्रेण कोपात् स्फुरदोष्ठनासः।
अभूतपूर्वो ज्वलयत्यशेषं
जगज्जिघत्सुः प्रलयानलोऽयम्।।१२।।

शिवः : वत्स! वीरभद्र! मनसा त्वं जातोऽसि प्रियोऽसि विजयी भव।

वीरभद्रः : अनुगृहीतोऽस्मि।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवः : दक्षं विनाशय खलं पतितं सबन्धुं
यज्ञञ्च मोहमयमीश्वरवर्जितं तत् ।
सैन्यं विदारय रिपोरमितप्रभाव!
वीराग्रगण्य! विजयी भव वीरभद्र!।।१३।।

वीरभद्रः : कोपानले मम समस्तजगज्जिघत्सो-
र्दक्षः प्रभो! किमिव नाम भवेत्पतङ्गः ।
प्राणान् प्रियान् धरतु दुष्टपशुस्तु ताव-
द्यावन्न निःसरति ते वदनाद् व्रजेति ।।१४।।

शिवः : परितुष्टोऽस्मि। तत्,
अमोघमुग्रं शतसूर्यतेजोऽनिवार्यवेगं रिपुवंशवह्निम्।
गृहाण शूलं मम शूलजातं सुरासुरादीन् विजयस्व तेन।।१५।।
(इति शूलं समर्पयति)

वीरभद्रः : (गृहीत्वा) अनुगृहीतोऽस्मि।

शिवः : प्रयाहि वत्स! विजयस्व, विजयस्व।

वीरभद्रः : निहन्मि दक्षं सबलं शिवद्विषं
न कोऽपि तस्यास्ति खलस्य रक्षिता ।
स्वयं सुरेशो वरुणो धनाधिपः
प्रजापतिर्वा युधि मे भविष्यति।।१६।।

(इति विकटं परिक्रामति)

पश्यन्त्यद्य पराक्रमं युधि सुरा ये केऽपि वीराः स्थिता
भित्त्वा भूमिमथापि विश्वमखिलं दक्षं निहन्मि क्षणम् ।
सद्यः शोकप्रतिक्रियास्तु भवतां देव्या वियुक्तात्मनां
गच्छामि त्वरितं प्रभो रिपुवनं दग्धं विजानन्तु तत् ।।१७।।
(इति निष्क्रान्तः)

शिवः : वत्स! नन्दिकेश्वर! त्वमिहैव ममान्तिकचरो भव। दक्षं सबलं हतमेवावेहि।

नन्दिकेश्वरः : यदाज्ञापयति देवः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हतो हि यः शम्भुपदाद् वियुक्तो मोहग्रहो वित्तकलत्रलिप्तः।
दक्षः खलः पापमयो दुरात्मा नष्टो निमित्तं त्विह वीरभद्रः।।१८।।

शिवः : सगणो महाकाल इव वीरभद्रः प्रयाति।

नन्दिकेश्वरः : देव! शीघ्रमेव ससैन्यं समखो दक्षो हत इति सुवृत्तं श्रोष्यामः।

शिवः : वत्स!

पूर्णात्मनो न रिपुरस्ति न च प्रियो मे
वाञ्छामि सर्वजगतां हितमेव नित्यम्।
शक्तिः सती न पृथगस्ति न धक्ष्यते सा
दक्षस्तु दुष्टहृदयः खलु दण्डनीयः।।१९।।

नन्दिकेश्वरः : देव! एवमेतत्—

कोपानले सर्वजगज्जिघत्सोस्तद्वीरभद्रस्य भयङ्करस्य।
त्रिशूलहस्तस्य महाबलस्य दक्षो न चैकाहुतिरल्पभागः।।२०।।

शिवः : **तृतीयनेत्रोत्थयुगान्तवह्निना समस्त्रिशूलाग्रहतारिकष्टकः।**
मम प्रियः कोटिरविप्रभाकरो निहत्य दक्षं सबलं स एष्यति।।२१।।

नन्दिकेश्वरः : भगवन् सर्वज्ञ! वीरभद्रकृतदक्षयज्ञविध्वंसदर्शनकौतुकं मेऽस्ति।

शिवः : वत्स! पश्य दर्शयामि तावत्। (इति हस्तोद्यमनं नाटयति, पृष्ठजवनिकान्तरे यज्ञदृश्यं वर्तते)

शिवः : पश्य पश्य महावीरवीरभद्रचेष्टितम्।

युद्धोन्मत्तमहास्त्रपाणिभिरयं मुख्यैर्गणैरुच्छ्रितै
र्दृप्तैः प्रेतपिशाचसङ्घबहुलैरुत्साहशक्तैर्युतः।
प्राप्तो दक्षमखस्थलीं बहुविधैर्गर्जन् गृहीतायुध-
स्तेजः क्रोधभयङ्करः प्रतिमुखं वीरः कृतान्तोऽपरः।।२२।।

नन्दिकेश्वरः : देव!

त्रिशूलमुद्यम्य विलोडयन् स-
नभः सतारार्कमखण्डशक्तिः।
कल्पान्तकारी भवदक्षिजन्मा
भातीव संहारकरः प्रकोपः।।२३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहो! आश्चर्यम्! आश्चर्यम्! अयं दक्षः सपुरोधाः।

(ततः प्रविशति दक्षः सपुरोधाः)

दक्षः : (पुरोहितमवलोक्य) गुरो! कपालिना सह महान् विग्रह आरब्धः। तत् प्रतिकारोपायश्चिन्तनीयः।

भृगुः : महाराज! मा भैषीः!

सर्वे भूतपिशाचगुह्यकगणाः कपालमालाधरा
व्यर्थाडम्बरभीतिदाः श्रुतिपथाद् भ्रष्टाः प्रमत्ताधमाः।
मच्छक्तिप्रभवैर्महाभटबलैर्वेदोक्तमन्त्रोद्गतैः
प्रोद्दीप्तैरनलैर्भृशं शलभतां सद्यो लभन्तां परे।।२४।।

दक्षः : **गुरौ महामन्त्रविदांवरे त्वयि बराकसैन्यं नु दिगम्बरस्य तत्।**
हतं मया वीतभयेन मन्यते महत्सु तेजोऽर्थकरं न साधनम्।।२५।।

भृगुः : (मखप्रयोगं नाटयति)

दक्षः : अतीवभयङ्करोत्पाता दृश्यन्ते। वामाक्षिस्फुरणं नामानिष्टं सूचयति।

भृगुः : मयि सति नोपद्रवसम्पातः।

दक्षः : **वृतं नभोरेणुमहारवैर्घनैर्भयाद् द्रुता मे पुररक्षिणो दिशः।**
महायुधैरध्वनि भैरवध्वनिः प्रवर्तते तद्रिपुचेष्टितं ध्रुवम् ।।२६।।

भृगुः : (अवलोक्य) तर्हि सावहितैरस्माभिर्भवितव्यम्। इमे सुरा अपि ते साहाय्यं विधास्यन्ति।

दक्षः : (सभयं) ननु समागत एवासौ पशुपतिः कपाली सभूतः।

(ततः सहसा सक्रोधं वीरभद्रो गणैः सह प्रविशति)

वीरभद्रः : (सक्रोधम्)

अलं सैन्यैः सर्वैः प्रमथबहुलैः सङ्गरमुखे
सतीदेव्या दाहप्रतिकृतिकरं शत्रुकदनम् ।
शिवद्रोहादेकं शतपविसमस्पर्शमधुना
सुपर्याप्तं दक्षाचलशिरसि शूलं पततु मे।।२७।।

(इति शूलोद्यमनं नाटयति) अरे दक्षाधम! मुहूर्तं तिष्ठ।

दक्षः : अरे! रे! भिक्षुकानुचर! अतीव प्रगल्भसे।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गलाच्छिरस्तालफलोपमं तव निपातयामि क्षणमद्य दुर्मुख! ।
महासिना कालकरालकर्मणा करोमि सद्यस्तु सतीपथातिथिम् ।।२८।।

वीरभद्रः : (प्रहस्य) अरे दुष्ट!

स्थितो महाशैल इवापरस्त्वया प्रदर्श्यतां तद् बलमात्मनो यथा।
शिवापमानं च सतीविनाशनं कृतं तु येनाद्य गतायुषाधम! ।।२९।।

दक्षः : गुरो! सर्वज्ञ! सर्वशक्ते! सर्वे समागताः सुराश्च समेत्य शिवसैन्यं प्रहरन्तु।

भृगुः : (आहुतिं गृहीत्वा) अरे! आत्माभिमामिन् दुष्ट! मुहूर्तं तिष्ठ!

आविर्भवन्तु सुभटा विजया महान्तो
दिव्यायुधाः शिवगणान् प्रतियोद्धुकामाः।
भूयो जुहोमि सुविशुद्धपदैश्च मन्त्रै-
र्लीयेत सत्वरमिदं रिपुसैन्यजातम्।।३०।।

(इति आहुतिप्रदानं नाटयति। अन्यगणाः पादेनान्यत्र प्रक्षिपन्ति।)

वीरभद्रः : (सहसा दक्षं केशेषु गृहीत्वा)

अहमिह रिपुमुण्डं रक्तसक्तं सकेशं
सुचिरतृषितशूलच्छिन्नमेतत् कलङ्कम् ।
ज्वलितहुतवहेऽस्मिन् पूरयाम्यद्य दत्त्वा
शिवरहितमखानामाहुतिं पश्चिमां तु।।३१।।

(इति तथा करोति, अन्ये गणा यज्ञभाण्डानि विक्षिपन्ति, कुण्डे जलं पातयन्ति, अन्यान् ताडयन्ति।)

वीरभद्रः : (भृगुमवलोक्य) इदानीं ते दक्षिणाऽवशिष्टा ।

समाप्तयज्ञस्य पुरोहितस्य सुदक्षिणा मन्त्रविदोऽवशिष्टा।
गृहाण चैतन्न हि लब्धपूर्वं परिश्रमो नाम कृतस्त्वया तु।।३२।।

(इति भृगोः श्मश्रूत्पाटनं करोति)

वीरभद्रः : अरे! शिवगणाः! पश्यत! पश्यत!

मच्छूलपातभयभग्नपराक्रमास्ते
दाक्षा द्रवन्ति विदिशः समरे प्रवीराः ।
दक्षं विगर्ह्य गिरिशं बहुशः स्तुवन्तो
देवा व्रजन्ति विधिलोकममुं विभीताः।।३३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्न युक्तं पलायमानान् अनुक्रमितुम्। तत् स्वामिनं साधयावो विजयं सूचयितुम्। (इति निष्क्रान्ताः सर्वे)

शिवः : वत्स! नन्दिकेश्वर! अपि दृष्टं त्वया?

नन्दिकेश्वरः : नाथ! सर्वमवलोकितम्। महान् विजयोऽस्माकं वीरभद्रेण भद्रेण कृतः।

शिवः : प्रतिशोधित आधिः। वीरभद्रोऽपि आगच्छत्येव।

वीरभद्रः : (प्रविश्य, सोत्साहम्) विजयतां विजयतां देव! हतो दक्षो विनाशितो मखः। विद्राविताः सुराः। त्यज्यतां मन्युः।

शिवः : वत्स! प्रियं कृतम्। तद् वरं ददामि ते।

प्रियं कृतं वीर ममाद्य पुत्रक! ततो गणानां प्रथमो भविष्यसि।
प्रियोऽसि सर्वेष्टवरप्रदो भव सुपार्श्वनिष्ठोऽन्तिकचारणः परः।।३४।।

वीरभद्रः : अनुगृहीतोऽस्मि।

शिवः : तद् गच्छ! सुखं वस। वत्स! नन्दिकेश्वर! त्वमपि गच्छ। स्वकृत्यं निष्पादय। (इति उभौ निष्क्रान्तौ)

शिवः : (स्मृतिमभिनीय) सतीदेव्यै वरो दत्तो न कदापि मद्वियुक्ता सा भवेत्। तत्पुनस्तां ग्रहीष्ये।

अनादिशक्तिः खलदक्षदेहजां तनुं परित्यज्य जगत् सुमङ्गलम्।
विधातुकामा तपसा समेष्यति परां पुनर्हैमवतीं पतिञ्च माम्।।३५।।

भवतु! अहमपि समाधिमाश्रये। (इति निष्क्रान्तः)

।। इति श्रीपारसनाथद्विवेदिविरचिते पार्वतीमङ्गले तृतीयोऽङ्कः।।३।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ चतुर्थोऽङ्कः

(ततः प्रविशतः शृङ्गिभृङ्गिणौ)

शृङ्गी : (परितो विलोक्य मुखविकारं नाटयन्) अयि भोः! बुभुक्षितोऽस्मि। शनैः शनैरपचयमेति मे शरीरम्।

भृङ्गी : भोः! अधुनैव मणद्वयं लड्डुकं भक्षयित्वाऽऽगतः, तदापि ते बुभुक्षा न शान्ता।

शृङ्गी : कथं परिहससि! पश्य मे प्रतिक्षणं क्षीयमाणं शरीरम्।

भृङ्गी : अयि! अतिस्थूलस्तुन्दिलो दृश्यसे। कथमस्मादपि स्थूलतरो भवितुमिच्छसि? कथं नाम पृथिवी त्वां धारयिष्यति?

शृङ्गी : वत्स! मातापितृभ्यां लालितो रक्षितश्च वत्सो वर्धते।

भृङ्गी : किं वत्सोऽसि, तर्हि वृद्धो कीदृशो भविष्यति?

शृङ्गी : अलं परिहासेन! माता सती पिता शिवः। उभावपि त्वां मां च सर्वं गणसमुदायं विहाय गतौ। तत् कथमस्माकं पोषणं भविष्यति।

भृङ्गी : (सखेदम्) सखे! ममापि ताभ्यां विनाऽहर्निशं व्यथते चेतः। केवलं दुःखन्यूनीकरणाय परिहासः कृतः।

शृङ्गी : सखे! जानास्येव जनन्याः सतीदेव्या यथावृत्तम्।

भृङ्गी : एवमवगतवृत्तान्तोऽस्मि।

शृङ्गी : सखे! माता सती अस्माकं प्रत्यहं भोजनादिचिन्तां कृतवती आसीत्, येन सुखं दिवसा यापिताः।

भृङ्गी : (साश्रु) अपि सत्यम्।

माता सा मे सत्स्वभावान्नपूर्णा
भाण्डागाराद् मोदकानि प्रगृह्य ।
स्वेच्छं नित्यं खादतोऽस्मद्दृशाँश्च
वात्सल्यान्न प्रावदन्मोदमाना ।।१।।

शृङ्गी : अहो! जननीं विना अनाथाः स्मः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अचिन्तयन्ती बहुशोऽपराधान् मुहुर्मुहुः पृष्टवती च भुक्तम् ।
न वेति या पालनतत्परा सा दयालुरम्बा मम कुत्र याता ।।२।।

भृङ्गी : सखे! स्वामी अपि न जाने अस्मान् अनाथीकृत्य कुत्र गतः। शून्यः कैलासः।

शृङ्गी : अयि! न जानासि, यदा वीरभद्रः समखं दक्षं विनाश्य आगतस्तदैव भगवान् भूतभावनः,

ततः प्रसन्नो विहतारिकण्टकः समाहितात्मा जगतामधीश्वरः ।
शिवो विशुद्धप्रणतार्तिनाशनो हिमालयस्योर्ध्वशिखां जगाम ह।।३।।

भृङ्गी : ततः किम्?

शृङ्गी : तत्र ब्रह्मपुरोगैर्देवैर्दक्षार्थं मखपूरणार्थञ्च संस्तुतः प्रसन्नः सन् दक्षं जीवयन् मखं सफलं कारयामास।

भृङ्गी : अहो!

अम्बेव सोऽपि स्वयमाशुतोषो दयालुरन्तःसरलस्वभावः।
क्षमाधिनाथो भजदार्त्तिहारी न तत्समः कश्चिदिहोपपन्नः।।४।।

शृङ्गी : **दक्षो नतः शिवपदं तमकामदेवं**
तुष्टाव दिव्यवचनैर्मधुरैः प्रबुद्धः।
देवैः सहैव निजदोषनिरासकामः
प्रीतोऽग्रहीत् परमकारुणिकस्ततस्तम्।।५।।

तदनन्तरं देवो देव्या विप्रयोगाच्छोकाकुलो न सुखमवाप।

भृङ्गी : कष्टं भो! देवस्यापि एवं दशा।

शृङ्गी : अयि भोः! न भ्रमः कार्यः। लीला भगवतः।

भृङ्गी : एवमेव सखे! न भ्रान्तोऽस्मि। देवदुःखदुःखिना मया उक्तम्। ततः?

शृङ्गी : **प्रियवियोगजशोकमनाः शिवो**
विधिकृतेषु भवेषु परिभ्रमन् ।
हिमगिरिं गिरिराजमुपेयिवान्
धवलितं वलितं तुहिनैर्घनैः।।६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वटतरोस्तलमुन्नतमीश्वरः सममवेक्ष्य समाप्तसमक्रियः।
सुखदमात्ममहिम्नि सदा स्थित उपविवेश विवेषविभूतिमान्।।७।।

भृङ्गी : समर्थः खलु देवः। ततः?

शृङ्गी : **सहजयोगसमाधिमधीश्वरः सकलमायिकभावपरात् परः।**
प्रणतभक्तजनार्थविशेषवान् उपगतोऽपगतोपनिबन्धनः।।८।।

भृङ्गी : शून्यमिदानीं जगद् विभाति। वयं दीना निराश्रया मातापितृभ्यां विना विजने वने भ्राम्यामस्त्रस्ताः।

शृङ्गी : (नेपथ्ये कर्णं दत्त्वा) अये इतो मधुरो ध्वनिः श्रूयते।

भृङ्गी : (सभयं) अये कस्य ध्वनिः? भीतोऽस्मि।

शृङ्गी : मूर्ख! किमिदं भयस्थानं? मा तावत्। निरूपयामि कस्यैष इति।

भृङ्गी : (तत् पृष्ठे गत्वा) निरूपय तावत् शीघ्रम्। हा! पितरौ विना भयभीतोऽस्मि अनाथोऽस्मि।

शृङ्गी : (निरूप्य) अलं भयेन! वीणाध्वनिः। मन्ये, देवर्षिर्नारदः प्रतिभाति। तद् हर्ष एवास्माकम्।

भृङ्गी : किमत्र कर्त्तव्यम्?

शृङ्गी : सखे! इहैव कुञ्जान्तर्हितो भवेव। निरूपणीयं तावत् किमिति।

(इति तथा कुरुतः)

(ततः प्रविशति यथोक्तो नारदः)

नारदः : (गायन् प्रविश्य)

लीलां तनुते भव तव माया।
नारायण जगदीश्वर शङ्कर सुन्दरश्यामलकाया।। (ली.)
रचयति विविधविचित्रविधानम्, भ्रमयति चेतोबोधपिधानम्।
मुनिजनमोहकरी शतवेषा नृत्यति गायति नियतिरशेषा।
सुरपतिहृदयनिकाया ।। (ली.)
भक्तजनार्त्तिहरी हरिचेतसि मोदकरी कृपया या ।
मूढजनोरसि भीतिकरी जगदुद्भवपालननाशक्षमा या
मिथ्या सत्यवदाभा ।। (ली.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवराजप्रियचिकीर्षया वसुन्धरां प्रयातुकामोऽहम्। अयमस्ति भगवतः शङ्करस्य कैलासलोकः। अस्ति च मम अभिलाषः शिवसतीपदसरोजाङ्कितं पूतस्थलमिदं पश्यामीति। अतोऽत्रागमनम्।

जगदम्बा सती तु,

स्थूलां तनुं मलिनवासमिवावमानाद्
उत्सृज्य योगहुतभुग्ज्वलितां शिवार्थम् ।
रूपं परं सकलकल्मषहं विधाय
जाता हिमाचलकुले जगतां हिताय।।९।।

तद् भगवत्या हिमालयराजसुताया अभिनवं दर्शनं वाञ्छमीत्यस्ति ममाप्याग्रहः।

तारकासुरविभीतिकम्पितो देवतापतिरिहेच्छतीदृशम् ।
सर्वलोकशिवमस्ति जन्मतः शाश्वती हि शिवशक्तिरिष्टदा।।१०।।

तत् प्रणम्य शिवलोकं प्रयामि हिमालयराजभवनम्।

(इति तथा कुर्वन् निष्क्रान्तः)

शृङ्गी : (सहर्षम्) सखे! महान् हर्षः। अपि श्रुतवानसि?

भृङ्गी : (सहर्षम्) जगदम्बा माता आविर्भूता। अहो जीविता वयम्।

यथा शुष्यत्सु तरुषु वृष्टिर्जाता तथा श्रुतिः ।
जाता माता पुनरिति मादृशे जीवितप्रदा।।११।।

शृङ्गी : तत् सखे! अद्यैवावामपि अन्तर्हितौ भूत्वा गत्वा तत्र पश्यावस्तावद् देवीं मातरं नारदहिमगिरिसंवादञ्च शृणुवः। नारदोऽपि योगी प्राप्त एव तद्भवनम्।

भृङ्गी : तथा। (इति निष्क्रान्तौ)

(इति विष्कम्भकः)

(ततः प्रविशन्ति हिमगिरी राज्ञी नारदश्चेति)

नारदः : अचलराज! अपि कुशली भवान् सपरिवारः।

राज्येषु कोशेषु बलेषु वृद्धिः प्रजासु कच्चित्तव मित्रवर्गे ।
अनामयं तात हिमाद्रिराज! धर्मेषु सर्वत्र च सन्ततेषु ।।१२।।

हिमाचलः : देव! भवतामागमनेन दर्शनेन किं दुर्लभम्? सर्वं कुशलम्। देवर्षे!

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करे वीणां नामश्रुतिमधुरगीतिं कलयतः
मुखाम्भोजे दिव्यं जलधितनयाजानिचरितम्।
मनो नित्यं नारायणपदसरोजे सुनिरतं
सुरर्षे! ते पुण्यागमनमिह सिद्धिं दिशति मे।।१३।।

मेना : सौभाग्येन वयमत्र भगवन्तं पश्यामः।

अनन्तजन्मार्जितपुण्यसञ्चयात्परप्रसादात्परमेश्वरस्य च।
भवादृशा देवगणेषु भाविताः कथञ्चिदस्मादृशदृष्टिगोचराः।।१४।।

नारदः : राजन्! परितुष्टोऽस्मि। नारायणस्ते भद्रं करोतु।

हिमाचलः : अनुगृहीता वयम्।

मेना : आर्यपुत्र! वत्सा उमापि ब्रह्मसुतं देवर्षिमभिवाद्याशीर्लभताम्।

हिमाचलः : देवि! सम्यक् स्मारितम्।

नारदः : (स्वगतम्) अधुना देव्या जगदम्बाया दर्शनं भविष्यति।
(प्रकाशम्) राजन् क्व ते राजपुत्री, ममापि परं कौतुहलं प्रेक्षितुम्।
(ततः प्रविशति उमा)

उमा : अम्ब! अहं सखीभिः सह ईश्वरमर्चितुं देवालयं गन्तुमिच्छामि। अनुजानीहि माम्।

मेना : कथमागतैव मे प्रियवत्सा!

नारदः : स्मरणादेषा उपस्थितास्ति। एषा आयुष्मती।

हिमाचलः : वत्से! पश्य देवपूज्यतममहर्षिर्नारदः प्राप्त इति। अभिवादय तावदेनम्।

मेना : वत्से! अभिवादयैनममोघवाचं महर्षिम्।

उमा : देव! नमस्ते।

नारदः : पुत्रि! सिद्धार्थायुष्मती भूयाः। (निपुणं निरीक्ष्य स्वगतम्)

इयं सती रूपगुणप्रकाशितां समस्तमाङ्गल्यमयीं नवां तनुम्।
अशेषशोभानिचयां दधाना भवार्थजाता सुषुमाधिदेवता।।१५।।

नमामि विद्यामपरां पराञ्च सौभाग्यदेवीमचलां भवानीम्।
अधीश्वरीं तां मनसो भवस्य नवां पराम्बातनुमाश्रितां हि।।१६।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचलः : भगवन् सर्वज्ञोऽसि! तद् ब्रूहि मम पुत्रिकायाः सुलक्षणानि।

मेना : एतदेव ममाप्यभिलषितम्। कानि सुलक्षणानि वत्सायाः?

पुत्रि! इत आयाहि दर्शय भगवन्तं पाणिरेखाम् (इति दर्शयति)।

नारदः : (स्वगतम्)

प्रपन्नतृप्तं परिवीक्षणेन क्षणेन यस्या जगदम्बिकायाः।
लीला तु तस्याः करकञ्जरेखां पश्यामि देव्याः कृपया भवान्याः।।१७।।

(प्रकाशम्। उमाया हस्तरेखां निरूपयन्) राजन्! सर्वशुभलक्षणैः सम्पन्ना ते सुता।

अखण्डसौभाग्यसमस्तसम्पदा महर्धिदिव्यायुरमोघदर्शना।
प्रशान्तिसौख्याभिरता सुता तव पयोधिजेवाखिलमङ्गलान्विता।।१८।।

हिमाचलः : अनुगृहीतोऽस्मि।

मेना : अनुगृहीताऽस्मि।

हिमाचलः : भगवन्! अमोघानि ते आशीर्वचांसि इमानि।

नितान्तशुद्धा तपसा महीयसा शिवार्थलोका पुरुषार्थसाधिनी।
भवादृशामीश्वरभावितात्मनाममोघवाक् नार्थविहायचारिणी।।१९।।

मेना : भगवन्! मोदते चेतः सुधावचः श्रुत्वा।

सुकल्पसिद्ध्यर्थबलातिबृंहिता हितोपदेशामृतधामवर्षिणी।
विशिष्टभावात्मविबोधबोधिनी भवादृशानां सफला सरस्वती।।२०।।

नारदः : वत्स! गिरिराज! यद्यपि सर्वाणि सुलक्षणानि तव सुतायां सङ्घटन्ते, तथापि.....।

हिमाचलः : (स्वगतम्) तथापीति आशङ्कते चेतः।

मेना : (स्वगतम्) किं विवक्षितमिति मुह्यति मनः।

नारदः : एषा एका पाणिरेखा सूचयति।

उभौ : (ससम्भ्रमम्) किमिति?

नारदः : पतिं निश्चयेन प्राप्नोति।

उभौ : (सप्रसन्नम्) प्रियं नौ। ननु कीदृशम्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः : **दिगम्बरं भिक्षुकरेणुमण्डितं विरूपनेत्रं जटिलं सुकोपनम्।**
करे गृहीत्वा च कमण्डलुं महीमपार्थमत्तं विचरन्तमीदृशम्।।२१।।

मेना : (सखेदं सोद्वेगम्) मा मैवम्, प्रतिहतममङ्गलं वत्सायाः।

हिमाचलः : मा मैवम्।

नारदः : किन्तु रेखा तादृशी।

हिमाचलः : (सखेदम्)

विधाय पूर्वं सकलं सुलक्षणं दिशन् सुताया हि पतिं विलक्षणम्।
विधिर्जडो नूनमहो विमूढधीः शिरोऽधिमौलिञ्चरणे न्यवेशयत्।।२२।।

मेना : मैवं मैवम्।

अहं प्रदास्यामि सुतां सुलोचनां गुणानुरूपाय वराय कोमलाम्।
न कण्टकाकीर्णतरुं समाश्रिता सुकल्पयोग्या लतिका हि शोभते।।२३।।

नारदः : पुत्रि! अनिवार्यो विधिः कथमन्यथा कर्तुं शक्यते।

उमा : मातः! अलं चिन्तया। स्वकृतमुपभुज्यते। ममैषा गतिः।

हिमाचलः : (अपवार्य) मा तावत्। कथमेवं ब्रवीषि मदधीनं तव सम्प्रदानम्।

मेना : एवमार्यपुत्र! वत्साया अनुरूपो वरः कल्पयितव्यः।

नारदः : सत्यमेवैतद् भविष्यति। पाणिरेखा तु वदति।

मेना : वदतु, किं तेन।

हिमाचलः : देवि! अनिच्छतोऽपि मम देवर्षिवचनं सत्यमिति मनः प्रत्ययं गच्छति।

मेना : हा! वत्साया मम भाग्यं स्फुटितम्। दुर्धिया विधिनाऽपराद्धम्।

उमा : अम्ब! अलं विधेराक्षेपेण। न दैवमपराध्यति। मम तु कृतं सुफलति।

नारदः : सम्यग् वदति वत्सा सुफलतीति।

मेना : **ऋषिवाक्यं न मोघं स्याद् भवितव्यं न चान्यथा।**
हन्त दुर्भाग्यमस्माकं विषीदामि सुतां प्रियाम्।।२४।।

हिमाचलः : **यत इमा सुता जाता मनसो मोदकारिणी।**
ततः प्रभृति राज्ये मे सम्पदो द्विगुणीकृताः ।।२५।।

नारदः : सर्वथा लक्ष्मीरिव ते सुता सर्वमङ्गलकारिणी।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचलः : सर्वेषां मङ्गलाधान्या मङ्गलं स्यात् कथं मुने! ।
आवयोर्नेत्रकौमुद्याः सुतायाः शुभलक्षणम् ।।२६।।

मेना : भगवन्! जगन्मङ्गलतत्पर! अनुचिन्तय वत्साया अभ्युदयं सौभाग्यम्।

नारदः : अखण्डं सौभाग्यमस्याः, महानभ्युदयः। उपायमेकं वक्ष्यामि येन श्रेयो भविष्यति।

उभौ : (सहर्षम्) अनुग्रहो भविष्यति। शीघ्रं कथय।

नारदः : **अस्याः करस्थाङ्कितरेखयानयोपलक्षितो यादृशरूपवान् पतिः।**
शिवः कपाली सविभूतिरीश्वरो दिगम्बरस्तादृश एव दृश्यते।।२७।।

तद् यदि स एव शिवोऽस्याः पतिः स्यात् तदा श्रेयः।

उमा : (स्वगतम्) अपि दैवं विदध्यात् प्रियं मे।

हिमाचलः : एवं सम्भविष्यति।

मेना : सम्भवति शम्भौ तल्लक्षणं किन्तु न स मे वत्साया योग्यो वरः।

उमा : अम्ब! दैवविधानमनिवार्यं पश्य।

नारदः : पुत्रि! मेने नान्यथा मन्तव्यम्। एतदेव भविष्यति। न नारदोऽन्यथा वदति।

मेना : एवमेतद् देव!

हिमाचलः : भगवन्! तत् कथं शिवः स्वभावतोऽसङ्गः अस्याः पतिः स्यात्।

नारदः : यदि ते सुता उमा तपश्चरेत् तदा तपसा तुष्ट आशुतोषः शिवस्तामनुग्रहीष्यति।

उमा : (स्वगतम्) प्रियं मे, अहं तपश्चरिष्यामि।

मेना : क्व तपः, क्व च मे सुता।

हिमाचलः : देव! तपो हि महाकष्टप्रदम्।

नारदः : किन्तु अभीष्टसिद्धिप्रदम्। तपसैव लभ्यः शिवः।

तपसेद्धो रविश्चन्द्रः प्रकाशेते तपोऽन्वितः।
पुरुहूतश्च वह्निश्च समर्थः सर्वसाधने।।२८।।

हिमाचलः : सत्यं भगवता उच्यते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः : राजन्! उमा तपश्चरणाय समुत्सुका। निमित्तानि शुभानि भवन्ति। समयश्च शुभः। अतोऽद्यैव तपसे एषा तिष्ठतु।

मेना : नाहं पुत्रीं प्रेषयिष्येऽतिकठिने तपसि।

नारदः : मेने! श्रेयस्ते उमाया ध्रुवं भविष्यति।

हिमाचलः : देवि! अनुमन्यस्व। गुरोर्वाक्यमविचारणीयं भवति।

मेना : तथास्तु।

हिमाचलः : भगवन्! भवदाज्ञया अहं पुत्रीं तपसे अनुजानामि।

मेना : पुत्रि। गच्छ तपसा प्रसादय शिवम्।

उमा : (सहर्षम्) यथाज्ञापयन्ति गुरवः। अहमद्यैव ईश्वरं प्रपूज्य नियममुपस्थास्ये।

सर्वे : **गच्छ पुत्रि शिवस्तेऽस्तु पन्थाः सुखकरः सदा! ।**
तपश्चर परं तावत् स्वयं नियममास्थिता।।२९।।

उमा : अनुगृहीतास्मि (इति निष्क्रान्ता)।

नारदः : राजन्! अहमपि साधयामि देवलोकम्। श्रेयस्तेऽस्तु। (इति निष्क्रान्तः)

उभौ : भगवन् नमस्ते।

हिमालयः : देवि! वत्सा तपसे गता। अवश्यमेव शिवः प्रसन्नो विधास्यति कल्याणमनुग्रहीष्यति ताम्। तदावामपि शिवं पूजयेव प्रत्यहम्।

मेना : यथा वदति आर्यपुत्रः।

हिमालयः : **अनुदिनं तपसा नियमैरसौ भवतु हैमवतीपतिरीश्वरः।**
परमतुष्टमनाः करुणाकरः समहितो महितो भजतां शिवः।।३०।।

तत् साधयावस्तावत् (इति निष्क्रान्तौ)।

।। इति श्रीपारसनाथद्विवेदिविरचिते पार्वतीमङ्गले चतुर्थोऽङ्कः।।४।।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ पञ्चमोऽङ्कः

(ततः प्रविशति सवीणो गायन् नारदः)

नारदः : अयि भोः! देवराजप्रियकामाय मया एतदनुष्ठितम्। भगवती पार्वती शिवं प्रार्थयितुं तपसे नियता वर्तते।

क्व च तपः कठिनं यतिनां क्षमं
क्व च हिमाद्रिसुता मृदुविग्रहा।
गुरुतरं व्रतमुत्कटमास्थिता
भवरता वरताभिनिवेशिता।।१।।

तदधुना इन्द्रपुरीं गत्वा सुरेन्द्रं सूचयामि एतत्। स च तारकासुरपरित्रस्तो न परित्राणं लभते। ब्रह्मणा च मन्त्रो दत्तो यत् शिवपुत्रेणास्य तारकासुरस्य वधो भविष्यति।

ततः प्रभृति देवराजस्य महान् ज्वरः कथमेतत् भविष्यतीति।

निरुध्य कामान् त्रिपुरान्तकः शिवः
समाधिमास्थाय निवर्तितक्रियः।
सती तु जाता हिमवद्गृहेऽधुना
कथं विवाहो भविता तयोस्तदा।।२।।

शिववरणार्थं पार्वती महातपः करोतीति प्रीतो भविष्यति। अहमपि उभयोरुद्वाहं वाञ्छामि तेन जगच्छिवं भवेत्।

इयमिन्द्रपुरी—

लभ्या यथाविधिकृतैः क्रतुभिस्तपोभिः
पुण्यैरनन्तसुखदा परलोभनीया।
यस्यै महासुरगणैः सह रिपुभिर्महद्भि-
र्देवेश्वरस्य भवति प्रसभं विमर्दः।।३।।

मन्दाकिनीपयसि पङ्कजसौरभाढ्ये
क्रीडन्ति देववनिताः सुचिरं शुभाङ्ग्यः।
आन्दोलयन्ति मरुतः सुरकाननेषु
कल्पं सुगन्धनिचयं स्फुटपारिजातम्।।४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रोऽपि सन्निहित एवेति तर्कयामि, तद् गन्तव्यम्।

(इति निष्क्रान्तः)

(ततः प्रविशति इन्द्रः सचिन्तः)

इन्द्रः : तारकासुरभयकम्पितस्य का नाम मम देवराजता?

सिध्यन्ति कार्याणि न केवलेन बलेन वा व्यर्थमनोरथेन।
सतामुपायेन सुसाधितेन सिद्धं हि कृत्यं श्रियमातनोति।।५।।

तद् उपायेन प्रवर्त्तितव्यम्। ब्रह्मणा चोपायो दर्शितः।

महर्षिनारदो हिमालयभवनं गतो मन्ये परावर्तित एवेति।

(ततः प्रविशति नारदः)

नारदः : वत्स देवेश्वर! अपि स्वस्ति।

इन्द्रः : देवर्षे! वन्दे। भवतां दर्शनेन सर्वं स्वस्ति। कथय किं वृत्तम्?

नारदः : कृतो विधिः। पार्वती इदानीमुग्रे तपसि वर्तते।

इन्द्रः : प्रियं मे। किन्तु भगवान् शशाङ्कमूर्धा तु परमं समाधिं गतः।

नारदः : सत्यमुच्यते। सोऽपि प्रसाध्यः।

इन्द्रः : को नाम समाधिभङ्गं कुर्यात्। इदञ्च तारकासुरादपि भीतिकरम्।

कथं समाधिभङ्गः स्याद् विषमाक्षस्य शूलिनः।
कथञ्चास्य समुद्वाहो भगवत्या भविष्यति।।६।।

नारदः : उपायेन सर्वं सम्भविष्यति।

इन्द्रः : केनापि यत्नेन समाधिभङ्गे त्रिलोकीं भस्मीभूतां द्रक्ष्यति।

महेश्वरः शूलधरः पिनाकी भग्ने समाधौ कुपितो न साध्यः।
तृतीयनेत्रोद्गतकल्पवह्निज्वालैस्त्रिलोकीं नियतं प्रदह्यात्।।७।।

नारदः : कथञ्चित् समाधेः समुत्थितोऽस्माभिर्ब्रह्मपुरोगैः संस्तुतो निश्चयेन कृपां विधास्यति। पश्य,

सुरैः स्तुतोऽसौ सहसा प्रवृद्धं यः कालकूटं निखिलं पपौ हि।
तथा चकारार्तिहरो हरस्तद् दक्षे कृपां देव दयालुरीशः।।८।।

इन्द्रः : सत्यमेवैतत्; किन्तु समाधिभङ्गस्तु दुर्लभः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः : मदनस्तत्र प्रयोक्तव्यः।

इन्द्रः : (सहर्षम्) आम्, एवम्, सम्यगुपायश्चिन्तितः। तत् स्मरामि कामदेवम्। (इति स्मृतिं नाटयति)

कामः : (सहसा प्रविश्य) प्रणमामि देवं देवर्षिञ्च। को नियोगः?

इन्द्रः : सखे! सखेदं ब्रवीमि। तारकासुरत्रासाद् आपद्गतामरावती तत् किञ्चिद् अवश्यमनुष्ठातव्यम्।

कामः : आज्ञापयतु भवान्।

इन्द्रः : भगवान् भूतभावनः समाधिस्थः। स एवोपायं जानाति।

तद् यतस्व तत्समाधिभङ्गे।

कामः : (सत्रासम्) किमिदं भाष्यते देवेन। रुद्रकोपाद् नाहं भविष्यामि।

इन्द्रः : मा भैषीः। अहं तव साहाय्यं विधास्यामि। सखे!

शक्यं हरेर्ज्वलितदीप्तिमतारिणा यत्
शूलेन वा त्रिपुरदाहनतत्परस्य ।
वज्रेण वा न शतपर्ववता बलेन
त्वीषत्करं कुसुमबाणमुखेन तत्ते।।९।।

कामः : अर्थवाद एवैषः। कम्पते मे मनः। दुर्निमित्तं पश्यामि।

न मेऽस्ति शक्तिः परमेश्वरस्य त्रिशूलहस्तस्य समाहितस्य।
कोटिप्रयत्नैरपि पञ्चबाणैर्भेत्तुं मनो देव! ततो बिभेमि।।१०।।

नारदः : वत्स! देवराजनियोगोऽनुष्ठातव्यः, श्रेयस्ते भविष्यति।

इन्द्रः : सखे! अजेयोऽसि न भीः कार्या।

तपसा न बलेन चेज्यया श्रुतिविज्ञानपरात्मना तथा ।
सुरसिद्धमुनीन्द्रमानुषैस्त्वमजेयोऽसि सखे! न संशयः।।११।।

कामः : भवत्सहायो विधास्यामि कार्यम्।

इन्द्रः : एवमेतद् अधुनैव प्रस्थातव्यम्।

नारदः : वत्स इन्द्र! कामेन सह गच्छ साधय कार्यम्।

अहमपि पितरं द्रष्टुमिच्छामि।

उभौ : भगवन् नमस्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः : स्वस्ति। (इति निष्क्रान्तः)

इन्द्रः : सखे! मकरध्वज! सैन्यैः सह त्वं मन्नियोगाद् अग्रतो गच्छ, अहं पश्चात् तव साहाय्यं विधास्यामि।

कामः : तथा करोमि। (इति निष्क्रान्तः)

इन्द्रः : कृत उपायः। बिभेमि, अपि रुद्रो भग्नसमाधिः। त्रिलोकीं न भस्म कुर्यात्। प्रसादयिष्यामस्तं क्रुद्धम्।

कामोऽपि तत्र गतः। अहमपि तत्रैव सन्निहितो भवामि। यत्र

शिवः समाधिं गतः। (इति परिक्रामति)

(ततः प्रविशति समाधिस्थः शिवः कामश्च)

कामः : अहो!

कालाग्नितुल्यं विषमाक्षमीशं निरीक्षितुं नाप्यधुना प्रशक्तः।
शङ्के विनाशो न भवेन्ममात्र हरस्य कोपाद् विषमं विभाति।।१२।।

(परितो विलोक्य) का गतिः। इदानीं प्रतिज्ञातं करोमि।

देवेन्द्रोऽपि सन्निहित एव।

इन्द्रः : (उपसृत्य) सखे! मा भैषीः, दयालुः प्रभुः। कुरु प्रयोगम्। अहमिहैवान्तर्हितो भवामि। (इति अपसरति)

कामः : तथेति (ध्यानं नाटयति धनुर्गृह्णन्)।

इन्द्रः : अहो आश्चर्यम्, आश्चर्यम्। समस्तं विश्वं काममयं प्रफुल्लितं विभाति। तथा हि—

वासन्तीश्रीस्त्रिभुवनतले कोकिलारावरम्या
व्याप्तं विश्वं मधुरवनितानूपुरोद्गीतिरागैः।
कामोद्वेगात् सुरमुनिजनाः कामिनीमाश्रयन्ते
लुप्ता धर्माचरणनियमाः पञ्चबाणप्रयाणे।।१३।।

कामः : प्रयुक्तं सैन्यम्। इदानीमहम् अजेयशरासने कुसुमबाणं सन्दधे (इति शरसन्धानं नाटयति)।

इन्द्रः : अहो! सर्वैः सह ममाप्युत्कण्ठते चेतः। लीलायिता वसुधावनिता। आश्चर्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रष्टो वैराग्यसेतुर्मुनिजननियमा योगिबोधाश्च लीना
विश्वेऽस्मिन्नङ्गनानां रतिकृतविभवा मोहिनीनां विलासाः।
दृश्यन्ते पुष्पसम्पत् परिमललसद्धीरशीताः समीराः
क्षुब्धा देवादिलोका विषमशरकृते पञ्चबाणप्रयोगे ।।१४।।

कामः : आश्चर्यम्—

येन प्रयोगेण समा त्रिलोकी वशीकृता काममयेन तेन।
शक्यो न शम्भुः सुसमाधिनिष्ठो जेतुं मयाऽजय्यपराक्रमेण ।।१५।।

(सक्रोधम्) तदिदानीं पुष्पबाणानामन्तिमः प्रयोगः कार्यो ब्रह्मास्त्रतुल्योऽमोघः। (इति पुनः शरसन्धानं नाटयति)

इन्द्रः : **शरे गृहीते कुसुमायुधेन चराचराणामपि मोहनेन ।**
अचेतनानामपि लक्ष्यते वै स्फुटः प्रभावः किमु चेतनानाम्।।१६।।

कामः : अयममोघः शरः शिवमनः सङ्क्षोभयतु (इति शरं मोचयति)

इन्द्रः : स्वस्त्यस्तु लोकाय।

शिवः : (शनैर्नेत्रमुन्मीलयन् समाधिभङ्गं नाटयति)

स्वानन्दनित्यनिरतं सुसमाहितं मे
कोऽयं मनो मदयते त्रिपुरान्तकस्य।
प्राणाः प्रिया न जगतां स्थितयश्च कस्य
यत् कालवह्निरधुना शरसङ्गदीप्तः।।१७।।

किं मदनोऽसौ? भवतु। तत् को विलम्बः ।

प्रचण्डनेत्रोत्थमहाज्वलेऽद्य हरस्य मेऽसौ मदनो मदान्धः ।
जगत् समग्रञ्च हुताशनास्ये ग्रासीभवेत् स स्वपताद् विधाता।।१८।।

(इति सहसा उत्तिष्ठति, तृतीयनेत्रमुद्घाटयति। कामश्च सधनुः पतति।

शिवः : (सक्रोधम्) केन दुरात्मना कृतान्तो निमन्त्रितः? नूनं देवैरेव।

अयं प्रचण्डो मम नेत्रजन्मा
कामाल्पभक्ष्येण पुनः प्रदीप्तः ।
कल्पान्तकोपोग्रहुताशनस्तद्
जगत् समग्रं दहताद् विधातुः ।।१९।।

(ततः प्रविशति ससम्भ्रमो ब्रह्मा इन्द्रो नारदश्च)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मा : अलम्, अलम्, महादेव!

क्रोधं प्रभो! संहर संहरात्र प्रसीद देवेश कृपाधिनाथ।
देवाः समे साञ्जलयः स्तुवन्ति प्रसीद मां पाहि निजं सविश्वम्।।२०।।

इन्द्रः : प्रभो! करुणाकर! क्षमस्व क्षमस्व!

कृतं तु सर्वं जगतां हिताय मयैव शम्भो! मदनः प्रयुक्तः।
दासस्य नाथ क्षमतां ममैतमेकापराधं करुणावतार।।२१।।

नारदः :

देवाधिदेवशरणं वयमास्थितास्ते
देवान् विलोकय प्रभो कृपणेक्षणेन।
इष्टं कुरुष्व जगतामसुरैः परास्त-
सैन्यस्य भीतमनसश्च सुरेश्वरस्य।।२२।।

ब्रह्मा : नाथ! क्षमस्व! दयस्व।

शिवः : किं भवन्तः प्राप्ताः। अस्तु उपसंहृतः प्रलयङ्करः प्रकोपः।

ब्रह्मा : जीविता त्रिलोकी।

इन्द्रः : इष्टञ्च सिद्धं मम।

नारदः : महाकृपायतने नेदमसदृशम्।

शिवः : तत् किं भवतामिष्टं यदर्थमिदं चेष्टितम्।

ब्रह्मा : देव! प्रथमं निरपराधं कामं जीवय।

शिवः : भवतां प्रीत्यर्थं प्रसन्नोऽहं वरं ददामि यद् अद्यारभ्य मदनोऽनङ्गः सन् प्राणिनां मनसि भवेद् रत्या सह। मनोजो मनसिजोऽनङ्ग इति ख्यातिं लभताम्। जीवताद् अयं गच्छतु।

कामः : (उत्थाय) अनुगृहीतोऽस्मि। (इति प्रणम्य निष्क्रान्तः)

ब्रह्मा : प्रभो! देवानां महत् कार्यम्। भीता इमे भवच्छरणागताः।

शिवः : अहमवश्यं भवतामिष्टं करिष्यामि। किं समीहितं देवानां वक्तव्यम्।

इन्द्रः : नाथ! तारकासुरेण निरस्ता वयं न शरणं लभामहे। तत् परित्रायस्व नः।

ब्रह्मा : नाथ त्वय्येव तारकासुरवधो विहितः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः : **प्रभो! त्वमेवासि शरणं नः सत्क्रिया वेदमार्गश्च लुप्यते परमासुरैः।**
कथं स्यात् तु सुरत्राणः त्वदधीनं हि नः क्रियाः।।२३।।

शिवः : कथमिव! किं मया कर्त्तव्यम्?

ब्रह्मा : देव! तारकासुरवधस्तव सुतेन विहितः। स चान्यथा न भविष्यति। अनुग्रहीतव्यञ्च मे वाक्यम्।

सुतो हि ते कोटिहुताशसुप्रभो महाबलो संयति देवनायकः।
भविष्यति स्कन्द इति प्रसिद्धिमागतोऽसुरं तारकमाहनिष्यते।।२४।।

शिवः : कथमेवं सम्भवेत्। सुत इति कथनाद् देवी सती पुनः स्मृतिपथमागता—

हता सती दक्षसुता मम प्रिया
शिवावमानं दधती न मानिनी।
कथं भवेन्निर्जरकार्यमद्य तद्
उपायमन्यं कुरुतात् सुसम्भवम्।।२५।।

ब्रह्मा : नाथ! न सती प्राकृता नारी। भवतामनादिशक्तिरिति न भवद्भ्यः पृथग् भवितुमर्हति।

विहाय देहं भवतामुपेक्षणात्
सती भवानी गिरिराजसद्मनि।
पुनः प्रजाता भवदर्थमास्थिता
दृढं तपोऽनन्यमनाः प्रसीद ताम्।।२६।।

इन्द्रः : देव! जगदम्बा पार्वती उग्रं तप आचरन्ती तिष्ठति।

नारदः : नान्यत्र भवतो देव्या मनो मनागपि गच्छति।

शिवः : यदि दृढानुरागोऽनन्यपरायणता पार्वत्यास्तर्हि भवतामनुकम्पनाय ग्रहीष्यामि।

ब्रह्मा : सन्देहश्चेत् परीक्ष्यताम्।

इन्द्रः : सर्वथा देवी भवत्परा नान्यपरा।

नारदः : अनन्यस्पृहा देवे सा।

शिवः : (स्वगतम्) यद्यपि देव्या भक्तौ मम न सन्देहस्तथापि लोकार्थं परीक्षा कर्त्तव्या देव्या यशसे च।

(प्रकाशम्) ब्रह्मन् पार्वत्या मयि दृढानुरागः परीक्षणीयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मा : **तस्याः परीक्षा कथमादिशक्तेर्जगज्जनन्या भवदेकभक्तेः।**
तथापि मान्यं वचनं भवस्य दृश्या तपस्या तु परीक्षकेण।।२७।।

तद् भवानेव परीक्षको युक्तः।

शिवः : एवमेतत् पार्वतीपरीक्षां करिष्ये। तदनन्तरं तद्दृढानुरागं वीक्ष्य ग्रहीष्ये।

ब्रह्मा : ग्रहणीयैव सा। महान् हर्षः।

इन्द्रः : सिद्धं मे कार्यम्।

नारदः : प्रियं मे।

ब्रह्मा : तद् गन्तव्यमस्माभिः।

शिवः : तथा।

ब्रह्मा : **भूयाच्छिवः परममाङ्गलिको भवस्य**
शक्तेर्वरः सपदि सर्वगिरीन्द्रपुत्र्याः।
देवा भवन्तु सफला हतशत्रुसैन्याः
श्रेयांसि विघ्नरहितानि जगत्सु नित्यम्।।२८।।

(इति सर्वे निष्क्रान्ताः)

।। इति श्रीपारसनाथद्विवेदिविरचिते पार्वतीमङ्गले पञ्चमोऽङ्कः।।५।।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ षष्ठोऽङ्कः

(ततः प्रविशति ब्रह्मचारिवेषः शिवः)

शिवः : **जानामि शुद्धां गिरिराजकन्यां महातपोमूर्त्तिमिव प्रसन्नाम्।**
मदेकनाथां मयि रक्तचित्तां तथापि देवीं यशसे परीक्षे।।१।।

पार्वतीपरीक्षार्थं कृतो ब्रह्मचारिवेषः। अहो मदर्थं महोग्रे तपसि देवी नियता वर्तते। तद् गन्तव्यं मया तपस्थलीं पार्वतीं प्रेक्षितुम्। (इति परिक्रामति)

(ततः प्रविशति पार्वती शिवलिङ्गाग्रतो ध्यानं नाटयन्ती)

उमा : अद्यैव तपोव्रतनियमपरिसमाप्तिः शिवप्रसादात् प्रसन्नं चेतः।

स्वामिन् शिवप्रणयिनी भगवन्ननन्या
सैषा चिरं सुनियतास्मि गिरीन्द्रजाता ।
अद्यास्ति नाथ तपसो नियमस्य पूर्ति-
स्तन्मे प्रसीद करुणाकर मां गृहाण ।।२।।

(इति पुष्पाञ्जलिं समर्पयति) नाथ भवतोऽन्यत्र मनो मनागपि न गच्छेत्। नाथ पुण्यदर्शनेनानुगृहाण।

शिवः : अये! एषा गिरिराजकुमारी सुकुमारी मदर्थं महति तपसि नियता। अहो विलक्षणमस्या सौन्दर्यम्।

एषा नवीनस्फुटयौवनश्रीर्मृद्वी महोग्रैर्नियमैर्विभाति ।
निदाघदग्धेव सुवर्णवर्णा प्रफुल्लिता कल्पलता कुमारी।।३।।

तद् द्रष्टव्या एषा। (उपसृत्य) भद्रे! अपि वर्धते तपः।

उमा : (स्वगतम्) अये! कोऽयं ब्राह्मणवटुस्तेजसा रूपेण चाप्रतिमो देव इव उपस्थितः। भवतु पृच्छामि (प्रकाशम्) ब्रह्मचारिन्! स्वागतं तेऽस्तु। को भवान्? इह आसने आस्यताम्, यावदर्घ्यादीनुपकल्पयामि।

ब्रह्मचारी : अलमर्घ्यादिना। वाचैव कृतं सर्वम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भासा विभासि रजनीशतलाच्च्युतेव
देवी पयोधितनयासमपङ्कजश्रीः।
काऽसि त्वमीह शतपत्रमृदुं वपुः स्व-
मुग्रे महातपसि किं कठिने दुनोषि।।४।।

उमा : ब्रह्मन्! अहं गिरिराजस्य हिमाचलस्यौरसी पुत्री उमा नाम।

ब्रह्मचारी : (साश्चर्यम्) अपि! किं भवती गिरिराजकुमारी। किमिति कलेवरमिदं कान्तं दहसि। अहो पार्वति!

अनेन कान्तेन कलेवरेण वरेण भोगोचितभाजनेन ।
तपो महोग्रं परिसाधयन्ती रक्तोत्पलाग्रेण शमीमभैत्सीः।।५।।

उमा : शिवः पतिर्मे स्यादित्येतदर्थं तपः कृतवती।

ब्रह्मचारी : केनोपदिष्टोऽयं पन्था दुष्करः।

उमा : सकलमहर्षिकुलालङ्कारभूतेन देवर्षिणा नारदेन गुरुणा।

ब्रह्मचारी : स्वेतरकुलाङ्गारेणेति वक्तव्यम्।

उमा : अनुचितमिदमवमाननं देवर्षेर्न श्रोतुं शक्नोमि।

ब्रह्मचारी : अयि! मुग्धे गिरिवरपुत्रि! सः प्रवञ्चकशिरोमणिः।

सतां चिह्नच्छायातिलकपरिवेशातिकपटी
गृहीत्वा वीणां तां जगति जनभेदं रचयति।
मुखे रामं जप्त्वा मनसि मलिनं धारयति च
प्रशान्तेऽपि स्थाने झटिति कलहं कारयति सः।।६।।

अहो व्यर्थमेव तद् वचनं विश्वस्य परिश्रमः कृतः।

उमा : ननु नापवक्तव्यो मे गुरुः।

को नाम नारायणपादपद्मभक्तो जगत्यां खलु तत् समोऽस्ति ।
हितोपदेष्टा निरतः परार्थे गुरुः सुरर्षिः परमो दयालुः।।७।।

ब्रह्मचारी : (सहासम्) एतदेव तु कापट्यं तस्य यद् नारायणभक्तोऽपि कपालिनं वरं प्राप्तुमुपादिशत्।

अहो मुनीनां कपटाग्रगस्य वचांसि विश्वस्य मुधा प्रतप्तम् ।
विहाय मुग्धे नियमं समग्रं प्रयाहि शीघ्रं गिरिराजपुत्रि।।८।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उमा : किं तत्र तस्य कपटकारित्वं पश्यसि।

ब्रह्मचारी : एतदेव यत् सर्वगुणरूपयौवनसम्पत्तिशालिनं सनातनं नारायणं विष्णुं तव सुयोग्यं वरं विज्ञायापि कुलशीलहीनं भिक्षुकं कपालमालाधरं वरमुपदिदेश।

उमा : न हि तत्र तस्य कामचारः। मम पाणिरेखैव सूचितवती तत्रभवन्तम्।

ब्रह्मचारी : अहो! बालिशे! सम्यक् प्रताडितासि तेन कथितमुनिना। क्व तेन ज्यौतिषं शास्त्रमधीतम्।

उमा : कथं सर्वज्ञं सर्वदर्शिनं महर्षिमधिक्षिपसि?

ब्रह्मचारी : नाधिक्षेपः! यथार्थमुच्यते। असौ मेषमीनमपि न जानाति; अपि तु एवमेव सर्वान् प्रवञ्चयति। पश्य,

पुत्रान् कलत्राणि धनानि सर्वं विहाय भस्मच्छुरिताङ्गमूढः ।
भ्रमत्यवश्यं स इव त्रिलोक्यां यो वोपदिष्टः खलु नारदेन।।९।।

उमा : भवतु, कपटेनैवोपदिष्टाहम्। मम तु इष्ट एव वरः शिव इति न तस्योपदेशाच्चलेयम्।

ब्रह्मचारी : (सहासम्) सम्यग् भवत्यां नारदप्रयुक्तेन्द्रजालं निक्षिप्तं प्रतिभाति।

उमा : कुत इति?

ब्रह्मचारी : भवादृश्या रूपयौवनगुणवत्या राजकुमार्याः सर्वसम्पत्सम्पन्नायाः कुलशीलरूपगुणरहितः कपाली वर इति न युक्तं विभाति। विष्णुरेव तव योग्यो वरः।

उमा : भवतु, कपाली स एव मे पतिः, नान्यत्र मनो गच्छति।

ब्रह्मचारी : अयि मुग्धे न जानासि,

कपाली भूतेशो विरहितकुलो दिक्पटधरः
चिताभस्मालेपो भ्रमति भुवनं भिक्षुक इव।
विरूपाक्षो व्यालग्रथितनृकपालस्त्रगहितः
असङ्गोऽपूतोऽसौ वटतरुतले तिष्ठति हरः।।१०।।

उमा : **स मे नाथो भूयान्मनसि नितरां निष्ठितगणो**
भवः शम्भुः स्वामी त्रिभुवनपतिर्ब्रह्मपरमम्।
शिवः साक्षादात्मा श्रुतिशतपदैर्वन्दितपदो
ह्यनन्यासक्ताहं दिवसपतिरक्तेव सुविभा ।।११।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मचारी : (स्वगतम्) धन्यासि देवि गिरिजे। (प्रकाशं प्रहस्य) अयं तव हठो न युक्तः। तव योग्यस्तु—

गदाधरः श्रीपतिरीश्वरः परः सपद्महस्तः सरसीरुहेक्षणः।
सुराधिदेवः कुलशीलशोभितो वरः स शोभाकरविष्णुरीक्षितः।।१२।।

उमा : **हठोऽस्तु मे शैलनृपात्मजाया न वाग्रहं स्वं विजहामि देवे।**
गच्छाधुनेतो द्विज किं तवात्र व्यर्थप्रलापेन शिवो वरः स्यात्।।१३।।

ब्रह्मचारी : राजकुमारि! रूपेण गुणैः सम्पदा च विष्णुः शिवमतिशेते तत् किं न वाञ्छसि तमेव।

उमा : **युक्तं विहीनं धनयौवनेन गुणेन वा रूपकुलेन शम्भुम्।**
वरं वृणे सत्यमिदं वदामि, नान्यं कथञ्चित् सगुणं प्रविष्णुम्।।१४।।

ब्रह्मचारी : अपि राजपुत्रि! विष्णुरेव वरस्तव योग्य इति ममापि मतिः।

उमा : **अनन्तजन्मार्जितपुण्यकर्मभिरुपासनध्यानपरैर्निषेवणात्।**
समात्मनाहं शिवमीश्वरं सती वरं वृणे मेऽस्ति दृढा हि भावना।।१५।।

ब्रह्मचारी : (स्वगतम्) एवमेव देवि! ददामि तुभ्यं वरं प्रसन्नोऽस्मि।
(प्रकाशम्) अयि भूधरराजपुत्रि! स तु कपाली ते प्रार्थनीयो वरः कामं दग्ध्वा निष्कामस्त्रिलोक्यां भ्रमति।

उमा : (सस्मितम्) तत् किमतः पूर्वं सकामं शिवमज्ञासीः।

निष्कामपूर्णात्महितानुकम्पी सच्चिन्महानन्दपरात्परः सः।
जानामि शम्भुं सगुणं विशेषं न मेऽस्ति मोहः पुनरत्र कश्चित्।।१६।।

तद् ब्रह्मन् आतिथ्यं गृह्यताम्।

ब्रह्मचारी : अस्तु कृतमातिथ्येन गच्छामि (अपसृत्य) पुनः स्वेन रूपेण।
कृतव्रताया देव्या अवश्यमेव मनोगतो वरो देयः। (उपसृत्य)

धन्यासि शैलतनये न हि ते समास्ति
नित्यं श्रिता शिवमधीश्वरमादिशक्तिः।
भावो दृढोऽस्ति तव शङ्करपादपद्मे
सौभाग्यमङ्गलकरी परमेश्वरी त्वम्।।१७।।

देवि! मदर्थं कठिनं तपः कृतवती।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उमा : (विलोक्य) कथं प्रभुः स्वामी एव ब्रह्मचारिवेषः समागतः। देव! अनाथां मामाश्रय अनुगृहाण। (पादयोः पतति)

शिवः : **देवि! प्रिये मयि सुनिष्ठितसर्वभावं**
तप्तं तपोऽतिकठिनं परमं भवत्या।
पूर्वं कृतं यदवमानमभूतपूर्वम्
अत्र क्षमस्व पुनरप्यपरं विलम्बम् ।।१८।।

(इत्युत्थापयति)

उमा : (साश्रु) स्वामिन्! मैवं वक्तव्यम्। भवान् प्राप्त इति सिद्धाऽस्मि। तत्,

जगत्सु सर्वेषु शिवेतरेषु समस्तसम्पत्स्वपि लोभनीषु ।
न जातु यातान्मम चित्तमेतदखण्डभावं भजताद् भवन्तम्।।१९।।

शिवः : देवि! तथास्तु।

उमा : प्रभो! अनुगृहाण मां पूरय मम मनोरथम्।

शिवः : सकलभक्तकल्याणतत्पराया मदनन्यायाः कथं न पूरयिष्ये ते मनोरथम्। तथास्तु।

उमा : अनुगृहीतास्मि।

शिवः : त्वं गच्छ भवनम्। अहमपि गच्छामि।

भवतु मङ्गलमत्र शिवस्य मे गिरिसुताकरपीडनसम्भवम्।
परिणयो जगतां वरकन्ययोस्तदनु मोदकरो भवताच्चिरम्।।२०।।

(इति निष्क्रान्तौ)

।। इति श्रीपारसनाथद्विवेदिविरचिते पार्वतीमङ्गले षष्ठोऽङ्कः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ सप्तमोऽङ्कः

(ततः प्रविशति सभृङ्गी शृङ्गी)

शृङ्गी : अये मित्र! महान् प्रमोदः।

भृङ्गी : किम् अद्य क्वचिल्लड्डुकानि प्राप्तानि?

शृङ्गी : त्वं तु भोजनभट्ट एव। न जानासि भगवान् समागतः।

भृङ्गी : सखे! सनाथितः कैलासः।

शृङ्गी : यावदम्बा नागच्छति तावन्न पूर्णा सनाथता।

सा श्रीर्भवस्य भवनस्य गिरेर्वनस्य
माता गणस्य भरणक्षमशक्तियुक्ता ।
जाता गृहे गिरिपतेस्तपसि स्थिता या
प्रायास्यति स्वभवनं नु कदा प्रसन्ना।।१।।

भृङ्गी : मन्ये जननी न चिरमस्मान् विहाय स्थास्यति।

सुतान् प्रियान् स्वान्तु यदा स्मरिष्यति
बुभुक्षितान् सा चिरपोषिताश्रितान्।
विहाय सर्वानितरान् समेष्यति
वनं गता धेनुरिव स्ववत्सकान्।।२।।

शृङ्गी : सखे! अस्मान् स्मरन्ती जननी न विलम्बयिष्यति। पश्य,

भाण्डागारं शून्यमेतद् विना तां वृक्षाः कालेऽपीह नैते फलन्ति।
शोभानष्टाः पर्वतस्यास्य सर्वा भ्रान्ताः खिन्ना मादृशा नाथहीनाः।।३।।

भृङ्गी : सखे! शीघ्रमेव मन्ये, अम्बा आगमिष्यति। अस्मान् पूर्ववत् परिचेष्यति।

शृङ्गी : अयि मूढ! अम्बा कथञ्चित् स्वसुतान् विस्मरति?

भृङ्गी : सत्यं ब्रवीषि। ममाम्बा सदैवास्मान् स्मरन्ती भोजनं पृच्छन्ती आसीत्।

शुष्कं मुखं वीक्ष्य दयालुरम्बा करेण चालम्ब्य बुभुक्षितोऽसि ।
भुङ्क्ष्वेति नित्यं मम चिन्तयन्ती न विस्मरिष्यत्यवशं सुतान्तु।।४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शृङ्गी : एवमेव, आगमिष्यति न विस्मरिष्यति।

भृङ्गी : परं केनोपायेनागमिष्यति?

शृङ्गी : सखे! अद्यैवं श्रुतमस्ति यद् ब्रह्मादयो देवाः स्वामिना सह मन्त्रयितुमागताः।

भृङ्गी : भवेत् कश्चित् स्वार्थस्तेषाम्।

शृङ्गी : एवमेतत्, परन्तु,

स्वार्थप्रवृत्ता अपि निर्जरास्त इष्टं करिष्यन्ति हि निश्चयं नः।
चेष्टा न का लोकहिते रतानां श्रेयः प्रसूते महतां जनानाम्।।५।।

भृङ्गी : सुष्ठूच्यते।

शृङ्गी : तत् तैर्भगवत्या उमायाः समागमविषये मन्त्रः प्रवर्तितः।

भृङ्गी : तदा प्रियं नः।

शृङ्गी : इदमपि श्रुतं यद् ब्रह्मादेशेन नारदो हिमालयराजेन सह सङ्गम्य सर्वां वैवाहिकवार्तां सुनिश्चितवान्।

भृङ्गी : महर्षिर्नारदस्तु पूर्वमेव कृतप्रयत्न आसीत्।

शृङ्गी : तद् भगवतः शिवस्य विवाहो भगवत्या पार्वत्या सह निश्चित एव।

भृङ्गी : तद् महान् हर्षः। अस्माकमम्बाऽऽगमिष्यति।

शृङ्गी : पश्य, सुरा अपि स्वस्वसमाजैर्वरयात्रायां गन्तुं समागताः।

भृङ्गी : अये! सत्यमुच्यते।

शृङ्गी : मित्र! पश्य, पश्य—

अयं स विष्णुर्गरुडाधिवाहनो गदारिशङ्खैर्लसितैश्चतुर्भुजैः।
जगन्महास्तम्भसमैः सुशोभितः समेति देवं भगवन्तमीश्वरम्।।६।।

भृङ्गी : सखे! कौतुकं पश्य, पश्येतः,

अयं सकूर्चैः पलितैश्चतुर्मुखैः पितामहो हंसगतो विराजते।
सपात्रमाल्यश्रुतिशोभितैः करैः सुरैर्वृतो ब्राह्ममहौजसा ज्वलन्।।७।।

शृङ्गी : मित्र! इतः पश्य इमे देवगणाः कृतसुन्दरवेशपरिग्रहा वयोभिः पञ्चविंशतिवार्षिकाः शोभन्ते। ननु तेषां मध्ये,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अयं सुरेशो गजपृष्ठसंस्थितः पुरन्दरो वज्रकरोऽत्र दृश्यते।
सुरेषु सर्वेषु समूहितेष्विह सुमेरुकल्पो मरुतां समेधिता।।८।।

भृङ्गी : अयि! देवगन्धर्वकिन्नराणां सिद्धमुनिविरागिणां महान् समवाय उपस्थितः।

शृङ्गी : मित्र! इतः पश्य पश्य, अस्माकं समाजः कीदृश इति।

वेताला भूतसङ्घा नरशवशिरोमाल्यभूषा विरूपा
नग्नाः पैशाचसेनाः कृतरुधिरवशापङ्कलिप्ता विचित्राः।
नृत्यन्तो युध्यमाना प्रमथबहुगणा भस्मविच्छुरिताङ्गा
दृश्यन्ते त्रासयन्तो विविधपरिकराः कालदूताः प्रयाताः।।९।।

भृङ्गी : एवमेतत्। वयमपि साधयामः। औत्सुक्यं मां बाधते।

शृङ्गी : ननु भगवानपि धृतवरवेशो ब्रह्मादिसुरैः परिवृतः सवाहनः सज्जित एव। तदावामपि साधयावः।

(इति निष्क्रान्तौ)

(इति प्रवेशकः)

(ततः प्रविशति यथोक्तः शिवो ब्रह्मादिसमाजपरिवृतः)

ब्रह्मा : (शिवं प्रति) देव! सम्भृताः सर्वे सम्भाराः। समवेताश्च सर्वे देवादयस्तद् आज्ञापय वरयात्राम्।

विष्णुः : एवमेव देव! सर्वे वयं समवेताः। निमित्तानि च मङ्गलानि दृश्यन्ते। अथवा किं तेन,

हलाहलं नाथ तवात्र देहे पीतं जगद्भस्मकरं सुधाभूत्।
शिवेति नाम्नाभिहितेन सर्वममङ्गलं मङ्गलमस्ति नित्यम्।।१०।।

ब्रह्मा : भो नारायण! वरयात्राप्रस्थानात् पूर्वं वरपरीक्षणं कर्तव्यमवशिष्टम्। तत् कुरु त्वम्।

विष्णुः : यथा वदति भवान् (इति शिवं निरूपयति सहासम्) भो विधे! एवं वरो न त्वया पूर्वं दृष्टः सृष्टो वा

कपालमालः शशिशेखरो महाजटाधरो भस्मतनुर्दिगम्बरः।
महाहिभूषो वृषवाहनो वरो विरूपनेत्रः खलु दिव्यदर्शनः।।११।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मा : कथं भवान् भूतभावनं पशुपतिं हसति। पश्य,

पुरारिः प्रियः सत्त्वभस्मानुलेपस्तृतीयाक्षिविज्ञानयुक्तः कपाली ।
सुधासूतिगङ्गाधरः शूलहस्तः सुविज्ञानगोवाहनो नीलकण्ठः।।१२।।

शिवः : (सस्मितम्) भो नारायण! सुराश्च! इदानीं प्रस्थातव्यं न वेति वरयात्राधिकारो ब्रह्महस्तेऽवलम्बितः।

विष्णुः : कथं न। अनेनैव तु दुर्घटमपि सुघट्यते।

ब्रह्मा : नैव नैव, अयं विष्णुः सर्वपालनक्षमो वरयात्रास्वामी।

विष्णुः : अये सुराः! सुवेषा वयमेकतश्चलेम, शिवाद्भुतसेना चैकतः। अन्यथा परपुरे अवश्यमेवास्माकमुपहासो भविष्यति। (इति सर्वे हसन्ति)

ब्रह्मा : भो नारायण! अलमुपहासेन।

विष्णुः : अयि ब्रह्मन् चतुर्मुख! तत्र वरयात्रायां कः समधीः। गोत्रोच्चारे च का वंशावली। (इति सर्वे परिहसन्ति)

ब्रह्मा : सर्वं भविष्यति। इदानीं प्रस्थातव्यम्।

शिवः : (सस्मितं पश्यति)

विष्णुः : तर्हि प्रस्थातव्यम्। (इति सर्वे परिक्रामन्ति)

(मार्गे भूताः पिशाचाश्च लीलां कुर्वन्ति हसन्ति च परिक्रम्य स्थित्वा)

ब्रह्मा : इयमस्ति गिरिराजपुरी! पश्य—

सिक्ता राजपथा सुगन्धपयसा माल्यैः पताकादिभि-
र्व्याप्ता रक्षिभिरत्र राजभवनं दिव्यं ध्वजैः शोभितम्।
माङ्गल्यं परिदृश्यते नगपतेः सर्वत्र पुर्यां महत्
सम्पत्तिसकला जनेषु विपुलो हर्षो विवाहोत्सवात्।।१३।।

विष्णुः : ब्रह्मन्! कथं नैतद् भवेत्!

यस्यालये वसति सर्वधनाधिदेवी
लक्ष्मीः समस्तजगतामचला भवानी ।
तस्याचलेन्द्रदुहिताविभवो न कस्मात्
सर्वातिशायिमहिमा वसुधाधरस्य।।१४।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मा : तर्हि इहैव वयमावासं कल्पयेम। यावद् आगच्छन्ति हिमगिरिराजदूताः।

विष्णुः : (सस्मितम्) भो भो देवाः! पश्यत पश्यत—

भयातुराः शीघ्रतरं द्रवन्ति प्राणैः सहैते पुरवासिनो हि ।
बाल्यः स्त्रियो नाम निरीक्षितुं न क्षमाः समाजं सकलं वरस्य।।१५।।

ब्रह्मा : अपि गिरिराजः सपरिकर आगच्छन्नेव भवेत्।

विष्णुः : (सहासम्) भोः भोः वरयात्रिणः! प्रेतपिशाचा निवर्तध्वम्।

युष्मान् प्रेतपिशाचभूतबहुलान् वीभत्सरौद्रप्रियान्
दृष्ट्वा कृष्णमुखान् भयातुरजनाः स्थातुं न शक्ताः क्षणम्।
आगच्छेयुरथापि केचिदपि ये प्राणान् धरेयुर्यदि
ह्यातिथ्याय च सत्क्रियार्थमिह कः पीतामृतो वर्तते।।१६।।

(इति सर्वे हसन्ति)

(ततः प्रविशति हिमालयराजः सपरिकरः सोपहारः, वरयात्रिणो विलोक्य स्वगतम्)

अये! एते वरयात्रिणो विरूपास्तादृश एव वरः। न जाने महादेवी मेना वरं विलोक्य कां दशां भजिष्यति। अथवा भगवतः शङ्करस्य विभूतिरेषा। न चिन्तनीया। तद् गत्वा सम्मानयामः। (प्रकाशम्) भो! भो! देवाः! पितामहादयः! स्वागतम्, स्वागतम्। इमानि पाद्यानि अर्घ्याणि चेमानि।

अयि भोः परिचारकाः! परिदीयन्तामिमानि।

(परिचारकाः भीता अर्घ्यपात्राणि संस्थाप्य द्रवन्ति)

हिमाचलः : न भेतव्यम्, न भेतव्यम्।

(परिचारकाः पृष्ठे मुखानि कृत्वा ददति)

ब्रह्मा : कृतमातिथ्यमिदानीं द्वारपूजा भवतु।

हिमाचलः : एवमेतत् (इति शिवपूजनं करोति)।

वरश्च प्रेषणीयो विवाहाय। मा भूत् कालस्य पर्ययः। भो परिचारकाः! भवन्तो वरयात्रिणः सेवायां संलग्ना भवन्तु।

ब्रह्मा : शुभमिदं वैवाहिकं लग्नं नक्षत्रञ्च तद् वरयात्रिणो जनावासं गच्छन्तु, वयञ्च वैवाहिकं कृत्यं निष्पादयामः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्णुः : यथाशीघ्रमेते व्रजन्तु भोजनादिक्रियां कुर्वन्तु।

(इति ब्रह्माणं विष्णुं नारदमिन्द्रञ्च विहाय सर्वे निष्क्रान्ताः)

हिमाचलः: देव! वरं नयतु राजभवनप्राङ्गणे।

ब्रह्मा : तथेति (इति सर्वे परिक्रामन्ति)।

(ततः प्रविशति ससखी मेना धृतपूजनसामग्रीहस्ता)

हिमाचलः: देवि! वत्साया वरः परीक्ष्यताम्।

मेना : (शिवं विलोक्य भीता किञ्चिदपसृत्य विष्णुमुखी भूत्वा)

किम् अयं वरः?

विष्णुः : **कथं वरोऽहं जगदम्बिकाया पूज्या च मे मङ्गलदेवता सा।**

वरस्तु योग्यो भगवान् महेशः परात्परं ब्रह्म गुणान्वितश्च।।१७।।

देवि! अयं वरः पूज्यश्च।

ब्रह्मा : देवि!

परो वृषारूढमहेश्वरोऽयं कपालमालाधर आत्मरूपः।

विभूतिमान् सर्वगुणप्रपन्नः वरोऽस्ति नित्यं तव पुत्रिकायाः ।।१८।।

मेना : (सभयं कम्पमाना) आर्यपुत्र!

परित्रायस्व, परित्रायस्व, नाहमेनं द्रष्टुं शक्नोमि।

हिमाचलः : प्रिये! आश्वस्यताम्। अयं साक्षात् शिवो महेशः प्राप्तोऽनुग्रहाय।

मेना : एतदर्थं कोमलया वत्सया परितप्तम्। अहो वृथा गतं तपः सर्वम्।

हिमाचलः : देवि! अयं परमात्मा उपस्थित इत्यवेहि।

मेना : आर्यपुत्र! निवर्तय सादरमेनम्। नाहं कमलमार्दवां वत्सां कपालिना सङ्गमयिष्यामि।

अहो! सुताया मम कोमलाया वज्रेण भाग्यं लिखितं विधात्रा।

यदेष कापालधरो विरूपो वरः कृतस्तेन जडेन नूनम् ।।१९।।

विष्णुः : भो ब्रह्मन्! श्रुत्वा प्रसन्नो भव महादेवी-मेनाभाषितं गालिवाक्यम्।

ब्रह्मा : भवतु, मङ्गलमिदम्। (सस्मितम्) देवि!

सुता न ते प्राकृतराजपुत्री जाता पराम्बा जगदीश्वरी सा।

अयं कपाली वृषभाधिरूढो महेश्वरस्तत् पतिरस्ति नित्यः।।२०।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नारदः : देवि! मान्यथा मंस्था। एतत्तु पूर्वमेव उमायाः पाणिरेखादर्शने भाषितमासीत्। तत् किमिदानीं विशङ्कसे?

मेना : गुरो! देवर्षे!

वृथा प्रतप्तं नियतं मतं यत् श्रुतञ्च धर्मो मम पुत्रिकायाः।
नाहं करिष्यामि सुताप्रदानं निवर्ततामस्य वरस्य यात्रा।।२१।।

निवर्ततामेष वरः स्वदेशम्

विष्णुः : (सोपहासं ब्रह्माणं प्रति)

विधे! विधिस्ते नितरामसत्यो विभाति राज्ञ्या वचनेन तत्किम्।
गच्छेम शीघ्रं यत आगता नु हरस्य पाणौ न विवाहरेखा।।२२।।

हिमाचलः: देवि प्रिये! किमिदं भाषसे? ननु उपस्थिता देवेशाः।

इन्द्रः : (स्वगतम्) अपि राज्ञ्या हठेन मम सङ्घटितोपायो वृथा न भवेत्। (प्रकाशम्) देवि! न भ्रमः कार्यः। साक्षाच्छिव एव तव पुत्रिकावरः प्राप्तः।

नारदः : देवि! किं भगवन्तं शिवं त्रिलोकाधिनाथं न जानासि?

पश्य तावत् पुनः स्वेन चक्षुषा भगवतोऽद्भुतं रूपम्।

मेना : दृष्टमस्य रूपं किं पुनर्दर्शनेन।

ब्रह्मा : देवि! निरीक्षस्व तावत् प्रियं रूपं शङ्करस्य।

मेना : (विलोक्य साश्चर्यम् स्वगतम्)

अनन्तशोभाकर ईदृशो वरो न कोऽपि देवेष्वपि दृश्यतेऽधुना।
समस्तसामर्थ्यविभूतिरूपवान् शिवः सहोमः प्रभया विभूषितः।।२३।।

(इति विलोक्य क्षणं ध्यानस्था भवति)

हिमाचलः: देवि! अयं साक्षाज्जगदीश्वर इत्यवेहि।

ब्रह्मा : पुत्रि! सौभाग्यं तव।

नारदः : देवि! एतत् पूर्वमेव मया भाषितं मान्यथा कार्षीः।

हिमाचलः: देवि! परीक्षस्व वरम्।

मेना : एवमेतत्, आर्यपुत्रो यथा वदति।

(इति सप्रसन्ना वरं परीक्षते)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मा : पुत्रि मेने! वत्स गिरिराज! शीघ्रमेव पाणिप्रदानं भवतु। मुहूर्तं त्वरयति माम्।

हिमाचलः : यथा वदति भवान्। (मेनां प्रति) देवि! शीघ्रमेव वत्सां कृतालङ्कारां विवाहमण्डपं प्रवेशय।

मेना : यथाज्ञायपति आर्यपुत्रः (इति निष्क्रान्तौ)

विष्णुः : भो ब्रह्मन्! कथञ्चिद् आश्वासिता वयम्।

ब्रह्मा : भो! विष्णो! त्वया उक्तं शिवपाणौ न विवाहरेखेति, इदानीं व्यर्थं ते वचनम्। सत्यश्च मम विधिः।

(इति सर्वे हसन्ति)

(ततः प्रविशति सख्या सह उमा)

सखी : अयि राजकुमारि! फलितस्ते मनोरथः। लब्धञ्च महातपसां फलम्।

उमा : सखि! सत्यं ते वचनं स्यात्।

सखी : अयि भीरु! किमद्यापि सन्देहः।

तपोऽनुरागं तव वीक्ष्य सादरं शिवो हि साक्षात्परिणेतुमागतः।
सविष्णुवेधाः स्वयमद्य निर्जरैः सहैव सौभाग्यमिदं सदा भवेत्।।२४।।

उमा : दैवं निर्विघ्नं प्रार्थये।

सखी : साक्षात् शिवे प्राप्ते को विघ्नो नाम।

उमा : सखि! भगवन्तं शिवं विरूपं विलोक्य अम्बा नान्यथा मन्येत।

सखी : न हि न हि ब्रह्मादिदेवैराश्वासिता स्वयञ्च शिवं प्रियदर्शनं कृत्वा इदानीं मोदमाना तव पाणिग्रहमनुमन्यते।

उमा : तर्हि प्रियं मे। भगवतोऽनुग्रहो भविष्यति।

सखी : कोऽनुग्रहस्तस्य? त्वमेव रूपेण गुणेन शीलस्वभावेन च सर्वानुग्राहिका।

उमा : मैवं वक्तव्यम्, परमेश्वरो ममाश्रयः।

सखी : (निरूप्य) सखि शोभसे इदानीम्।

तुलां न कञ्चिन्नवरूपयौवनं गुणप्रकर्षं सुविभूषितं वपुः।
दधाति दिव्यं च ददाति कामपि कलांशमात्रां सुरसुन्दरीतनौ।।२५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उमा : अयि! प्रियवादिनी असि।

सखी : का मे प्रियवादिता? यथार्थमुच्यते,

अपूर्वया दिव्यवपुश्श्रिया तव विभूषणान्येव विभूषितानि हि।
शिवः सुधन्यो यदनन्यसङ्गमात् सुरद्रुमः कल्पलतासुशोभितः।।२६।।

अङ्काद् विनिर्गत्य गुरोस्तु बाल्यात् कृतानुरागा नवयौवनेन।
पदेन त्वं सुन्दरि! सुन्दरीणां कृतालया शङ्करमानसेऽसि।।१७।।

उमा : (सलज्जम्) अयि! व्यर्थप्रशंसनेनालम्।

सखी : पश्य! इमे ब्रह्मादयो देवाः। अत्र,

अयं महेशस्तव रूपयौवनपुराणभोक्ता हृदयेश्वरो वरः।
यदङ्गभूषा यदनङ्गनोदिनी भविष्यसि त्वं कमलेव चक्रिणः।।२८।।

उमा : सखि! वचनरचनाचतुरासि।

सखी : तत् सखि! नयनानन्दकरं शिवरूपं पश्य।

सुधारश्मिश्चन्द्रः शिरसि जटिले भात्यनुपमं
विषं कण्ठे ब्रूते जगदवनशीलं परकृपाम्।
त्रिशूलं हस्ते यद्विगमयति शूलानि भजतां
तृतीयं यन्नेत्रं तदिह पवितं ज्ञानममलम्।।२९।।

उमा : (शिवं विलोक्य) (स्वगतम्) अहो! अपूर्वं रूपं स्वामिनः।

सखी : सखि! किं प्रियं पश्यन्त्या तव सक्तैव दृष्टिः? पश्य, पश्य,

शिवः साक्षादात्मेन्द्रियमुखगवि बिम्बित इव
जटा गङ्गा चन्द्रो गरलमहिभूती सममिदम्।
स्वनिष्ठं मायाया विलसितमहो रूपमधुरम्
अनादिस्त्वं देवी भवतु तव सङ्गः शिवमयः।।३०।।

उमा : अयि विज्ञानवादिनि! पण्डिता प्रतिभासि।

सखी : सखि! उपसर्तव्यं विवाहमण्डपे। (इत्युभे परिक्रामतः)

सखी : (उपसृत्य) महाराज! एषा राजकुमारी प्रापिता।

हिमाचलः : देव! ब्रह्मन्! एषा वत्सा कृताऽलङ्कारा प्राप्ता, तत् को विलम्बः?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मा : प्रवर्ततां पाणिग्रहणसंस्कारः।

हिमाचलः : (जलादिकं गृहीत्वा) देव! महेश्वर! प्रतीक्षतां तावत् पाणिमुमायाः। गृह्यताञ्चेमां मया प्रदत्ताम्। त्रिर्वदामि।

(इति मन्त्रपूर्वकं कन्यायाः पाणिग्रहं कारयति। शिवो गृह्णति। नेपथ्ये विजयध्वनिः)

नेपथ्ये : **पाणिग्रहस्त्रिजगतां परमेश्वरेण**
देव्याः सुमङ्गलकरोऽस्तु गिरीशपुत्र्याः ।
देवा भवन्तु सफला निहतारिवंशाः
पापानि यान्तु नितरां प्रशमं समेषाम्।।३१।।

ब्रह्मा : सञ्जातः पाणिग्रह इदानीम्, अनादिसिद्धदेवस्येश्वरस्य सर्वनाम-रूपगोत्रस्य सर्वनामरूपगोत्रया सह महादेव्या अनादिरूपया सह विवाहः प्रवर्तताम्।

नारदः : एष अग्निः सुप्रज्वालितः (इति अग्निं प्रज्वालयति)।

(ब्रह्मा शिवपार्वत्योः प्रदक्षिणां कारयति)

ब्रह्मा : भगवन्! सिन्दूरदानं कुरु।

शिवः : तथा (इति सिन्दूरदानं करोति)।

ब्रह्मा : जातो विधिः, जगन्मङ्गलकरः परिणयः शिवपार्वत्योः।

परिणयो गिरिजाशिवयोः सदा जगति पूर्वमभूदुदयङ्करः।
तदनु सर्वजनेषु भवेन्मुदा शिवकरः सुखसन्ततिदायकः।।३२।।

विष्णुः : **तज्जगन्मङ्गलं जातमद्य प्रभोः शङ्करस्योमयाभूद् विवाहोत्सवः ।**
पापतापापहो देवहर्षोद्गमस्तारकादेर्मनश्शूलकारी शिवः।।
भक्तवृन्दप्लवो भाववारांनिधेः कीर्तनीयस्तनूभृत् समूहैः शुभः।
सर्वलोके विवाहप्रसङ्गे सदा श्रावणीयः सुगानीय एवं मुदा।।३३।।

इन्द्रः : **चिरात् प्रविष्टं हृदये मदीये रिपोरवध्यत्वमहाश्मकष्टम् ।**
जाते शिवस्याचलराजपुत्र्याः समुद्धृतं तत् सुखदे विवाहे।।३४।।

नारदः : **तृप्तोऽस्मि देवं गिरिराजपुत्रीसनाथितं मोदकरं विलोक्य ।**
अद्यास्ति जन्तोः सफलं ममैतत् संसारजन्मैतदनुग्रहेण ।।३५।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवः : भवतां प्रीत्यै मयैतद् अनुष्ठितम्, तद् भवतां मनोरथः शुभः पूर्णो भूयात्।

(पार्वतीं विलोक्य) देवि!

सुखं समाधौ न तथावलब्धं यथाधिगत्याद्य गिरीशपुत्रीम् ।
सुदुश्चरं नाम तपो हि तप्तं क्षमस्व मां देवि! विलम्बनाय।।३६।।

उमा : (साश्रु) स्वामिन्! मैवं वक्तव्यम्।

जगत्सु सर्वेषु शिवेतरेषु समस्तसम्पत्स्वपि लोभनीषु।
न जातु यातान्मम चित्तमेतद् अखण्डभावं भजताद् भवन्तम्।।३७।।

अनुगृहाण मां देव, पुनर्मोहो न संविशेत्, अनन्यसक्तभावाहं, कृपया भक्तवत्सल!

शिवः : **तथास्तु देवी गिरिराजपुत्री त्वं मे मनोवृत्तिरिवासि सिद्धा ।**
आलम्ब्य त्वां भक्तजनस्य सर्वम् इष्टं प्रकुर्वे सततं सुखं स्यात्।।३८।।

अस्तु, सर्वलोकसुखं शिवमस्तु।

ब्रह्मा : देवराज! सिद्धस्ते मनोरथः किमन्यत् प्रियमुपहरामि।

इन्द्रः : किमन्यत् प्रियं मे स्यात्? इदं भरतवाक्यमस्तु—

धनधान्यसमृद्धिसंयुता वसुधा सर्वफला भवेत् सदा ।
सुखमङ्गलदिव्यसम्पदा श्रुतिगोब्राह्मणबोधमण्डिता।।३९।।
भूयात् सुखं सर्वजगत्सु नित्यं शिवस्य भक्तिर्जनमानसेषु ।
जयः सुराणां श्रुतिपालकानां पराजयो देवरिपोः समन्तात्।।४०।।
श्रेयः सदा भवतु सर्वजनस्य सर्वं काव्यस्य कर्तुरपि मङ्गलनाटकस्य।
श्रोतुर्गिरीन्द्रतनयाचरितस्य नित्यं पादारविन्दरतिरस्तु महेश्वरस्य।।४१।।
तथास्तु सर्वं गिरिजाप्रसादाद् जगन्महामङ्गलमीश्वरस्य ।
कृपेक्षणेनात्र समस्तशत्रोः पराजयो वाग्विजयः कवीनाम्।।४१।।

(इति निष्क्रान्ताः सर्वे)

।। इति सप्तमोऽङ्कः।।

।। पूर्णमिदं श्रीपारसनाथद्विवेदिविरचितं पार्वतीमङ्गलं नाटकम् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचना-प्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञ-विचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्ग्लग्रन्थानां समालोचनाः प्रकाश्यन्ते। तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये।

७. **''वित्त अधिकारी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)'' इति सङ्केतेन ('बैङ्कड्राफ्ट' अथवा 'पोस्टल-आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम्।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **''सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२** (उ.प्र.)'' इति सङ्केतेन विधेयः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रजिस्टर्ड न्यूजपेपर्स एक्ट के अन्तर्गत

विज्ञप्ति

१. प्रकाशन का नाम	सारस्वती सुषमा
२. प्रकाशन की तिथि	त्रैमासिक
३. प्रकाशक का नाम	**डॉ. हरिश्चन्द्र मणि त्रिपाठी**
राष्ट्रियता	भारतीय
पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी - २२१००२
४. सम्पादक का नाम	**डॉ. राजाराम शुक्ल** **डॉ. हरिश्चन्द्र मणि त्रिपाठी**
राष्ट्रियता	भारतीय
पता	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी - २२१००२
५. मुद्रक का नाम	**श्री अनूप कुमार नागर**
राष्ट्रियता	भारतीय
पता	श्रीजी-कम्प्यूटर प्रिण्टर्स, जे. १२/५ नाटी इमली, वाराणसी
६. स्वामित्व	सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी - २२१००२

मैं राजाराम शुक्ल घोषित करता हूँ कि उल्लिखित विज्ञप्ति मेरी जानकारी के अनुसार बिलकुल ठीक है।

हस्ताक्षर

राजाराम शुक्ल

निदेशक, अनुसन्धान-संस्थान

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय

वाराणसी - २२१००२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri